[391] We follow here the manuscripts Ī and Ja; according to Ṛ manuscript the sentence would be: "However there is a difference for the main altar; the rule for this altar will be given now."

# पटलार्थसंग्रहः

चतुःपञ्चाशे पटले कामकोष्ठविधिर्निरूप्यते । कामकोष्ठं स्वतन्त्रं केवलं चेति द्विविधम् । स्वतन्त्रं परिवारादिभिर्युतं वीरमित्यप्युच्यते । परिवारहीनं केवलमुच्यते । आलयस्य द्वितीयतृतीयचतुर्थपञ्चमावरणेष्वन्यतमे नदीतीरे तटाके पर्वताग्रे उद्याने सभास्थाने वा स्वतन्त्रं गौर्यालयं कल्पयेत् । मण्डपस्येशदेशे तदुत्तरे वा केवलकामकोष्ठं परिकल्पयेत् । अत्र पटले स्वतन्त्रकामकोष्ठस्य निर्माणविधानादिकं वक्ष्यते । (१-६पू०)

श्रीभोगं पुत्रकोष्ठं चित्रं श्रीभद्रं श्रीकान्तं पुत्रकान्तं गोमुखं सुन्दरं कौसलं श्रीनिवासं विजयं पद्मकान्तकं कोष्ठसुन्दरधामं सुभद्रं सुमङ्गलं पार्वतीकान्तकं चेति स्वतन्त्रगौर्यालयं षोडशविधम् । (६उ०-८)

मूलप्रासादमध्ये चतुर्दिक्षु चतुःसूत्रं चतुःकोणेभ्यः चतुःकर्णसूत्रं च कृत्वा एतेषामष्टसूत्राणां पार्श्वे उमाकोष्ठं कल्पयेत् । तत्सूत्राद्देवीकोष्ठस्य मध्यसूत्रविस्तारः शिवभागमित्युच्यते । लिङ्गविस्तार-मानस्य त्रिचतुःपञ्चषट्सप्तभागः शिवभागः स्यात् । अन्यप्रकारेण स्वस्तिके लिङ्गे लिङ्गतारार्धं शिवाधिक्ये त्रिपादकं वर्धमाने सार्धैकं समखण्डके त्रिगुणम् अन्यलिङ्गेषु लिङ्गनाहसमं शिवभागः स्यात् । (९-१४पू०)

गौरीकोष्ठसूत्रं शिवभागसमं भवेत् । तद्भागान्तर्गतं चेत् कर्तृनाशकरं शिवभागस्य बाह्ये चेत् सम्पत्करं च भवेत् । तस्मात् सर्वप्रयत्नेन शिवभागावसाने कोष्ठसूत्रं कल्पयेत् । सूत्रमेवं विनिश्चित्य प्राक्सूत्रस्य दक्षिणेऽथवा सौम्ये श्रीभोगम् अग्निदिक्सूत्रपार्श्वे पुत्रकोष्ठं दक्षिणे सूत्रपार्श्वे चित्रकान्तं नैर्ऋते श्रीभद्रविमानं वारुणे सुन्दरं वायव्ये पुत्रकान्तं कौबेरे गोमुखं विमानम् ईशदिक्कोणे श्रीकान्तं विमानं च परिकल्पयेत् । (१४उ०-२१पू०)

ऐन्द्राग्नेययोर्मध्ये कौसलं आग्नेयदक्षिणयोर्मध्ये श्रीनिवासं दक्षिणनैर्ऋत्योर्मध्ये विजयावहं वरुणनैर्ऋत्योर्मध्ये पद्मकान्तकं विमानं वरुणानिलयोर्मध्ये कोष्ठसुन्दरं कुबेरवाय्वोर्मध्ये सुभद्रकं कुबेरेशानयोर्मध्ये सुमङ्गलं शक्रेशानयोर्मध्ये पार्वतीकान्तं विमानं च प्रकल्पयेत् । दिक्षु विदिक्षु च

श्रीभोगाद्यष्टकम् अन्तरालेषु कौसलाद्यष्टकं विमानं च कल्पयेत् । अन्योन्यसंकरे राक्षसास्पदम् भवेत् । अतः सर्वप्रयत्नेन वर्गे वर्गे च संकरं न कुर्यात् । (२१उ०-२७)

मूलालयसमं त्रिपादमर्धं वा गर्भार्धे तत्समं वा गौर्यालयविशालकं भवेत् । अथवा पञ्चभूमिके प्रासादे त्रिचतुःकरमारभ्य नवदशकरं विस्तारः स्यात् । द्विभूमिके प्रासादे पञ्चषट्करमारभ्य एकादश-द्वादशकरपर्यन्तं त्रिभूमिके सप्ताष्टकरमारभ्य षोडशपञ्चदशकरपर्यन्तं चतुर्भूमिके प्रासादे तु नवदशकरमारभ्य अष्टादशकरपर्यन्तं विस्तारो भवेत् । पञ्चदशषोडशभूमिके प्रासादे एकादश-द्वादशकरादि त्रयस्त्रिंशच्चतुस्त्रिंशत्करपर्यन्तं विस्तारः स्यात् ।(२८-३३)

विस्ताराष्टांशाधिक्यं ब्रह्मगर्भे विस्तारसार्धाधिक्यं विष्णुगर्भे विस्तारादर्धमाधिक्यं रुद्रगर्भमिति च ज्ञायते । शान्तिकादिविमानेषु तारं सप्तपञ्चांशं षड्चतुर्थांशं तारादष्टाधिकमिति क्रमेण भवेत् । (३४-३६)

कामकोष्ठस्य तारमायामं च मूलकोष्ठसमे भवेताम् । मुखमण्डपं तदर्धं पादं त्रिपादं वा स्यात् । अन्तरालस्य वेशनं सार्धदण्डं द्विदण्डं तथा अन्तरालविशालकं तत्संख्याहस्तमानं च स्याताम् । मण्डपमधिष्ठानादिवर्गाढ्यं सावकाशं वा भित्तिगण्डयुतं वा तोरणाद्यैर्विचित्रितं भवेत् । (३७-४०)

मण्डपमानम् अष्टसप्तषट्पञ्चभ्योऽन्यतमेन वर्धयित्वा द्वादशेन ह्रासयित्वा आयं लभेत । व्ययलाभाय अष्टसप्तषण्णामन्यतमेन वर्धयित्वा दशभिर्ह्रासयेत् ।योनिलाभाय त्रिपञ्चसप्तनवानामन्यतमेन वर्धनं अष्टभिर्ह्रासं च कुर्यात् । ऋक्षलाभार्थं नवाष्टसप्तषण्णामन्यतमेन वर्धयित्वा सप्तविंशभिर्ह्रासयेत् । दशनवसप्तषण्णामन्यतमेन वर्धयित्वा सप्तभिर्ह्रासेन वारलाभो भवेत् । चतुःपञ्चषडष्टानामन्यतमेन वर्धयित्वा नवसंख्यया ह्रासेन अंशको लभ्यते । आयाधिक्येन धनाधिक्यं व्ययाधिक्याद्धनक्षयश्च भवेत् । (४१-४४)

ध्वजोक्षसिंहहस्तियोनयः शुभदाः श्वानकाकखरधूमयोनयस्त्वशुभावहाः । कर्तुर्जन्मनक्षत्रं वास्तुनक्षत्रं च त्रिजन्मयुगलं चतुरष्टषण्णवभिःह्रासयित्वा लभ्यमानं शुभावहं दिनम् अन्यानि

चाशुभदानि । बुधशुक्रेन्दुगुरुवाराः शुभदाः । तस्करभुक्तिशक्तयधननृपत्यक्लीबनभीतिनिधनप्रेष्यानि नवांशानि । एषु अधनतस्करषण्डानि वर्ज्यानि । (४५-४९पू०)

पुष्यर्क्षादिसप्तकेन शुभवारादिभिर्युक्तं सप्त योगाः भवन्ति – रिक्ताख्यं मरणं नाशं मृतं सौख्यं प्रसिद्धिदं प्रीति च इत्येते । शनिवारे उत्तरादित्रीणि नक्षत्राणि भानुवारे विशाखा सोमवारे शतभिषक् शशिवारे श्रविष्ठा बुधवारे श्रवणं गुरुवारे अभिजित् नक्षत्राणि जन्मर्क्षाणि भवन्ति । एवं सम्यक् परीक्ष्य शुभमानानि ग्राह्यानि । (४९उ०-५२)

मानसूत्रं विन्यासससूत्रं धरासूत्रमुपपीठकं प्रकृतिर्होमसूत्रमित्येते सूत्रभेदाः । आयादिशुभसंयुक्तं मानसूत्रं भवेत् । षडङ्गुलमारभ्य त्रित्र्यङ्गुलवर्धनेन नवमानं यावत् विन्याससूत्रमुच्यते । नवाङ्गुलमारभ्य एकैकाङ्गुलवर्धनेन अष्टाविंशत्यङ्गुलं यावत् भूसूत्रं स्यात् । षडङ्गुलमारभ्य अङ्गुलाङ्गुलवर्धनात् पञ्चविंशत्यङ्गुलं यावत् उपपीठसूत्रमुच्यते । तत्सूत्रात् प्रकृतेः नीप्रं त्रिचतुःपञ्चमात्रकं होमसूत्रसहितमिति चतुःसूत्रमुक्तम् । एवं मानसूत्रं विन्याससूत्रमधिष्ठानसूत्रं प्रकृतिः होमसूत्रमिति पञ्चसूत्राण्युक्तानि ।(५३-६०पू०)

विस्तारमष्टधा विभज्य षडंशं गर्भगेहं भवेत् । षडंशे चतुर्भागः चतुरंशे द्विभागः पञ्चभागे त्रिभागः सप्तांशे पञ्चभागः नवांशे सप्तभागो वा गर्भगृहस्य विशालं भवेत्। शेषांशे भित्तिविस्तारः परितः कल्प्यते । त्रिभागं विस्तारमायामं त्रिभागं च स्यात् । अथवा त्र्यंशविस्तारे पञ्चपङ्क्त्यायतं पञ्चपङ्क्ति-विशाले सप्तपङ्क्त्यायतं चतुर्भागविस्तारे षड्भागमायतं षडंशविस्तारेऽष्टांशायतं वा भवेत् ।अथवा कामकोष्ठस्य विस्तारं षोढा विभज्य एकांशं कूटविस्तारं तदायाममेकांशं कोष्ठदैर्घ्यं द्व्यंशं शेषं हारान्तरं च कुर्यात् ।कोष्ठायामे कूटांशं त्यक्त्वा शेषं चतुर्धा विभज्य द्विभागं कोष्ठदीर्घस्य शेषं द्विभागं हारान्तरस्य च कुर्यात् । (६०उ०-६८पू०)

पादबन्धं प्रतिबन्धमिति द्विविधम् । एकैकमष्टधा विभक्तम् । तत्र पादबन्धाष्टकम् – पादबन्धम् अब्जकान्तं श्रेणिबन्धं पुष्पपुष्कलं श्रीकान्तम् अम्भोजसुन्दरं सुन्दराब्जं भद्रबन्धं चेति । प्रतिबन्धं श्रीबन्धं स्कन्दकान्तं कुम्भकान्तं सर्वतोभद्रं मकरासनं शम्भुबन्धं चन्द्रबन्धनं चेत्येतत् प्रतिबन्धाष्टकम् ।

(६८उ०-७४पू०)

पादबन्धभेदानां लक्षणानि तथा प्रतिबन्धानां च पादबन्धाष्टकप्रतिबन्धाष्टकयोः विद्यमानानां भेदाः अष्टकद्वयस्थप्रत्येकबन्धस्य मानानि लक्षणानि च किंचिद्विशदतया ७४उ०-११३पू० पर्यन्तं स्पष्टीक्रियन्ते । अंशमर्धं त्रिभागं वा न्यूनाधिक्यं शोभाबलसमन्वितं योजनेन न दोषः। दिक्षु विदिक्षु पादबन्धमधिष्ठानमन्तराले तु प्रतिबन्धाधिष्ठानं च कुर्यात् । अन्योन्यसंकरेण कर्तुर्मरणं सम्भवेदतः संकरं प्रयत्नेन वर्जयेत् । परं तु पञ्चप्राकारबाह्ये संकरो न दोषावहः । कुम्भसमायुक्तं वृत्तं प्रतिबन्धमसूरकं कुमुदोपेतमष्टांशं प्रतिबन्धमिति च उच्यते। वर्गेण संकरे न दोषः विपरीते तु अशुभं भवेत् । कूटकोष्ठादिमानसंकरः शुभदः । जगतीं नीप्रमानां प्रकल्पयेत् । कम्पनीप्रं चतुर्भागैकं तदर्धं वा कल्प्यते । वाजनीप्रकमुत्सेधसमं तद्विगुणं वा स्यात् । महावाजनिर्गमं तत्त्रिपादसममर्धं वा भवेत् ।(११३उ०-१२१पू०)

एकहस्तमारभ्य त्रित्र्यङ्गुलवर्धनेन सप्तमानावसानं यावत् नालस्य निर्गमो भवेत् । तदायामं त्रिधा विभज्य एकांशं मूलविस्तरं तच्चतुर्थांशमग्रतारं च कल्पयेत् । एवं नालस्य विस्तारः सिंहवक्त्राश्वकन्धराकाराद्यलंकाराश्च १२१उ०-१२७पू० पर्यन्तं प्रतिपाद्यन्ते । स्तम्भमानं १२७उ०-१३०पू० पर्यन्तं स्तम्भानां विविधरूपाणि च १३०उ०-१३७पू० पर्यन्तं संयक् प्रतिपाद्यन्ते । स्तम्भानां पादाधारं स्तम्भभूषणादीनि च १३७उ०-१४७पू० पर्यन्तं विशदीक्रिर्यन्ते । मञ्चलक्षणं १४७उ०-१४९ पर्यन्तं वेदिकालक्षणं गललक्षणं च १५०-१५२ पर्यन्तं च प्रतिपाद्यन्ते । प्रस्तरादिशीर्षान्त-वर्गविस्तारः १५३-१५५ शीर्षलक्षणं १५६-१५८पू० स्थूपिकालक्षणं तन्मानं च १५८उ०-१६१पू० पर्यन्तं विशदीक्रियन्ते । नासिकालक्षणं द्वारमानं च १६१उ०-१६७ पर्यन्तमुच्येते। एकभूमि-प्रासादानां शान्तिकं पौष्टिकं जयदमद्भुतं सार्वकामिकं चेत्येतानां पञ्चगण्यकानां लक्षणं तन्मानानि च १६८-१७७ पर्यन्तं प्रतिपाद्यन्ते। एतेषां गण्यानां सामान्यलक्षणमानानि १७८-१८१पू० पर्यन्तम् उच्यन्ते। श्रीभोगादिविमानलक्षणेषु श्रीभोगं १८१ उ०-१८३, पुत्रकोष्ठं १८४-१८६, चित्रकान्तं १८७-१८८, श्रीभद्रं १८९-१९१, सुन्दरं १९२-१९३, पुत्रकान्तं १९४, गोमुखं १९५-१९६पू०, श्रीकान्तं १९६ उ०-१९८, पार्वतीकान्तं १९९-२००, सुमङ्गलं २०१-२०२पू०, सुभद्रं

२०२उ०-२०४, कोष्ठसुन्दरं २०५-२०७पू०, विजयावहं २०७उ०-२०९पू० ग्रन्थभागेषु च निरूप्यन्ते। श्रीभोगाद्यष्टकं विमानं दिक्षु पार्वतीकान्ताद्यष्टकमन्तराले च यथोक्तक्रमेण यथा वित्तानुसारं च स्थाप्यानि।

(२०९उ०-२११पू०)

कामकोष्ठस्थाप्यदेवतासु जम्भिनी पूर्वदिग्भागे स्तम्भिनी दक्षिणे मोहिनी पश्चिमे भेदिनी उत्तरे सिंहो वृषश्चाथवा वृषभः एव कोणे च स्थापनीयाः। प्रकारान्तरेण इन्द्राणीं पूर्वदेशे रौद्रीं दक्षिणदेशे वैष्णवीं वारुणे ब्राह्मीमुत्तरे च स्थापयेत्। (२११उ०-२१४)

देवीरूपमाने नागरमानं २१४उ०-२१६पू०, द्राविडमानं २१६उ०-२१७पू०, वेसरमानं २१७उ०-२१८, सामान्यमानं २१९-२२० ग्रन्थभागेषु प्रतिपाद्यन्ते। एवंलक्षणां देवीं संगृह्य प्रतिष्ठादिनात् पूर्वं नवमसप्तमपञ्चमतृतीयदिवसेष्वेकतमे सद्यो वाङ्कुरार्पणं विदध्यात्। प्रतिष्ठादिनस्य पूर्वदिने बालदेवीं समभ्यर्च्य शिल्पिकर्मानन्तरं प्रासादस्य पूर्वदिग्भागे मण्डपे शालिधान्योपरि वस्त्रमास्तीर्य तदुपरि देवीप्रतिमाम् ऊर्ध्ववक्त्रां प्राक्शिरस्कां च शाययित्वा गौरीगायत्र्याऽर्चयेत्। तन्मूलमन्त्रेण वस्त्रेणाच्छाद्य तद्दक्षिणे स्नपनं प्रकल्प्य मण्डपरक्षार्थं पूर्वादिदिक्षु यथाक्रमं कुम्भमध्ये लोकपालास्त्राणि सम्पूजयेत्। (२२१-२२६)

हैमे राजते ताम्रे कांस्ये वा पात्रे चन्दनेन द्वादशाङ्गुलविस्तारमेकाङ्गुलोन्नतं चतुरश्रं तन्मध्ये पद्मं च विलिख्य तत्कर्णिकामध्ये माणिक्यं पूर्वे मरकतमाग्नेये प्रवालं याम्ये इन्द्रनीलं नैर्ऋते पुष्यरागं वारुणे वज्रं वायुदेशे गोमेदं सौम्यदेशे मौक्तिकमैशान्यां वैडूर्यं वामदेवसमन्वितं न्यस्य वामाद्यैः शक्तिबीजैर्गन्धपुष्पादिभिरभ्यर्च्य शुद्धवस्त्रेणाच्छाद्य त्रिपाद्युपरि विन्यसेत्। (२२७-२३२पू०)

देशिकः देवीबिम्बस्य शिरसि हेमसूचिकया लिखित्वा नेत्रमन्त्रमनुस्मरन् भ्रूरेखां प्रथमतो विलिख्य मधुसर्पिःपयःशुद्धवारिहिमतोयैः क्रमेण देवीमूलमन्त्रेण संतर्प्य गन्धपुष्पैरर्चयेत्। ततो दर्पणमुत्पलं कर्पूरशकलं क्षीरं दधिकुम्भं घृतकुम्भं बृहतीफलानि च क्रमेण दर्शयेत्। अनन्तरमञ्जनं कन्दुकं वस्त्रं केशशोधनं कुङ्कुमं कृष्णगन्धं शालि पुष्पं तण्डुलं तिलमुद्गसमूहं च क्रमेण दर्शयेत्।

प्रच्छन्नपटमावर्ज्य सवत्सां गां ब्रह्मकन्याः ब्राह्मणान् प्राणिनश्च गौरीबीजमनुस्मरन् दर्शयेत् । (२३२उ०-२३९)

ततो देवीं संस्नाप्यालंकृत्य ग्रामप्रदक्षिणं कृत्वा नदीतीरे प्रपामध्ये विन्यसेत् । जलाधिवासनार्थं पुण्याहं वाचयित्वा स्नपनं च कारयित्वा जलक्रीडां च विधाय जलमध्ये गङ्गादिनदीरभ्यर्च्याघमर्षणं मन्त्रं जप्त्वा जलमध्ये देवीं शाययेत् । सूर्यास्तमनात् पूर्वं देवीबिम्बं जलाद्गृहीत्वा जलतीरे प्रपामध्ये विन्यस्य स्नपनार्हकैः स्नापयेत् । सर्वालंकारसंयुतां देवीं समादायालयं प्रविश्य यागमण्डपस्योत्तरे विन्यस्य भस्मबिल्वदलादिभिः शुद्धतोयेन च गौरी-गायत्रीमन्त्रमनुस्मरन् संस्नाप्य देवीं चित्रवस्त्रैः गन्धपुष्प-स्रगादिभिश्चालंकुर्यात् । (२४०-२४७पू०)

तत आचार्यो मण्डपे वास्तुहोमं पर्यग्निकरणं च कृत्वा स्नात्वा मण्डपं पूजयित्वा सम्मृज्य दर्भाग्रैर्वेदिकां प्रोक्षयेत् । अष्टद्रोणशालिभिः स्थण्डिलं कृत्वा तदर्धैस्तण्डुलैः तदर्धैस्तिलैस्तदर्धैर्लाज-पुष्पैश्च सम्भूष्य मध्ये पद्मं विलिख्य हृदयेन प्रोक्ष्य सिंहासनं च पूजयेत् । गौरीं मण्डपे वायुगोचरे विन्यस्याभ्यर्च्य तदग्रे रक्षासूक्तं जपेत् । मन्त्रोच्चारैः शङ्खघोषैश्च सह प्रतिसरं बद्ध्वा विप्राशीर्वचनैः सह धूपदीपादिकं दद्यात् । (२४७उ०-२५२)

ततो बालगृहं गत्वा यात्राहोमं विधाय कुम्भे करके वा महेश्वरीं समावाह्य बालबिम्बं नद्यां कूपे वाप्यां वा त्यजेत् । करकस्थां देवीं सम्पूज्य शिरसा वाहयित्वा सर्वालंकारसहितं सकलवाद्यघोषैः सह मुखमण्डपं प्रविश्य इन्द्रईशानदिशोर्मध्ये वेदिकोर्ध्वे विन्यसेत् । अष्टकरकान् सवस्त्रान् कूर्चपल्लव- हेमसंयुक्तानादाय अष्टदिक्षु स्थापयेत् । कर्णिकामध्येऽण्डजाद्यैश्चित्रवस्त्रेण वाऽधोमुखं शयनं कल्पयित्वा गौरीं शयने शाययित्वा गौरीबीजेन गन्धपुष्पैरर्चयेत् । (२५३-२५९पू०)

ततः अग्निकार्ये समिधं हृदयमन्त्रेण घृतं शिरसा चरुं शिखया लाजं कवचेन च प्रत्येकं हुत्वा गौरीमिमायमन्त्रेण दशवारं शतं तदर्धं तदर्धं वा प्रतिद्रव्यं च हुत्वा व्याहृतिहोमानन्तरमुमां च स्पृशेत् । ततो वर्धनीं संस्पृश्याहुतिसंख्यया च जप्त्वा शतं मन्त्रेण प्रायश्चित्ताहुतिं च जुहुयात् ।

रात्रौ देशिको जागरणं कृत्वा प्रभाते स्नानानन्तरं सौरादिकलशान् पूजयित्वा होममाचरेत् । गर्भगेहं गत्वा स्थलशुद्धिं कुर्यात् ।
(२५९उ०-२६५पू०)

द्वारतारं त्रिधा विभज्य मध्येऽष्टांशभाजिते एकांशं त्रिधा कृत्वा षोडशांशं दक्षिणे न्यस्य एकांशं वामभागे न्यस्य सूत्रं प्रसारयेत् । तत् शक्तिसूत्रं भवेत् शतैश्च मध्यं प्रकल्पयेत् । शक्तिसूत्रं मध्ये स्थापयित्वा गर्भेऽष्टाष्टांशे दैविके भागे गौरीपीठं दृढं स्थापयेत् । पीठं प्रक्षाल्यास्त्रेण पञ्चगव्यैरभिषिच्य पिण्डिकामस्त्रेण गन्धपुष्पादिनाऽभ्यर्च्य प्रणवमनुस्मरन् वस्त्रेणाच्छादयेत् ।
(२६५उ०-२६९)

ततो यागगृहेऽस्त्रेण शतं हुत्वा पादं प्रक्षाल्याचम्य सोष्णीषं सोत्तरीयकं परिचारकमाह्वयेत् । यजमानबन्धुवर्गदैवज्ञादिसहितं स्वस्तिसूक्तवाद्यघोषादिभिश्च समन्वितं गब्लिके शिबिके खेटके रथे वा देवीमारोप्य नानावाद्यघोषैः वितानछत्रधूपदीपैश्च सह ग्रामं समन्ततः प्रदक्षिणीकृत्य द्वारदेशे पुष्पाक्षतैः सम्पूजयेत्। गर्भगेहं प्रविश्य पुण्याहं वाचयित्वा गर्तं च सम्पूज्य पूर्वोक्तमार्गेण रत्नानि च तत्र स्थापयित्वा मूलमूर्तेर्मन्त्रेण महादेवीं स्थापयेत् । अष्टबन्धनं दृढीकृत्य शक्तिसूत्रं च निरीक्षेत । गन्धतैल- सुगन्धामलकपञ्चगव्यपञ्चामृतनालिकेरोदकैश्च देवीं संस्नाप्य नववस्त्रेण च वेष्टयेत् ।
(२७०-२७८पू०)

देशिको ब्रह्मवर्धनीं प्रणवेन गन्धपुष्पादिभिः समर्च्य पूर्णाहुतिं हुत्वा ब्रह्मवर्धनीं संगृह्य शङ्खध्वनिवेदघोषादिभिश्च सहितं छत्रचामरैः सर्वातोद्यैश्च परिवृतं धामप्रदक्षिणं कृत्वा द्वारपूजां च विधाय देवीबिम्बाग्रे त्रिपाद्युपरि ब्रह्मवर्धनीं स्थापयेत् । देवीं गन्धाद्यैः पूजयित्वा मन्त्रन्यासमारभेत । शशिनीं मूर्ध्नि अङ्गदां वक्त्रे इष्टदां हृदये मरीचीं गुह्यदेशे मालिनीं पादांशे च न्यस्य गौरीबीजेन सहितं षडङ्गं च विन्यस्य मातृकान्यासं गौरीकलान्यासं शक्तिन्यासं च क्रमेण कृत्वा वर्णं पदं भुवनं तत्त्वं तत्त्वेशीसहितं सबीजं कलामन्त्रं च ललाटे विन्यसेत् ।
(२७८उ०-२८५पू०)

ततो जीवन्यासं कृत्वा वर्धनीतो देवीबीजमादाय देव्या हृदयमध्ये न्यसेत्। वर्धनीतोयेन देवीं संस्नाप्य तापसापं च निवेद्य वेदकुम्भपुरःसरं सकलकलशोदकैश्च स्नापयित्वा शुद्धोदकेनान्ते च संस्नापयेत् । स्थलशुद्धिं विधाय मन्त्रोदकेन स्नापयित्वा मन्त्रान्नं च निवेदयेत् । ततो देवीं वस्त्रपुष्पस्त्रगादिभिरलंकृत्य षड्रसोपेतं नैवेद्यं च दद्यात् । (२८५उ०-२८९पू०)

ततः पानीयाचमनं देव्यै दत्वा कुण्डे स्थण्डिले चुल्लिमध्ये वा तूष्णीमग्निं संस्थाप्य इन्धनैर्दीपयेत् । प्रणवेन संप्रोक्ष्याग्नौ देवीमावाह्य पूजयित्वा निरीक्षणाद्यैः शोधयित्वा पुष्पाग्रैः पत्रैर्वा घृतान्नं जुहुयात् । चरुणा घृतेन च प्रत्येकं षोडश हुत्वा गौरीगायत्र्या पूर्णाहुतिं हुत्वा तेन मन्त्रेण देवीं सम्पूज्य अग्निं च विसृज्य मूले देव्यनुज्ञया सह तां प्रणम्य पूजयेत् । (२८९उ०-२९४पू०)

द्वारादिवाहनान्तं पीठान्तं वा बलिं दद्यात् । द्वारदक्षिणपार्श्वे ज्ञानशक्तिं तद्वामपार्श्वे क्रियाशक्तिं तदग्रे वृषभम् अग्निदिग्भागे श्रीदेवीं दक्षिणे मातङ्गिनीसहितसप्तमातृकाः नैर्ऋते जाह्नवीं पश्चिमे धरादेवीं वायव्ये मोहिनीम् उत्तरे शचीदेवीमैशान्यां सावित्रीं गोपुरद्वारपार्श्वे शङ्खपद्मनिधी च समर्चयेत् । पूर्वेऽणिमासिद्धिम् अग्निगोचरे महिमासिद्धिं दक्षिणे गरिमादेवीं नैर्ऋते लघिमादेवीं पश्चिमे ईशिकादेवीं वायुगोचरे वशित्वं सोमे प्राप्तिदेवीम् ईशगोचरे प्राकाम्यं नैर्ऋतेऽरुन्धतीं लघिमादेव्याः दक्षिणे ईशदेशे प्राकाम्यममृतेश्वरीं च पूजयित्वा सोमशंकरयोर्मध्ये सुन्दरीं चार्चयेत् ।(२९४उ०-३०१)

महापीठाग्रे कमलास्त्रमर्चयित्वा अन्धिनीजृम्भिनीरौद्रीशान्तिनीन्द्रविकारिणी स्तम्भिनीत्येताभ्यः षड् जीवनायिकाभ्यः शक्तिभ्यः क्रमेण कर्णिकामध्ये पूर्वदिग्दले दक्षिणे वारुणदिग्दले सोमे ईशाने च बलिं दद्यात् । द्वारादिबलिपीठान्तं बलिबेरसहितं सर्वातोद्यसमन्वितं च यथाक्रमं बलिं दद्यात् । (३०२-३०५)

गुरुः पादं प्रक्षाल्यालयं प्रविश्य गीतवाद्यजयशब्दादिभिः सह धामप्रदक्षिणं कृत्वा देवीं मण्डपे विन्यस्य लोकशान्त्यर्थं नीराजनं कुर्यात् । ततो गौरीमभ्यर्च्य धूपदीपादिकं दत्वा तां तोषयित्वा च प्रणिपत्य क्षमां प्रार्थयेत्। रात्रौ पूजावसाने निर्माल्यधारिणीं चार्चयेत् । एवं प्रतिदिनं

यथावित्तानुसारं देवीमर्चयन् नरः पुण्यां गतिमाप्नुयात् । (३०६-३०९१/२) इति कामकोष्ठ-विधिपटलार्थसङ्ग्रहः।

पञ्चपञ्चाशे पटले कल्याणविधिर्निरूप्यते । प्रतिष्ठादिनात् चतुर्थपञ्चमसप्तमनवमदशम-दिनेष्वेकतमे शुभदिने कल्याणोत्सवं कारयेत् । उद्दिष्टदिनात् पूर्वस्मिन् दिनेऽङ्कुरार्पणं विदध्यात् । तद्दिनस्य पूर्वाह्णे जलक्रीडां कारयित्वा मध्याह्ने पूर्वकर्म निर्वर्त्य रात्रौ कल्याणोत्सवमाचरेत् । सायाह्ने कौतुकबन्धनं पूर्वोक्तमार्गेण कुर्यात् । (१-५)

नवकुम्भमस्त्रमन्त्रेण क्षालयित्वा तन्तुभिर्वेष्टयित्वा हृदयमन्त्रेण भस्मभिरापूर्य वस्त्रेणाच्छाद्य विश्वेत्तातेति मन्त्रेण बद्ध्वा लाक्षामष्टमृदं वापि ग्रन्थिमध्ये विन्यसेत् । वृषभगायत्रीमन्त्रेण वृषभलाञ्छनं दत्वा तन्मूलेन गन्धपुष्पैश्च पूजयेत् । पृथगेकस्मिन् पात्रे ताम्बूलं नालिकेरं क्रमुकफलं कदलीफलं कल्हारदाम कुङ्कुमचन्दनं कर्पूरं हिमतोयं चित्रवस्त्रं भूषणं क्षौमं शार्दूलचर्म चामरं छत्रं दर्पणं कन्दुकं कृष्णपुष्पं केशशोधनमञ्जनं च यजमानेच्छया विन्यस्य अस्त्रेण सम्प्रोक्ष्य प्रणवेनाभिमन्त्रयेत् । सर्वद्रव्यसर्वालंकारयुतं वेदघोषसहितं सर्वभक्तजनैर्यजमानेन च परिवृतं गीतवाद्यसमोपेतं सोष्णीषसोत्तरीययुतेन परिचारकेन भस्मकुम्भं समादाय प्रणवेनार्चयेत् । शिव-मन्त्रेणास्त्रमन्त्रेण च वृषभलाञ्छनं त्यक्त्वा देव्या ललाटे हृदि गले च प्रणवमन्त्रेण भस्म लेपयेत् । (६-१५)

गौरीबीजेन संतर्प्य सर्वद्रव्याणि करे दद्यात्। ततो गुरुर्देवीं परया भक्त्या प्रणम्य तदग्रे तिष्ठन् सर्वशृङ्गारवेषाढ्यां सुविकीर्णालकान्वितां धूम्रवर्णां महाभोगां चित्रिणीं पूजयित्वा "हे अम्बिके ! गौरि ! कारुण्याकरचन्द्रिके ! जगदार्तिविनाशार्थं त्वं शिवस्य पत्नी भविष्यसि" इति विज्ञाप्य देवीं प्रणमेत् ।
(१६-१८पू०)

धाम्न ईशानदिग्भागेऽतिसुन्दरां प्रपां निर्माय गोमयेनालिप्य पिष्टचूर्णैर्विचित्र्य तन्मध्ये सितरक्तेन स्वस्तिकं विलिख्य पुण्याहं वाचयित्वा दध्यन्नकदलीफलरक्तपुष्पैर्विशेषेण बलिं दद्यात् ।

ततः शिवालये परमेश्वरं पूजयित्वा कुम्भे देवेशं शिवहस्तसमन्वितं संगृह्य चित्रवस्त्रैः पुष्पैराभरणैश्चालंकृत्य गजे गल्लिके शिबिके वाधिरोपयेत् । चक्रवर्त्युपचारैश्च स्नपनं कुर्यात् ।(१८उ०-२४पू०)

ततो देवीगृहं गत्वा मण्डपे स्थण्डिलं कृत्वा तत्र सिंहासनं कल्पयित्वा वस्त्रमास्तीर्य तदुपरि विभुं स्थापयेत् । तदग्रे सितैर्निर्दोषैः सिकतैः स्थण्डिलं कृत्वाऽग्निकार्योक्तमार्गेण शिवाग्निं परिकल्प्य समिदाज्यान्नलाजमाषशालियवतिलसर्षपनारिकेलैः फलैश्च सद्यादिनेत्रपर्यन्तं प्रत्येकं षोडश हुत्वाऽन्ते सर्वद्रव्यैः पूर्णाहुतिमाचरेत् । (२४उ०-२८पू०)

चतुर्दशहस्तायामं तच्चतुर्थांशविस्तारं नानाचित्रसमन्वितं क्षौममथवा कार्पासं वस्त्रं मन्त्रवस्त्रमित्युच्यते । षोडशगुञ्जमारभ्य द्विद्विगुञ्जवर्धनेन द्वात्रिंशद्गुञ्जं यावत् माङ्गल्यस्य काञ्चनं गृहीत्वा गणेशाकृतिं पद्माकृतिं शिवलिङ्गाकृतिं वा माङ्गल्यं परिकल्प्य बिन्दुपञ्चकयुतं पार्श्वे सुषिरयुतं हेमसूत्रद्वयोपेतं गौरीकण्ठानुकूलं गन्धसंयुतं च तत् कारयेत् । आचार्यः भूषणमन्त्रवस्त्रखङ्गदामानि गृहीत्वा शङ्खध्वनिगीत- वाद्यादिभिः सह देवालयं प्रविश्य गन्धपुष्पाद्यैरभ्यर्च्य मन्त्रवस्त्रेण वेष्टयेत् । गौरीबीजेन माङ्गल्यसूत्रं बद्धा करके आवाह्यार्चयित्वा कुम्भेशवामे सर्वालङ्कारसंयुतां देवेशीं स्थापयित्वा पार्वतीपरमेश्वरौ
गन्धपुष्पैरर्चयेत् । (२८उ०-३७पू०)

शिवद्विजकुलोत्पन्नः शिवशास्त्रज्ञः कृतदीक्षाभिषेकः पुत्रभ्रातृकलत्रवान् शुक्लचन्दन-शुक्लमाल्यैरलंकृतः पञ्चाङ्गभूषणोपेतः उष्णीषोत्तरीयादियुतः विष्णुमन्त्रं भक्त्या जप्त्वा हेमवर्धनीं गृह्णीयात् । शिवाग्रे द्रोणमितश्वेततण्डुलैः स्थण्डिलं कल्पयित्वा तन्मध्ये नलिनं विलिख्य त्रिपादीं विन्यस्य तदुपरि स्थलिकां न्यसेत्। गुरुः पूर्वमुदङ्मुखः शिवहस्तसमोपेतः कुम्भेशस्य पृष्ठे तिष्ठन् विष्णुमन्त्रं समुच्चार्य देवीहस्तं समादाय गौरीसंयुतस्य श्रीकण्ठशिवस्य हस्ते समर्पयेत् । "अनादिगोत्रसम्भूत ! लोकनाथ ! जगत्पते! आदिगोत्रसम्भूतामुमादेवीं गृहाण लोकशान्तये" इत्युक्त्वा गुरुः सोदकं गौरीहस्तं शिवहस्ते दद्यात् । देव्या दक्षहस्तं शिवस्य दक्षहस्ते तत्तन्मन्त्रेण विन्यस्य धूपदीपादिकं दद्यात् । ततोग्निं यष्ट्वा मधुदुग्धाज्यकदलीसितखण्डैः सम्बन्धाहुतिं हुत्वा

हृन्मन्त्रेण मधुपर्कं च दद्यात् । ततः पाद्याचमनधूपदीपादिकं च दत्वा शिवहस्तेन वर्धनीं संस्पृश्य हृदा पूजयेत् । शङ्खघोषसहितं बीजमुख्यं च जपेत् । (३७उ०-४८पू०)

पादुकाराधनार्थं पुण्याहं वाचयित्वा अग्नेरुत्तरपार्श्वे भूतलं गोमयेनालिप्य स्थण्डिलं कल्पयित्वा तदुपरि दारुपीठं स्थापयित्वा चित्रवस्त्रैरलंकृत्य तस्योपरि चन्दनादिभिर्विलेपितमश्म निदध्यात् । धर्मासनमर्चयित्वाऽस्त्रवारिणा प्रोक्ष्य गौर्या दक्षपादाम्बुजं शिवहस्तेन गृहीत्वाऽश्मोपर्यारोप्याष्टाङ्गेन च पूजयेत् । शिवहस्तेन गौरीहस्तं गृहीत्वा देवीपादुके शिष्येण ग्राहयित्वा वह्निं प्रदक्षिणीकृत्य तत्स्थाने पादुके न्यसेत् । देवदेवेशीं धूपदीपादिभिः सम्पूज्य देशिकोऽन्येन पट्टबन्धयुतेन देशिकेन साङ्गुलीयकरेण लाजं ग्राहयित्वा दम्पत्योरुभयहस्तेन शिवमन्त्रेण जुहुयात् । (४८उ०-५५पू०)

ततो गौरीपादुकामश्मनि पूर्ववदारोपयित्वा पूर्वोक्तविधानेन कुम्भवर्धनीं पूजयेत् । एवं त्रिवारं हुत्वा व्याहृतिं शतं तदर्धं तदर्धं वा मूलमन्त्रेण हुत्वा पूर्णाहुतिं च विधाय शिवाग्निं विसृजेत् । भस्म विसृज्य नैवेद्याद्युपचारैः सन्तोष्य कुम्भवर्धनीं संगृह्य ब्रह्मघोषशङ्खवाद्यादिभिः सह रम्यं शय्यागृहं प्रविश्य शयने स्थापयेत् । द्विसन्धिकेऽग्निमाहूय सायं प्रातर्हुत्वा समिदाज्यचरुभिः प्रत्येकं पञ्चविंशतिर्हुत्वा द्रव्यं प्रति व्याहृतिहोमं चाचरेत् । (५५उ०-६१पू०)

पञ्चमेऽहनि प्रातःसन्ध्यावसाने चूर्णोत्सवं ततो जलक्रीडां च समाचरेत् । तदवसाने तीर्थं संगृह्य सर्वालंकारयुतं छत्रचामरयुतं च ग्रामप्रदक्षिणं कृत्वा स्नपनमण्डपं प्रविशेत् । देवस्य देव्याश्च स्नपनं कारयित्वा पूर्वोक्तमार्गेण शिवाग्निं कल्पयित्वाऽघोरेण शतं हुत्वा पूर्णाहुतिमाचरेत् । अग्निं विसृज्य तं कुम्भे संयोज्य गर्भगेहं प्रविश्य लिङ्गशुद्धिं विधाय स्नपनोदकैः संस्नाप्य देवेशीं च विधानतः संस्नापयेत् । ततो नित्यपूजां कृत्वा रात्रौ पूजावसाने भोगाङ्गं च सम्पूजयेत् । उमास्कन्दादिदेवानां कुम्भहीनं पूजयेत् । एवं कुर्वाणो मर्त्यः पुण्यां गतिमाप्नुयात् ।(६१उ०-६८१/२)

इति कल्याणविधिपटलार्थसङ्ग्रहः।

षट्पञ्चाशे पटले गौरीसंकोचविधिरुच्यते। आयुरारोग्यजयदः पुत्रपौत्रसमृद्धिदश्चायं विधिः। आद्यो द्वितीय इति तरुणालयो द्विविधः। कर्षणाद्यर्चनान्तम् आद्ये तरुणालये क्रियते । प्रासादे पतिते भिन्ने लिङ्गे च चलिते द्वितीयतरुणालयः क्रियते । सर्वाण्यन्यकर्माणि उभयोस्तरुणालययोः समानान्येव । मूलस्थानं विनिश्चित्य तरुणालयं कारयेत् । बालालये प्रतिष्ठादिकं कृत्वा ततो मूलालयं प्रविशेत् । (१-४)

प्रासादाग्रे दक्षिणे वोत्तरे वा मण्डपं कारयेत् । विंशद्धस्तविस्तारं षड्विंशद्गात्रसंयुक्तं च मण्डपम् उत्तमं द्वादशहस्तं मध्यमं दशहस्तं तु कन्यसं भवेत् । षोडशस्तम्भयुतं मण्डपं मध्यममधमं च स्यात् । मण्डपस्य दिक्षु विदिक्षु च अनावृतं स्यात् । मण्डपं चतुर्द्वारसमायुक्तं चतुस्तोरणयुतं वितानध्वज-दर्भमालादिभिश्चालंकृतं पुष्पमालाभिः फलैरष्टमङ्गलैश्च भूषितं कुर्यात्। स्तम्भांश्च वस्त्रैर्वेष्टयेत् । मण्डपं त्रिधा विभज्य मध्यभागे वेदिकां रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभां च निर्माय तन्मूले तत्परितश्च चतुरङ्गुलोत्सेधामष्टाङ्गुलनीव्रामुपवेदीं च कल्पयेत् । वेदीं परितः कुण्डानि निर्माय नवाग्निं पञ्चाग्निम् एकाग्निं वा कुर्यात्। सर्वाणि कुण्डानि योन्याकाराणि स्युः । योनौ योनिं न कारयेत् । क्षेत्रस्य पञ्चैकभागं विधाय पुरस्ताद्बहिश्च श्रोत्रार्धांशोच्चमानेन करणे पिप्पलपत्राकृतिर्भवेत् । ततो योनिकुण्डं यथोक्तलक्षणं कुर्यात्। (५-१४)

शिल्पिनमुद्वास्य मण्डपं गोमयेनोपलिप्य पुण्याहं वाचयित्वा ब्राह्मणांश्च भोजयित्वा तानुद्वास्य पुनः पुण्याहं वाचयेत्। समर्यकपदे वास्तुहोमं विधाय पुनश्च पुण्याहं वाचयित्वा पर्यग्निकरणं कृत्वाऽऽचार्यो विधिना स्नात्वा शुक्लचन्दनादिलिप्तः शुक्लवस्त्रोष्णीषशुक्लमाल्यैश्चालंकृतः अङ्कुराण्यर्पयित्वा स्थानशुद्धिं च विदध्यात् । (१५-१८)

उत्तराभिमुखः सकलीकरणं कृत्वा गर्भगेहं प्रविश्य स्थानशुद्धिं विधाय गौरीबिम्बं रजन्युदकैः शुद्धतोयैः पञ्चगव्येन च स्नाप्य बिल्वपत्रैश्च घर्षयेत्। दर्भमूलाद्गृहीतमृदा वल्मीकमृदा वा गौरीं लेपयित्वा गन्धोदकैश्च स्नाप्य हृदयमन्त्रेण पूजयेत् । चन्दनागरुकोष्ठ-कुंकुमोशीरकेसरत्वगेलापत्रकर्पूरैरालोड्य गौरीं लेपयेत् । पिण्डिकाब्जं च समालिप्य शक्तिबीजेन

प्रोक्षयेत् । गौरीवामहस्ते हेमसूत्रकौतुकं शिरोमन्त्रेण बद्ध्वाऽष्टपुष्पैरभ्यर्च्य गौरीपीठं सामन्यपुष्पैः पूरयित्वा नववस्त्रेण वेष्टयेत् । (१९-२५पू०)

बालगृहे गन्धादिभिः पूजयित्वा निर्दोषैः सिकतैः स्थण्डिलं कल्पयित्वा अग्न्याधानादिकं सर्वमग्निग्कार्योक्तवद्विधाय सद्यमन्त्रेण समिधः ईशानेन घृतम् अघोरेण चरुं च प्रत्येकं पञ्चविंशतिर्हुत्वा प्रासादबीजमुख्यैः व्योमव्यापिदशाक्षरैः शक्त्याद्यैर्वामाद्यैश्च प्रत्येकं षोडशाहुतीर्हुत्वा गौरीबीजमनुस्मरन् स्पृष्ट्वा च जुहुयात् । (२५उ०-२९)

अग्रे शालिभिर्विमलैः स्थण्डिलं कल्पयित्वा सापिधानं ससूत्रं हेमपल्लवनालिकेर-फलादियुक्तं लम्बकूर्चयुतं च कुम्भं करकं वा स्थण्डिलोपरि विन्यस्य गौरीमावाह्य पूजयेत्। वाममन्त्रेण स्थापनमुद्रामघोरेणावकुण्ठनं शक्तिमन्त्रेण सान्निध्यं च प्रदर्श्य पञ्चमेन च पूजयेत्। शक्तिमुकुलिकापद्मनमस्काराख्यमुद्राश्च प्रदर्श्य दिक्ष्वस्त्रं च योजयेत्। सूत्रादियुतानष्टघटानभितो इन्द्रादीशान्तं विन्यस्य तत्र वामादिशक्तीस्तत्तद्बीजमनुस्मरन्नावाह्य समर्चयेत्। गौरीमन्त्रेण गन्धपुष्पादिभिः पूजयित्वा नैवेद्यधूपदीपताम्बूलादीनि दत्वा जयादिरभ्याधानं राष्ट्रभृतश्च क्रमाद्धुत्वा पूर्णाहुतिं च हुत्वा शिरसा घटमुद्धरेत् अस्त्रेण बिम्बं छित्वा तटाके निक्षिपेत्। (३०-३७१/२) इति गौरीसंकोचविधिपटलार्थसङ्ग्रहः ।

सप्तपञ्चाशे पटले गौरीबालस्थापनं वक्ष्यते । तत्फलमायुरारोग्यजयाः पुत्रपौत्रावाप्तिश्च । बालालय आद्यो द्वितीय इति द्विविधः । मूलालयस्य पूर्वस्तरुणालय आद्य इत्युच्यते ।अनादरात् प्रमादाद्वा भिन्नश्छिन्नोऽनवीकृतो वा द्वितीयतरुणालयः । सर्वाण्यन्यानि कार्याणि उभयोः समानान्येव। मूलस्थानं निश्चित्य तदनन्तरमेव बालस्थापनं कार्यम् । बालबिम्बप्रतिष्ठानन्तरं मूलबिम्बं नार्चयेत् । यतो बालस्थानं विना प्रतिष्ठाकरणे पुत्रपौत्रविनाशः सम्भवेत् अतः सर्वप्रयत्नेन बालस्थापनं कुर्यात् । (१-६पू०)

देवालयस्याग्रे उत्तरे दक्षिणे ईशाने वा तरुणालयं कारयित्वा नवाहे सप्ताहे पञ्चाहे त्र्यहे वाऽङ्कुरार्पणमाचरेत्। शैलजेन लोहजेन दारुजेन मृण्मयेन वा बालबिम्बं शमीबिल्व-

मधूकाश्वत्थोदुम्बरेष्वन्यतमेन दारुणा बालशक्तिं च कारयेत् । द्वादशाङ्गुलमुत्सेधमधमाधमादारभ्य एकैकाङ्गुलवृद्ध्या नवशक्तिं कल्पयेत् । पीठं स्वयोनिर्वा इष्टकामयं वा स्यात्। आद्यस्तरुणालयः सप्त पञ्च त्रिहस्तो वा भवेत् । द्वितीयस्तरुणालयः आयतः चतुरश्रो पूर्वभवनवद्वा स्यात् । गौरीबिम्बं मूलगर्भार्धं तत्त्र्यंशं तच्चतुर्थांशं वा भवेत् । गौरीपीठान्तरे बालबिम्बं स्थापयेत् । बालशक्तिपीठं वृत्तं चतुरश्रं वा स्यात् । रत्नन्यासाभावे पादशैलं विना कुर्यात् । (६उ०-१५पू०)

बालालये पूर्वे दक्षिणे ऐशान्ये उत्तरे स्वेष्टदेशे वापि यागमण्डपं दश अष्ट नव सप्त अथवा त्रिहस्तं वा षोडशस्तम्भयुतं सर्वालंकारयुक्तं च परिकल्पयेत्। तन्मध्ये नवभागैकभागमितां हस्तमात्रसमुत्सेधां दर्पणोदरसन्निभां वेदिकां निर्माय गोमयेनालिप्य ब्रह्मणान् भोजयित्वा पुण्याहं वाचयित्वा प्रोक्षणं कृत्वा वास्तुहोमं च समाचरेत् । ततः पर्यग्निकरणं कृत्वा वस्त्रैः शालिभिश्च शयनं प्रकल्पयेत् । (१५उ०-२०पू०)

ततो बेरशुद्धिं धामप्रदक्षिणं च कृत्वा अक्षिमोचनानन्तरं रक्षासूत्रं बध्नीयात् । त्रिरात्रमेकरात्रं याममर्धयामं वा जलाधिवासनं कृत्वा बिम्बं वेदिकोपरि विन्यसेत् । वस्त्रेण संवेष्ट्य दर्भपुष्पसंयुतं पीठमध्ये विन्यस्य कण्ठमात्रं जले स्थापयेत् । निद्राकुम्भं च स्थापयित्वा पूजयेत् । वेद्युपरि वर्धनीं संस्थाप्य तत्परितो वामादिशक्तिकुम्भान् इन्द्रादीशानान्तकं विन्यस्य गौरी-बीजमनुस्मरन् गन्धपुष्पाद्यैरर्चयेत् । वस्त्रं हेमपट्टं कूर्चं नालिकेरं वा समर्प्य देव्यग्रे स्थण्डिलं कुर्यात् । (२०उ०-२७पू०)

वर्धनीं परिचारकः करे वहेत्। अग्रे स्थण्डिलं कल्पयित्वा व्योमव्यापिमन्त्रमुच्चरेत्। गौरीं विधिवत् सम्पूज्य पायसान्नं च निवेद्य कुम्भे आवाह्य गन्धपुष्पैरर्चयेत् । ततोऽग्निकार्योक्तवद्यात्राहोमं समिदाज्यचरुलाजसर्षपयवतिलैः गौरीबीजमनुस्मरन् कृत्वा स्पर्शाहुतिं च शतं जुहुयात् । उष्णीषोत्तरीयाद्यैरलंकृतो देशिकः कुम्भमुत्थाप्य वेद्यां स्थण्डिलोपरि विन्यस्य गौरीबीजं स्मरन् गन्धपुष्पस्रगादिभिः पूजयेत् । (२७उ०-३२पू०)

नवाग्नौ पञ्चाग्नौ एकाग्नौ सर्वयोनिके स्थण्डिले वाऽग्निकार्यमाचरेत् । खदिराश्वत्थबिल्व-पलाशवह्निसमिद्भिः आज्यान्नाभ्यां च पृथक् पृथक् हुत्वा गौरीगायत्रिमन्त्रेण घृतेन च जुहुयात् ।

प्रभाते पूर्वं शक्तेर्होमं कृत्वाऽऽचार्यं वस्त्रहेमाङ्गुलीयकैः पूजयित्वा दैवज्ञं भक्तांश्चापि पूजयेत् । परिचारकैर्गौरीबिम्बं शयनादुद्धृत्य तरुणालये पीठमध्ये तत्पदमध्ये संस्थाप्य कुम्भस्थां गौरीं गौरीमन्त्रेण विन्यसेत् । वामादिशक्तिकुम्भान् तत्तत्स्थानेऽभिषिञ्चेत् । मन्त्रपुष्पं समर्प्य मन्त्रान्नं निवेद्य धूपदीपादि च दत्वा प्रभूतहविषं निवेदयेत् । ततो होमं नित्योत्सवं भोगाङ्गयजनं च क्रमेण निर्वर्त्य सर्वसम्पत्करं महोत्सवं च देव्याः कारयेत् । प्रासादं पुनर्नवीकृत्य गौरीं मूलबिम्बे सम्यग्योजयित्वा सम्प्रोक्षणं च कृत्वा प्रायश्चित्तमाचरेत् । (३२उ०-४१) इति गौरीबालस्थापन-विधिपटलार्थसङ्ग्रहः ।

अष्टपञ्चाशे पटलेऽस्मिन् गौरीसम्प्रोक्षणविधिरुच्यते । यागमण्डपं पञ्चगव्येन प्रोक्ष्य प्रविश्य च अष्टद्रोणशालिभिः स्थण्डिलं कृत्वा तण्डुलतिललाजपुष्पदर्भैः परिस्तीर्य तन्मध्ये साष्टपत्रं सकर्णिकं नलिनं विलिख्य कुम्भं शिरसा वाहयित्वा प्रदक्षिणं कुर्यात् । सर्वातोद्यसमायुक्तं वेदघोषसमायुतं च उमासूक्तं जपन् शनैः प्रदक्षिणं कृत्वा मण्डपं प्रविश्य वेदिकोर्ध्वे कुम्भं विन्यस्य गौरीजेन पूजयित्वाऽभितो वामादिशक्तीनां कलशान् स्थापयित्वा तत्तन्मूर्त्याकृतिं ध्यायन् स्वस्वनाम-मन्त्रैस्तान् गन्धपुष्पादिभिरभ्यर्च्य नैवेद्यं च दद्यात् । (१-७पू०)

ऋग्वेदाद्यध्ययनं उमासूक्तश्रीसूक्तरुद्रसूक्तपुरुषसूक्तशान्तिसूक्तादिजपं च क्रमेण कुर्यात् । आचार्यो मूर्तिपैः सह अग्निकार्योक्तमार्गेण समिदाज्यचरुलाजसर्षपयवतिलैः सप्त होमद्रव्यैः पलाशोदुम्बराश्वत्थ- बिल्वखदिरैश्च होमं विदध्यात् । आज्यं सद्यमन्त्रेण चरुमघोरेण लाजं वामेन सर्षपं कवचेन यवं शिखया तिलमस्त्रेण च जुहुयात् । त्रिशतं तदर्धं तदर्धं वा प्रत्येकं हुत्वा द्रव्यान्ते व्याहृतिं च सर्वद्रव्ययुक्तं हव्यवाहेन च जुहुयात्। एवं रात्रौ जागरणं च कुर्यात् । (७उ० -१४)

प्रभाते स्नानादिनित्याह्निकं विधायाचार्यो मूर्तिपैः सार्धं पूर्णाहुतिं शिरोमन्त्रेण हुत्वाऽग्निं विसृज्य शक्तिकुम्भं शिरसा वाहयन् सर्ववाद्यसहितं सर्वालंकारसंयुतं च पुत्रभ्रातृकलत्रैर्हर्म्यप्रदक्षिणं कृत्वा गर्भगेहं प्रविशेत् । (१५-१७)

कलशं स्थण्डिलोपरि विन्यस्य दैवज्ञेन निवेदितसुमुहूर्ते गौर्या अष्टत्रिंशत्कलान्यासं कृत्वा कुम्भान्मन्त्रं समादाय गौरीमध्ये विन्यस्य शक्त्यादिशक्तिपर्यन्तं कुम्भादादाय पीठे च विन्यसेत् । गन्धपुष्प- स्रगादिभिरलंकृत्य नववस्त्रेण सम्वेष्ठ्य मन्त्रपुष्पं दत्वा मन्त्रान्नं च निवेद्य प्रभूतहविषं दत्वा ताम्बूलं च निवेदयेत्। चुलुकोदकसहितं मुखवासं दत्वा ऋगाद्यध्ययनैः स्तोत्रनृत्तवाद्यैश्च देवीं सन्तोषयेत् । सम्प्रोक्षणान्ते विशेषोत्सवं च संयक् कारयेत् । एवं कुर्वाणः पुण्यां गतिमाप्नुयात् । (१८-२२१/२) इति गौरीसम्प्रोक्षणविधिपटलार्थसङ्ग्रहः ।

एकोनषष्टितमे पटले गौरीव्रतं वक्ष्यते । तदकालमृत्युशमनं सर्वसौभाग्यदायकं सर्वशत्रुप्रशमनं सर्वैश्वर्यप्रदायकम् नित्यमभीष्टफलदं च । श्रावणे पूर्वपञ्चम्यां भाद्रपदे पूर्व- त्रयोदश्यामाश्विने पूर्वनवम्यां कार्त्तिके पूर्वसप्तम्यां मार्गशीर्षे पूर्णिमायां पौषे पूर्वचतुर्दश्यां माघेऽपरपञ्चम्यां फाल्गुनेऽपराष्टम्यां चैत्रे कृष्णदशम्यां वैशाखे कृष्णसप्तम्यां ज्येष्ठे पूर्वद्वितीयायामाषाढे शुक्लाष्टम्यां वा प्रतिमासं गौरीनक्षत्रे वा गौरीव्रतं विधिनाऽनुष्ठेयम् । पर्वताग्रे नदीतीरे पुष्पोद्याने गृहे देव्यालयाग्रे तत्पश्चाद्व गोष्ठे देवालये वा पञ्चदशकरायतमायामसमविस्तारं षट्त्रिंशद्गात्रसंयुतं चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितं वितानध्वजसंयुक्तं दर्भमालाभिरावृतं तरङ्गवेष्टनयुतं दर्पणैरुपशोभितं नानाश्चर्यगुणोपेतं च मण्डपं प्रपां कूटाकारं वा परिकल्पयेत् । (१-११पू०)

तन्मध्ये वा एकपार्श्वे वा शिखिपादसमाकारां दिशि भद्रसमन्वितां विस्तारार्धसमुत्सेधां दर्पणोदरसन्निभां मध्ये उन्नतां च वेदीं कल्पयित्वा तत्पार्श्वे उपवेदीं च परिकल्पयेत् । मध्ये गौरीं संस्थाप्य स्नपनैरभिषिच्य पुण्याहं वाचयित्वा कौतुकं च बध्नीयात्। नैवेद्यं दत्वा यात्राहोमं निर्वर्त्य धामप्रदक्षिणं कृत्वा मण्डपं प्रविशेत् । तत्र पाद्यादिकं दत्वा कारुण्यं हास्ययुक्तं वीरं रौद्रं श्रृङ्गारचरितं वा देवीपराक्रमं तत्सन्निधौ श्रावयित्वा पुनः धूपदीपादिना सम्पूजयेत्। वेदघोषैः विविधैः स्तोत्रैः नृत्तवाद्यगीतादिभिश्च देवीं सन्तोष्य पूर्वोक्तमार्गेण पानीयार्घ्यादिकं च दत्वाऽस्तमयवेलायां सायरक्षां कल्पयेत् । (११उ०-१९पू०)

ततः पञ्चविंशतिसंख्याकमारात्रिकं भस्म च दत्वा देवीबीजेन दर्पणं जयरवेण नीराजनं च दर्शयित्वा देव्यग्रे भरतोक्तं नृत्तं च कल्पयेत् । गौरीचिह्नं मञ्जूषे स्थापयित्वा चिह्ने सर्वदेवसमन्वितां देवीं सम्पूज्य सर्वान् दीक्षितान् आहूय तानालोक्य युष्माकं व्यसनव्याधिदुर्भिक्षऋणक्लेशादिशत्रवः सर्वे महादेव्याज्ञया सदा नश्यन्तु इत्युक्त्वा तान् विसृज्य कौतुकं च जले विसृजेत् । ततः साधकं पापभक्षणमन्त्रतो दार्वासने समारोप्य तदङ्गेऽक्षरकलां न्यसेत् । गौरीचिह्नं साधकस्य दद्यात् । गौरीमन्त्रं जपन् साधकः स्वशिरसि तद्वहेत् । (१९उ०-२६पू०)

चिह्नदर्शनमात्रेण सर्वपापं विनश्यति। संग्रामे मृगयानादिकालेषु च यो नरो गौरीचिह्नं शिरसा वहेत् तस्य देहे गौरी वसेत् इति सत्यम् । देवी सर्वदा सान्निध्यं कुरुते।सर्वेषां दक्षिणां दत्वाऽऽचार्यं च पूजयेत्।अनन्तरे पटले शिवव्रतं वक्ष्यते इति प्रतिज्ञातम् ।(२६उ०-२९) इति गौरीव्रतविधिपटलार्थसङ्ग्रहः ।

षष्टितमे पटले मत्स्यलीलाविधिरत्र वक्ष्यते । अनया लीलया प्राणिनां भोगः भूपतीनां सुखं च सिध्यति । मीनादिकन्यामासपर्यन्तं मत्स्यलीलायाः प्रशस्तः कालः। इयं लीला उत्तम-मध्यमाधमभेदेन त्रिधा प्रोक्ता । समुद्रमत्स्यलीला उत्तमा नदीलीला मध्यमा तटाकवाप्योरधमा च स्यात् । (१-४पू०)

अभिषेकार्थमुपयुज्यमानं बेरमुत्तमं पौराण्यायतनं बेरं मध्यमं सद्योनिष्कृतिबेरमधमं चोच्यते । शतक्रोशावधिं यावत् तदुत्तमं दर्शनं पञ्चाशत्क्रोशं मध्यमं द्वादशक्रोशावधिदर्शनम् अधममिति च गण्यते । इयं गणना कृतयुगे प्रोक्ता । अस्मिंस्तु युगे उक्तमानस्य चतुरंशविहीनं कृत्वा परिकल्पयेत् । मत्स्यलीला एकदिने क्रियमाणा अधमा त्रिदिने क्रियमाणा मध्यमा पञ्चदिने क्रियमाणा उत्तमा च मता । (४उ०-१०)

प्रकारान्तरेण मत्स्यलीला वासं यानमिति द्विधा प्रोक्ता । यानं चेद् आलये कार्यम् । आस्थानमण्डपं सम्यग् भूषयित्वा सुवारे सुदिने रात्रिपूजावसाने देवदेवं जगन्नाथं प्रार्थ्य अनुगृहीतोऽस्मीति विज्ञाप्य स्वर्णादिसूत्रेण पूर्वोक्तवद्रक्षाबन्धनं कुर्यात् । अपरेद्युर्दिवाकाले

आस्थान-मण्डपे प्रातःसन्ध्यवसाने सूरिबृन्दसेवायुक्तं परमेश्वरं राजोपचारैस्तोषयेत् । मध्याह्ने पूजावसाने पताकादिसर्वालंकारसंयुतं सकलवाद्यैः सहितं च यानं समुद्दिष्टमत्स्यस्थानं पूर्ववन्नयेत् । तत्काले राजा देशिकैः सह नागवल्लीदलं कर्पूररजनीचूर्णादिमिश्रितं विकिरेत् । सर्ववर्णजनैः सहितं तत्स्थानं प्रविश्य उत्तरे पश्चिमे दक्षिणे पूर्वे वा प्रपां कृत्वा वितानाद्यैरलंकृत्य देवं मध्ये विन्यस्य तस्याग्रे मत्स्यपूजां कुर्यात् । (११-२०)

ओदनानि विन्यस्य ओदनस्येति मन्त्रेण पूजयेत्। तण्डुलतिललाजैर्मत्स्यं सम्यगर्चयेत्। मलिम्नाय महामत्स्यो दीपरूपो महोदरः इत्येवं मन्त्रमुच्चरन् मत्स्यानां भोजनं दत्वा सायाह्नात् पूर्वमेवमाचरेत्। तदन्ते गायकस्य लीलागानसहितं विनोदवाद्यसहितं च पूर्वस्थानं प्रविश्य महेश्वरस्य स्नपनं शान्तिहोमं च कुर्यात्। तदन्ते सायरक्षां पूर्ववदर्चनं च कृत्वा नित्यपूजां विशेषपूजां च कुर्यात्। ततः स्नपनं कृत्वा रक्षाबन्धं च विसृजेत्। आलयस्य समीपं चेदेवं कुर्यात्। (२१-२६)

यानमत्स्यलीला एवमुक्ता । वासभेदमत्स्यलीलायां तु रात्रौ पूजावसाने कर्ता देशिकसहितः महेशाग्रे कर्तव्यं प्रार्थ्य एकमूर्तिस्वरूपं पञ्चधा परिकल्प्य "अम्बिकासहितो देवो जगदुत्पत्तिकारणम् । लोकरक्षार्थं मत्स्यलीलां समुद्दिश्य भगवदाज्ञया गम्यताम्" इति विज्ञापयेत् । पूर्वं प्रतिसरं बद्ध्वा प्रभाते सर्वालंकारसंयुतं सर्ववाद्यजयघोषादिभिः सह यानं शनैः शनैः गमयन् कर्पूररजनीलाजमिश्रं पथि विकिरेत्। मनोरमे देशे भक्ष्यादीनि निवेद्य ताम्बूलादिकं च शिवसन्निधौ दद्यात् । प्रतिदिनं विशेषेण स्नपनं शान्तिहोमं च नित्यपूजाविधानेन कुर्यात् । स्नानदेशं पूर्वमुद्दिश्य तत्र सलक्षणां प्रपां कारयित्वा तन्मध्ये वेदीं निर्माय तदूर्ध्वे सिंहासनं विन्यस्य तस्योपरि महेशं स्थापयित्वा लीलागानं च श्रावयेत् । (२७-३६)

सूरिबृन्दैः सह वसन्तलीलां कृत्वा मत्स्यभोजनमध्ये ओदनस्येति मन्त्रेण तण्डुलानि ओदनानि च पृथक् पृथक् विन्यसेत् । मत्स्यलीलां समालोक्य तेषां भोजनं क्षिपेत् । लीलाया अन्तिमदिनं निर्दिश्य एवं प्रतिदिनं कुर्यात् । सर्वप्रयत्नेन नित्यपूजां निर्वर्तयेत्। नित्यपूजाहीने प्रायश्चित्तं समाचरेत् । प्रायश्चित्तविहीने तु राज्ञो राष्ट्रस्य च दोषः सम्भवेत् । लीलावसाने विमुखयानं कारयित्वा राजोपचारेण पूर्वस्थाने निवेश्य स्नपनं शान्तिहोमं च कृत्वा प्रभूतहविषं दद्यात्

। राजा स्वपत्नीदेशिकाभ्यां सह शिवस्य मूर्ध्नि पुष्पं दापयेत् । मनसा चिन्तितं च प्रार्थयेत् । अनेन प्रकारेण मत्स्यलीलां कारयेत्। अनन्तरे पटले मौक्तिकग्रहणविधिरुच्यते। (३७-४५) इति मत्स्यलीलाविधिपटलार्थसङ्ग्रहः।

एकषष्टितमे पटले मौक्तिकग्रहणविधिर्निरूप्यते । समुद्रे मुक्ताफलानि संगृह्य नृपतिनाऽऽचार्यैः पूजाचक्रेऽन्तर्भूतजनैश्च यथायोगं विभज्य स्वस्वभागग्रहणविधिः प्रतिपाद्यते । फाल्गुनचैत्रकार्त्तिकमासेष्वन्यतमेऽथवा परस्मिन् मासे वा पूर्वपक्षे चेदष्टमीनवमीद्वितीयातृतीया-चतुर्थीपञ्चमीर्विहाय, अपरपक्षे चेत् चतुर्थीपञ्चम्यष्टमीनवमीदशमीत्रयोदशीर्विहाय अन्यस्यां तिथौ मौक्तिकग्रहणमाचरेत् । अथवा आश्वयुग्रोहिणीपुष्यमघाषाढादित्रयहस्तनक्षत्रेष्वेकतमे शुक्रमन्दा-दित्यवासरान् वर्जयित्वा वज्रादिवृध्द्यन्तेष्वष्टादशसु शुभदेषु योगेष्वन्यतमे मेषकर्कटसिंहवृश्चिककुम्भेषु पञ्चसु राशिष्वन्यतमे च मौक्तिकग्रहणम् आरभ्येत । (१उ०-११)

निश्चितदिवसात् पूर्वमभिषेकबेराग्रे स्थण्डिलं कल्पयित्वा राजचिह्नानि सर्वाणि तदुपरि स्थापयित्वा, देवदेवं नमस्कारपूर्वकं विज्ञाप्य, मौक्तिकग्रहणार्थं रत्नानि गृहीत्वा, तत्तदङ्गजनैः सह ध्वजादिछत्रपर्यन्तचिह्नैः ढक्काकेशवाद्याशरीवाद्यादिघोषैश्च सह पूर्वोक्तयानविधिना अब्धितीरं विशेत् । (१२-१६) समुद्रतीरे प्रपां वा कूटाकारं वा चतुर्द्वारयुक्तं चतुस्तोरणभूषितं मध्ये वेदिसंयुक्तं च निर्माय पताकादिभिः पूगाद्यैश्च अलंकुर्यात् । (१७-१८पू०)

तत्र सिंहासनस्थं देवं नित्यवत् सम्पूज्य सुराक्षीरदधिमध्विक्षुसर्पिःक्षारान् सप्ताब्धिदेवान् क्रमेण समर्चयेत् । (१८उ०-२३) तदनन्तरम् अलंकृतदेवम् आरोपितध्वजपटे उडुपे समारोप्य तद्दक्षिण-वामपर्श्वयोः क्रमेण मालिनीदेशिकौ तिष्ठन्तौ सकलवाद्यघोषैः राजोपचारैश्च सह मौक्तिक[ग्रहण]स्थानं प्रविशेताम् । (२४पू०-२६पू०) यन्त्रमार्गेण मौक्तिकानि गृहीत्वा पवन्यादि समापूर्य पूर्वस्थाने निवेशयेत् । (२६उ०-२७पू०) मुक्ताग्रहणशालायां पश्चिमनिर्ऋत्यैशान्योत्तरासु एकतमायां दिशि संगृह्यमाणरत्नानि सायाह्नसमयावधि आवेश्य अस्तमये काले स्नपन-शान्तिहोमनित्यपूजादिकं सम्यगाचरेत् । (२७उ०-२९)

एवं पक्षाहान्तं प्रतिदिनं समुद्रतीरे कुर्यात् । (३०)

समस्तद्रव्यैः सह पुनरास्थानमण्डपं प्रविशेत् यत्र सूरिजनाः सम्मिलिताः। (३१)

मूलालये स्नपनं शान्तिहोमं नैमित्तिकार्चनं च यथाविधि निर्वर्त्य महाहविर्निवेद्य परमेश्वरं तोषयेत्। (३२-३४पू०)

महेशस्य पुरतः गोमयालेपिते पिष्टचूर्णैरलंकृते ज्वलद्दीपैश्च परिवृते भूमिभागे समुद्रगृहीतानि रत्नानि विन्यस्य तद्द्रव्यम् अष्टधा विभजेत्। (३४उ०-३५पू०)

एकांशं देशिकस्य, भूपतेरेकांशं, अतिथीनामेकभागं, सूरीणामेकांशं, चक्रपूजोक्तमर्त्यानां भागमेकं, शेषांशं देवस्य च विभजेत्। (३५उ०-३८पू०)

एवं सर्वलोकहितः सर्वदेवप्रियार्थकश्च मौक्तिकग्रहणविधिर्निरूपितः। निरूपयिष्यमाण उत्पातविधिः श्रूयतामिति प्रतिज्ञायते। (३८उ०-३९पू०) इति मौक्तिकग्रहणविधिपटलार्थसङ्ग्रहः।

द्विषष्टितमे पटले सर्वसम्पत्समृद्ध्यर्थं राजराष्ट्रहिताय च उत्पातशान्तिविधिः निरूप्यते। (१) उत्पातो द्विविधः सामान्यो महाद्भुतश्चेति। तत्र सामान्यो दीर्घफलदः महाद्भुतस्तु सद्य एव फलदायकः। तेषां दोषनाशनप्रतिक्रियाः सर्वा अविलम्बेन सम्यक् करणीयाः, अकरणे तु नृणां ब्राह्मणानां नृपस्य च दोषो भवेत्। (२-३)

महाद्भुताः-

रात्रौ भास्करोदयः, अमावास्यायामिन्दुदर्शनम्, भूकम्पः, नदीकूपतटाकानां क्षोभः, प्रतिमारोदनम्, शोणितपाषाणपांसुमधूनां वर्षणम्, असृक्क्षीरयोर्वर्षणम्, वृक्षाच्छ्रोणितस्रावः, शिवालयस्य शिखादिपादुकान्तभागानाम् अकारणात् पतनम्, देवालयस्य स्थानात्स्थानान्तरगमनम्, वृक्षस्य स्थानभ्रंशः, वृक्षे चान्यपुष्पफलानामुद्भवः, तत्पुष्पे अन्यगन्धस्य सम्भवः, लिङ्ग-प्रतिमयोरुष्णसम्भवः, अण्डजस्वेदजमृगानां नराणां च स्वजात्यन्यप्रसवः, प्रासादभ्रमणम्, श्वेतवायससम्भवः, पर्वतद्वयस्य युद्धः, आर्द्रवृक्षस्य स्वयं दाहः, प्रतिमायाः कम्पनम्, शिववर्धन्योर्भेदनम्, लिङ्गप्रतिमयोर्भेदनम्, प्रतिमायाः स्फोटनम्, प्रतिमायां

नीलवर्णदर्शनम्, करिण्या मदजलस्रावः, अग्निं विना धूमोद्भवः, लिङ्गस्य वर्णान्तरगमनम् , चतुष्पदाम् अङ्गाधिक-सम्भवः, स्वयमेव भेरीघोषः इत्येते महाद्भुताः प्रोक्ताः । (४-१४)

सामान्याद्भुताः-

प्रतिसूर्यस्य प्रतिचन्द्रस्य च दर्शनम्, रात्राविन्द्रधनुर्दर्शनम्, वह्निनक्षत्रस्य दर्शनम्, ग्रहनक्षत्रस्य च पातः, सप्ताहाशनिसंकुलः, नैरन्तर्येण सप्ताहं यावत् इन्दुसूर्ययोः परिवेषः, महावातप्रकोपः, दिशां दाहः, लिङ्गे पूजितपुष्पस्य वर्णान्तरप्राप्तिः, अकस्मात् पुष्पपतनम्, सित-कुसुमस्यासितत्वप्राप्तिः, अतीव शलभोत्पत्तिः, वाहनानाम् उन्मादः, शुकमूषिकविषसर्पाणाम् अधिकोत्पत्तिः, प्रासादसभास्थानगोपुरमण्डपपरिवारालयेषु मधुनीडसम्भवः, अतिवृष्ट्यनावृष्टी, नृपस्य युद्धोद्योगे पुण्यवृक्षस्याकारणात् पतनम्, राज्ञः प्रधानमहिषीप्रधानाश्वगजानाम् मरणम्, रक्तस्त्रीवायसोलूकजम्बुगृध्रपिङ्गलानां नृपवेश्मप्रवेशः, तेषां देवालयस्पर्शः, देवालयस्योपरि नृप-भवनस्योपरिष्टाच्च श्वारोहतद्रोदनतत्तज्जातिक्रियाः, लिङ्गे वा प्रतिमायां वा खद्योतारोहणम्, व्योम्नि धूमकेतूनां नानारूपदर्शनम्, लिङ्गमूले प्रतिमायां च जन्तूनामारोहणम्, व्यतिरिक्तक्रियाणां सम्भवः इत्येते सामान्याद्भुताः प्रोक्ताः । (१५-२५)

महाद्भुतानां प्रतिक्रियाः रात्रौ भानुदर्शनस्य प्राणिनाशनृपभयावहत्वात् तद्दोषशमनार्थाय सप्ताहं यावत् दिशाहोमं महास्नपनं च कृत्वा देवेशं सम्पूज्य प्रभूतहविर्निवेद्य ब्राह्मणान् भोजयेत्, तेषामाशिषश्च प्रार्थयेत् । (२६-२८)

अमावास्यामिन्दुदर्शनदोषशमनार्थमपि पूर्वोक्तप्रकारेणैव प्रतिकृतिं कारयेत् । (२९)

भूमिकम्पो राज्ञो राष्ट्रस्य च दोषावहः। तच्छमनार्थमेकविंशद्दिनं यावत् क्षीरप्रस्थसहस्रैः मधुसर्पिःसहस्रैश्च महाव्योमेति मन्त्रमनुस्मरन् शिवं सम्यगभिषिच्य पलाशसमिधा शतवारं हुत्वा ब्राह्मणांश्च भोजयेत् । (३०-३२पू०)

नदीकूपतटाकानां क्षोभे जना दुर्भिक्षेण महामार्या च पीड्येरन्। तत्परिहारार्थं तेषां तीरे नवहस्तप्रमाणमण्डपं निर्माय मण्डलं च विलिख्य तन्मध्ये स्थण्डिलं कारयित्वा तदुपरि अग्नि-कार्योक्तमार्गेण पञ्चाग्निं चोत्पादयेत्। (३२उ०-३४)

देशिकः पञ्चाहं यावत् अस्त्रमन्त्रेण व्याघातसमिधः हृदयेन घृतं पाशुपतेन चरुं च शतं तदर्धं तदर्धं वा जुहुयात्। (३५-३६पू०)

मिन्दाहुतिं व्याहृतिहोमं जयादिरभ्याधानं राष्ट्रभृद्धोमं च क्रमेण जुहुयात्। (३६उ०-३७पू०)

शिवं च विधिवत् सम्पूज्य ब्राह्मणांश्च भोजयित्वाऽन्ते उत्सवं च कारयेत्। (३७उ०-३८पू०)

प्रतिमारोदनेन ग्रामस्य गवां धान्यानां च नाशः सम्भवेत्। तद्दोषवारणार्थं देवप्रतिमाशुद्धिं सम्प्रोक्षणं च विधाय पक्षं पक्षद्वयं वा शान्तिहोमं दिशाहोमेन सह निर्वर्तयेत्, प्रतिदिनं स्नपनं ब्राह्मणानां दीनान्धानां च भोजनं च कारयेत्। (३८उ०-४१पू०)

शोणितवर्षेण प्राणिनाशः सम्भवेत्, तन्निवारणाय प्रासादमण्डपादीनि तोयेन क्षालयित्वा आलयस्य समन्तात् गोमयालेपनं पर्यग्निकरणं पुण्याहं च कारयेत्। (४१उ०-४३पू०)

ततः सप्ताहान्तं सहस्रप्रस्थमितैः क्षीरैः सहस्रप्रस्थमितैः सर्पिर्भिश्च देवमभिषिच्य महाव्योमेतिमन्त्रेण पलाशसमिद्भिः शान्तिहोमं च कृत्वाऽन्ते उत्सवं च निर्वर्तयेत्। (४३उ०-४५पू०)

मधुक्षीरयोर्वृष्ट्या विप्राणां क्षत्रियाणां च क्लेशो भवेत्। अतस्तद्दोषशमनार्थं सहस्रप्रस्थमिताभ्यां मधुक्षीराभ्यां सप्ताहपर्यन्तं शिवमभिषिच्य विशेषेण पूजयित्वा प्रभूतहविर्निवेदयेत्। (४५उ०-४६)

अशोकसमिद्भिः शान्तिहोमं पश्चाद्ब्राह्मणभोजनं च कुर्यात्। (४७)

वृक्षाच्छोणितसम्भवे राज्ञःपरचक्राद्भयं भवेत्। भयवारणाय वृक्षमूले दिशाहोमं कृत्वा ब्राह्मणांश्च भोजयित्वा वास्तुदेवं च पूजयेत्। ततः शिवं सम्पूज्य स्नपनं च कृत्वा प्रभूतहविषं निवेदयेत्। (४८-५०पू०)

कारणं विना देवालयस्य पादुकान्तभागपतने स्त्रीणां क्षेत्रिणां च दुःखं सम्भवेत्। प्रासादं पूर्ववत् कृत्वा जीर्णभागांश्च उद्धृत्य देवबिम्बं च समापाद्य पुनः संस्थापयेत्, विशेषपूजां तदन्ते उत्सवं चाचरेत्। (५०उ०-५२)

आलयस्य स्थानान्तरप्राप्तौ नृपस्य स्थानभ्रंशः सम्भवेत्। तच्छान्त्यर्थं तत्स्थानं पूर्ववत् निर्माय देवं संस्थाप्य च पूजयेत्। गव्येनाभिषिच्य ब्राह्मणांश्च भोजयेत्। (५३-५४)

वर्धनीशिवकुम्भयोर्भेदने शान्त्यर्थं सर्वेषां देवानां स्नपनैरभिषेकं कारयेत्। (५५-५६पू०)

वृक्षस्य स्थानान्तरप्राप्तौ तदन्यफलगन्धकुसुमानां च सम्भवे राष्ट्रवासिनां दुःखं सम्भवेत्, तद्वारणाय तज्जातिवृक्षं पुनः पूर्वस्थाने स्थापयित्वा मयूरसमिधा शान्तिहोमं च कृत्वा सप्ताहान्तं स्नपनं क्षीराभिषेचनं च निर्वर्त्य वास्तुदेवं सम्पूजयेत्। तस्य वृक्षस्य पुष्पैः फलैश्च शिवं विधिवत् पूजयेत्। (५६उ०-६०)

लिङ्गस्य देवप्रतिमानां च उष्णत्वे प्रतिपन्ने सति जनानां नानारोगाः गोनाशं दुर्भिक्षं च जायेरन्। तन्निवारणार्थं सप्ताहं यावत् सहस्रप्रस्थमितैःक्षीरैर्मधुभिः सर्पिर्भिः नारिकेलोदकैश्च शिवमभिषिच्य महाव्योमेतिमन्त्रेण स्नपनं विशेषपूजनं च निर्वर्त्य कुङ्कुमोशीरचन्दनादीनि कुष्ठागरुकर्पूरैरालोड्य शिवमालेपयेत्। महाहविः प्रदाय दिशाहोमं च कृत्वाऽन्ते शीतकुम्भं च समर्पयेत्।(६१-६५)

अण्डजस्वेदजचतुष्पान्नराणां च स्वजात्यन्यप्रसूतौ भूपतेर्मरणं सम्भवेत्, तद्वारणाय गोभूमिकाञ्चनादीनां दानं कृत्वा सप्ताहं यावत् स्नपनम् अर्कसमिधा शान्तिहोमं च कृत्वाऽन्ते उत्सवं कारयेत्। (६६-६८पू०)

प्रासादस्य भ्रमणे जनानां दुःखं सम्भवेत्, तद्वारणार्थं गव्यैः प्रत्येकं सहस्रप्रस्थमितैः प्रासादं परमेश्वरं च संहितामन्त्रानुस्मरणपूर्वकमभिषेचयेत् ततः प्रासादं प्रोक्ष्य स्नपनं कृत्वा ब्राह्मणांश्च भोजयेत्। (६८उ०-७०)

सितकाकसमुद्भवे राष्ट्रस्य क्षोभः सम्भवेत्, तद्वारणाय पञ्चाहं यावत् स्नपनं विशेषपूजनादिकं च निर्वर्त्य वैकङ्कतेन समिधा शान्तिहोमं कृत्वा प्रभूतहविषं दत्वा वास्तुदेवांश्च समर्चयेत्।(७१-७२पू०)

पर्वतद्वन्द्वयुद्धसम्भवे नृपस्यापजयो भवेत्, तद्वारणार्थं पर्वताग्रे दिशाहोमं कृत्वा तं पर्वतं पञ्चगव्येन प्रासादमन्त्रमनुस्मरन् प्रोक्ष्य तत्समीपे लिङ्गं संस्थाप्य च पूजयेत्, तद्देशदेवतानां स्नपनं कृत्वा हविषं च दत्वा विशेषेण सम्पूज्य उत्सवं च कारयेत् । (७३उ०-७६पू०)

आर्द्रवृक्षाणां स्वयंदाहे बालानां नाशः अग्निक्षोभश्च तस्मिन् राज्ये सम्भवेत्, तत्क्लेशवारणाय ग्रामस्य चतुर्दिक्षु समिदाज्यचरुलाजसर्षपैः स्वयंदग्धार्द्रवृक्षसमिद्भिश्च पञ्चब्रह्मषडङ्गमन्त्रोच्चारणपूर्वकं शतं तदर्धं वाऽथवा एकवारं वा हुत्वा पूर्वोक्तमन्त्रैः प्रासादमन्त्रेण च प्रत्येकं सहस्रं तदर्धं वा हुत्वा मिन्दाहुतिं जयादिहोमं च कृत्वा स्नपनैरभिषिच्य विशेषेण परमेश्वरं सम्पूज्य औदुम्बरसमिधा शान्तिहोमं च कारयेत् । (७६उ०-८१)

देवताप्रतिमाकम्पने राज्ञो मरणं सम्भवेत्, तन्निवारणाय प्रतिमाशुद्धिं कृत्वा देवं गव्यैरभिषिच्य सप्ताहं यावत् पुण्याहवाचनं दिशाहोमं च कृत्वाऽन्ते उत्सवं च कारयेत् । (८२-८३)

शिववर्धन्योः तथा लिङ्गप्रतिमयोर्भिन्ने संजाते नृपस्य परचक्राद्भयं राष्ट्रे महामारीरोगश्च सम्भवेत्, तद्वारणार्थं देवालयस्य बालस्थापनं प्रासादनवीकरणं च विधाय प्रासादसम्प्रोक्षणं च विधिनाऽऽचरेत् । (८४-८५)

लिङ्गे भिन्ने सति तदुद्धृत्य प्रमाणान्तरेण वापि नवं स्थापयित्वा विधिना प्रतिष्ठापयेत् । (८६-८७पू०)

प्रत्यङ्गोपाङ्गहीने वस्त्राभरणादिहीने च पुनः सन्धानं सम्प्रोक्षणं च कृत्वा सप्ताहं यावत् दिशाहोमं महास्नपनं च कारयित्वा पञ्चगव्यपञ्चामृतैः क्षीरमधुसर्पिषां सहस्रप्रस्थमितैश्च परमेशानं महाव्योमेतिमन्त्रेणाभिषेचयेत् । (८७उ०-९०पू०)

महेश्वरस्य स्नपनादिकं कृत्वा ब्राह्मणांश्च भोजयित्वा खादिरसमिधा शान्तिहोमं च कृत्वाऽन्ते उत्सवमाचरेत् । (९०उ०-९१)

देवप्रतिमायां नीलवर्णदर्शनं दुःखावहं स्यात् , तद्वारणाय नयनोन्मीलनं कृत्वा यावत् पक्षं पक्षद्वयं वा अर्कसमिधा शान्तिहोमपुरःसरं स्नपनं दिशाहोमं च कृत्वा ब्राह्मणान् दीनानन्धांश्च भोजयेत् । (९२-९३)

करिण्या मदोत्पत्तौ महावातप्रकोपे च वाहनानां स्त्रीणां च भयं सम्भवेत्, तद्वारणाय सप्ताहं यावत् शिवस्य पूजनं स्नपनं शिवविद्याङ्गमन्त्रैश्च होमं च कृत्वा महाहविश्च निवेदयेत्। (९४-९६पू०)

अग्निं विना धूपोत्मन्ने वाहनानां क्षयः परचक्राद्भयं च सम्भवेत्, तन्निवारणार्थं तत्प्रदेशं खात्वा पञ्चमृद्भिः पूरयित्वा व्याघातसमिद्भिः शान्तिहोमं च कारयेत्। ब्राह्मणान् दीनानन्धांश्च भोजयित्वा सहस्रप्रस्थमितक्षीरैः शिवमभिषिच्य अन्ते स्नपनं कृत्वा शान्तिकुम्भं च समर्पयेत्। (९६उ०-९९)

शिवलिङ्गस्य वर्णान्तरप्राप्तौ जातिदूषणं सम्भवेत्, तद्वारणाय एलालवङ्गतक्कोलजाती-जम्बुमुरान् सम्यक् पेषयित्वा तेन लिङ्गमालेपयेत्। सप्ताहं यावत् शिवस्य स्नपनं शान्तिहोमं च कृत्वा अशोकसमिद्भिः त्र्यम्बकमन्त्रेण हुत्वाऽन्ते विशेषपूजानन्तरं विप्रांश्च भोजयेत्। (१००-१०२)

स्वयमेव भेरीघोषे संजाते महामारी प्रवर्तेत, तद्वारणार्थं पक्षं पक्षद्वयं वा स्नपनं कृत्वा बिल्वसमिद्भिः शान्तिहोममाचरेत्। (१०३-१०४पू०)

सामान्याद्भुतानां प्रतिक्रियाः -

आदित्योदयसमये प्रतिसूर्यस्य दर्शनं तु परचक्राद्भयं नराणां ज्वरपीडां चावहेत्, तद्दोषशमनाय सप्ताहं यावत् अश्वत्थसमिद्भिः शान्तिहोममन्ते स्नपनं विशेषपूजनं च कृत्वा प्रभूतहविषं च निवेदयेत्। (१०५-१०७पू०)

चन्द्रोदयकाले प्रतिचन्द्रस्य दर्शनं दुर्भिक्षं महामारीपीडां चावहेत् तद्वारणाय प्रतिसूर्यदर्शन- दोषनिवारणार्थमुक्तोपाया एवावलम्बनीयाः। (१०७उ०-१०८)

रात्रौ इन्द्रधनुर्दर्शनेन वह्निनक्षत्रदर्शनेन ग्रहनक्षत्रपातेन च अनावृष्टिः नराणां ज्वरपीडा वाहनानां क्षयश्च सम्भवेत्। (१०९-११०पू०)

तद्वारणार्थं सप्ताहं यावत् शिवपूजानन्तरं महास्नपनं कृत्वा अश्वत्थसमिद्भिः शान्तिहोमं विधायान्ते चोत्सवमाचरेत्। (११०उ०-१११)

सप्ताहं यावत् निरन्तराशनिपाते सति अतिवृष्टिः नराणां रोगश्च सम्भवेत् , तद्वारणाय अशनिपातानन्तरं सहस्रप्रस्थमिताभ्यां घृतक्षीराभ्यां परमेशानं स्नापयित्वा विशेषेण च सम्पूज्य स्नपनं च कृत्वा प्रभूतहविश्च निवेदयेत् । (११२-११४पू०)

चन्द्रसूर्यौ सप्ताहपर्यन्तं परिवेष्टितौ चेत् युद्धे नृपस्य दुर्मरणं सम्भवेत्, तद्वारणार्थं गोभूतिलानां च दानं महादानं च कृत्वा सहस्रप्रस्थमितैः क्षीरैः महेश्वरं स्नापयित्वा स्नपनं च कुर्यात् । (११४उ०-११६)

लिङ्गपूजितपुष्पाणां तत्समर्पितवस्त्रानुलेपानां च वर्णान्तरसम्प्राप्तिः ग्रामदूषणमावहेत्, तद्दोषशमनार्थं विधिवत् शिवं सम्पूज्य प्रभूतहविश्च निवेदयेत् । (११७उ०-११८)

अतीव शलभोत्पत्तौ वाहनानामुन्मत्ते जाते शुकमूषिकयोर्विषसर्पाद्युत्पन्ने च प्राणिनां नाशः अनावृष्टिश्च सम्भवेत्, तद्वारणाय प्रासादस्याग्रतः दश वा द्वादश वा हस्तमितं चतुरश्राकारं दर्पणोदरसन्निभं षोडशस्तम्भयुतं सर्वालंकारसंयुतं च मण्डपं निर्माय तन्मध्ये हस्तद्वयप्रमाणं षडङ्गुलमितमेखलात्रययुतं नाभियोनियुक्तं च वृत्तकुण्डं कृत्वा चतुर्दिक्षु चतुरश्रकुण्डानि कोणेषु च पद्माकारकुण्डानि च कारयेत् । (११९-१२३पू०)

मध्याह्ने तस्मिन् कुण्डे शिवाग्निं विधिना कल्पयित्वा समिच्चरुलाजसर्षपलवणकार्पासबीजैः देशिको हुत्वा पलाशखादिराश्वत्थवटसमिधः पूर्वादिदिक्षु शमीबिल्वाशोकमयूरसमिधः क्रमेण विदिक्षु च सद्यमन्त्रेण जुहुयात् । (१२४-१२६)

पञ्चब्रह्मषडङ्गैः विद्याङ्गैर्मूलमन्त्रैः पाशुपतास्त्राघोरास्त्रमन्त्रैश्च प्रत्येकं सहस्रं तदर्धं वा क्रमाद्धुत्वा जयादिरभ्याधानराष्ट्रभृतश्च क्रमाज्जुहुयात् । (१२७-१२८)

तदनन्तरं स्नपनं कृत्वा विशेषेण सम्पूज्य महाहविश्च निवेद्य ब्राह्मणांश्च भोजयेत् । (१२९-१३०पू०)

प्रासादसभास्थानगोपुरमण्डपपरिवारालयादिस्थानेषु मधुनीडसम्भवः ग्रामनाशं राज्ञो मरणं चावहेत्, तद्वारणार्थं मधुनीडं व्यपोह्य शुद्धाम्भसा प्रोक्ष्य विधिवच्छिवं सम्पूज्य दिशाहोमं च कुर्यात् । (१३०उ०-१३२)

सप्ताहं यावत् मध्वाज्यपयोभिः शिवं संस्नाप्य नवसम्भूतैः समिद्भिः शान्तिहोमं तदन्ते स्नपनं च कृत्वा सप्ताहं वा त्र्यहं वा उत्सवं च कुर्यात्। (१३३-१३४)

अनावृष्टिः गोनाशं सस्यनाशं चावहेत् , तद्वारणार्थं सप्ताहं यावत् खादिरसमिद्भिः शान्तिहोमं क्षीराभिषेचनमन्ते स्नपनं च कृत्वा शीतकुम्भं समर्पयेत्। (१३५-१३६)

अतिवृष्टौ दुर्भिक्षं सम्भवेत्, तद्वारणाय सहस्रप्रस्थमिताभ्यां मधुघृताभ्यां शिवमभिषिच्य स्नपनं च कुर्यात्। (१३७-१३८पू०)

रजनीचूर्णं कर्पूरेण सह सम्यगालोड्य लिङ्गपिण्डिकां षडङ्गुलप्रमाणेन वेष्टयेत्, परीणाहे कनिष्ठाङ्गुले कर्पूरं विवर्ज्य गोघृतेन चतुरङ्गुलप्रमाणेन च वेष्टयेत्। १३८उ०-१४०पू०)

सहस्रं तदर्धं वा दीपानारोप्य मुद्गभिन्नसमायुक्तं प्रभूतहविषं च निवेद्य पलाशसमिद्भिः शान्तिहोमं कृत्वा विशेषपूजनं च कुर्यात्, एवं त्र्यहं यावत् कुर्यात्। (१४०उ०-१४२पू०)

नृपे युद्धोद्युक्ते सति अकारणेन द्रुमस्य अथवा राज्ञः प्रधानमहिष्या वा भूमौ पतने प्रधानाश्वस्य वा गजस्य वा मरणे च भूपतेर्मरणं सम्भवेत्। (१४२उ०-१४३)

तद्वारणार्थं ब्राह्मणानां महादानं कृत्वा महेशानं विशेषेण सम्पूज्य महास्नपनं विधाय महाहविश्च निवेद्य वास्तुदेवांश्च पूजयेत्। (१४४-१४५)

देवालये नृपस्य गृहे विद्याग्नि यागशालासु सभास्थाने चत्वरे मठे तटाकतीरे कूपतीरे वा यदि स्त्री रक्ता जायते चेत् प्रतिक्रियाः कर्तव्याः। (१४६-१४७)

सभास्थाने स्त्रियां रक्तायां जायमानायां ग्रामनाशः, चत्वरे तथा सति प्राणिनाशः, मठे ग्रामदूषणं, तटाकतीरे [ग्रामात्] लक्ष्मीनिर्गमनं, रथ्यायां बालानां नाशनं, कूपतीरे च ग्रामवासिनां दुःखं च सम्भवेत्। (१४८-१५१पू०)

एतादृशदोषवारणार्थं तत्प्रदेशं खात्वा वालूकादिभिः पूरयित्वा पुण्याहं वाचयित्वा ब्राह्मणांश्च भोजयेत्। (१५१उ०-१५२पू०)

पञ्चगव्येन पवमानमन्त्रमुदीरयन् सम्प्रोक्षणं पलाशसमिद्भिः शान्तिहोमं स्नपनं पुनः शान्तिहोमं च कुर्यात्। (१५२उ०-१५३)

गोमायुः पिङ्गलो गृध्रः उलूको वायसो वा आलयान्तः नृपभवने वा प्रविष्टश्चेत् बालानां स्त्रीणां च नाशः सम्भवेत्, तद्वारणाय शीतकुम्भं शान्तिहोमं च कृत्वा ब्राह्मणान् भोजयेत् स्नपनं च कुर्यात्। (१५४-१५६पू०)

देवालयोपरि नृपभवनस्योपरि वा श्वारोहे तथा तत्र रोदने च राज्ञो मरणं सम्भवेत्, तद्वारणार्थं श्वानं ततो विसृज्य पुण्याहं वाचयित्वा अश्वत्थसमिधादिभिः शान्तिहोमं च कारयेत्। (१५६उ०-१५८पू०)

ब्राह्मणभोजनं महास्नपनं तदन्ते उत्सवं च विधाय वास्तुदेवान् समर्चयेत्। (१५८उ०-१५९पू०) लिङ्गे वा प्रतिमायां वा गृध्रारोहणे नराणां रोगवृद्धिः सम्भवेत्, तद्वारणाय गृध्रं विसृज्य सद्य एव देवस्य स्नपनं दूर्वासमिद्भिः शान्तिहोमं च विधाय स्नपनं कारयेत् महाहविश्च निवेदयेत्। (१५९उ०-१६१)

आकाशे धूमकेतुदर्शने प्रायश्चित्तं समाचरेत्। (१६२)

लिङ्गमूले जन्तोरारोहणं राष्ट्रक्षोभं दुर्भिक्षं चावहेत् ,तद्वारणाय देवेशं सम्पूज्य अष्टबन्धं च कृत्वा खादिरसमिद्भिः शान्तिहोमं विधाय शीतकुम्भं कृत्वा महाहविश्च निवेदयेत्। (१६३-१६५पू०)

विशेषाद्भुतसम्भवे गुरूपदिष्टमार्गेण शान्तिहोमं मासं यावत् कृत्वा दोषान् शामयेत्।(१६५उ०-१६६)

एतादृशप्रतिक्रियाणां फलसिद्ध्यर्थम् आचार्यं दक्षिणादानेन वस्त्राङ्गुलीयकगोभूमिधन-धान्यादिदानेन च प्रीणयेत्। दक्षिणासु अधमं दशनिष्कं मध्यमं तद्द्विगुणं तत्त्रिगुणम् उत्तमं च स्यात्। सर्वाणि यागोपयोगद्रव्याण्यपि देशिकाय प्रदद्यात्। (१६७ -१६९$^{१}/_{२}$) इति उत्पात-शान्तिविधिपटलार्थसङ्ग्रहः।

त्रिषष्टितमे पटले ग्रामशान्तिविधिरुच्यते। ग्रामनगरपत्तनराजधानिककुब्जक-खेटकादिष्वेकतमे वा स्थाने जनानां बहुरूपे वा शून्ये वा पूर्वादिदिक्ष्वेकतमायां वा विदिक्षु वा ग्रामशान्तिरनुष्ठेया। (१-३पू०)

ग्राममानं चतुर्भागम् अष्टभागं वा विभज्य तेषु षोडशांशं वा द्वादशांशं वा वास्तु निश्चित्य बाह्ये आभ्यन्तरे प्रासादपरितो वापि वास्तुवीथीं प्रकल्पयेत्। (३उ०-५पू०)

ब्रह्मादीशानपर्यन्तम् इन्द्रादीशानपर्यन्तं वा ग्राममध्ये बलिर्दातव्यः। आद्यन्तं बलियुक्तम् अयुक्तं दिनं प्रति इति नियमः। (५उ०-६)

ब्रह्मराक्षसपिशाचभूतनिशाचराः शून्यग्रामवासिनः सन्ति । पूर्वापरवास्तुषु गमनागमनकरणे ग्रामवासिनां रोगशोकभयं सम्भवेत्, तस्मिन् ग्रामे उत्सवकरणे राष्ट्रनाशश्च सम्भवेत्, तद्वारणार्थं तेषां राक्षसादीनां बलिर्दातव्यः। ग्रामाभिमुखस्थानान्निर्गत्य द्वारदेशे तत्र स्थितानां राक्षसादीनां अन्यदेवानां च प्रीत्यर्थं बलिर्दातव्यः। (७-११पू०)

देशिको बलिद्रव्याणि सम्पाद्य स्नात्वा सकलीकृत्य सामान्यार्घ्यं प्रकल्प्य पञ्चगव्यं च संसाध्य आदौ विघ्नेशं पूजयेत्। (११उ०-१२)

सर्वसिद्ध्यावहं द्विधाखण्डितं नालिकेरफलं विघ्नेशाय दत्वा "भो विघ्नराज ! देवदेव नमस्तुभ्यं तवाज्ञया शिवाध्वरे प्रवृत्तोऽहम्। त्वत्प्रसादात् भूतेभ्यो बलिदानं करोम्यहम्" इति विज्ञापयेत्। (१३-१६पू०)

क्रमुकं नालिकेरपुष्पं मांसं च संख्यया परिगृह्य तदर्धप्रमाणेन तण्डुलद्रोणं तच्चतुर्गुणं पुष्पं च गृह्णीयात्। पीतरक्तवर्णानि पुष्पोद्यानोद्भूतानि सुगन्धीनि च जातिकल्हारादिपुष्पाणि च मुक्तपुष्पं च पुष्पपात्रे निक्षिपेत्। (१६उ०-१९पू०)

एकां कार्पासवर्तिं महावर्तिपञ्चकं च गजमृगमदं कर्पूरयुक्तकृष्णगन्धं कुन्दुरुष्कागरुयुतधूपं च रक्तवस्त्रं कम्बलं च दारुपीठपञ्चकमथ वा तच्चतुष्कं खड्गशूलधनुर्बाणक्षुरिकाभिण्डिपालकानि च गृह्णीयात्। (१९उ०-२१)

नालिकेरं तैलं बहुकदलीफलानि पञ्चचूर्णं गुलं क्षीरं कदलीदलानि क्रमुकैलादिसंयुक्त-ताम्बूलं च परिगृह्य आढकद्वयतण्डुलैः शुद्धौदनं आढकैकमितपायसं च पाचयित्वा आढकमितान् क्षीरविमिश्रान् आर्द्रान् अक्षतान् शुद्धपात्रे निक्षिपेत्। (२२-२४)

तदनन्तरम् अस्त्रेश्वरमभ्यर्च्य शिवखड्गं शिवसन्निधौ संस्थाप्य परमेश्वरं विज्ञाप्य बलिद्रव्याणि संगृह्णीयात् । (२५-२६पू०)

अस्त्रेशं शिवखड्गं च शिष्यहस्ते संनिधाय शङ्खभेर्यादिघोषैः डमरुपटहमद्दलादिवाद्यघोषैः स्त्रीणां कुरवैश्च घण्टारवेण च सह दीपज्वालाछत्रचामरादिभिश्च संयुक्तः द्वारदेशं समाश्रयेत् । (२६उ०-२८)

द्वारपालान् आसनादिनिवेद्यान्तमभ्यर्च्य बाह्ये वाभ्यन्तरे वा वटुकं चार्चयेत् । द्वारं तोयेन प्रक्षाल्य नन्दिकालयोश्च बलिं दत्वा मध्ये वृषभं सम्पूज्य महाघण्टां च वादयेत् ।(२९-३०)

द्वारबहिः पञ्चहस्तप्रमाणकभूप्रदेशे तृणमूलादीनपसार्य तत्प्रमाणकचतुरश्रे वेदिकां निर्माय तां गोमयेनालिप्य पञ्चगव्येन सम्प्रोक्ष्य बलिद्रव्याण्याहरेत् । अस्त्रेशं शिवखड्गं च वेदिकोर्ध्वे विन्यस्य मध्येऽष्टदलपद्मं ऐन्द्रेऽष्टकोणकं याम्ये नवयोनिं पश्चिमे षट्कोणमुत्तरेऽष्टशूलं च रक्तवर्णेन लिखेत् । (३१३५पू०)

तद्बाह्ये सितवर्णेन चतुरश्रं प्रकल्प्य अश्रस्याभ्यन्तरे कोणानि पञ्चचूर्णैरलंकृत्य मण्डलस्य पदबाह्ये पीठचतुष्टयं न्यसेत् । मण्डलपश्चिमे मध्ये न्यस्तपीठोर्ध्वे वस्त्रमास्तीर्य रक्तपद्मैः संवृतं कृत्वा कुडुपाधिकप्रस्थमिततण्डुलं वस्त्रोपरि न्यस्य तदुपरि चतुर्दिक्षु नालिकेरान् स्थापयेत् । (३५उ०-३८)

पूर्वे खड्गं दक्षिणे धनुर्बाणं पश्चिमे क्षुरिकाम् उत्तरे भिण्डिपालं मध्ये शूलं च स्थापयित्वा पञ्चचूर्णमिश्रमोदनं कुडुपाधिकप्रस्थमिततण्डुलं च निधापयेत् । कांस्यपात्रं तण्डुलैः पूरयित्वा तन्मूर्ध्नि नालिकेरोदकघृताभ्यां परिपूर्य तन्मध्ये महावर्तिं च विन्यसेत् । (३९-४२ पू०)

वायुदेशे रक्तचूर्णैरलंकृतस्वस्तिकोपरि नालिकेरं स्थापयित्वा तस्याग्रे आमूलाग्रसमन्वितकदलीपत्रं निधाय तस्योर्ध्वे सिताक्षतान् कदलीफलानि च न्यस्य पूर्वादिदिक्षु शास्तारं चण्डिकाम् अघोरं भैरवं च तन्मध्ये भूतनाथेशं च समर्चयेत्। (४२ उ०-४५ पू०)

पश्चादाग्नेयमण्डले पञ्चचूर्णैरलंकृते पूर्वे वाऽष्टदिक्षु वा कदलीपत्रं विन्यस्य तदुपरि कपित्थफलाकृतिमेकं पिण्डं निधाय वर्तिदीपसमन्वितं जलपरिषेचनेन सह नन्द्यादीनां बलिं दद्यात् । (४५ उ०-४७) नैर्ऋते पञ्चचूर्णैः षट्कोणं विलिख्य महाभूतषट्कस्य क्रमेण बलिं दद्यात्। (४८)

ऐशान्यां सूत्रषट्कसमायुक्तं पञ्चचूर्णैरलंकृतं चतुष्कोणमण्डलं लिखित्वा नालिकेरपुष्पयुक्त-क्रमुकफलानि नालिकेरदलैर्लम्बयित्वा चतुष्पथे पिशाचानां त्रिपथे रक्षसां च बलिं दद्यात्। (४९-५१ पू०)

नागान् कूष्माण्डांश्च त्रिपथे पूजयित्वा तत्रैव भैरवमर्चयेत्, द्विपथेऽसुरांश्चार्चयेत् । अन्नबलिदानानन्तरं वर्तिदीपं प्रदर्श्य पुष्पाणि विकीर्य अक्षतविकीरणेन देवानुद्वासयेत्। (५१ उ०-५३)

ऐशान्यां मध्ये वाऽग्रे वा रक्ततोयं विसृज्य शिवखड्गेन शोधितमजमेकं संहरेत्। "नमस्ते भूतनाथेश! तव प्रीत्यर्थं मया दत्तो बलिर्गृह्यताम्। प्रीतमनाः यथासुखं गच्छ । सर्वाभीष्टदायको यागो मया प्रवर्तितः" इति प्रार्थयेत्। (५४-५६ पू०)

ततः शून्यवास्तुमध्ये शान्तिबलिं, ग्रामे भद्रकाल्याद्यन्यदेवतानां प्रीत्यर्थं बलिं च दत्वा पादं प्रक्षाल्य वास्तुं प्रविशेत्। देवाग्रे वीथिमध्ये भूतपीठेन्द्रमध्ये वास्तुमध्ये वा ब्रह्मस्थानं संकल्प्य पूर्वादीशानान्तं बलिं दद्यात् । उक्तस्थानादन्यत्र बलिर्न दातव्यः इति नियमः पालनीयः (५६ उ०-६०)

मृगयात्रादितीर्थान्तं वास्तुबाह्ये यानकं च कृत्वा मध्याह्ने सायाह्नेऽर्धरात्रौ वा बलिं दद्यात् ।(६१) ग्रामशान्तिबलिदानेन सर्वेषां ग्रामवासिनां क्षेमः सर्वाभीष्टसिद्धिश्च जायते । (६२)

ग्रामशान्तिबलिहीने तु तस्मिन् राष्ट्रे वास्तुनाशः नृपस्य परचक्राद्भयं दुर्जयश्च जायेत देशवासिनः ज्वरमार्यादिपीडिताश्च भवेयुः। तस्मात् सर्वथा ग्रामशान्तिबलिं दद्यात् तदन्ते सर्वकामप्रदमुत्सवं च कुर्यात् । (६३-६५ पू०)

एवं कुर्वन् मनुष्यः पुण्यां गतिं चाप्नुयात् । (६५ उ०) इति ग्रामशान्तिविधिपटलार्थसङ्ग्रहः ।

चतुःषष्टितमे पटले नित्यार्चनादिहीने करणीयानि प्रायश्चित्तानि उच्यन्ते । प्रायो विनाशः चित्तं सन्धानं विनाशस्य सन्धानं प्रायश्चित्तमिति प्रायश्चित्तपदव्युत्पत्तिः। (१-२पू०)

निश्चितद्रव्यहीने दोषः सम्भवेत्, तद्वारणाय प्रायश्चित्तमनुष्ठेयम् । अकल्पितद्रव्याणां प्रमाणहीनं न दोषावहम् । (२उ०-३)

प्रायश्चित्तकारणानि अधुना संगृह्यन्ते। कर्मकरस्य मार्जनप्रोक्षणस्नानहीने , सौरपूजाहीने , पुण्याहवाचनपञ्चगव्यहीने, गणेशार्चनद्वारार्चनहीने, पाद्यार्घ्याचमनस्नानहीने, वस्त्राभरण-गन्धपुष्पहीने, नैवेद्योपदंशपानीयहीने, मुखवासहुतबल्युत्सवहीने, धूपदीपारात्रिकहीने, भस्म-ताम्बूलदर्पणछत्रहीने, चामरखड्गवेदस्तोत्रहीने, पुराणपञ्चाङ्गश्रवणहीने, नृत्तगानवाद्यचण्डार्चनहीने च प्रायश्चित्तकर्माणि उच्यन्ते । (४-१०पू०)

मार्जनप्रोक्षणादिहीने गोगणानां नाशः सम्भवेत्, तद्वारणार्थं भूतलं पञ्चगव्येन प्रोक्ष्य कालातिक्रमदोषशमनार्थं शान्तिकुम्भाभिषेचनं कृत्वा व्योमव्यापिमन्त्रं शतवारं च जपेत् । (१०उ०१२पू०)

कर्मकरस्य स्नानहीने दुर्भिक्षं सम्भवेत् , तद्वारणाय तेन स्पृष्टद्रव्याणि यत्नेन वर्जयेत् , तेन लिङ्गं स्पृष्टं चेत् मृद्भाण्डानि विसृज्य लिङ्गं स्नपनैरभिषेचयेत् । (१२उ०-१४पू०)

सौरपूजाविहीने नृपस्य रोगपीडा सम्भवेत् , तद्वारणाय शान्तिहोमं देवस्य स्नपनैरभिषेकं च कृत्वा सूर्यमन्त्रं शतं वा तदर्धं वा जपेत् । (१४उ०-१५)

नित्यपुण्याहहीने राष्ट्रे श्रियो नाशः सम्भवेत्, तद्वारणाय पञ्चगव्याभिषेकं कुर्यात् । पञ्चगव्यविहीने महामारी प्रवर्तेत, तद्वारणार्थं ब्रह्ममन्त्रमनुस्मरन् शम्भुं घृतेनाभिषेचयेत् । (१६-१७)

विघ्नेशार्चनहीने वाजिवारणनाशः सम्भवेत् , तद्दोषशमनाय विघ्नेशं स्नपनेनाभिषिच्य शान्तिहोमं कृत्वा भक्ष्यापूपादिकं निवेद्य विघ्नेशमन्त्रं शतं जपेत् । द्वारपूजाविहीने दुर्भिक्षं सम्भवेत् , तद्वारणार्थं शिवं शान्तिकुम्भतोयेनाभिषिच्य तत्तद्वारदेवतामन्त्रं शतं जपेत् । (१८-२०)

पाद्यद्रव्यादिहीने राज्ञो नाशः सम्भवेत् , तत्परिहारार्थम् अन्यसन्ध्यासु तद्द्रव्यं द्विगुणं दत्वा मूर्तिकुम्भतोयेन परमेश्वरं स्नापयेत् । (२१-२२पू०)

आचमनार्घ्यविहीने तु पाद्यद्रव्यहीनोक्तप्रायश्चित्तमनुष्ठेयम्। स्नानद्रव्यहीने राष्ट्रे जलाभावः सम्भवेत्, तच्छमनाय तद्द्रव्यं द्विगुणं दत्वा पञ्चाशत्कलशोदकैः व्योमव्यापिमन्त्रमनुस्मरन् परमेशं स्नापयेत्। (२२उ०-२४पू०)

वस्त्रदानहीने महाव्याधिः समुद्भवेत्, तद्वारणाय त्वक्कषायोदकेन शम्भुं स्नापयित्वा वस्त्रयुग्मं चान्यसन्ध्यासु दत्वा अस्त्रमन्त्रं शतम् जपेत् । भूषणोपवीतविहीने दारिद्र्यं सम्भवेत्, तद्धानाय शान्तिकुम्भोदकेन स्नापयित्वा अस्त्रमन्त्रं शतं जपेत् । गन्धद्रव्यहीनं राष्ट्रे भयमावहेत्, तद्वारणाय अस्त्रोदकेन संस्नाप्य तद्द्रव्यं द्विगुणं दद्यात् । पुष्पपत्रविहीने अनावृष्टिः सम्भवेत्, तद्दोषशमनाय दिशाकुम्भोदकैः परमेशं स्नापयित्वा सद्यमन्त्रं शतं जपेत्। (२४उ०-२९पू०)

नैवेद्योपदंशहीने दुर्भिक्षं सम्भवेत्, तद्धानाय कलशोदकैरीशं स्नापयित्वा ईशमन्त्रं शतं जप्त्वा तद्द्रव्यं च द्विगुणं दद्यात्। पानीयमुखवासहीने राष्ट्रं जलवर्जितं भवेत्, तच्छमनार्थं परमेशानं पञ्चाशत्कलशोदकैः स्नापयित्वा तद्द्रव्यं च द्विगुणं दत्वा मूलमन्त्रं शतं जपेत्। (२९उ०-३२पू०)

नित्यहोमहीने भूपतेर्नाशः सम्भवेत्, तद्वारणाय शान्तिहोमं षोडशस्नपनं च कृत्वा नित्याग्निकार्यम् अघोरमन्त्रशतहोमं च कुर्यात्। प्राकारबलिहीने राष्ट्रं बलवर्जितं भवेत्, तद्दोषशमनाय शान्तिहोमं कृत्वा मार्जनोदकैर्देवं स्नापयित्वा दशबीजं शतं जप्त्वा पश्चाद्बलिं समाचरेत्। (३२उ०-३५पू०)

नित्योत्सवहीने परचक्राद्भयं भवेत् ,तद्वारणार्थं शान्तिहोमं स्नपनैरभिषेकं च कृत्वा त्र्यम्बकमनुं शतं जप्त्वा नित्योत्सवं कुर्यात् । शुनकप्रतिलोमादिभिः संस्पृष्टे तस्मिन् प्रदेशे पूर्ववत् शान्तिं कृत्वा तत्स्थाने बलिं दत्वाऽस्त्रमन्त्रं शतं जपेत्। (३५उ०-३८)

यस्मिन् स्थाने बलिदीपो न दीपितः तत्र पुनर्दीपं प्रज्वाल्य बलिशेषं समापयेत् । धूपदीपविहीने महामारी प्रवर्तेत, तच्छमनार्थं शान्तिहोमं कृत्वा सूर्यतोयेन परमेशं स्नापयेत् । आरात्रिकनृत्तादिहीने शान्तिकुम्भोदकैः स्नाप्य बहुरूपं शतं जपेत्। (३९-४१)

भस्मताम्बूलहीने नृपस्य दुर्जयः सम्भवेत्, तद्वारणाय अस्त्रमन्त्रं शतं जप्त्वा परिमार्जनतोयैः परमेशं संस्नाप्य द्विगुणं भस्म ताम्बूलं च दद्यात्। दर्पणछत्रहीने चामरखड्गहीने च

16d

परचक्राद्भयं राज्ञो दुर्जयश्च सम्भवेताम् , तत्परिहाराय शान्तिहोमं स्नपनाभिषेकं च कृत्वा क्षुरिकामन्त्रं सहस्रं वा तदर्धं वा जपेत् । (४२-४५पू०)

ऋगाद्यध्ययनहीने भक्तादिस्तोत्रहीने च शान्तिकुम्भोदकैः स्नाप्य बीजमुख्यं शतं जपेत् । पञ्चाङ्गश्रवणपुराणश्रवणहीने च जायाबालानां नाशः सम्भवेत्, तद्वारणाय मान्योदकेन संस्नाप्य दशबीजं शतं जपेत् । (४५उ०-४७)

नृत्तगानवाद्यादिहीने राष्ट्रनाशः सम्भवेत्, तद्वारणार्थं शान्तिहोमं कृत्वा मूलकुम्भोदकेनाभिषिच्य नन्दिमन्त्रं शतं जप्त्वा नृत्तादिकं कुर्यात् ।(४८-४९पू०)

चण्डार्चनहीने राजसेनानाशः सम्भवेत् , तद्दोषशमनाय मूर्तिहोमं कृत्वा गन्धोदकैरभिषिच्य चण्डमन्त्रं शतं जप्त्वा चण्डं चार्चयेत् । सायं सन्ध्याविहीने अन्यसन्ध्यासु द्विगुणं कुर्यात् देवस्य यथा तृप्तिर्भवेत् तथा निष्कृतिं कुर्यात् । सन्धिद्वयविहीने तु सम्प्रोक्षणमाचरेत् । एवं कुर्वाणो जनः पुण्यां गतिमाप्नुयात् । (४९उ०-५२) इति नित्यार्चनादिहीने प्रायश्चित्तविधिपटलार्थसङ्ग्रहः ।

पञ्चषष्टितमे पटले प्रायश्चित्तविधयो विव्रियन्ते । प्रवीणस्य सन्धानं प्रायश्चित्तमिति प्रायश्चित्तपदव्युत्पत्तिः अस्मिन् पटलारम्भे दृश्यते । पापशुद्धिं विना पुरुषस्य सर्वाः क्रियाः निष्फला भवेयुः अतः पापशोधनमवश्यकरणीयम् । (१-३पू०)

आत्मार्थयजनहीने अन्यसन्ध्यासु प्रासादमन्त्रेण द्विगुणं यजेत् । रुग्णे जाते प्रासादमन्त्रमुच्चरन् पुष्पाञ्जलिं कुर्यात् । अवगाहनहीने घटस्नानम्, तदभावे तु आर्द्रवस्त्रेण हृदयमन्त्रमुच्चरन् मार्जनं च कुर्यात् । एतेषामप्यभावे भस्मस्नानम्, तेष्वप्यशक्तश्चेत् तूष्णीं पुष्पाञ्जलिं दद्यात् । (३उ०-६)

तस्याप्यभावे शिवं वा गुरुं वा पश्येत् । रोगाद्विमुक्तः महास्नपनं कुर्यात् मूलमन्त्रेणायुतं जुहुयात् । (७-८)

चतुर्वर्णजाताः प्रतिलोमाश्च तेनैव मार्गेण कुर्युः। स्वजात्यदीक्षितेन स्पृष्टाश्चेत् शुद्ध्यर्थं भस्मस्नानं कृत्वा मूलमन्त्रं पञ्चशतं जपेयुः। (९-१०)

कामादकामाद्वा शूद्रान्नभोजने चान्द्रायणं कृच्छ्रं चरेत् , कामादकामाद्वा प्रतिलोमान्नभोजने उपवासं चरित्वा महाव्योममन्त्रं शतं जपेत् । कामतो भोजने पञ्चाङ्गषडङ्गमन्त्रान् सहस्रं जपेत् । (११-१३पू०)

निर्माल्यलशुनमत्स्यमांसानि वर्ज्यानि । तेषामकामतो भक्षणे ईशानमन्त्रं शतं जपेत्, तेषामेव कामतो भोजने सान्तपनं कृच्छ्रं चरेत् । निर्माल्यलङ्घने तद्दाने वा स्नानद्वयं कार्यम् । (१३उ०-१५पू०)

चण्डालस्पर्शने कृते शिवमन्त्रं शतं जपेत् , प्रमादात् स्पर्शने सचेलस्नानं कृत्वा महाव्योम-मन्त्रेण पञ्चगव्यं च पिबेत् । शिवाग्निगुरुनिन्दाश्रवणे हृदयमन्त्रेण कर्णौ पिधाय सचेलस्नानमुपवासं च कृत्वा प्रासादमन्त्रं शतं जपेत् , सान्तपनं कृच्छ्रं चरित्वा द्विगुणं शिवपूजां च कुर्यात् । (१५ उ०-१८)

स्वजात्यदीक्षितस्य शवं कामतोऽकामतो वा स्पर्शने सचेलस्नानं कृत्वा हृन्मत्रेण घृतं प्राश्य अघोरेण सह शिखामन्त्रं च जप्त्वा स्नानद्वयं कुर्यात्, शिवमन्त्रं च शतं जपेत् । अकामतः स्पर्शनेऽस्त्रमन्त्रं हृदयेन सह त्रिंशत् जपेत् । (१९-२१पू०)

अदीक्षितविप्रस्य शवं प्रमादात् स्पर्शने स्नानं कृत्वा प्रासादमन्त्रं शतं जपेत्, तमेव कामात् स्पर्शने स्नानं कृत्वा पूर्वोक्तमन्त्रसहस्रं जपेत् । शवदर्शने भस्मना शुद्धिर्भवति कामतो दर्शने सद्यमन्त्रं शतं जपेत् । (२१उ०-२३पू०)

दीक्षितस्य शवस्पर्शे भस्मना शुद्धिर्भवति । दीक्षितस्य वयस्यस्य शवं प्रमादात् स्पर्शने समुद्रस्नानमेकरात्रोपवासं च कुर्यात् । अदीक्षितशवानुगमने समुद्रस्नानं कृत्वा व्योमव्यापिमन्त्रं शतं जपेत् । अकामात् करणे शिवमन्त्रं शतं जपेत् । अदीक्षितशवस्पर्शने भस्मस्नानेन शुद्धिर्जायते । (२३उ०-२७पू०)

अदीक्षितस्य नृपस्य शवस्य प्रमादात् स्पर्शने समुद्रस्नानम् एकरात्रोपवासं प्रातर्गव्यपानं च कृत्वा प्रासादमन्त्रसहस्रमघोरास्त्रमन्त्रं त्रिसहस्रं च जपेत् । कामात् स्पर्शने स्नानद्वयं कृत्वा अघोरास्त्रमन्त्रसहस्रं जप्त्वा गोग्रासं च दत्वा सामान्याचारं द्विगुणं चरेत् । (२७उ०-३०पू०)

दीक्षितस्यादीक्षितस्य वा शवानुगमने सचेलस्नानं गोमयालेपनं च कृत्वा पूर्वोक्तमार्गेण जपं कुर्यात्। कामादनुगमने स्नानं त्रिरात्रोपवासं च चरित्वा प्रासादमन्त्रं शतं जपेत् । तयोः शवयोर्दर्शने स्नानं पूर्ववत् कृत्वा हृदयमन्त्रं द्विगुणं त्रिगुणं[वा]जपेत् । अदीक्षितनृपशवस्य प्रमादात् स्पर्शने पूर्ववत् स्नानं त्रिरात्रोपवासं च कृत्वा पञ्चगव्यं पीत्वा प्रासादमन्त्रं शतं जपेत् । (३०उ०-३४)

अकामात् स्पर्शने पूर्वोक्ताः क्रियाः द्विगुणं कृत्वा गोग्रासं च दद्यात् । कामतोऽकामतः शवा-नुगमने स्नानद्वयं त्रिवारघृताशनं च कृत्वा अघोरास्त्रमन्त्रमयुतं जपेत्, पूर्ववत् स्नात्वा गोमयेनालिप्य पुनः स्नात्वा मूलमन्त्रं च सहस्रं जपेत्, समुद्रस्नानं पुनर्गोमयालेपनं च कृत्वा अघोरास्त्रमन्त्रेण सह पञ्चाक्षरं च सहस्रं जपेत् । (३५-३८)

अदीक्षितवैश्यस्य शवं कामतः स्पर्शने स्नानं कृत्वा घृतं प्राश्य एकरात्रमुपोष्य हृन्मन्त्रेण गव्यं प्राशयेत् । तप्तकृच्छ्रं चरित्वा सावित्रीमन्त्रजपानन्तरं त्रिसहस्रमघोरास्त्रं च जप्त्वा ब्राह्मणान् भोजयित्वा शिवस्य स्नपनं कुर्यात् । (३९-४२पू०)

अवान्तरशैवस्य शवं कामतः स्पर्शने समुद्रस्नानं कृत्वा हृदयमन्त्रेण घृतं प्राश्य गोमयेन सर्वाङ्गं मूलमन्त्रेण लिप्त्वा स्नानं कृत्वा पुनर्घृतं हृदा प्राश्य एकाहमुपोष्य गव्यं च प्राश्य सद्योजातमन्त्रं सहस्रं जपेत् । (४२उ०-४५पू०)

अदीक्षितशवं प्रमादात् स्पर्शने स्नानद्वयं कृत्वा गोग्रासं च दत्वा ग्रामान्तरे वसेत् । एतयोः शवयोः कामादनुगमने पूर्ववत् स्नात्वा सान्तपनं कृच्छ्रं चरित्वा यथाविभवं ब्राह्मणान् भोजयित्वा अघोरास्त्रं शिवास्त्रं च प्रत्येकं शतं जपेत् । अकामादनुगमने कृच्छ्रं चरेत् ।(४५उ०-४८)

कामतोऽकामतो वा अदीक्षितशवदर्शने स्नानं कृत्वा मूलमन्त्रं जपेत् । कामाद्दर्शने जाते प्रासादमन्त्रशतं जपन् स्नानद्वयं कुर्यात् । अदीक्षितशवस्पर्शे उक्तयोर्द्विगुणमाचरणीयम् । (४९-५१ पू०)

शिवदीक्षायुक्तशूद्रः शूद्रशवस्पर्शे सचेलस्नानं कृत्वा प्रासादमन्त्रं शतं जपेत् । शवानुगमने तथैव कृत्वा द्विगुणं मन्त्रजपं कुर्यात् । अकामेनानुगमने शिवस्य स्नपनं कुर्यात् । कामादनुगमने सान्तपनं चरित्वा वामदेवमन्त्रं त्रिसहस्रं जपेत् । (५१ उ०-५४ पू०)

दीक्षायुक्तस्य शूद्रस्य शवं कामतः स्पर्शे पूर्ववत् स्नात्वा गव्यं हृन्मन्त्रेण प्राशयेत् । एकरात्रमुपोष्य प्रभाते स्नात्वा अघोरास्त्रं त्रिसहस्त्रं जपेत् । शवानुगमने अधिकं जपमाचरेत् । प्रमादादनुगमने स्नानं कृत्वा स्नपनं विधाय प्रासादमन्त्रं विंशत्सहस्रकं जपेत् । (५४ उ०-५७)

प्रतिलोमनराणां शवस्य प्रमादात् स्पर्शने पूर्वोक्तविधानं द्विगुणं कुर्यात् । कामात् स्पर्शनेऽपि पूर्वोक्तमाचरणीयम् । अकामात् स्पर्शे स्नात्वा पूर्वोक्तवत् कृच्छ्रं त्रिगुणं कुर्यात् । (५८-५९)

पुत्रकस्य शिष्यस्य शवस्पर्शने शिवमन्त्रं शतं जप्त्वा स्नानं च कृत्वा घृतं प्राशयेत्। दीक्षापुत्रशवस्पर्शने सचेलस्नानं प्राणायामशतं प्रासादमन्त्रशतजपं च कुर्यात् । (६०-६१)

अन्येषां शिवसम्बन्धिपुत्राणां शवादिस्पर्शने पूर्ववत् स्नात्वा प्रासादमन्त्रं शतं जपेत् । (६२-६३ पू०)

सूतके आदिशैवमहाशैवौ त्र्याहाशौचमाचरेताम् , अनुशैवः षड्दिनानि आशौचम् , अपरे नवदिनान्याशौचमाचरेयुः । अवान्तरशैवः द्वादशदिनानि इतरे पञ्चदशदिनानि आशौचम् आचरेयुः । (६३उ०६४)

सूतकाशौचं गृहस्थ एव कुर्यात् । सूतककाले सर्वप्रयत्नेन शिवं दृष्ट्वा गुरुं पूजयेत् । एवमकृत्वा भोजनग्रहणे महादोषः सम्भवेत् । (६५-६७ पू०)

देशिकाचारयुक्तो नित्यपूजासमन्वितश्च प्रेतकसूतकं पूर्वोक्तवदाचरेत् , अनाचार्यकुले जातः शिवशास्त्रबोधकश्च नित्यपूजाविहीनश्चेत् दशाहं सूतकमाचरेत् । (६७ उ०-६९ पू०)

शैवसम्बन्धहीनानां ब्राह्मणादीनां चातुर्वर्णानां क्रमेण दशदिनपञ्चदशदिनविंशद्दिन-त्रिंशद्दिनानि सूतकमाचरणीयम् । प्रेतयुक्तगृहे वासे ब्राह्मणः सप्तस्नानं कृत्वा प्रासादमन्त्रेण पञ्चगव्यम् पिबेत् । क्षत्रियवैश्यशूद्रास्तु स्नात्वा व्योमव्यापिमन्त्रं शतं जपेयुः ।(६९ उ०-७२)

द्वयोर्जात्योः तमेव मन्त्रं द्विगुणं त्रिगुणं वा जपेत् । सूतकयुक्तनृपस्य स्पर्शने स्नानद्वयम् , सूतकयुक्तवैश्यस्य स्पर्शे महाव्योमेतिमन्त्रजपः, सूतकशूद्रस्य स्पर्शने तस्य मन्त्रस्य द्विगुणं जपश्च विहिताः। (७३-७५ पू०)

आशौचयुक्तनरस्य स्पर्शने शूद्रः स्नानं कृत्वा पूर्वोक्तमन्त्रं द्विगुणं जपेत् । (७५ उ०-७६पू०)

रजस्वलानारीस्पर्शने सद्यः स्नात्वा अघोरास्त्रं शतं जपेत्। रजस्वलायाः द्वितीयतृतीय-चतुर्थदिने स्पर्शे सति स्नानं कृत्वा गव्यं प्राशयेत् । कामात् स्पर्शे अघोरमन्त्रस्य द्विगुणं जपेत् । (७६उ० - ७८)

भोजनकाले देशिकस्य पत्न्याः आर्तवसम्भवे भुक्तशेषं त्यक्त्वा पूर्ववत् स्नात्वा एक-रात्रोपवासानन्तरं प्रातर्गव्यं हृदयमन्त्रेण पिबेत् । अघोरास्त्रं च सहस्रं जपेत् । भोजनकाले तस्य सहवासश्रवणेऽन्नशेषं त्यक्त्वा भस्मस्नानं कृत्वा प्रासादमन्त्रं शतं जपेत् । (७९- ८२पू०)

प्रातःकाले रजोयुक्तनारीवाक्यश्रवणे पूर्ववत् स्नात्वा पञ्चगव्यं च प्राशयेत् । भोजनकाले चण्डालभेरिशब्दश्रवणे अन्नशेषं त्यक्त्वा भस्मस्नानं कुर्यात् । मौनेन कर्णौ पिधाय भेरीशब्दान्ते भुञ्जीत । प्रमादात् भोजनेऽघोरास्त्रं शतं जपेत् । (८२ उ०-८५ पू०)

आशौचयुक्तो देवं पूजयित्वा पूजान्ते यदि जानाति द्रव्यसारं भुञ्जीत । अन्यथा करणे देवस्तमालयं मुञ्चति । प्रमादात् पूजाकरणे महत्स्नपनं कुर्यात् । (८५ उ०-८६)

शैवानां तत्कालभोजनं शिवमन्त्रप्रभावेण विनश्यति । तस्मात् नित्यपूजाया हानिं न कुर्यात् । नित्यार्चनाग्नियुक्तानां इयमेव रीतिरनुसर्तव्या । (८७-९०)

शिव [दीक्षा] युक्तस्य पुत्रस्य द्रव्यसेवने स्नानद्वयं कृत्वा प्राणायामसहस्रमघोरास्त्रमन्त्रजपं च कुर्यात् । (९१-९४)

प्रायश्चित्तविध्यनन्तरं स्नपनविधिः प्रस्तूयते इति पटलान्ते सूचितम् । (९४१/२) इति प्रायश्चित्तविधि- पटलार्थसङ्ग्रहः ।

षट्षष्टितमेऽस्मिन् पटले प्रासादमण्डपलिङ्गबेरपिण्डिकाप्राकारगोपुरादीनाम् अन्येषां च जीर्णोद्धारो वक्ष्यते । (१-२पू०)

स्वायम्भुवादिलिङ्गानां जीर्णोद्धारो न कर्तव्यः । मोहादज्ञानाद्वा लिङ्गचालनं सर्वनाशकरं भवेत् । लिङ्गे जीर्णेऽपि तदेव पूजयेत्, प्रतिष्ठाक्रममार्गेण प्रतिष्ठां च कुर्यात् । (२उ०-४)

स्वायम्भुवं धाम अलक्षणं बहुवर्णं सशैवलम् एकद्रव्येण च निर्मितम् । कालेन जीर्णे सति तदेव धाम दृढं बध्नीयात्, द्रव्यान्तरेण च निर्माणे राजराष्ट्रयोर्नाशः सम्भवेत् । शास्त्रोक्तमार्गेण जलसम्प्रोक्षणं च कुर्यात् ।(५-७पू०)

पौरुषधामसु एकाङ्गहीने वा सर्वाङ्गानां क्षये वा तद्द्रव्येणैव पूर्वोक्तविधिना समं कृत्वा सम्प्रोक्षण- माचरेत् । सर्वथा हीनद्रव्यं वर्जयित्वा वरद्रव्येणैव कर्तव्यम् । (७उ०-१०)

मृण्मयदारुजलोहजशिलामयबेराणि स्थापितपूजितानि जीर्णानि अग्निदग्धान्यथवा भिन्नानि चेत् न पूजनीयानि, मोहात् पूजने राजराष्ट्रादिनाशः सम्भवेत् । (११-१२)

तादृशबेराणि जले वा स्थले वा क्षिप्त्वा मृद्भिराच्छादयेत् , नवां च प्रतिमां तत्तद्द्रव्येणैव कुर्यात् । मृद्दारुलोहशैलरत्नजेषु बेरेषु पूर्वपूर्वादुत्तरोत्तरं वरम् । हेमजं बेरं सर्वोत्कृष्टम् । (१३-१६पू०)

उक्ततालप्रमाणेन समप्रमाणेन वा बेरं कुर्यात्, सर्वथा हीनप्रमाणेन न कुर्यात् । मानोत्कृष्टमेव कर्तव्यं नापकृष्टम् । उक्तक्रमेण बेरं कृत्वा सम्प्रोक्षणमाचरेत् । (१६उ०-१८पू०)

स्वायम्भुवलिङ्गस्य पिण्डिकायां जीर्णायाम् इष्टकया जीर्णभागस्य सन्धानमाचरेत् । पञ्चाङ्गानां क्षये शिलया दृढं बध्नीयात् । शैलजादिबेरेषु एकाङ्गुलप्रमाणहीने न दोषः सम्भवति । तत्तल्लक्षणमार्गेण जीर्णाङ्गं समं कृत्वा सकलाङ्गं कुर्यात् । (१८उ०-२१)

पौरुषलिङ्गे जीर्णे शैलजं चेत् तद्द्रव्येणैव जीर्णोद्धारः कर्तव्यः, अन्यथाकरणे दोषः सम्भवेत् । जीर्णां लिङ्गपिण्डिकां समुद्रे विनिक्षिप्य उक्तप्रमाणेन तदधिकं वा लिङ्गानुरूपं पीठं सलक्षणं पीठबन्धं विना कृत्वा अष्टबन्धं शास्त्रविहितेन विधिना कुर्यात् । (२२-२५) स्वायम्भुवादिलिङ्गेऽग्निदग्धे न दोषः सम्भवति । अग्निदाहे पुनः स्थापनमार्गेण कुर्यात् । (२६-२७पू०)

मण्डपप्राकारादिजीर्णेषु उद्धारःपूर्वोक्तक्रमेण कर्तव्यः। कर्णकूटादिहीने सम्पूर्णोद्धारणं कुर्यात् । प्रथमेष्टकायां शैलजायां सत्यां तामेव शिलां न्यसेत् । पुरातनसालात् प्राकारो न समश्नेत्

मुखादन्यत्र स्थानेषु विधानेन समं कुर्यात्। पुरातनसाले सलक्षणे सति तेनैव मानेन सर्वशः कुर्यात्। (२७उ०-३१पू०)

इष्टकादिजीर्णे गोपुरादिषु च पुनःसन्धानं शैलजे मानाधिक्येन कुर्यात्। भारयोगादिजीर्णेषु नवान् वनादानीय शास्त्रोक्तमार्गेण कुर्यात्। पश्चात् तरुभिः संग्राह्य तत्तत्स्थानेषु स्थपतिर्योजयेत्। एतेष्वशक्तश्चेत् न कारयेत्। कूटे मालिकायां वा जीर्णे यथालाभं नवं कृत्वा उद्धारणं कुर्यात्। (३१उ०-३६पू०)

बाणलिङ्गस्य त्र्यङ्गुलादधिकभागे जीर्णे तत् समुद्रे निक्षिप्य अन्यल्लिङ्गं विधिना स्थापयेत्। अज्ञातप्रतिष्ठाप्रकारकं पारम्पर्येण पूजितं च पौराणिकलिङ्गमित्युच्यते। तस्मिन् लिङ्गे यवमानक्षये वापि शास्त्रोक्तविधिना सम्प्रोक्षणं कर्तव्यम्। तस्य लिङ्गस्य खण्डस्फोटादिके तत्पुरतः मूर्तिलिङ्गं स्थापयेत्। (३६उ०-४०)

यवान्तरप्रमाणेन हीनं चेत् स्वर्णरजतताम्रादिष्वन्यतमेन पट्टं कृत्वा सम्पूरयेत् पुनः स्थापनमार्गेण लिङ्गवत् कुर्यात्। एकद्रव्यकृतं लिङ्गं न पौराणिकं भवति। अष्टादशपुराणेषु उक्तं लिङ्गं तन्मूलशास्त्रविधानेनैव स्थापयेत्। (४१-४४पू०)

महाबेरेषु जीर्णाङ्गं तत्तद्वस्तुनैव पुनःसन्धानं कुर्यात्। उत्तमाङ्गविहीने तु तद्बेरमग्नौ द्रवीकृत्य पुनःसलक्षणां प्रतिमां कृत्वा विधिना सम्प्रोक्षणं कुर्यात्। (४४उ०-४६)

अधुना विशेषविधौ प्रासादे जीर्णे सति तिथिनक्षत्राद्यपेक्षां विना शीघ्रमेव पुनः सन्धानमाचरेत्। यस्मात् प्रासादस्य जीर्णावस्थायाम् अल्पशून्यत्वात् भूतप्रेतपिशाचयक्षगन्धर्व-ब्रह्मराक्षसाः आश्रयन्ते भयदुर्भिक्षमरणादीनि च ते कुर्वन्ति यस्माच्च तत्काले प्रमादात् क्रियमाणानि पूजानैवेद्योत्सवादीनि निष्फलानि च भवन्ति तस्मात् सर्वप्रयत्नेन कालापेक्षां विना शीघ्रमेव पुनः सन्धानादिकं कर्तव्यम्। (४७-५१)

देहः प्रासादः प्रोक्तो देही च लिङ्गम् उच्यते; उभयोरन्तरं नास्ति। स्थूललिङ्गं विमानं स्यात् सूक्ष्मलिङ्गं सदाशिवः सदाशिवस्य मध्ये शिवं भावयेत्। (५२-५३) प्रकारान्तरेण स्थूललिङ्गे सदाशिवम् अन्तर्लिङ्गे च शिवं क्रमात् पूजयेत्। एवं व्यापकव्याप्तिरूपेण विमानं लिङ्गं च भावयेत्।

लिङ्गाभावे विमानं पीठं च लिङ्गवद्भावयन् आवाहनादिपूजां बलिं च कुर्यात् । यजनादिकं सर्वं विमाने कुर्यात् । विमानहीने पूजाकर्माणि निष्फलानि भवेयुः । (५४-५७)

भौमादिस्थूपिपर्यन्तं शिवरूपमुच्यते । सम्पूर्णावयवैर्युते देहे सति देही तं न मुञ्चति । शिरःस्थूपिगलं पदाधिष्ठानमञ्चकं च अङ्गमित्युच्यन्ते, कूटशाला उपाङ्गं नासिपञ्जरं प्रत्यङ्गं इति चोच्यन्ते। (५८-६०पू०)

विना मन्त्रोच्चारणं पूजाकरणे शवादिस्पर्शने आलयस्य अङ्गप्रत्यङ्गादिहीने च पूजाकरणे च बेरालयाद्गता शक्तिरादित्यमण्डले वसति । द्वादशाब्दावसाने च सा शक्तिः शिवे लीयते । तदूर्ध्वे च काले स्थानशक्तिरपि परमपदं गच्छति, आलयं च शून्यालयं सम्भवति । तस्मात् शीघ्रमेव जीर्णोद्धारणादिनाऽऽलयं नवीकृत्य कर्षणादिप्रतिष्ठान्तक्रियाः सर्वाश्च कुर्यात् । (६०उ०-६४पू०)

प्रासादस्य जीर्णे काले सर्वतत्त्वानि लिङ्गे संयोज्य पूजयेत् । पूर्वलिङ्गे हीने सति जीर्णं लिङ्गं चोद्वास्य विमानं पूजयेत् । लिङ्गविमानयोरन्योन्यभावं च विचिन्तयेत् । पञ्चावरणदेवताः द्वारपालकांश्च मूल एव पूजयेत् । स्थपतिः स्थापकाज्ञानुसारं विमानस्य जीर्णोद्धारं यथालक्षणं कृत्वा इत्थं विज्ञापयेत् "द्वादशाब्देष्वन्तरे गृहं सम्यङ्निर्माय पुनस्त्वां स्थापयाम्यहम् "। इति । स्थपतिप्रतिज्ञां देशिकः कर्तुश्च ज्ञापयेत् । (६४उ०-७१पू०)

जीर्णोद्धारकाले विमाने शिल्पिस्पर्शनं नित्यपूजाविरोधत्वात् प्रतिदिनं शिल्पिकर्मानन्तरं पुण्याहं वाचयित्वा पवमानमन्त्रोच्चारणपूर्वकं पञ्चगव्यगन्धोदकादिभिः संस्नाप्य शान्तिहोमं कृत्वा ब्राह्मणांश्च भोजयित्वा अर्चनां कुर्यात् । पूजान्ते शिल्पिभिः विमानोत्पवनं कारयित्वा जीर्णोद्धार-क्रियासमाप्तौ पुनः संस्थापनं कारयेत्। आचार्यं वस्त्रहेमाङ्गुलीयकैः पूजयित्वा भक्तान् परिवारांश्च यथाशक्ति च भोजयेत् । (७१उ० - ७६$^{१}$/२) इति जीर्णोद्धारविधिपटलार्थसङ्ग्रहः ।

सप्तषष्टितमे पटले महाशान्तिव्रतविधिरुच्यते । व्रतमिदं शिवलोकप्रदं शिवप्रीतिकरं सर्वशत्रुनाशकरं सर्वपापक्षयकरं भोगमोक्षप्रदायकं प्रजावृद्धिकरं च भवति । (१-२)

श्रावणमासे श्रवणनक्षत्रं भाद्रपदे प्रोष्ठनक्षत्रं आश्विने आश्वर्क्षं कार्त्तिके कृत्तिका धनुर्मासे आर्द्रा पुष्ये पुष्यं माघे मघानक्षत्रं फाल्गुने उत्तरफल्गुनी चैत्रे चित्रा वैशाखे विशाखा ज्येष्ठे मूलानक्षत्रं आषाढे उत्तराषाढानक्षत्रं च महाशान्तिव्रतोचितकालाः। अथवा मासे मासे पूर्वपञ्चम्यामपि व्रतमनुष्ठातुं शक्यते। (३-६पू०)

नद्यब्धिवापीकूले पर्वताग्रे महावने ग्राममध्ये सभास्थाने देवालयसमीपे वा भूप्रदेशं संशोध्य विधिवत् सुन्दरामेकां प्रपां निर्मिमीत। (६उ०-७) व्रतार्थं सहस्रं वा तदर्धं वा शतं वापि तदर्धार्धं वा लिङ्गं मृद्दारुलोहशैलेष्वन्यतमेन अथवा धातुजं क्षणिकं रत्नजं वा लिङ्गं पूजार्थं सम्प्रकल्पयेत्। (८-९)

यवत्रयं समारभ्य यवैकैकविवर्धनेन द्विशतयवं यावत् मृल्लिङ्गस्योदयो भवेत्। एकाङ्गुलं समारभ्य अर्धार्धाङ्गुलवर्धनात् चतुर्विंशाङ्गुलं यावत् दारुलिङ्गस्य मानं भवेत्। यथालाभप्रमाणं रत्नलिङ्गस्य भवति। माषत्रयमारभ्य माषैकैकवर्धनेन द्वादशमाषं यावत् लोहजलिङ्गस्य मानं भवेत्। अङ्गुलत्रयमारभ्य अङ्गुलैकैकवर्धनेन अष्टसहस्राङ्गुलं यावत् शैललिङ्गस्योदयः भवेत्। क्षणिकलिङ्गं तु यथाकामप्रमाणेन कल्प्यते। (१०-१४)

मृद्दारुशैललोहलिङ्गानां कल्पने लिङ्गायामस्य वेदांशे एकांशं लिङ्गविस्तारो भवति। अथवा त्रिभागैकस्य पञ्चांशे द्व्यंशो लिङ्गविस्तारः लिङ्गायामे त्र्यंशेंऽशं तस्य मूले चतुरश्रकं भवेत् शेषं वृत्तरूपं वा सर्वं सुवृत्तमेव वा भवेत्। लिङ्गं सूत्रोपेतमथवा विहीनं वा स्यात् तच्छिरस्तु छत्राकारं भवेत्। (१५-१८पू०)

एकस्मिन्नेव लिङ्गे सर्वलिङ्गानि कर्तुं शक्यन्ते। लिङ्गायामं त्रिधा विभज्य व्योमांशं भूगतं कृत्वा एकांशं पीठबन्धम् एकांशमर्चनार्हकं च कुर्यात्। (१८उ०-१९)

प्रकारान्तरेण लिङ्गस्य पञ्चभागे द्व्यंशं पीठनिवेशनं त्रिभागं पूजार्हं च स्यात्। लिङ्गस्य सप्तभागे द्विकोलकमर्चाभागं कृत्वा शेषं पिण्डिप्रवेशार्थं कुर्यात्। (२०-२१पू०)

पूजांशस्य पञ्चविंशतिभागेन विभक्ते एकैकं भागं चत्वारिंशद्भागेन विभजेत्। एवं सहस्रलिङ्ग- कल्पनविधिः। (२१उ०-२२)

अयुतलिङ्गकल्पनार्थं लिङ्गोदये पञ्चाशद्भागं कृत्वा चत्वारिंशांशे पञ्चांशं कुर्यात् । लिङ्गस्य पूजांशं दशधा विभज्य एकैकं पञ्चाशदंशं कृत्वा पञ्चशतलिङ्गं निर्मिमीते। लिङ्गोदयं चतुर्धा विभज्य एकैकं सप्तविंशतिभागं कृत्वा अष्टोत्तरशतलिङ्गं कल्पयति। लिङ्गोदयं पञ्चधा कृत्वा एकैकं पञ्चांशकरणे पञ्चविंशतिलिङ्गनिर्माणं भवेत् । एकैकं पञ्चाशद्भागकरणे द्विशतपञ्चाशल्लिङ्गं निर्मीयते । (२३-२७पू०)

महालिङ्गस्य विस्तारात् पादं वाऽष्टांशं वाऽल्पलिङ्गस्य तारार्धं भवेत् । अल्पलिङ्गं महालिङ्गाद्विनिर्गतं भवेत् । लिङ्गोपरि लिङ्गान्तरं न कर्तव्यम्, लिङ्गयोरन्तराल एवान्यलिङ्गं कल्पयेत् । (२७उ०-२९) शिरोवर्तनयुक्तं वा हीनं वा लिङ्गं कल्पयेत् । महालिङ्गशिरोमानस्याधः अल्पलिङ्गानि कर्तव्यानि तानि च सूत्रहीनानि स्युः। शिवलिङ्गविधानवत् नन्द्यावर्तशिलापीठं भवेत् ।(३०-३१)

रत्नलिङ्गं तद्विधानोक्तमार्गेण स्थापनीयम् । एवं लक्षणयुक्तानि लिङ्गानि सम्पाद्य निश्चितदिवसात् पूर्वेद्युरथावा ततः सप्तदिनेभ्यो नवदिनेभ्यो वा पूर्वे सायाह्नसमये आचार्यः स्नात्वा यजमानेन सह प्रपामण्डपं प्रविश्य भूतशुद्धिं सकलीकरणं प्रदक्षिणं च कृत्वा लिङ्गसंख्यासमं मूलमन्त्रं यजमानसमन्वितो जपेत् । जपान्ते नियतेन्द्रियः यजमानेन सह मण्डपोस्योत्तरपार्श्वे सैकतोपरि शाययेत् । (३२-३६)

ब्राह्ममुहूर्ते उत्थाय पादप्रक्षालनमुखशुद्ध्यादिकं च कृत्वाऽऽचम्य भस्मना तिलकं धृत्वा मूलमन्त्रं जपेत् । (३७-३८पू०) ततो यजमानसहितो यथाविधि स्नात्वा सन्ध्यावन्दनादिनित्यकर्माणि समाप्य प्रपामण्डपं प्रविश्य सकलीकृत्य मण्डपं पूजयेदथवा मण्डपं मनसा वा कल्पयेत् । चतुर्द्वाराणि समभ्यर्च्य मण्डपरक्षार्थं सशक्तिकमस्त्रराजं च पूजयित्वा मण्डपमध्ये पश्चिमे वा मन्त्रमयं वा दारुमयं वा पीठं विन्यस्य शुद्धवस्त्रैरुपर्यास्तरणं कल्पयित्वा तदुपरि लिङ्गसंख्यासमं शिवासनानि प्रकल्पयेत् । (३८उ०-४३पू०)

पुण्याहवाचनं कृत्वा पञ्चगव्यपञ्चामृतादीनि प्रकल्प्य लिङ्गानि स्नानवेद्युपरि न्यस्य अस्त्रमन्त्रोच्चारणेन पञ्चगव्यपञ्चामृतादिभिः तानि प्रक्षाल्य लिङ्गमन्त्रानुस्मरणपूर्वकं शिवासने स्थापयेत् । तत्तन्मन्त्रेण गन्धपुष्पधूपदीपाद्यैरभ्यर्च्य नैवेद्यताम्बूलानि च दद्यात् । नीलोत्पल-

कल्हारपद्मश्वेतपङ्कजार्कारग्वधचम्पकादिपुष्पेष्वन्यतमैर्वा रत्नैर्वा कनकैर्वा कर्पूरशकलेनाथवा बिल्वपत्रेण वा लिङ्गानि तत्तन्मन्त्रेणाभ्यर्चयेत्। (४३उ०-४८पू०)

पूजार्थमागतानि पुष्पाणि शुद्धपात्रे संगृह्य निरीक्षणादिभिः संशोध्य धूपदीपौ दत्वा यजमानम् अर्घ्यजलेन सम्प्रोक्ष्य शिवमन्त्रेण भस्मना तिलकं कल्पयित्वा शिवहस्तं संकल्प्य तं हस्तं यजमानमूर्धनि स्थापयित्वा मूलमन्त्रमष्टोत्तरशतं जपेत् । पूजार्थमाहृतानि पुष्पाणि यजमानहस्ते निक्षिप्य शङ्खध्वनिपूर्वकं प्रतिलिङ्गस्योपरि तत्तन्मन्त्रं समुच्चरन् निधापयेत्। (४८उ०-५२)

एकलिङ्गे विशेषविधिरुच्यते । पीठबाह्ये परितो त्रिहस्तं तदर्धं वा स्थलमानं व्यपोह्य पूजांशोदयसममानं मण्डलं कल्पयित्वा तद्बाह्ये सप्ततालसमुन्नतम् उत्सेधसमविस्तारं तदर्धार्धमपि वा त्रिमेखलायुतं द्विमेखलायुतं वा चतुरश्रं वा सुवृत्तं वा वेदिकां कल्पयित्वा सुधया सैकतैः शुद्धवारिभिश्च तां पूरयेत् । (५३-५६) तस्मिन् वारिमण्डले लिङ्गसाहस्रकं पश्यन् यजमानः भुक्तिमुक्तिकाङ्क्षी अग्रादिमूलपर्यन्तं मुक्त्यभिलाषी मूलाद्यग्रपर्यन्तं प्रत्येकं लिङ्गम् आवरणैः सह सम्पूजयेत् । लिङ्गं प्रत्याढकार्धं नैवेद्यं कल्पयित्वा धूपदीपादिभिः सह नृत्तान्तं यजेत । नृत्तगीतादिकं सर्वं लिङ्गस्य परितः कारयित्वा पूजान्ते शिवमन्त्रशतं जप्त्वा इष्टबन्धुजनैःसह यजमानस्तस्मिन् वारिमण्डले यद्देवा इति मन्त्रमुच्चरन् स्नायात् । पापविनिर्मुक्तश्च शिवसायुज्यमाप्नुयात्। (५७-६३)

महाशन्तिव्रतदर्शनात् लिङ्गसहस्रप्रणामाच्च शिवलोके शिवेन सह मोदते। (६४)

आचार्यं गोभूमिहिरण्यदानेन पूजयित्वा तस्य व्रतोपकरणानि नवस्त्राणि च दद्यात्। (६५)

अनन्तरे पटले गौरीव्रतमुच्यते इति प्रतिज्ञा।(६६पू०) इति महाशान्तिविधिपटलार्थसङ्ग्रहः ।

अष्टषष्टितमे पटले नित्यार्चनहीने प्रायश्चित्तविधिरुच्यते । शिवद्विजकुलोत्पन्नः सुप्रसन्नो देशिकः विधिना स्नात्वा शुक्लवस्त्रोत्तरीययज्ञोपवीतादिधरः पञ्चाङ्गभूषणयुक्तश्च प्रासादं प्रविश्य पादप्रक्षालनानन्तरं देवदेवं नमस्कृत्य त्रिपुण्ड्रादि धृत्वा सकलीकरणं च कृत्वा सद्योङ्कुराणि वापयेत् । (१-४ पू०)

प्रासादाग्रे गोमयेनालिप्य पिष्टचूर्णैरलंकृत्य शालिभिः स्थण्डिलं कृत्वा तन्मध्ये साष्टपत्रं सकर्णिकं पद्ममालिख्य तण्डुलतिलदर्भपुष्पैश्च परिस्तरेत् । (४उ०-६पू०) सुवर्णरजतताम्राद्यन्यतमेन निर्मितान् मृण्मयान् वा नवकलशान् पक्वबिल्वफलाकारान् गृहीत्वा एकद्वित्रियवान्तरं तन्तुभिस्तान् वेष्टयित्वा प्रक्षाल्य सन्धूप्य सकूर्चान् सापिधानान् वस्त्रहेमसंयुतान् गन्धोदकयुतान् तान् वामपार्श्वे स्थापयेत् । पुण्याहं वाचयित्वा कुम्भानुद्धृत्य शिवास्त्रकैः सम्प्रोक्ष्य स्थण्डिलोपरि स्थापयेत् । (६उ०-१०पू०)

व्याप्यव्यापकभावज्ञः सर्वव्यापिनं निष्कलं सकलाकलं शिवं पञ्चावरणसंयुतं कुम्भमध्ये आवाहयेत् । अष्टादशगणान् लोकपालान् वसून् त्रयस्त्रिंशद्देवादींश्च कुम्भमध्ये आवाहयेत् । विधिना सदाशिवं च ध्यात्वा वर्धन्यां शक्तिबीजं च विन्यसेत् । परितोऽष्टविद्येश्वरान् तत्तत्कलशे स्वस्व-बीजैश्च आवाह्य गन्धपुष्पादिनाऽभ्यर्चयेत् ।(१०उ०-१५पू०)

प्रागुक्तविधिनाऽग्न्याधानादिकं कृत्वा तत्त्वव्याप्तिक्रमेण पूर्वोक्तसंख्यया जुहुयात् । समिदाज्यचरुतिलसर्षपमुद्गगुलसक्तुलाजकदलीफलैः सद्याद्यस्त्रपर्यन्तं पूर्वोक्तवद्धुत्वा घृतेन सहस्रं वा तदर्धं वा मूलमन्त्रेण जुहुयात् । तद्दशांशमङ्गमन्त्रैः पृथक् पृथक् जुहुयात् , रात्रौ जागरणं च कुर्यात् । (१५उ०-१९पू०)

प्रातरुत्थितो देशिकः स्नानसकलीकरणादि कृत्वा पृथक् पृथक् देवान् हुत्वा तदनन्तरं जयादिरभ्याधानं राष्ट्रभृत् च जुहुयात् । अन्ते अघोरास्त्रपाशुपतास्त्रशिवास्त्राणि प्रत्येकं शतं मृत्युञ्जय-समन्वितं हुत्वा पूर्णाहुत्यनन्तरं घटं शिरसा वाहयन् स्वस्तिसूक्तैः सह हर्म्यप्रदक्षिणं कृत्वा गर्भगेहं प्रविश्य स्थण्डिलोपरि स्थापयेत् । (१९उ०-२३पू०) स्थिरराश्युभयं हित्वा चरराशिषु लिङ्गमध्ये योजनं करणीयम् । प्राणप्रवाहमार्गेण सदाशिवं ध्यायेत् । वर्धन्यां शक्तिबीजेन शक्तिं च भावयेत् । (२३उ०-२५पू०)

कुम्भोदकैः शिवं वर्धन्यद्भिः पिण्डिकाम् अष्टघटोदकैः परितश्च स्नापयेत् । अर्चनानन्तरं प्रभूतहविर्निवेद्य मण्डपाभ्यन्तरे पूर्वे पीठे च बलिं दत्वा ध्वजादिबलिपीठान्तं देवान् प्रत्येकमर्चयेत् ।

नित्यं नैमित्तिकं नित्योत्सवमहोत्सवादीनि च योग्यलिङ्गे समाचरेत् । (२५उ०-२८) इति नित्यार्चनाहीने प्रायश्चित्तविधिपटलार्थसङ्ग्रहः ।

एकोनसप्ततितमे पटले मकुटस्य निर्माणविधिरुच्यते । मकुटं त्रिधा प्रोक्तम् किरीटं करण्डं जटामकुटमिति । एषु निष्कलस्य सकलस्य च जटामकुटलक्षणमुच्यते । (१-२)

शिवमौलिषु त्रिसहस्रं सत्रिशतं सत्रिंशन्निष्कम् उत्तमस्वर्णसंख्याविधानम् । त्रिगुञ्जैस्त्रिंशतं सत्रित्रिंशन्निष्कं मध्यमं सत्रिंशच्छतनिष्कं त्रिगुञ्जसहितमधमस्वर्णविधानं च भवति । सोमास्कन्दादिमौलिषु शतं विना तन्मानं स्वर्णसंख्याविधानं भवति । एतन्मानद्विगुणं त्रिगुणं वापि ग्रहीतुं शक्यते । (३-५)

तत्तत्संख्याविधानोक्तं शुद्धकनकं हैमे ताम्रपात्रे वा मूलमन्त्रमुच्चरन् क्षिप्त्वाऽलंकृतगजपृष्ठे गब्लिकोर्ध्वे वाऽऽरोप्य ग्रामप्रदक्षिणं कुर्यात् । गुरुः स्नानादिकं निर्वर्त्य कर्तृदैवज्ञस्वर्णकारैः सहितः शिवस्य पुरतो वा देवालयस्य समीपे वा कर्मारम्भं कुर्यात् । पञ्चब्रह्ममन्त्रैरभ्यर्च्य यथाविधि होमं च कुर्यात् । (६-९)

हैमे पीठेऽथवाऽकल्पिते वा हाटकमस्त्रमन्त्रेण निधाय गन्धपुष्पादिनाभ्यर्च्य तन्मन्त्रेण त्रिधा देशिकः प्रहरेत् । स्वर्णकारस्तदनन्तरं संताड्य क्रियामारभेत । (१०-११)

सकलप्रतिमायाः तत्प्रमाणतः देहबन्धाङ्गुलमानेन चतुर्विंशाङ्गुलम् एकविंशाङ्गुलम् अष्टादशाङ्गुलं वा मकुटोत्सेधं कुर्यात् । (१२-१३)

निष्कलस्य शिरोवर्तनतस्तारं तत्समं नाहं च विस्तारसमतुङ्गं सप्ताष्टनवांशके एकांशोनाधिकं वा आयादिसंयुतं च भवेत् । तुङ्गतारवशेनायादि च भवेत् । ललाटमुकुलान्तं मानसूत्रं मानितव्यम् । (१४-१६पू०)

जटायुग्मयुतं परितो वृतमथवा तिर्यगूर्ध्वस्थजटाभिः मण्डितं वा स्यात् । द्वादशांशोत्सेधे एकांशेन जटोदयः कनिष्ठानामिकामध्याङ्गुलीनाहं वा तद्भवेत् । ललाटपट्टसंयुक्तं शिरोवर्तनमूर्ध्वतः तदुत्सेधवशेन चतुष्पूरितयुक्तम् अथवा तदर्धेन पूरितोत्सेधविराजितं च मकुटं भवेत् । मकुटस्य

मौलिमूलविशालं तत्त्रिभागैकं तदग्रविस्तारं क्रमेण कृशतां नीयमानं जटोदयमानेन द्विगुणं मुकुलोदयं च भवेत्। मुकुलं तद्रूपं वा भवेत्। (१६उ०-२१)

मकुटस्य वामे शिवगङ्गा तदर्धोदयमानतः वामेऽर्धशशी सव्ये नागार्कपुष्पाणि च कृत्वा नानापुष्परत्नादिशोभाढ्यं नानाचित्रक्रियोपेतं च मकुटं कारयेत्। अत्रानुक्तमन्यत्सर्वं युक्त्या मकुटम् अलंकुर्यात्। (२२-२४पू०)

अनन्तरे पटले मकुटारोपणमुच्यते। (२४उ०) इति मकुटनिर्माणविधिपटलार्थसङ्ग्रहः।

सप्ततितमे पटले मकुटारोपणं वक्ष्यते। तत्फलम् आयुरारोग्यवर्धनं पुत्रपौत्रवर्धनं समृद्धिः शत्रुनाशश्च।(१-२पू०)

उत्तरायणकाले शुक्लपक्षे देवनक्षत्रे राजग्रामानुकूलनक्षत्रे वा युद्धारम्भेऽथवा यजमानदिने वा तदवसाने शुभदिने मकुटारोपणं कुर्यात्। (२उ०-४पू०)

प्रासादस्य पूर्वादिचतुर्दिक्ष्वेकतमे नैर्ऋतादिविदिक्ष्वेकतमे वा गोपुरद्वारपार्श्वे पञ्चप्राकार-बाह्येऽथवा तदभ्यन्तरे वा काम्यदेशे वा वास्तुमध्ये वा मकुटारोपणार्थं मण्डपं कुर्यात्। (४उ०-६) मकुटारोपणात् पूर्वमेव रत्नलोहशिलामृद्भिः याज्ञिकैर्वृक्षैर्वा सिंहासनादीनि कारयेत्। आसनानि शैलदारवाणि चेत् रत्नग्रहविधानतः कार्याणि। पूर्वोक्तलक्षणयुक्तमासनमापाद्य स्थापनात् पूर्वरात्रावेव अधिवासनमाचरेत्।(७-९) मकुटमण्डपात् पूर्वे सौम्ये दक्षिणे नैर्ऋते ईशाने वा दिशि रङ्गमण्डपं कल्पयेत्। गुणवेदकरमारभ्य द्विद्विहस्तवर्धनेन नवमानं कृत्वा विंशदेकोनविंशकं कुर्यात्। रङ्गमण्डपं विमानाकारं कूटाकारमथवा प्रपां वा कुर्यात्। (१०-१२)

रङ्गमण्डपं चतुर्द्वारविदिक्कुड्यादियुतं भवेत्। तत्परितोऽलिन्दमेकांशं द्विभागं वा कल्पयेत्। बाह्ये संचारपङ्क्तिका तत्समा तद्द्विगुणा वापि स्यात्। अक्ष्यग्निवेदभूतांशैः चतुर्दिक्षु मुखभद्रकं च कुर्यात्। मण्डपं विस्तारसदृशायामं भवेत् तलोत्सेधं चांशमानं स्यात्। रङ्गमण्डपमष्टाष्टस्तम्भयुक्तं दर्भमालाभिः समावृतं द्वारतोरणगात्रवेष्टनवितानध्वजादियुतं मुक्तादामभिरलंकृतं कुड्यचित्र-तरङ्गवेष्टनादिनानाश्चर्यादिभिश्चालंकुर्यात्। (१३-१७)

मार्जनप्रोक्षणगोमयानुलेपनादिभिर्मण्डपशुद्धिं कुर्यात् । आचार्यः स्नात्वा सकलीकृतः सामन्यार्घ्यकरो मकुटमण्डपं प्रविशेत् । बलिदानपुरःसरं वास्तुहोमं पर्यग्निकरणं च कृत्वा गोमयेनानुलेपयेत्। आचार्यः शिष्यसहितोऽस्त्रमन्त्रतः स्नानं कृत्वा अन्तर्यागानन्तरं रङ्गमण्डपं प्रविशेत् । (१८-२१पू०)

अष्टद्रोणशालिभिः स्थण्डिलं कृत्वा शाल्यर्धतण्डुलैः पुष्पैस्तिलैर्लाजैश्च परिस्तरेत् । अस्त्रेण क्षालितान् कुम्भान् तन्तुभिः परिवेष्ट्य गन्धतोयेन पूरयित्वा तदुपरि कूर्चपल्लवादीनि निदध्यात् । सवस्त्रं सहिरण्यं नालिकेरफलयुतं शिवासनघटं स्थण्डिलस्य मध्ये तत्परितो लोकपालघटांश्च विन्यसेत् । (२१उ०-२४)

मध्यकुम्भे आसनाधिपतीन् तत्तद्दिग्घटे लोकपालांश्च पूजयित्वा नैर्ऋते पीठमध्ये मण्डपरूपिणीं ध्यात्वा गन्धपुष्पाद्यैः सम्पूज्य नैवेद्यं च दद्यात् । रात्रौ कुम्भाग्रे स्थण्डिलं कृत्वा विधिना शिवाग्निं न्यस्य समिदाज्यचरुलाजमाषशालियवतिलैः सद्यादिशिरःपर्यन्तं प्रत्येकं षोडश हुत्वाऽन्ते व्याहृतिं हुत्वा स्पर्शाहुतिं च कुर्यात् । हेममयकूर्मं पात्रे न्यस्य तं स्पृशन् पूर्वोक्तैर्मन्त्रैर्यथाक्रमं जुहुयात् । (२५-२९)

प्रभाते देशिकः स्नात्वा सकलीकृत्य उष्णीषोत्तरीयादिभिरलंकृतः मण्डपस्थघटान् पूजयित्वा पूर्णाहुतिं च जुहुयात् । मुहूर्ते सम्प्राप्तेऽभिषेकमण्डपे पूर्वदक्षिणमार्गतो मध्यसूत्रं समास्तीर्य सूत्राद्वामभागे देवाङ्गुलत्रयं नीत्वा शिवसूत्रं प्रसार्य तदासनमध्यमे स्थानकस्यासनं चेत्तद्विहाय दैविके पदमध्यमे मानुषस्यासीनासनके स्थाने घटान् स्थापयेत् । (३०-३४पू०)

पुण्याहं वाचयित्वाऽस्त्रमन्त्रतः प्रोक्ष्य पञ्चगव्येन संसिच्य पवमानमन्त्रमुदीरयन् शिलागर्ते कूर्मं पारदेन सह न्यसेत् । (३४उ०-३५) आधारशक्तिमन्त्रेणाभ्यर्च्य तदूर्ध्वे सुधया वेष्टकया वा शिलाभिर्वा त्र्यङ्गुलोन्नतामुत्सेधाष्टगुणायामां चतुरश्रां वेदिकां कृत्वा तदूर्ध्वे शिल्पिभिः सिंहासनं स्थापयेत् कर्मावसाने शिल्पिनश्च विसृजेत् । (३६-३८)

शिष्यसंयुक्त आचार्यः स्नात्वा सकलीकृत्य सर्वालंकारसंयुक्तः कलशान् गृहीत्वा स्वस्ति-सूक्तसमन्वितमभिषेकार्हमण्डपं प्रदक्षिणीकृत्य आसनस्य परितोऽष्टकलशान् स्थापयित्वा ऐन्द्रेशानयोर्मध्ये च तदासनकलशांश्च न्यसेत् । (३९-४१)

पुण्याहं वाचयित्वा सिंहासनमण्डपादींश्च प्रोक्षयित्वा नैर्ऋते स्तम्भमूले कुम्भान्मन्त्रं समादाय आसनोपरि विन्यस्य अन्यकुम्भोदकैस्तत्तन्मन्त्रैः स्नापयेत् । तत्रैव मण्डपाधिपतीनभ्यर्च्य पूर्वमन्त्रैर्यथाक्रमं सिंहासनं च सम्पूज्य धूपदीपं दत्वा पुष्पाञ्जलिमाचरेत् । एवं दिवाकालं नीत्वा सायाह्ने गणेशं सम्पूज्य पायसं च निवेद्य देवदेवस्य मकुटारोपणक्रमं विज्ञापयेत् । (४२-४६)

आचार्यः सोष्णीषः सोत्तरीयकः शिष्यसंयुक्तोऽस्त्रराजं चण्डेशं च गृहीत्वा छत्रचामर-धूपदीपादिसहितः वाद्यघोषसमन्वितः पर्वताग्रे नदीतीरे क्षेत्रे सिन्धुतीरके क्षीरवृक्षसमीपे वा मृत्तिकाग्रहणार्थं यायात् । तत्र पुण्याहं वाचयित्वा बलिदानानन्तरं पञ्चगव्येन संसिच्य वाममन्त्रम् उच्चरन् मृदं गृह्णीयात् । (४७-५०) मृदं पात्रे संस्थाप्य पूजयित्वा हृन्मन्त्रोच्चारेण वस्त्रेणाच्छाद्य देवाग्र-मण्डपाभिषेकार्हमण्डपरङ्गमण्डपपरिवारालयेष्वन्यतमे पूर्वमार्गेण प्रविश्य अङ्कुरार्पणं कुर्यात् । तदनन्तरं देवदेवस्य कौतुकं बध्नीयात् । सिंहासनोपयोगे क्रियाभेदो नास्ति । (५१-५३)

शिष्यसंयुक्त आचार्यः रङ्गमण्डपे द्वारकुम्भतोरणादीनभ्यर्च्य नवकुम्भान् तन्तुभिर्वेष्टयित्वा गन्धोदकेनापूर्य वस्त्रेणालंकृत्य तान् सहेमकूर्चान् कृत्वा चूतपल्लवं नालिकेरं च तेषामुपरि न्यस्य तान् कुम्भान् वाममन्त्रमुच्चरन् स्थण्डिले विन्यसेत् । कुम्भमध्ये मकुटेन सह ईश्वरं च पूजयित्वा अभिषेकार्थं शुद्धपात्रे विन्यसेत् । गजकण्ठे सर्वालंकारसहितं समारोप्य ग्रामप्रदक्षिणं च कृत्वा पञ्चगव्येन तदनन्तरं शुद्धवारिणा च शिववत् संस्नाप्य श्वेतवस्त्रेण सम्मार्ज्य मञ्जूषे वा शुद्धपात्रे वा हृदयमन्त्रोच्चारेण सह विन्यसेत् । (५४-६०पू०)

तेनैव मन्त्रेण कौतुकं स्वर्णसूत्रं वा बद्धा वेदिकोपरि विन्यस्य धूपदीपादिभिः सम्पूजयेत् । ततः पूर्वोक्तवत् शिवाग्निं कल्पयित्वा समिदाज्यचरुभिः सद्यास्त्रहृदयमन्त्रैः प्रतिद्रव्यं मकुटं स्पृशन् प्रत्येकं शतमर्धं तदर्धं वा जुहुयात् । षड्रसमिश्रचरुणा च मूलमन्त्रेण शतं हुत्वा सर्वद्रव्यैः हव्यवाहेति

मन्त्रेण होमानन्तरं जयादिरभ्याधानं राष्ट्रभृच्च क्रमाद्धुत्वा पूर्णाहुत्यनन्तरं शिवाग्निं च सम्पूजयेत् । (६०उ०-६५)

वायुदिग्भागे पञ्चविंशतिकलशान् स्नपनार्थं कल्पयेत् । नैर्ऋतदिग्भागे शक्त्यग्निनाग-खट्वाङ्गपट्टसपत्रदण्डकक्षुरिकापद्मकासीन् खड्गं वज्राङ्कुशं गदाधनुःपरशुशूलानि च अष्टादशदेवचिह्नानि अधिवासयेत् तत्तन्मन्त्रेणाभ्यर्चयेच्च । (६६-६८)

काहलं मुरजं शङ्खं दर्पणं छत्रचामरं मधुदधिघृतपूरितकुम्भान् क्षुरिकानखशोधनं केश-शोधनकं दन्तशोधनमञ्जनमोड्याणं योगपट्टं मात्रादण्डं वेत्रकं धर्मबुद्धोपकरणं भस्मकुम्भं मृगाजिनं कलाची जलभाण्डं पादुके चाग्निकोणके स्थापयित्वा प्रणवेनाभ्यर्चयेत् । शय्यागृहमध्ये तद्वारोचित-वस्त्रं भूषणं च विन्यस्य अल्पदूरे कपिलां गजं चैव बन्धयेत् । एवं रात्रौ जागरणं कृत्वा प्रभाते स्नानमाचरेत् । (६९-७४पू०)

आचार्यः सकलीकृत्य सोष्णीषोत्तरीयकः हेमाङ्गुलीयकटकहारकुण्डलमण्डितः सित-चन्दनलिप्ताङ्गो हेमयज्ञोपवीतधरश्च प्रातःसन्ध्यावसाने देवदेवं प्रणम्य शिबिकादावारोप्य तं रङ्गमण्डपं नयेत् । द्रव्याणि च दर्शयित्वा पूर्णाहुतिं च कृत्वा शिवाग्निं विसृज्य कुम्भे च संयोज्य पुण्याहं वाचयित्वा स्नानकर्म समाचरेत् । (७४उ०-७८पू०)

पञ्चगव्यपञ्चामृतैः स्नपनोदकैः ब्रह्मकुम्भोदकैः सौरादिकलशोदकैश्च संस्नाप्य मन्त्रपुष्पं च प्रदापयेत् । पश्चान्मन्त्रान्नं निवेद्य देवदेवं शय्यागृहं नयेत् । गन्धपुष्पादिनाभ्यर्च्य नैवेद्यादीनि धूपदीपताम्बूलानि च दत्वाऽस्त्रेशपूजानन्तरं नृत्तगीतादि च कारयेत् । (७८ उ०-८१)

तद्वारोचितवस्त्रैर्महेश्वरमलंकृत्य सर्ववाद्यघोषैः जयस्तोत्रशब्दादिभिश्च सह मकुटमण्डपं प्रविश्य व्याघ्रचर्माम्बरान्विते सिंहासने समारोप्य भूषणगन्धमाल्यादिभिरलंकृत्य आचार्यः शिष्यमाहूय वस्त्रबन्धं समाचरेत् । (८२-८४)

पञ्चाङ्गभूषणं परिवेषसमन्वितं गीतमङ्गलवाद्यघोषस्तोत्रशब्दादिभिः समन्वितं दत्वा अभिषेकं च कृत्वा मन्त्रेण भूषयित्वा गन्धपुष्पार्चनानन्तरं धूपदीपादिकं दद्यात् । पूर्वोक्तविधिना परिवेषक्रमं कल्पयित्वा रथे वा गजकण्ठे वा वृषध्वजमारोप्य नानाछत्रध्वजैः

नानावाद्यकाहलादिभिः नानावस्त्रैः नानाभक्तजनैश्च सहितं अनुपूजागजवाजिदेवचिह्नादिभिश्च समोपेतं ग्रामप्रदक्षिणमाचरेत्। (८५-९०पू०)

देवालये नीराजनानन्तरं यात्रार्थस्नपनं विधाय सन्ध्याशेषं समाचरेत्। ततो देवेशं शिबिकायामारोप्य देवचिह्नसहितं रङ्गमण्डपं नयेत्। तत्र सिंहासने संस्थाप्य परिवेषक्रमं विधाय पाद्याचमनादिकं दत्वा महाहविर्निवेदयेत्। ततो नानादेशकथावाक्यैः धर्मयुद्धादिदर्शनैः विनोद-वाक्यैर्महाजालादिदर्शनैः वीणावेणुमृदङ्गादिवाद्यैर्गानैश्च देवेशं तोषयेत्। ततोऽस्तमयवेलाया-मभिषेकार्हमण्डपे देवदेवं सिंहासने संस्थाप्य परिवेषक्रमं समाचरेत्। (९०उ०-९५)

तदन्ते परमेश्वरं संगृह्य देवालयं प्रविश्य नित्यकर्म समाचरेत्। भोगाङ्गार्चनान्ते परमेश्वरं पूर्ववत् शिबिकादौ समारोप्य शय्यागृहं प्रविशेत्। सुगन्धिकुसुमान्विते मृदुतल्पसमायुक्ते शयने देवमारोप्य तन्मूलमन्त्रेण गन्धपुष्पाद्यैः सम्पूज्य भक्ष्यादीनि निवेदयेत्। (९६-९९पू०)

एवं मकुटारोपणविधिर्निरूपितः। अनन्तरं दिनचर्याक्रमो वक्ष्यते। (९९उ०) इति मकुटारोपणविधि- पटलार्थसङ्ग्रहः।

एकसप्ततितमे पटले मकुटारोपणे दिनचर्याविधिर्निरूप्यते। सूर्योदयात् पूर्वमेव चतुर्थयामे गुरुः पञ्चमहाशब्दान् श्रुत्वा शिष्यवर्गसमन्वितः पञ्चाङ्गभूषणोपेतश्च मूललिङ्गं समभ्यर्च्य धूप-दीपादिकं भस्म च दत्वा मूलमन्त्रेण ताम्बूलं च दद्यात्। तत्कालोचितगानैः वीणावेणुवाद्यैरन्यैश्च शिवं तोषयेत्। शिवमन्त्रेण दर्पणं दर्शयित्वा दैवज्ञेन पञ्चाङ्गं श्रावयेत्। यद्यस्त्रेशः पूर्वस्यां दिश्यस्ति तर्हि दक्षिणद्वारमर्चयेत्, दक्षिणे चेत् पश्चिमाभिमुखमर्चयेत्, पश्चिमे चेत् उत्तराभिमुखम्, उत्तरेऽस्त्रनाथः चेत् पूर्वाभिमुखमीश्वरमर्चयेत्। (१-६पू०)

घृतकुम्भं सम्पूज्य अस्त्रमन्त्रेण दर्शयेत्, शिरसा मधुकुम्भं, नेत्रमन्त्रेण दधिकुम्भं, कवचमन्त्रेण भस्म, शिखया बृहतीफलम्, अन्यसाधनद्रव्याणि चास्त्रेण दर्शयेत्। नन्दां गां गायत्र्याभ्यर्च्य दूर्वाग्रकबलं दद्यात्। सर्वशिक्षासमन्वितं मातङ्गं गजमाहूय शिवमन्त्रेण

नारिकेलफलं दर्शयित्वा तस्मै दद्यात् । अनन्तरं पञ्चकल्याणमश्वमश्वशिक्षासमन्वितं सर्वालंकारयुक्तमाहूय गन्धमाल्यैः समभ्यर्च्य हृदा सैन्धवं दापयेत् । (६उ०-१२पू०)

ततो देवं खेटके शिबिकायां वारोप्य प्रदक्षिणक्रमेण स्नानमण्डपं प्रविश्य स्नानवेद्युपरि न्यस्य सम्पूजयेत् । गन्धतैलचन्दनलवङ्गामलकफलसारभस्मकर्पूरधूलिपञ्चगव्यपञ्चामृतैः फल-पुष्पास्त्रतोयैः मृत्कषायोदमार्जनैः कान्त्या कान्त्युदकैश्च संस्नाप्य श्रीरुद्राध्यायनमकेनाभिषेचयेत् । (१२ उ०-१६ पू०)

ततो माल्यपुष्पादिनालंकृत्य मन्त्रान्नं निवेदयेत्। शुद्धवस्त्रेण सम्मार्ज्य रङ्गमण्डपे स्वेष्ट-दिशि दार्वासने समारोप्य परमेश्वरमर्चयेत् । विधिना महाहविर्निवेद्य मुखवाससहितं ताम्बूलं च दत्वा धूपदीपादिकं दत्वा नीराजनं विधाय परिवेषक्रमानन्तरं विनोदालोकनं च कारयेत् । (१६ उ०-१९)

सायाह्ने मन्दीभूते दिवाकरे तद्वारोचितवस्त्रैः परमेश्वरमलंकृत्य पूर्वयानक्रमेण ग्रामप्रदक्षिणं कृत्वा सिंहासने समारोप्य परिवेषं समाचरेत् । नीराजनं कृत्वा गीतनृत्तादिभिः सह देवं मूलगृहं प्रविश्य हविर्निवेद्य षडाशेषं च समाचरेत् ।(२०-२३ पू०) ततः शय्यागृहे देवमानीय पूर्ववत् खट्वोपरि समारोप्य भक्ष्यपानादिकं दद्यात् । अष्टमेऽहनि सम्प्राप्ते भूकाभिषेकमाचरेत् । तद्दिनात् द्वित्रिदिने पूर्वे वनदेवतातृप्त्यर्थं मृगयात्रां कुर्यात् । (२३ उ०-२५)

एवं मकुटारोपणं प्रत्यब्दं परिकल्पयेत् । अत्रानुक्तं तद्राजोपचारवत् कार्यम् । अनन्तरे पटले रथारोहणविधिर्निरूप्यते । (२६- २६१/२) इति मकुटारोपणे दिनचर्याविधिपटलार्थसङ्ग्रहः ।

द्विसप्ततितमे पटले रथारोहणविधिरुच्यते । पूर्वेद्युः रात्रौ रथाग्रे शान्तिहोमं कृत्वा शुद्ध-तोयेन क्षालयित्वा पञ्चगव्यैश्च प्रोक्ष्य सर्वविघ्नशान्तये विघ्नेशमर्चयेत् । तत्तत्स्थाने सर्वान् देवान् दिक्पालकांश्च स्वस्वनाम्नाऽभ्यर्च्य चक्रेषु चन्द्रसूर्यौ अक्षयोः आधाररूपिणीं पाशेष्वष्टनागान् मेघनादं सुराष्ट्रं च पूर्वापरे च समभ्यर्च्य तेभ्यो रक्तबलिं दद्यात् । (१-६ पू०)

देशिकः परेद्युः प्रातः नित्यार्चनादिकं सर्वं निर्वर्त्य सुमुहूर्ते सुलग्ने च पुरुषवेषधारिणीभी रुद्रकन्याभिः सहितः देवेशं रथे नीत्वा सर्ववाद्यसहितं रथाकर्षणमारभेत। सर्वेषु स्थानेषु रथं नीत्वा जनांश्च तोषयेत्। विघ्नादिभिर्यानविच्छेदे शीघ्रं सन्धानादिकं कारयेत् । कालातिक्रमणे कृता पूजा निष्फला भवेत् राज्ञः परचक्राद्भयं च सम्भवेत् । अतस्तद्वारणाय मध्याह्नसमयं यावत् यानं नीत्वा रथे दीपान्तमभ्यर्च्य मूललिङ्गे नैवेद्यं दद्यात् । (६ उ०-११ पू०)

भानोरस्तमयादूर्ध्वं यानमशक्तं चेत् शिबिकादिषु देवेशमारोप्य यानशेषं समापयेत् । कालातिक्रमदोषवारणाय राजराष्ट्रहितार्थं च शान्तिहोमपुरःसरं भीमरूपं शतं जप्त्वा तत्संख्याकं होमं च कुर्यात् । नित्यकर्मादिकं च निर्वर्तयेत्। रथारोहणविध्यनन्तरं प्रभामण्डलविधिर्निरूप्यते इति पटलान्ते सूचितम् । परमयं पटलः त्र्यशीतितमपटलतया ग्रन्थे दृश्यते। (११ उ०-१४) इति रथारोहणविधिपटलार्थसङ्ग्रहः ।

त्रिसप्ततितमे पटलेऽस्मिन् सकलस्थापनविधिर्निरूप्यते । आयुरारोग्यजयाः पुत्रश्रीकीर्तिवर्धनानि च अस्य फलानि । केवलं सहजं पौनःपुन्यं चेति सकलस्थापनं त्रिविधम् । एकबेरस्य स्थापनं केवलमित्युच्यते । महेश्वरादिबिम्बानां तच्छक्तितत्परिवारप्रतिमानां वाहनायुधभक्तादिप्रतिमानां च एकस्मिन्नेव काले एकाचार्येण स्थापनं सहजमित्युच्यते । वर्णादिस्फोटने अङ्गोपाङ्गविहीने च बिम्बं त्यक्त्वा नवबिम्बस्य स्थापनं पौनःपुन्यमित्युच्यते ।(१-५)

उत्तरायणकाले शुक्लपक्षे शुभे दिने सुमुहूर्ते स्थापनं सम्यगाचरणीयम् । शैलरत्नजलोहमृद्दारुबिम्बानां भित्तिचित्राणां च प्रयोक्तव्यविशेषोऽधुनोच्यते । प्रासादे गर्भसम्युक्ता तत्स्थाने दृढीकृता च प्रतिमा अचलं बेरं, गर्भगेहविहीनं बेरं च चलमित्युच्यते । अचलं स्वप्रतिष्ठितदेशे वर्तते चलं तु रत्नजचित्रबिम्बादि बहुविधं रत्नन्यासादिकं विना सर्वत्र स्थापितं दृश्यते । (६-१०पू०)

बेरनिर्माणं द्रव्यसंग्रहः मण्डपनिर्माणं दृष्टिमोचनं प्रतिमाशुद्धिर्ग्रामप्रदक्षिणं जलाधिवासः मण्डपार्चनं रक्षाबन्धः द्रव्याधिवासनम् अधिवासनं होमकर्म प्रतिमोद्धारः दक्षिणादानं कलशोद्धारः

अभिषेकः नैवेद्यं कलशस्नपनं प्रभूतहविर्दानं धूपदीपादिदानं चेति विंशत्यङ्गैर्युक्तः प्रतिष्ठाविधिः। (१०उ०-१५)

यागार्थमण्डपनिर्माणम् अङ्कुरार्पणमग्निकार्यं परिवारघटस्थापनं मण्डपार्चनादिकं च पूर्वोक्तविधिना कुर्यात्। तत्तद्बिम्बघटांश्च पृथक् कल्पयेत्। प्रतिष्ठार्क्षस्य त्रिदिनेऽथवा तस्मिन्नेव दिने वा अङ्कुरार्पणं पूर्वोक्तविधिना कुर्यात्। नेत्रद्वययुतर्क्षेऽक्षिमोचनं कुर्यात्। देशिकानुज्ञया भ्रूरेखाम् अक्षिरेखां च शिल्पिना कारयित्वा तस्मै गोभूमितिलहिरण्यादि दत्वा तं विसृजेत्। शालिभिः स्थण्डिलं कारयित्वा पद्ममष्टदलं लिखित्वा तण्डुलतिललाजदर्भैः पुष्पैश्च परिस्तीर्य तन्मध्ये महेशप्रतिमादिकं स्थापयित्वा पुण्याहं वाचयित्वा रक्तपुष्पैरलंकुर्यात्। (१६-२२)

महेशप्रतिमामभितोऽष्टकलशान् ससूत्रान् सापिधानान् पल्लवनारिकेलफलोपेतान् वस्त्रैरलंकृतान् गन्धपुष्पैः समभ्यर्च्य तेषु विद्येशान् पूजयेत्। ततः प्रछन्नपटमास्तीर्य ईशानमन्त्रेण पक्ष्मरेखां सद्योजातेन कृष्णमण्डलं नेत्रमन्त्रेण ज्योतिर्मण्डलं चालिखेत्। मधु वाता ऋतायेति मन्त्रेण मधुपात्रं घृतं मिमिक्षमन्त्रेण घृतपात्रं आप्यायस्वेति मन्त्रेण क्षीरपात्रं दधि क्राव्णेति दधिपात्रं शिवगायत्रिमन्त्रेण पञ्चरत्नं गौर्धेनुभव्यमन्त्रेण सवत्सां गां ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान् सुमङ्गलीति मन्त्रेण सुमङ्गलीं येषामीशेति मन्त्रेण धान्यराशिं च दर्शयित्वा प्रछन्नपटमावर्ज्य सर्वान् जनांश्च प्रदर्शयेत्। (२३-३१पू०)

ततः पञ्चमृत्पञ्चगव्यकैः बेरशुद्धिं विधाय रत्नोदकैः शुद्धतोयैश्च स्नाप्य वस्त्राभरणैर्माल्यैश्चालंकृत्य रथे वा शिबिकायां वा भक्तितो देवमारोप्य ग्रामप्रदक्षिणमाचरेत्। (३१उ०-३३)

जलतीरं समाश्रित्य सुन्दरां प्रपां निर्माय तन्मध्ये स्थण्डिलं कल्पयित्वा स्थण्डिलमध्ये अष्टपत्रकर्णिकादियुतं पद्मं च विलिख्य दर्भैः पुष्पैश्च परिस्तरेत्। कलशान् नव संस्थाप्य हृदयमन्त्रेण पुण्याहं वाचयेत्। बेरं प्राक्शिरस्कमूर्ध्ववक्त्रं मूलमन्त्रेण जले स्थाप्य त्रिरात्रमेकरात्रं याममेकं वा तत्राधिवासयेत्। ततो वास्तुहोमं पर्यग्निकरणं च कृत्वा पुण्याहं वाचयित्वा मण्डपार्चनं कुर्यात्। बिम्बं जलादुत्तीर्य शुद्धिं कृत्वा महामण्डपमासाद्य रक्षाबन्धनमाचरेत्। (३४-३८)

ततः पुण्याहं वाचयित्वा वेदिकोपरि प्रोक्ष्य शालिभिः स्थण्डिलं तण्डुलैश्च शोभितं कृत्वा अण्डजाद्यैरनुक्रमात् तत्र शयनं कल्पयित्वा तत्तन्मूलेन गन्धाद्यैरर्चयेत् । तत्र शयने प्रतिमां वस्त्रवेष्टितां प्राक्शिरस्कां शाययित्वा स्वस्वमूलेन पूजयेत् । तस्य दक्षिणपार्श्वे शिवकुम्भं वर्धनीं च वस्त्राद्यलंकृतं पल्लवकूर्चफलादियुतं हेमरत्नसमायुक्तं शुद्धाम्बुपूरितं च स्थापयित्वा कुम्भे शिवमावाह्य तन्मूलेनैव पूजयित्वाऽभितः कलशानष्टौ संस्थाप्य विद्येशान् सम्पूजयेत् । गन्धपुष्पादिनाभ्यर्च्य धूपदीपादिकं दद्यात् । ऋगाद्यध्ययनं च चतुर्दिक्षु कुर्युः। (३९-४५पू०)

तत एकाग्नौ अग्न्याधानादिकमाज्यभागान्तं सर्वं कृत्वा वह्निमध्ये बहुरूपं मूलतः गन्धपुष्पादिना समभ्यर्च्य समिदाज्यचरुलाजसर्षपतिलयवैः सप्तद्रव्यैः तत्तन्मूर्तिदशाहुतीर्विधाय मूलमन्त्रेण आज्येन जुहुयात् । समिदादिषड्द्रव्यैः हृदादीनि प्रत्येकं षोडशाहुतीर्हुत्वा क्रमात् व्याहृतीभिश्च हुत्वा तत्तन्मूलमन्त्रेण आज्येनाष्टशताहुतीश्च विधाय एकत्रिंशत्कलाभिस्तत्तत्स्थाने च स्पृशेत् । सर्वद्रव्यैर्हव्यवाहमन्त्रेण हुत्वा गेयनृत्तगीतादिभी रात्रिशेषं व्यपोहयेत् । (४५उ०-५१पू०)

प्रभाते आचार्यः मूर्तिपैः सह स्नानत्रयं विधाय सकलीकृत्य बिम्बं शयने शाययित्वा गन्धपुष्पादिनाऽर्चयेत् । ततो नानावाद्यदीपछत्रनानालंकारसंयुक्तं नानाभक्तजनैः सहितं स्वस्ति-सूक्तसहितं च हर्म्यप्रदक्षिणं कृत्वा बिम्बं स्नानवेद्युपरि न्यस्य पुण्याहं वाचयित्वा एकत्रिंशत् कला न्यसेत् । ब्रह्मकुम्भं पूर्ववत् समलंकृतं समुद्धृत्य आलयप्रदक्षिणं कृत्वा देवाग्रे स्थापयेत् । मुहूर्तं निरीक्ष्य दैवज्ञेन गन्धपुष्पाक्षतैर्याजयित्वा तस्य ताम्बूलदक्षिणादिकं दद्यात् । (५१उ०-५७पू०)

ततः सुमुहूर्ते जीवन्यासं कृत्वा तत्तद्बीजमन्त्रं स्मरन् कुम्भतोयैरभिषेचयेत् । पश्चान्मन्त्रान्नं दत्वा परिवारघटैः तत्तत्स्थानेऽभिषिच्य शिवं गन्धपुष्पैरभ्यर्च्य वस्त्राभरणैरलंकृत्य प्रभूतहविर्दत्वा धूपदीपदानानन्तरं ताम्बूलं च दद्यात् । पश्चादाचार्यं वस्त्रहेमाङ्गुलीयकैः पूजयित्वा गोभूहिरण्य-धान्यादिकं दत्वा तन्मनः सन्तोषयेत् । तत उत्सवं यथावित्तानुसारं कारयित्वा भक्तानां परिचाराणां दीनान्ध-कृपणादीनां च यथाशक्ति दक्षिणादिकं दद्यात् । (५७उ०-६२)

एवं यः कुरुते स पुण्यां गतिमाप्नुयात् । तस्य वाञ्छितार्थाः सर्वे सिद्ध्यन्ति सोऽन्ते सायुज्यं चाप्नुयात्। (६३¹/₂) इति सकलस्थापनविधिपटलार्थसङ्ग्रहः ।

चतुःसप्ततितमे पटले पाकालयस्थापनविधिर्निरूप्यते । आलयस्य सुधाकर्मावसाने पाकालयः स्थापनीयः। उत्तरायणकाले शुक्लपक्षे शुभे दिने शुभमुहूर्ते स्थापनं करणीयम् । निश्चितदिवसात् पूर्वेऽङ्कुरार्पणं कृत्वा शिल्पिनं विसृज्य पुण्याहं वाचयित्वा वास्तुहोमं च कृत्वा पर्यग्निकरणं कुर्यात् । ब्राह्मणान् भोजयित्वा पुनः पुण्याहं च वाचयित्वा तद्दिनात् पूर्वरात्रौ अधिवासनमारभेत । (१-५पू०)

प्रथमस्तम्भमूले कौतुकं हृदा बन्धयित्वा मण्डपमध्ये वेदिकां प्रकल्प्य अष्टद्रोण-मितव्रीहिभिः स्थण्डिलं कल्पयित्वा तन्मध्येऽब्जं लिखित्वा दर्भैश्च परिस्तरेत् । तन्मध्ये सूत्रोदकादिसंयुतं कुम्भं स्थापयित्वा तस्मिन्नन्नपूर्णेशीं स्वनामतः पूजयेत् । अभितोऽष्टकलशांश्च स्थापयित्वा वामादिशक्तीः सम्पूजयेत् नैवेद्यधूपदीपादिकं च दद्यात् । चतुर्दिक्षु ऋगाद्यध्ययनं ब्रह्मसूक्तादिजपं च कुर्युः। अग्न्याधानादिकं सर्वमुक्तप्रकारेण कृत्वा समिदाज्यचरुलाज-सर्षपयवतिलैः सप्तहोमद्रव्यैः सद्यादिशिरोन्तमन्त्रैः शतं तदर्धं वा प्रत्येकं जुहुयात् । (५उ०-१२पू०)

एवं रात्रौ जागरणं कृत्वा आचार्यः प्रभाते स्नानादिनित्यकर्माणि निर्वर्त्य जयादिरभ्याधानं राष्ट्रभृतं च क्रमेण हुत्वा ब्रह्मबीजेन पूर्णाहुतिं च कुर्यात् । पश्चादग्निं विसृज्य कुम्भमध्ये योजयित्वा ब्रह्मकुम्भं समुद्धृत्य धामप्रदक्षिणं कृत्वा प्रधानस्तम्भमूले स्थण्डिले स्थापयेत् । पुण्याहं वाचयित्वा दैवज्ञं च पूजयित्वा कुम्भान्मन्त्रं समादाय तद्गात्रे विन्यस्य शेषगात्रेषु रुद्रमन्त्रांश्च क्रमाद्विन्यसेत् । वामादिकलशान् पूर्वादिदिक्षु क्रमेणाभिषिच्य सर्वगात्राणि सम्पूज्य पायसान्नं च दद्यात् । (१२उ०-१७)

शिवं यथाविभवं विधिवत् सम्पूज्य महेश्वरप्रतिमां पूजयित्वा गब्लिकोर्ध्वे संस्थाप्य भक्ष्य-भोज्यान्नपानादि देवाग्रे स्थापयेत् । सर्वालंकारसंयुक्तं दीपज्वालासहितं शङ्खघोषसमायुक्तं सर्वम् उत्थाप्य हर्म्यप्रदक्षिणं कृत्वा पचनालयं प्रविशेत् । तत्र स्थण्डिलं प्रकल्प्य पञ्चचूर्णैरलंकृत्य वस्त्रेणास्तीर्य तन्मध्ये महेश्वरं स्थापयेत् । भोजनद्रव्याणि सर्वाणि च स्थापयित्वा अस्त्रवारिणा

सम्प्रोक्ष्य वीरार्द्रकं लवणतिन्त्रिणीफलसंयुतं सर्वद्रव्यं निरीक्ष्य तदग्रेऽन्नपूर्णेशीं स्वनाम्ना समर्चयेत् । देव्यै च सर्वं भोजनद्रव्यं शिवाज्ञया दद्यात् । अन्नपूर्णेशीं परिचारकैर्धारयित्वा विधिना हविष्यं पायसान्नसहितं पाचयित्वा सर्वद्रव्याणि शिवाय निवेदयेत् । महेश्वरं पूर्वस्थाने स्थापयित्वा आचार्यं वस्त्रहेमाङ्गुलीयकैश्च पूजयेत् । य एवं कुर्यात् स पुण्यां गतिमाप्नुयात् । (१८- २७ १/२) इति पाकालयस्थापनविधि-पटलार्थसङ्ग्रहः ।

पञ्चसप्ततितमे पटले बाललिङ्गस्थापनविधिरुच्यते । बाल[लिङ्ग]स्थापनं प्रथमं द्वितीयमिति द्विधा । मूलस्थानस्य पूर्वं यत् तरुणालयं तत् प्रथमं स्मृतम् । सर्वथा तरुणालये बाललिङ्गं प्रतिष्ठाप्यैव मूलस्थानं प्रकल्पयितव्यम् । अन्यथा तत् कुलक्षयकरं भवेत् । प्रायश्चित्तार्थं स्थाप्यमानं बाललिङ्गं द्वितीयमित्युच्यते । (१-४पू०)

प्रासादस्य पूर्वदिग्भागे दक्षिणे उत्तरे ईशाने आग्नेये वा बालगेहं प्रकल्पयेत् । त्रिकरमथवा चतुष्करमारभ्य क्रमेण हस्तैकवर्धनेन नवकरमथवा दशकरपर्यन्तं बालगृहविशालं भवेत्। देवस्य बालगृहं युगाश्रं देव्याश्च आयताश्रं वा तद्भवेत् । (४उ०-७पू०) एकादशाङ्गुलमारभ्य अङ्गुलाङ्गुलविवर्धनेन सप्तविंशाङ्गुलं यावद्बालबिम्बस्य उदयः स्यात् । आयामसदृशं तस्य नाहं छत्रशीर्षकं च लिङ्गं भवेत् । अश्वत्थोदुम्बरप्लक्षशमीखदिरवृक्षेष्वन्यतमेन शैलजैर्लोहजैर्वा बाललिङ्गं सूत्रहीनं कल्पयेत् । (७उ०-१०)

स्वयोनिमथवा इष्टकाभिर्वा पीठं कल्पयेत् । पञ्चभागे द्विभागं तच्चतुर्थांशं वा सप्तभागे त्रिभागं तत्त्रिभागैकं वा पीठवेशं स्यात् शेषं लिङ्गोदयो भवेत् । लिङ्गनाहसमं तारं तारार्धं पीठिकोदयः तारमष्टांशाधिक्यं पीठमूले विशालं च भवेत् । पीठतारं त्रिभागैकं गोमुखं दीर्घविस्तरं तत्त्रि-भागैकभागेन गोमुखाग्रं च प्रकल्पयेत् । (११-१४)

त्रियहे पञ्चाहे सप्ताहे नवाहे अथवा सद्यो वाऽङ्कुरार्पणं कर्तव्यम् । बालालयस्याग्रे चतुरश्रं षोडशस्तम्भयुक्तं चतुर्द्वारसमन्वितं चतुस्तोरणयुक्तं मण्डपं निर्माय दर्भमालाभिरलंकुर्यात् । मण्डपं पञ्चधा विभज्य मध्यभागे रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभां वेदिकां निर्माय उपवेदीं चतुरङ्गुल-

समुत्सेधां च ततः प्रकल्पयेत् । होमस्तु नवकुण्डेषु पञ्चकुण्डेषु एककुण्डे वा स्थण्डिले वा कार्यः । (१५-१९पू०)

मण्डपं गोमयैरालिप्य ब्राह्मणांश्च भोजयित्वा वास्तुहोमं कृत्वा पर्यग्निकरणं कुर्यात् । पुण्याहप्रोक्षणानन्तरं मण्डपपूजां कुर्यात् । वेद्यूर्ध्वे अष्टद्रोणशालिभिः स्थण्डिलं कृत्वा तदर्धैः तण्डुलैः तदर्धैः तिलैश्च भूषयित्वा लाजैः पुष्पैश्च परिस्तीर्य शयनं कल्पयेत् । बालबिम्बं पञ्चरात्रं त्रिरात्रमेकरात्रमेकयाम- मर्धयामं वा जलेऽधिवासयेत् । नो चेत् स्नानं वा कारयित्वा कौतुकं बद्ध्वा शयनेऽधिवासयेत् । (१९ उ०-२४ पू०)

नवकुम्भान् तन्तुभिर्वेष्टयित्वा अस्त्रमन्त्रेण क्षालयित्वा जलेन चापूर्य हिरण्यं च संयोज्य वस्त्रैः कूर्चपल्लवैश्चालंकृत्य वेद्यूर्ध्वे विन्यस्य सम्पूजयेत् । मध्यकुम्भे शिवं वर्धन्यां देवीम् अभितोऽष्टकलशेषु विद्येशांश्च पूजयेत् । ऋग्यजुःसामवेदादीनां जपं च कारयेत् । समिदाज्यान्न-लाजमाषशालितिलैः द्रव्यैः क्रमेण सद्यादिशिरोन्तकं शिवाग्नौ हुत्वा खादिरबिल्वाश्वत्थ-पलाशवह्निशाखाभिः पूर्वादिचतुर्दिक्षु समिद्धोमं च कुर्यात् । आग्नेय्यां वटशाखया नैर्ऋते प्लक्षशाखया वायुदेशे औदुम्बरेण ईशाने चार्कशाखया अथवा औदुम्बरसमिद्भिः सर्वासु विदिक्षु च जुहुयात् । प्रतिद्रव्यहोमानन्तरं स्पर्शाहुतिं हुत्वा सर्वद्रव्यैः हव्यवाहमन्त्रेण सकृच्च जुहुयात् । (२४ उ०-३२पू०)

रात्रौ जागरणं कृत्वा प्रभाते स्नात्वा तोरणान् कलशान् कुम्भांश्च पूर्ववत् पूजयेत् । अग्निं गन्धाद्यैरभ्यर्च्य चित्तादिमन्त्रैर्हुत्वा यदस्येति मन्त्रेण पूर्णाहुतिमाचरेत् । (३२ उ०-३४ पू०)

वेदघोषशङ्खवाद्यादिघोषैश्च सहितं छत्रचामरसमन्वितं बालबिम्बसमोपेतं प्रदक्षिणमाचरेत् । बालगर्भगेहे पुण्याहं वाचयित्वा सुमुहूर्ते बालमूर्तिं स्थापयित्वा पीठरन्ध्रकेऽष्टबन्धं त्रिबन्धं वा योजयेत् । शिवकुम्भं समादाय धामप्रदक्षिणं कृत्वा बालबिम्बाग्रे स्थण्डिलोर्ध्वे विन्यस्य मन्त्रन्यासं कृत्वा चलमार्गेण कुम्भाद्देवं समादाय लिङ्गमध्ये योजयेत् । (३४ उ०-३९पू०) कुम्भोदकेन संस्नाप्य पायसान्नं निवेद्य स्थापितैरन्यैः कलशैः संस्नाप्य नैवेद्यपानीयाचमनादिकं दत्वा पीठान्तं वृषान्तं वा बलिदानं कृत्वा धूपदीपानन्तरं ताम्बूलं दद्यात् । ततो नृत्तगीतादिभिः परमेश्वरं संतोषयेत्। धरातलसमाप्ते उत्तरावधिके आसमाप्तालये वापि सम्प्रोक्षणमाचरेत् । (३९उ०-४३पू०)

बाललिङ्गस्थापनविध्यनन्तरं देवीबालबिम्बस्थापनविधिरुच्यते। तत्र लिङ्गस्थापनविध्युक्ताः सर्वाः क्रियाः देवीबालबिम्बस्थापनविधावपि कर्तव्याः यतो हि यद्यप्यत्र मन्त्रभेदो भवेत् तथापि क्रियाभेदो न विद्यते । कामकोष्ठाग्रे दक्षिणे उत्तरे ईशे पश्चिमेऽथवा देवबालगृहे वापि देवीबालगृहं कल्पयित्वा शिवपूजान्ते बलिहोमादिकं विना स्थापयेत् । देव्याः पृथग्बालगृहे तु देवपूजोक्तमार्गतः महादेवीं तन्मन्त्रेणैव समभ्यर्च्य कामकोष्ठाधारावसाने उत्तरारोपणे मूर्धेष्टकावसाने वा सम्प्रोक्षणमाचरेत् । (४३उ०-४८)

देवस्य तरुणालये देवीबालबिम्बप्रतिष्ठायां देवालयं समापाद्य देवीं संस्थापयेत् शिवसम्प्रोक्षणं च कृत्वा कल्याणोत्सवमाचरेत् । गौरीसम्प्रोक्षणात् पूर्वमेव शिवसम्प्रोक्षणं कर्तव्यम् । बालालये देवीं समाकृष्य शिवालये देवाग्रे निर्मितमण्डपे ईशदेशे नैर्ऋते वायव्ये दक्षिणेऽथवा उत्तरे स्थापयित्वा देव्यग्रे स्थण्डिलं कल्पयित्वा पूर्वोक्तप्रकारेण शिवाग्निं यजेत् । तन्मध्ये गौरीमावाह्य मूलेन शतं जुहुयात् । समिदाज्येनाघोरमन्त्रं शतं हुत्वा तदन्ते गौरीं स्थापयित्वा पूर्वोक्तमार्गेण पूजयेत्। समाप्ते तु देव्यालये विधानेन सम्प्रोक्षणं कृत्वा पूजयित्वा कल्याणोत्सवमाचरेत् । (४९-५५) इति बाललिङ्गस्थापनविधिपटलार्थसङ्ग्रहः ।

षट्सप्ततितमे पटले पञ्चगोचरमूर्तीनामर्चनाविधिर्निरूप्यते । इदमर्चनमायुःश्रीपुष्टियशस्करं वर्तते । मोक्षार्थं सदाशिवं धनार्थं विष्णुं शत्रुजयार्थं दुर्गां पुत्रलाभार्थं गणेशं देहकान्त्यर्थं स्कन्दं च पूजयेत् । एषु पञ्चबेरेषु महेश्वर एव प्रधानः। पञ्चगोचरपूजनं स्वतन्त्रं परतन्त्रं चेति द्विविधम्। ग्रामे नगरे पत्तने राजधानिके खर्वटे कुब्जके पर्वते आपणे नद्यां वनमध्ये चतुष्पथेऽथवा पौराण्यायतने वा स्थापनं स्वतन्त्रमित्युच्यते । गृहे पञ्चमूर्तीनां पूजनं परतन्त्रमिति ज्ञायते । (१-७) परतन्त्रे विष्णुमूर्तिः स्थाप्यते । महेश्वरः पूर्वास्यः स्थापनीयः तस्याग्रे च स्नानबेरः। पश्चिमास्यो भवेन्महाविष्णुस्तस्य सव्ये मार्कण्डेयश्च स्थापनीयः। विष्णोर्वामे भूशक्तिं साञ्जलिकरां तथा तस्याग्रे स्नानबेरं च शास्त्रोक्तविधिना स्थापयेत् । परिवाराष्टकं द्वारदेवांश्च आदिशैवः संस्थाप्य पूजयेत् । (८-११पू०)

उत्तराग्रे दुर्गादेवीं तत्सव्यापसव्ये शिवकुमारसहितां महिषासुरमूर्धस्थां सिंहारूढां वा स्थाप्य पूजयेत् । दुर्गामूर्तिश्चित्रबेरश्चेत् तस्याग्रे स्नानबेरं स्थापयेत् । सर्वा अपीमा मूर्तयस्तत्तत्तन्त्रोक्तमार्गेण स्थापयित्वा पूजनीयाः। (११उ०-१३)

दुर्गायाः सव्यपार्श्वे कल्याणमूर्तिः स्कन्दः अञ्जलिकरदेवीयुतः कुक्कुटासनसंस्थिः सर्वदेवावृतः सिद्धकिन्नरयुतश्च स्थाप्य सर्वोपचारैः पूजनीयः। देव्या वामपार्श्वे ब्रह्मणः स्थानं भवेत् स्कन्दस्य दक्षिणपार्श्वे नारदश्च स्थाप्यः। दुर्गालयस्य वामे गणाधीशं सर्वदेवावृतं मुनिगन्धर्वसेवितं च पूर्वोक्त-विधिना स्थाप्यार्चयेत्। (१४-१८)

एतेषु पञ्चबेरेषु सदाशिवः प्रधानो भवति । देवाग्रे कल्पितमण्डपे द्वारदेवताः बेराश्च स्थापनीयाः। सदाशिवबिम्बं केवलं सहजमिति द्विविधम् । त्रिबेरं केवलं पञ्चबेरं च सहजं भवेत् । पञ्चावरणयुतः सदेशो गर्भावरणयुतो विष्णुश्चार्चनीयौ । अच्युतोऽनन्तमूर्तिश्चक्रपाणिर्जनार्दनः पुरुषः पुरुष्टुत् गोविन्दो वित्तनायकश्चेतीमे विष्णोर्गर्भावरणदेवाः । तत्तत्तन्त्रोक्तमार्गेणादिशैवः पूजां कुर्यात् । (१९-२३पू०)

एकावरणयुतां दुर्गादेवीं एकावरणयुतं गणनायकं परिवाराष्टकयुतं स्कन्दं च पूजयेत् । आणिमा महिमा गरीमा लघिमा ईशित्वं वाशित्वं प्राप्तिः प्राकाम्यं चेत्यष्ट दुर्गावरणदेवताः। सुमुखः एकदन्तः कपिलो गजकर्णकः लम्बोदरो विकटो विघ्नराजो गणाधिपश्च विघ्नेशपरिवारदेवताः । षण्मुखः शक्तिपाणिः कार्त्तिकेयो गुहः स्कन्दो मयूरवाहः सेनानीः विशाखः इत्येते स्कन्द-परिवारदेवाः । (२३उ०-२७)

स्कन्दो महामर्यादिस्थाने एवं तत्पार्श्वे च लक्ष्मीः मातृकाश्च प्रतिष्ठाप्य पूजनीयाः। मण्डपवामपार्श्वे भूतेशीं तां परितः सर्वान् देवांश्च पूजयेत् । सर्वेषां देवताबेराणां स्थानं पौराण्यायतनं तत्पश्चिमे कामकोष्ठं देव्याः स्वतन्त्रालयो निर्मीयते । (२८-३०पू०)

प्रथमावरणे द्वारस्योभयपार्श्वे द्वौ भूतौ अण्डाभरणनामानौ प्रतिष्ठाप्य ताभ्यां चतुःप्रस्थतण्डुलैः पाचितं पिष्टमोदकबलिं दद्यात् । भूतस्य सव्यपार्श्वे ज्वरदेवं तद्बाह्ये मालिकावामे ज्येष्ठां चार्चयेत् । पूर्वोक्तदिशा सर्वेषाममीषां देवानां प्रधानः सदाशिवः तत्पूजाबलिदान-

नित्योत्सवोत्सवाः सर्वा अप्यन्याः क्रियाश्च शिवपूजाविधानेन अनुष्ठेयाः। उत्सवसमये महेश्वर-विष्णुस्कन्दविनायकदुर्गामूर्तीनामन्येषां देवानां च प्रत्येकं प्रतिदिनं शिवोत्सवविधानेन यानं कुर्यात् । (३०उ०-३६पू०)

यदा सदाशिवं परितोऽन्यदेवताबेराः प्रतिष्ठिताः तदा स्कन्दं पूर्वस्यां विघ्नेशं दक्षिणायां विष्णुं प्रतीच्यां दुर्गां चोदीच्यां मयूरं मूषिकं गरुडं मृगं चाग्नेय्यादिविदिक्षु च प्रतिष्ठापयेत् । शिवस्याग्रे वृषभः ध्वजदण्डं च स्थाप्येते । प्रधानमेकदण्डं स्यात् तस्याग्रे पञ्च ध्वजाः स्थाप्याः तेषु मध्यमो वृषध्वजः दिक्षु च अन्यध्वजाः भवेयुः। (३६ उ०-३९)

देवानामालयेषु संघटितेषु सत्सु यत्र स्थाने न प्रासादोऽस्ति तत्र मुखमण्डपं निर्माय मालिकासु अन्यदेवालयाः मध्ये च शिवालयः कल्पयितव्याः । परितो वृषादिबलिपीठं च कल्पयेत् । वृषभभानुमातृहस्तिवक्रस्कन्दज्येष्ठादुर्गाक्षेत्रपालानां बलिं दत्वा सव्यापसव्यं च परिवारबलिं दद्यात् । इन्द्रादिलोकपालानां प्रथमावरणे दत्वाऽनन्तरं द्वितीयावरणे दद्यात् । दण्डाग्रे महापीठं कल्पयित्वा निर्गमद्वारदेशे नन्दिकालबलिं बाह्यद्वारे द्वारभूतबलिं पीठबाह्यप्रदक्षिणे वृषभादिबलिं महापीठे बलिं च दत्वा प्रदक्षिणं कुर्यात् । (४०-४६) बलिपीठस्य बाह्ये द्वितीयभ्रमणं क्रियते । गीतनृत्तादिकं तृतीयभ्रमणे कुर्यात् । अन्य उपचाराः शिवपूजाविधानोक्तप्रकारेण कार्याः । य एवं कुरुते स पुण्यां गतिमाप्नुयात् । (४७-४८) इति पञ्चगोचरमूर्त्तिविधिपटलार्थसङ्ग्रहः ।

सप्तसप्ततितमे पटले मठप्रतिष्ठाविधिर्विव्रियते । पटलस्यारम्भभागे केचन श्लोका नष्टाः । लाजैः पुष्पैर्दर्भैश्च विकीर्य तन्मध्ये साष्टपत्रं सकर्णिकं पद्ममालिख्य ससूत्रान् सापिधानान् वस्त्रयुग्मेन वेष्टितान् फलपल्लवसंयुक्तान् स्वर्णरत्नादिगर्भितान् नवकुम्भान् पद्मस्योपरि निधाय मध्यकुम्भे शिवं गन्धपुष्पैर्यथाक्रमं सम्पूजयेत् । परितः पूर्वादीशान्तं विद्येशान् गन्धपुष्पादिभिर्यष्ट्वा तोरणद्वार-कुम्भांश्चापि समर्च्य यागपूजां समाप्याचार्यसाधकादीनां वस्त्रभूषणानि दद्यात् । (१-५)

मठस्योत्तरदेशे मातुलुङ्गद्वयं नारिकेलफलं बदरामलवार्ताककपित्थाम्रफलानि नारङ्गद्वयं पनसं कदलीफलं बदरीलिकुचधात्रीफलानि चम्पकपुष्पं रजनीचूर्णं क्रमुकफलानि च तोयेन क्षालयित्वा मठसन्ततिवृद्ध्यर्थं सर्वैश्वर्यसमृद्ध्यर्थं च स्थापयेत् । चतुर्दिक्षु चतुर्वेदपारायणं दक्षिणे

चोत्तरे च अघोरास्त्रक्षुरिकास्त्रजपं नृत्तगेयादि च विदध्यात् । आचार्यः कुण्डसंस्कारादीनि कृत्वा शिवाग्निं विधिवदानीय तन्मध्ये सर्वावरणसहितं शिवमावाह्य नैवेद्यधूपदीपादिकं दत्वा मूल-मन्त्रेणाज्यैर्जुहुयात् । समिल्लाजसक्तुसर्षपयवतिलवेणुमुद्गनिष्पावमाषान् एकादशद्रव्याणि ईशानाद्यस्त्रपर्यन्तं क्रमेण जुहुयात् । शतमर्धं तदर्धं वा प्रतिद्रव्यं हुत्वा द्रव्यान्ते व्याहृतिभिर्हुत्वा महा-पूर्णाहुतिमाचरेत् । (६-१४)

रात्रौ जागरणं कृत्वा प्रभाते स्नानादिनित्यानुष्ठानानि विधाय मठालयं प्रविशेत् । मठस्य प्रस्तरदेशे त्रिसूत्रैर्दर्भमालया वस्त्रयुग्मेन च परितो वेष्टयित्वा दिग्ध्वजेन वितानैश्च समाच्छाद्य मठस्योर्ध्वमलंकुर्यात् । पञ्चमृत्कषायैर्गव्यैश्च मठान्तर्जगतीकण्ठपट्टिकाङ्घ्रिकपोतकपञ्चस्थानानि अभिषिच्य सुगन्धेन विलिप्य निवृत्त्यादिकलामन्त्रान् क्रमेणार्चयित्वा धूपदीपादिकं दत्वा द्वारे तदधिपानर्चयेत् । (१५-१९)

ततो यागपूजादिकं समाप्य प्रायश्चित्तहोमं च हुत्वा अग्निस्था देवता घटे योजयेत् । वह्निं परिधिविष्टरांश्च विसृज्य कर्ता सुमुहूर्ते सुलग्ने च शालां प्रविशेत् । तत्र यथाविभवं दानादिकं कृत्वा प्रधानकुम्भं बन्धुभिर्वाहयित्वा वाद्यमङ्गलघोषसहितं मठं प्रदक्षिणीकृत्य कुम्भं स्वस्थाने निधाय कर्ता घटस्थं देवं प्रणमेत् । वेद्या उपरि मध्ये शिवकुम्भजलेन सेचयेत् अन्यकुम्भ-जलैस्तत्तत्स्थानेऽभिषेचयेत् । सर्वद्रव्यसमृद्ध्यर्थं सर्वज्ञानफलार्थं च नैवेद्यधूपदीपादिकं दद्यात् । (२०-२५)

कर्ता मठं प्रविश्य फलद्रव्याणि स्पृष्ट्वा उत्तराभिमुख उपविश्य परमेश्वरं चिन्तयेत् । गुरुं भक्तिपूर्वकमर्चयित्वा तं प्रणम्य तस्मै साधकाचार्यभक्तानां च दक्षिणां दद्यात् । कर्तृनामाङ्कितं मठस्य नाम कुर्यात् । एवं यः कुरुते सोऽन्ते सायुज्यमाप्नुयात्।(२६- २८ $^{1}/_{2}$) इति मठप्रतिष्ठाविधि-पटलार्थसङ्ग्रहः ।

अष्टसप्ततितमेऽस्मिन् पटले तटाकप्रतिष्ठाविधिर्वक्ष्यते । तटाकं वापीं पुष्करिणीं वा आलयाभिमुखे प्रधानतया खानयेत् । ऐशान्यामुत्तरे दक्षिणे आग्नेय्यां पश्चिमेऽथवा मनोरमे देशे वा

तटाकं कल्पयेत् । तन्निर्माणे अशक्तश्चेत् वापीखननमपि शिवप्रीतिकरं स्यात् । पुष्पोद्यानादिरम्यदेशे यथावित्तानुसारं तटाकं खनित्वा शैलजैरिष्टकाभिर्वा तत्स्थानं दृढीकृत्य सोपानादिभिरलंकुर्यात् । (१-५पू०)

तीर्थमुद्दिश्य तटाकादिस्थापने सर्वं फलमाप्नोति । अनेन धनधान्यसमृद्धिः पुत्रपौत्रवर्धनमारोग्यं भुक्तिर्मुक्तिश्च लभ्यन्ते । तटाकशुद्धिं कृत्वा वारिणाऽऽपूर्य तत्तीरे दक्षिणे पूर्वे उत्तरे ईशदिग्भागे वा कुण्डवेदीसमन्वितां यागशालां निर्मायालंकृत्य पञ्चाहे त्र्यहे वा अङ्कुरार्पणं कृत्वा सद्योऽधिवासनं च कुर्यात् । ततो वास्तुशान्तिं पर्यग्निकरणं च कुर्यात् । (५उ०-९)

पञ्चगव्यप्रोक्षणेन शुद्धिं विधाय वेदिमध्येऽष्टद्रोणशालिभिः पद्ममालिख्य तन्मध्ये ससूत्रान् सापिधानान् नालिकेराम्रपत्रयुतान् रत्नस्वर्णप्रतिमादियुतान् क्षौमवस्त्रैरलंकृतान् नवकुम्भान् स्थापयित्वा गन्धपुष्पैरर्चयेत् । आसनमूर्तिन्यासध्यानादिकं कृत्वा मध्यकुम्भे वरुणं तन्मन्त्रेणावाहयेत् । गङ्गायमुनानर्मदासरस्वतीसिन्धुगोदावरीकावेरीताम्रपर्णिका अष्टशक्तीः पूर्वादीशान्तकुम्भेषु क्रमेणार्चयेत् । शङ्खं वासुकिं पद्मं कुलीरं कूर्मं नक्रमुत्पलं चेति विशेषद्रव्याणि क्रमेण तत्तत्कुम्भे निक्षिप्य स्वनाम्ना च पूजयित्वा धूपदीपादिकं दत्वा नैवेद्यताम्बूलादि च निवेदयेत् । द्वारादिस्वगुरुपर्यन्तमर्चयित्वा यागशालां च पूजयेत् (१०-१८)

ततः पश्चिमे पद्ममश्रं वा कुण्डमेकं कल्पयित्वा शिवाग्निमानीय आधानादिविवाहान्तमग्निकार्यमाचरेत् । देवं सम्पूज्य पलाशवटशुक्लार्काश्वत्थोदुम्बरप्लक्षखदिरबिल्वशमीभिः समिद्भिः जुहुयात् । वरुणमन्त्रेण प्रथमं पलाशं हुत्वा वटादिशम्यन्तसमिद्भिर्गङ्गादिताम्रपर्णीपर्यन्तं क्रमेण स्वस्वनाम्ना च जुहुयात् । आज्यं चरुं मधु क्षीरं च वरुणमन्त्रतो हुत्वा शालिगोधूममाषतिलसिद्धार्थाढकनिष्पावयवमुद्गैर्नवधान्यैर्मध्यादीशानपर्यन्तं तत्तन्नाम्ना च जुहुयात् । द्विशतं शतं पञ्चाशत् पञ्चविंशतिर्वा प्रतिद्रव्यं होमः कार्यः । ततः पूर्णाहुतिं हुत्वा बलिदानं च विधाय समापयेत् । (१९-२६ पू०)

एवं रात्रौ कृत्वा प्रभाते स्नानादिकं कृत्वा यागाशालां प्रविश्य पूर्ववत् सम्पूज्य हुत्वा जयादिरभ्याधानं प्रायश्चित्तहोमं च विधाय पूर्णाहुतिं कृत्वा वह्निस्थं देवं घटे संयोजयेत् । दश

दानानि कृत्वा आचार्यं पूजयित्वा यथोक्तां दक्षिणां दद्यात्। कुम्भान् शिरसा उद्धृत्य सुमुहूर्ते सुलग्ने धाम-प्रदक्षिणं कृत्वा तटाकं च प्रदक्षिणीकृत्य तटाकाभिमुखः कुम्भान् विन्यस्य पुण्याहं वाचयित्वा पञ्चगव्यैस्तटाकं प्रोक्ष्य धूपदीपादिभिः सम्पूजयेत्। साधितैः कलशैः तटाकवारिमध्ये संयोज्य मध्यादीशक्रमेण कुम्भ-द्रव्यैरभिषेचयेत्। नैवेद्यधूपदीपाद्युपचारानन्तरं तटाकं परितोऽष्टलोकेशबलिं दद्यात्। तस्मिन् तटाकतीर्थे कर्ता बन्धुभिः सह स्नात्वा तीर्थं संगृह्य शिष्टजनेभ्यो दद्यात्। यथावित्तानुसारं भूरि दानं दत्वा तटाकतीरे सर्वकार्याभिवृद्धये भोजयेत्। एवं यः कुरुते स सर्वान् कामानवाप्नुयात्। (२६उ०-३५१/२) इति तटाकप्रतिष्ठाविधि पटलार्थसङ्ग्रहः।

एकोनाशीतितमे पटले वृक्षपूजाविधिरत्र निरूप्यते। अनेन आयुःश्रीकीर्तिपुत्रधान्यवर्धनानि लभ्यन्ते। वृक्षपूजा सामान्यं विशेषं चेति द्विविधा। अश्वत्थादिवृक्षयजनं सामान्यं देवालये यस्मिन् वृक्षे शिवसान्निध्यं वर्तते तस्य पूजनं विशेषमिति चोच्यते। अस्मिन् पटले तस्य विवरणं दीयते। (१-३)

प्रातःसन्ध्यावसाने दिव्यवृक्षाग्रे बहुरूपेण संशोध्य तत्पुरुषेण लेपनं च कृत्वा पुण्याहं वाचयित्वा द्रव्याण्यस्त्रतः प्रोक्ष्य पाद्यादीनि साधयित्वा विघ्नेशमर्चयेत्। द्वारपूजां कृत्वा वृक्षं हेतिना प्रक्षाल्य आसनमूर्तिमूलं च कल्पयेत्। वृक्षं शिवमयं ध्यात्वा स्नापयित्वा वस्त्रमाल्यगन्धादीनि शिव-मन्त्रेण दद्यात्। नैवेद्यदानानन्तरं धूपदीपभस्मताम्बूलादिकं दत्वा स्तोत्रैश्च तोषयेत्। इमां पूजाम् एकद्वित्रिकालं वा कुर्यात्। एवं प्रतिदिनं कुर्वाणः शिवलोके महीयते। (४-९) इति वृक्षपूजा-विधिपटलार्थसङ्ग्रहः।

अशीतितमे पटलेऽस्मिन् कूपस्थापनविधिर्वक्ष्यते। उत्तरायणकाले शुक्लपक्षे शुभदिने सुमुहूर्ते कूपस्थापनं कर्तव्यम्। स्थापनदिनात् पूर्वदिवसेऽधिवासनमारभेत। आचार्यो मण्डपम् अलंकृत्य पुण्याहं वाचयित्वा शालिभिः स्थण्डिलं कृत्वा लाजैः पुष्पैश्च परिस्तरेत्। (१-३)

नवसंख्याकान् कुम्भानस्त्रेण क्षालयित्वा ससूत्रान् सवस्त्रान् सापिधानान् वारिपूरितांश्च कृत्वा फलपल्लवैरलंकृत्य हेमकूर्चादिकं च संयोज्य मध्यकुम्भे मनोन्मनीमावाह्य पञ्चरत्नं विनिक्षिपेत्। ऐन्द्रकुम्भे कूर्मं गङ्गां च अग्निदिक्स्थकुम्भे मण्डूकं यमुनां च दक्षिणकुम्भे सर्पं नर्मदां च नैर्ऋतकुम्भे मत्स्यं सरस्वतीं च वारुणकुम्भे कर्कटं सिन्धुं च वायव्यकुम्भे नक्रं गोदावरीं च सौम्यकुम्भे पद्मं कावेरीं च ईशकुम्भ उत्पलं ताम्रपर्णीं च स्वस्वनाममन्त्रैः समर्चयेत्। कूपमध्ये पञ्चमृदः पञ्चगव्यं च निक्षिपेत्। (४-१०)

समिदाज्यान्नलाजैरग्निकार्योक्तमार्गेण सद्यादितत्पुरुषपर्यन्तमष्टोत्तरशतं क्रमेण जुहुयात्। सर्वद्रव्याणि हुत्वाऽन्ते व्याहृतिं च जुहुयात्। वरुणमन्त्रजपानन्तरं मूलमन्त्रशतं जप्त्वा आपो वा इति मन्त्रमष्टोत्तरशतं जपेत्। ततः पूर्णाहुतिं हुत्वा नैवेद्यादिकं दद्यात्। एवं रात्रौ कृत्वा प्रभाते स्नात्वा सकलीकरणं कृत्वा कुम्भमग्निं च पूजयेत्। जयादिरभ्याधानं राष्ट्रभृद्धोमं च कृत्वाऽग्निं विसृज्य कुम्भमध्ये योजयित्वा नैवेद्यधूपदीपादिकं दद्यात्। (११-१६)

सर्वालंकारसंयुतं कुम्भानुद्धृत्य धामप्रदक्षिणं कृत्वा कूपस्थानं प्रविशेत्। पुण्याहं वाचयित्वा शुद्धैरुत्थेति मन्त्रतः कूपमध्ये संप्रोक्ष्य अस्त्रेणार्चयेत्। कुम्भात् मूर्तीः समादाय कूपमध्ये योजयित्वा आपो वा इति मन्त्रतः संस्नाप्य गङ्गादिसर्वकलशोदकैः स्वस्वनामतः स्नापयेत्। गन्धपुषादिभिरभ्यर्च्य धूपदीपादीनि दत्वा कूर्माद्यष्टद्रव्याणि कूपमध्ये योजयेत्। (१७-२१पू०)

सघृतं गुलमिश्रं बलिं कूपबाह्ये वज्रादिपद्मपर्यन्तं स्वनामतो दत्वा कूपतोयं भक्तेभ्यो दद्यात् । आचार्यं वस्त्रहेमाङ्गुलीयकैः पूजयेत्। एवं कुर्वाणः पुण्यां गतिमाप्नुयात्। (२१उ०-२३)

इति कूपस्थापनविधिपटलार्थसङ्ग्रहः।

एकाशीतितमे पटले नागलक्षणमुच्यते इति प्रतिज्ञायते। स्वर्णेन ताम्रेण रजतेन शिलया इष्टकया दारुणा दशमृद्भिर्वा नागं प्रकल्पयेत्। एकहस्तमारभ्य क्रमेणाष्टाङ्गुलवर्धनात् चतुर्विंशति-हस्तान्तं नागस्यायामो भवेत्। आयादिशोभयुतं शुभमानं गृहीत्वा तन्मानशतांशमङ्गुलं कल्पयेत्। (१-४पू०)

मुखमानं चतुरंशं मुखविस्तार एकादशांशः फणिदीर्घो द्वादशांशः फणिविस्तारः पञ्चांशश्च भवेत् । नासापुटान्तरं पादांशं नासितार एकांशः नासिदीर्घस्तत्समः दृष्टिमण्डलमेकांशं च स्यात् । दृष्टिमण्डलमध्ये यवमानेन कृष्णमण्डलमारच्य तद्विस्तारार्धमानेन ज्योतिर्मण्डलं कल्पयित्वा पक्षदीर्घं द्विभागं कृत्वा पक्षविस्तारमेकांशं कुर्यात् । पक्ष्म पञ्चाङ्गुलं कर्णौ पञ्चदशाङ्गुलौ च स्युः। कर्णविस्तारश्चतुरंशः तदाकृतिश्च सिंहकर्णवच्च भवेत् । नागश्चतुरङ्गुलदीर्घश्चतुर्दन्तयुतः दन्तस्यादिः अर्धाङ्गुलः दन्तो हरिदन्तवच्च भवेत् । करण्डमकुटवद्वा चित्रवस्त्राकृतिं वा कृत्वा फणार्धमानेन च पार्श्वे फणं कुर्यात् । नागः सप्तफणयुतः त्रिफणयुतो वा स्यात् । नाहं षोडशाङ्गुलं वालान्तमेकाङ्गुलं च भवेत् । मण्डलपञ्चकयुतो मण्डलत्रययुतो वा पद्मपीठोपरि स्थाप्यः । तन्नासिमध्यमसूत्रं वालाग्रं ऋजुसूत्रं च स्यात् । तन्माने एकद्वित्र्यंशन्यूनाधिक्ये न दोषः। एवं शोभाङ्गुलयुतं नागं युक्त्या समापादयेत् । (४उ०-१३)

नागलक्षणानन्तरं तत्प्रतिष्ठाविधिरनन्तरे पटले वक्ष्यते। इति नागलक्षणविधि-पटलार्थसङ्ग्रहः ।

द्व्यशीतितमे पटले नागप्रतिष्ठाविधिर्निरूप्यते । नागस्थापनं धान्ययशआयुःपुत्राणां वर्धनं तथा जन्मवन्ध्याकाकवन्ध्यामृतवन्ध्यापुरुषवन्ध्यानां स्त्रीणां पुत्रप्रदं च । यथोक्तमार्गेण सुशिलां गृहीत्वा द्विसर्पं भिन्नभिन्नं वा पञ्चास्यं वा लिङ्गयुक्तमयुक्तं वा एकफणयुतं वा आयादिशुभयुक्तं शिल्पमानेन कारयेत् । (१-४)

देवालये मठे पर्वते तीर्थतीरे नन्दवनेऽश्वत्थमूले चैत्यवृक्षसमीपे वा नागस्थापनम् इष्टसिद्धिकरं भवेत् । आलयेऽष्टदिक्ष्वपि कर्तुं शक्यते । ऐन्द्रे राजपदं याम्ये आयुर्वृद्धिकरं वारुणे आरोग्यदं सोमे वित्तप्रदं वह्निदेशे सुखदं नैर्ऋतौ विजयप्रदं वायव्ये भयनाशकरम् ऐशान्यां पुत्रवर्धनं च भवति । शिवस्य परितः प्राकारे चापि नागं स्थापयेत् । (५-९पू०)

देवानां दिवाकालभूते उत्तरायणे नक्षत्रपक्षतिथिवारसुमुहूर्तादि सम्यग् वीक्ष्य पञ्चाहं त्र्यहमेकाहं वा तद्दिने वा यथोचितं नागस्थापनं समारभेत । (९उ०-११) शिवालये वान्यदेशे वा

चतुर्द्वारयुतमष्टहस्तमितं षोडशस्तम्भयुतं च मण्डपं कारयेत्। तत्त्रिधा विभज्य मध्यभागे वेदिकां रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभां चतुर्द्वारयुतां च निर्मायालंकुर्यात्। पश्चिमे देशे योनिकुण्डं पद्मकुण्डं वा कल्पयित्वा शिल्पिनं विसृज्य ब्राह्मणांश्च भोजयेत्। गोमयेनालिप्य वास्तुहोमं कृत्वा सायाह्ने बीजनिर्वापनं कुर्यात्। (१२-१६पू०)

कर्ता प्रातःस्नानादिनित्यकर्माणि निर्वर्त्य उपवासार्थं च संकल्प आचार्यवरणं कृत्वा कर्मान्तराणि समाचरेत्। प्राणायामपुरःसरं पूजासंकल्पं कृत्वा सवर्णनखयुक्ताङ्गुलीभिः नेत्रमन्त्रमुच्चरन् नेत्रयुग्मयुतशुभे दिने नागबिम्बस्य नयनोन्मीलनं विधाय सुवर्णदूर्वादिभिः सह अस्त्रमन्त्रेण मध्वाज्याभ्यां च तर्पयेत्। ततो बिम्बशुद्धिं कृत्वा ग्रामप्रदक्षिणानन्तरं जलाधिवासनं रक्षाबन्धनं च क्रमेण कुर्यात्। (१६उ०-२१पू०)

निद्राकुम्भसहितं शयनं च कल्पयेत्। वेदिमध्ये अष्टद्रोणमितशालिभिः पद्मं लिखित्वा तिलतण्डुलैश्चालंकुर्यात्। तन्मध्ये दशकुम्भान् त्रिसूत्रैर्वस्त्रैश्च वेष्टितान् अन्तःकूर्चप्रतिमारत्नादियुतान् नालिकेरयुतांश्च स्थापयित्वा मध्यकुम्भे नागराजं तद्वामे वर्धन्यां नागकन्यां च आवाह्य नागबीजेन पूजयेत्। पूर्वादीशानपर्यन्तम् अनन्तादीन् गन्धपुष्पाद्यैः नैवेद्यैश्चार्चयेत्। तत अग्निकार्योक्तमार्गेण कुण्डेऽग्निमानीय सम्पूज्य समिदाज्यान्नशालियवगोधूमवैणवापामार्गनीवारप्रियङ्गुतिलसर्षपलाज-पलाशैर्द्रव्यैर्नागब्रह्माङ्गमूलैर्जुहुयात्। सहस्रं तदर्धं तदर्धार्धमष्टोत्तरशतं पञ्चाशत्पञ्चविंशतिर्वा हुत्वा प्रायश्चित्ताहुतिं पूर्णाहुतिं च जुहुयात्। (२१उ०-३१पू०)

नागबिम्बं शयनादुत्थाप्य स्पर्शाहुतिं हुत्वा बिम्बं यथास्थाने संस्थाप्य क्रमेण न्यासं कुर्यात्। अग्नेरावाहितमूर्तिं समुत्थाप्य तां कुम्भे विन्यसेत्। आचार्यं दक्षिणादिभिः पूजयित्वा यात्रादानं दशदानानि च कुर्यात्। वेदीतः कुम्भमुत्थाप्य बिम्बाग्रे विन्यस्य कुम्भाद्बीजमादाय नागबिम्बे योजयेत्। तद्वामे वर्धनीं न्यस्य तद्बीजं नागपीठे सुयोजयेत्। (३१उ०-३५पू०) अनन्ताद्यष्टनागांश्च पूर्वादिकलशेभ्यो न्यस्य महाभिषेकं कृत्वा वस्त्रगन्धपुष्पमाल्यैराभरणैश्चालंकुर्यात्। महानैवेद्यं ताम्बूलं च दत्वा धूपदीपादिसर्वोपचारान् कुर्यात्। पश्चाद्ब्राह्मणान् भोजयित्वा दक्षिणांश्च दद्यात्। एवं

विधिना नागप्रतिष्ठां कुर्वाणः नागेन्द्रस्य प्रसादेन सर्वान् कामानायुरारोग्यैश्वर्यपुत्रादींश्च लब्ध्वा इह लोके सुखं प्राप्यान्ते पुण्य-लोकं च लभेत। (३५उ०-३९१/२) इति नागप्रतिष्ठाविधिपटलार्थसङ्ग्रहः ।

त्र्यशीतितमे पटले सकलप्रतिमादीनां प्रभामण्डलस्य लक्षणं निरूप्यते । स्वर्णरजतलोहाद्यन्यतमेन प्रभामण्डलं क्रियते । सकलबिम्बस्य शोभार्थं मण्डलत्रयं क्रियते । तत्र प्रथमं वह्निमण्डलमनन्तरं भानुमण्डलमन्ते चन्द्रमण्डलं क्रियते । अथवा यथाशक्ति एकं द्वयं त्रयं वा मण्डलं कर्तुं शक्यते । (१-३)

तत्रादौ अग्निमण्डलकल्पनं विव्रियते । बिम्बोदयस्य अर्धभागं गृहीत्वा चन्द्र-बिम्बवद्भ्रामयित्वा जानुभ्यां जङ्घामध्याभ्यां चावसानं कुर्यात् । मण्डलस्य विस्तारो मध्यविस्तारस्य त्रिपञ्चसप्तनव वा स्यात् पञ्चभागे अंशहीनकं च स्यात् । मूलाग्रस्य विशालं क्रमेण परिकल्पयेत् । मकरास्ये मकरं वा वृत्तं वा संयोज्य मकरदीर्घं त्रयोदशाङ्गुलं कुर्यात् । मकरविस्तारमेकादशधा विभज्य मुक्तादाम्नो द्व्यंशकं वेत्रस्या-र्धांशकम् इन्दूत्सेधस्य द्व्यंशकं वेत्रतुङ्गस्यार्धांशकं महावेत्रस्य त्र्यंशकं तत्तुङ्गस्यार्धांशकमिन्दूत्सेधस्य द्व्यंशकं वेत्रस्यार्धांशकं च कुर्यात् । तस्योपरि अग्निं प्रकल्पयेत् । अग्नेरुत्सेधः पञ्चाङ्गुलं तद्विस्तारस्त्र्यङ्गुलं च भवेताम् । अग्निः सप्तजिह्वायुतः पञ्चजिह्वायुतो वा स्यात् । पार्श्वेषु अग्निं त्रिजिह्वं क्रमेण क्षीणं च कल्पयेत् । सर्वाङ्गानि शोभा-बलयुतानि कार्याणि । (४-१२)

वह्निमण्डलबाह्ये भानुमण्डलं कुर्यात् । तद्विस्तारायाममानानि पुर्वोक्तवत् स्युः। विस्तारं सप्तधा विभज्य वेत्रस्यैकांशं पुष्पोच्चस्य पञ्चभागं वेत्रस्यैकं भागमष्टदलकर्णिकादियुतपुष्पस्य पञ्चभागं च दत्वा मध्ये रत्नानि विन्यस्य वृत्ताकारं च कल्पयेत् । सप्तविंशसंख्यया पुष्पाणि तदूर्ध्वं तत्संख्यया पद्मकुड्मलानि च कल्पयेत् । (१३-१७पू०)

भानुमण्डलबाह्ये चन्द्रमण्डलं पूर्वोक्तविस्तारायामयुतं कुर्यात् । वेत्रद्वयं मध्ये पुष्पयुतं च कल्पनीयम् । पुष्पं च षोडशदलयुतं भवेत् । तदूर्ध्वं कुमुदकुड्मलाकारं च कुर्यात् । सप्तविंशति-पुष्पाणि तत्संख्याककुमुदकुड्मलयुतानि च कल्पयेत् । एवमतिसुन्दरं चन्द्रमण्डलं कल्पयेत् ।

अग्निमण्डले महावेत्रस्य मध्ये रत्नपुष्पं कल्पयेत् । एवं प्रभामण्डलविधिरुक्तः। अनन्तरे पटले पुष्परागविधिरुच्यते । (१७उ०-२२) इति प्रभामण्डलविधिपटलार्थसङ्ग्रहः ।

चतुरशीतितमे पटले बाणलिङ्गविधिरुच्यते । बाणलिङ्गं स्थावरं जङ्गमं चेति द्विविधम् । नागरादिविमानेषु स्थावरं स्थापयेत् । ब्राह्मणक्षत्रियवैश्यशूद्राः जङ्गमं लिङ्गमात्मार्थं पूजयेयुः। नागरे नागरं द्राविडे द्राविडं वेसरे वेसरं मिश्रे च मिश्रं लिङ्गं यथोक्तं स्थापयेत् । विप्रस्य श्वेतवर्णलिङ्गं क्षत्रियस्य रक्तकं वैश्यस्य पीतवर्णं शूद्रस्य नीलवर्णं लिङ्गं भवेत् । (१-५)

स्थावरबाणलिङ्गं सामान्यं शिरोवर्तनब्रह्मसूत्रादिहीनं निम्नोन्नतसमायुक्तं व्यग्रवक्रयुतं त्र्यश्रं वा वृत्ताकारं वा स्यात् । पूजांशस्य द्विगुणं पीठं कण्ठादूर्ध्वं च बिलं भवेत् । लिङ्गविष्कम्भमानेन पीठं वृत्तं चतुरश्रं बाह्याष्टाश्रं षडश्रं वा कुर्यात् । (६-९पू०)

जङ्गमबाणलिङ्गं सामान्यं ब्राह्मणस्य अष्टाश्रं क्षत्रियस्य षडश्रं वैश्यस्य चतुरश्रं शूद्रस्य च वृत्ताकारं स्यात्। सर्वजातीनां पीठं वृत्ताकारं भवेत् । लिङ्गस्य रूपमेव पिण्डिकायां बिलस्य रूपं भवेत् । सूत्रहीनलिङ्गस्य मुखभेदोऽपि नास्ति । लिङ्गनाहसमं पीठविस्तारं कुर्यात् । लिङ्गस्य निम्नभागो मुखं भवेत् तद्गोमुखाकारं च विचिन्तयेत् । शिवशास्त्रोक्तक्रमेण पीठबन्धं कुर्यात् । स्वायम्भुवादिलिङ्गानामपि पीठबन्धः कार्यः। (९उ०-१४)

अन्यप्रकारेण बाणलिङ्गलक्षणमुच्यते । पर्वतवननदीजलादिष्वन्यतमस्थानात् इष्टलिङ्गं गृहीत्वा पश्चात् तस्य पीठं कल्पयेत् । लिङ्गनाहसदृशः पीठविस्तारः तथा लिङ्गोत्सेधसममथवा कर्णमानं वा पीठं भवेत् । पीठं लिङ्गानुरूपशैलेन स्त्रीशैलेन कारयेत् । पूर्वोक्तवत् श्वेतादिवर्णलिङ्गानि ब्राह्मणादीनां स्युः। इष्टलिङ्गं बाणलिङ्गं च समानमेव तयोर्न भेदः। तत्पूजनेन इष्टकाम्यान्यवाप्यन्ते । लोहादिषु बाणलिङ्गेषु पूजयित्वा यथेष्टलिङ्गं पूजयेत् । (१५-२०)

पर्वते पर्वतलिङ्गमेकवर्णं संगृह्य तदनुरूपं त्रिखण्डयुतं पीठं कुर्यात् । अथवा एकवर्णमर्धचित्रं पञ्चाङ्गसहितं पद्माकृतिं वापि शिल्पिभिः कारयेत् । (२१-२३)

परार्थपूजायां लक्षणैर्युतं लिङ्गमर्चयेत् । आत्मार्थयजने तु लक्षणानि न मुख्यानि केवलं भक्तिरेवात्र कारणं यया भुक्तिमुक्तिफलानि लभ्यन्ते । सर्वप्रयत्नेन गुरोराज्ञानुसारमात्मार्थं वा परार्थं वा शिवपूजां कुर्यात् । अनुलोमप्रतिलोमजना अपि आत्मार्थं शिवं पूजयेयुः। परार्थपूजा ग्रामादिषु तथा आत्मार्थयजनं स्वगृहे च क्रियते ।(२४-२६)

पर्वतलिङ्गस्य नाहं षोडशभागिकं कनिष्ठपक्षे पञ्चांशं पीठिकोत्सेधः मध्यमपक्षे सप्तांशम् उत्तमपक्षे अष्टांशम् । नवधा पीठोच्छ्रायः उच्छ्रुतेः द्विगुणं तारमथवा त्रिगुणं चतुर्गुणं वा भवेत् । शिलालिङ्गस्य शिलया दारुणा इष्टकया वा पीठबन्धं कुर्यात् । पीठप्रमाणमानेन प्रासादं कुर्यात्। पश्चात् प्रतिष्ठामुक्तमार्गेण कुर्यात्। लिङ्गहीने पीठमवरं भवेत् । लिङ्गोत्कृष्टे पीठं वरं स्यात् । यत्र लिङ्गं क्रियते तत्रैव प्रतिष्ठापयेत् । द्वादशाङ्गुलहीनत एकहस्तात् परं नास्ति । एतयोरधिकं कर्तुं शक्यते परं सर्वथा हीनं न कुर्यात् । यजमानानुकूलेन शास्त्रोक्तमार्गतः कुर्यात् । एकमार्गं समाश्रित्य प्रयत्नेन शुभकाले कुर्यात्। (२७-३४१/२) इति बाणलिङ्गविधिपटलार्थसङ्ग्रहः ।

पञ्चाशीतितमे पटलेऽत्र बलिपीठविधिर्विव्रियते । भद्रं क्षुद्रमिति बलिपीठं द्विधा प्रोच्यते । क्षुद्रमल्पपीठमिति भद्रं महापीठमिति चोच्यते । अनयोः क्षुद्रबलिपीठस्य लक्षणमुच्यते । शिवलिङ्ग-पीठस्य तुङ्गतारनवांशस्य सप्तांशं पञ्चांशं त्र्यंशं वा क्षुद्रपीठस्य विस्तारो भवेत् । स च क्रमश उत्तमो मध्यमोऽधमश्च भवेत् । विस्तारस्य चतुर्भागो क्षुद्रपीठस्य तुङ्गं स्यात् । मानाङ्गुलवशादथवा द्वादश अष्ट षण्मात्रकं वा तद्भवेत् । (१-५पू०) उत्सेधांशस्य पञ्चभागे उपानमेकांशं पद्मतुङ्गं त्रिभागमेकांशेन कर्णिकां च कुर्यात् । अथवाऽन्यप्रकारेणापि कर्तुं शक्यते । एकांशेन फुल्लपद्मवच्चापि कुर्यात् । मातृपीठमयुक्तं चेत् पूर्ववत् कुर्यात् । सयुक्तं चेत् एकपीठजं कृत्वा चतुरङ्गुलं षडङ्गुलं सप्ताङ्गुलं वापि विशालयुक्तं कारयित्वा उत्तुङ्ग-लक्षणादि पूर्वोक्तवत् तथा तत्तदन्तरमानमेकाङ्गुलवशाच्च कुर्यात् । (५उ०-९)

भद्रपीठस्य लक्षणानि परिवारविधिनिरूपणावसरे पूर्वमेवोक्तमिति पटलेऽस्मिन् सूचितम् । भद्रपीठं प्रथमावरणेऽथवा द्वितियावरणे द्वारे प्रतिष्ठापयेत् । प्रतिष्ठाविधिः देवालयप्रतिष्ठासमानतन्त्रेण

वा अन्यतन्त्रेण वा चतुरङ्गविधानेन एकाचार्येण एकस्मिन्नेव काले च कार्यः । अङ्कुरार्पण-वास्तुयागादिकं समानतन्त्रेणैव कुर्यात् । (१०-१३पू०)

प्रासादस्य पूर्वदिग्भागे मण्डपं निर्माय तन्मध्ये एकहस्तप्रमाणकां रुद्रवेदीति नाम्नीं त्र्यैकतुङ्गयुतां वेदिकां च कल्पयेत् । पूर्वादिचतुर्दिक्षु विधिवेदीं तत्समां विधानेन कारयेत् । नवाहे पञ्चाहे त्र्यहे वाऽङ्कुरार्पणमाचरेत् । जीर्णबलिपीठं परित्यज्य नवं पुनस्तत्र स्थापयेत् । स्फुटितं छिन्नं भिन्नं चेति जीर्णबलिपीठं त्रिधा प्रोच्यते । उपानजगतीकुमुदकण्ठपट्टिकापद्मकर्णिकाः महाङ्गमिति प्रोच्यन्ते । दलोपदलनास्याद्या उपाङ्गमित्युच्यन्ते । महाङ्गेषु स्फुटितं भद्रपीठं सर्वथा विभिन्नं क्षुद्रपीठं च वर्जयेत् । (१३उ०-२०)

जीर्णबलिपीठस्य दक्षिणे मण्डले आसनं संकल्प्य आवाहनादिपूजां कुर्यात् । तत्पूर्वे विमलैः शालिभिः स्थण्डिलं कृत्वा तन्मध्येऽष्टदलपद्मं सकर्णिकमालिख्य द्रोणमिताम्बुपूरितान् घटान् तन्मध्ये विन्यसेत्। पीठाद्देवान् कुम्भमध्ये विन्यस्यावाह्य नैवेद्यादिकं दत्वाऽग्निकार्योक्त-मार्गेणाग्न्याधानादिविवाहान्तं कृत्वा मधुघृतदूर्वातण्डुलैः देवतामन्त्रमुच्चरन् शतमर्धं तदर्धं वा जुहुयात् । क्षुरिकाबीजमुख्येन पूर्णाहुतिं हुत्वा जयादिरभ्याधानं राष्ट्रभृच्च क्रमाद्धुत्वा अग्निस्थं मण्डलस्थं च कुम्भे योजयेत् । (२१-२७पू०)

जीर्णबलिपीठादिकं भूतले निखनेत् समुद्रे वा क्षिपेत् । ततः पञ्चमृद्द्रव्यबिल्वैः पीठशुद्धिं कुर्यात् । भद्रपीठं चेत् तदग्रस्थदर्पणे शुद्धैरुत्थेति मन्त्रेण धाराभिषेचनं कुर्यात् । वास्तुहोमबलि-मण्डपार्चनादिकं विधाय भद्रपीठस्योर्ध्वकर्णिकायां रक्षाबन्धनं कुर्यात्। अन्येषां पीठानां कृतं चेत् पुनर्न कुर्यात् । (२७उ०-३१पू०)

वेदिषु अष्टद्रोणैः शालिभिस्तदर्धैस्तण्डुलैस्तदर्धतिलैश्च स्थण्डिलं कृत्वा लाजपुष्पतिल-दर्भैर्विकीर्य तत्पूर्वस्थवेदिकुम्भेषु दक्षिणोत्तरमध्यतो नन्दिनं महाकालं वृषभं च क्रमेण पूजयेत् । ततो दक्षिणवेदिकुम्भेषु दुर्गाम् मातृः विघ्नेशं वीरस्कन्दौ माधवं चण्डेशं चाग्न्यादीशान्तं सम्पूज्य अग्रे भूतेशं चार्चयेत् । प्रतीचीवेदिकुम्भेषु अरिष्टं भुजगेश्वरं धर्मदेवं च क्रमेण दक्षिणवाममध्यकुम्भेषु पूजयित्वा इन्द्रं वैश्वानरं यमं निर्ऋतिं वरुणं वायुमिन्दुं वटुकं महेश्वरं विष्णुं पितामहं च पूर्वादारभ्य

पूजयेत् । वेदिमध्यस्थकुम्भेषु आमोदं प्रमोदं सुमुखं दुर्मुखमविघ्नं विघ्नराजं च क्रमेण पूर्वदक्षिणवरुणसोमेशानदिक्कर्णिकोर्ध्वे आसनमूर्तिमूलैरभ्यर्चयेत् । (३१उ०-३९)

वेद्युत्तरदेशे क्षुद्रपीठस्याधिवासनं कुर्यात् । भद्रपीठं तु तत्स्थान एवाधिवासनं कुर्यात् । कुम्भस्थापनपूर्वकं वेदपारायणादिकं कारयेत् । अग्निकार्योक्तप्रकारेणाग्न्याधानादिकं कृत्वा समिदाज्यचरुलाजसर्षपयवतिलैः तत्तन्मूलमन्त्रषडङ्गैः पवमानैस्त्र्यम्बकैश्च स्पृष्ट्वा स्पृष्ट्वा होमम् आमाचरेत् । रात्रौ जागरणं कृत्वा प्रभाते स्नात्वा तोरणादिघटान् सर्वान् गन्धपुष्पैरर्चयेत् । (४०-४४पू०)

प्रासादमध्यमे अन्तर्मण्डलमध्यमे च अग्न्यादीशपर्यन्तं दुर्गादिचण्डान्तं क्षुद्रबलिपीठानि स्थापनीयानि । वृषभस्य पुरतः तद्बलिपीठं वृषभपृष्ठभागे दण्डप्रमाणदेशे भूतेशबलिपीठं च भवेताम्। प्रतिद्वारं तद्वारेशस्य पीठं तथा धर्मेशस्य पीठं वृषाग्रतश्च भवेत् । भद्रपीठाग्रमानत इन्द्रपीठं मुखायामे तत्स्थानं च अन्तर्मण्डलमानतः कुर्यात् । सोमेशयोर्मध्ये सप्तदिक्षु अग्न्यादीनां पीठं स्थापयित्वा नैर्ऋते दण्डमानेन विष्णुपीठं च स्थापयेत् । ऐशान्यां हस्तमानेन ब्रह्मपीठं प्रतिष्ठापयेत् । द्वितीयावरणे उक्तप्रकारेण पीठानि स्थापयेत् । भद्रपीठप्रतिष्ठा प्राकारलक्षणप्रकरणे उक्ता । (४४ उ०-५१पू०)

पश्चादाचार्यं वस्त्रहेमाङ्गुलीयकैः पूजयित्वा अध्येतॄन् परिचारान् पर्यष्टिनश्च यथावित्ता-नुसारमुत्तरीयोष्णीषाद्यैश्च सन्तोषयेत् । पूर्वस्थापितघटान् उद्धृत्य शिरसा वाहयन् सर्वातोद्यसमन्वितं धामप्रदक्षिणं कृत्वा तत्तन्मूलमुच्चरन् तत्तत्पीठेऽभिषेचयेत्। भद्रपीठश्चेत् मन्त्रन्यासं समाचरेत् । (५१उ०-५४) इति बलिपीठविधिपटलार्थसंग्रहः ।

## [चतुःपञ्चाशत्तमःपटलः]

### कामकोष्ठविधिः[1]

कामकोष्ठविधिं वक्ष्ये [2]श्रृणु त्वं तत्प्रभञ्जन ।

[कामकोष्ठकल्पनम्]

[कामकोष्ठद्वैविध्यम्]

स्वतन्त्रं केवलं चेति [3]द्विविधं परिकीर्त्तितम् ॥ १ ॥
स्वतन्त्रं [4]वीरमित्युक्तं परिवारादिभिर्युतम् ।
[5]परिवारविहीनं [6]यत्केवलं [7]चेति कथ्यते ॥ २ ॥

[द्विविधकामकोष्ठस्थानानि]

[8]द्वितीयावरणे चैव [9]तृतीयावरणे तथा ।
चतुर्थावरणे चैव [10]पञ्चमावरणे तथा ॥ ३ ॥
[11]नदीतीरे [12]तटाके वा पर्वताग्रे मनोरमे ।
उद्याने वा [13]सभास्थाने गौर्यालयं प्रकल्पयेत् ॥ ४ ॥

---

[1] अयं पटलः अ (टि. १९१- पृ० २७४-३०२), ई (टि.३६ - पृ० १८४-२१५), ऊ (टि.३८ - पृ० ६२४-६८३), ऋ ( टि. ९७- पृ० २२१-२४९ ), च ( टि. ९५५- पृ० ७८-८२, श्लो०६२ पर्यन्तमेव वर्तते।), झ ( टि. १०१६ पृ० १९-५१), त (पृ० ३४५-३६९ ) इत्येतेषु कोशेषु दृश्यते ।मुद्रिते मानसारे पृ० ४१९-४२८ पर्यन्तम् अयं पटलः पूर्णतया उद्धृतो दृश्यते।

* अयं पटलः सप्तसु मातृकासु मानसाराख्यग्रन्थे च विद्यते इति आदौ निर्दिष्टम् । तथापि " अ, ई, ऊ, ऋ" मातृकाः विना अन्यासु मातृकासु बहुत्र ग्रन्थपाताः लेखकप्रमादाश्च विद्यन्ते इति हेतोः ताभ्यो मातृकाभ्यः सर्वत्र पाठभेदाः न प्रदर्शिताः।

[2] श्रृणु त्वं ] अ, ई, ऋ, च, झ; श्रृणुध्वं – ऊ, त.

[3] द्विविधं ] अ, ई, ऊ, ऋ, झ, त; द्वितीयम् – च.

[4] वीरमित्युक्तं ] अ, ई, ऊ , ऋ, च; विरमित्युक्तं - त, झ.

[5] परिवारविहीनं ] अ, ई, ऊ, ऋ, च, झ; परीवारविहीनं – त.

[6] यत्केवलं ] अ, ई, ऊ, ऋ, झ, त; चेत् केवलं – च.

[7] चेति ] अ, ई, ऊ, ऋ, झ, त; त्वथ – च.

[8] द्वितीयावरणे ] अ, ई, ऊ, ऋ, च, त; द्वितिय्यावरणे – झ.

[9] तृतीयावरणे तथा ] ई, झ ; तृतीयावरणेऽपि वा - अ, ऊ, ऋ; तृतीयावरणेऽथवा – च; तृतीयावरणं तथा- त.

[10] पञ्चमावरणे तथा ] अ, ऊ, ऋ; पञ्चमावरणेऽथवा – ई, च, झ; पञ्चमावरणं तथा- त.

[11] नदीतीरे ] अ, ई, ऊ, ऋ, च, त; नदितीरे – झ.

[12] तटाके वा ] अ, ई, ऊ, ऋ, च, त; तटाके व - झ.

[13] सभास्थाने ] अ, ई, ऊ, ऋ, च, त; सभास्धाने - झ.

[१]स्वतन्त्रं स्थानमेवोक्तं [२]मण्डपे त्वीशदेशके ।
मण्डपस्योत्तरे [३]वापि केवलं कोष्ठमाचरेत् ॥५॥
केवलं [४]स्थानमेवोक्तं [५]स्वतन्त्रं त्वधुना श्रृणु[६] ।

[स्वतन्त्रकामकोष्ठभेदाः]

[७]श्रीभोगं [८]पुत्रकोष्ठं च चित्रं [९]श्रीभद्रमेव च ॥६॥
[१०]श्रीकान्तं पुत्रकान्तं च गोमुखं [११] सुन्दरं तथा ।
[१२]कौसलं [१३]श्रीनिवासं च विजयं [१४]पद्मकान्तकम् ॥७॥
[१५]कोष्ठसुन्दरधामञ्च सुभद्रञ्च सुमङ्गलम् ।
[१६]पार्वतीकान्तकं चैव [१७]गौर्यालयं द्विरष्टधा ॥८॥

[सूत्रविन्यासः]

[१८]मूलप्रासादमध्ये तु [१९]चतुर्दिक्सूत्र[२०]निर्गमः ।

---

[१] स्वतन्त्रं स्थानमेवोक्तं ] अ, ई, ऋ, त; स्वतन्त्रस्थानमेवोक्तं – ऊ, च; स्वतन्त्रस्थानमेवोक्त – झ.

[२] मण्डपे त्वीशदेशके ]च; मण्डपस्त्वीशगोचरे – अ, ई, ऋ; मण्डपं त्वीशगोचरे –ऊ; मण्डपस्वीशगोचरे– झ; मण्डपं स्त्वीशकोचरेत् –त.

[३] वापि ] अ, ई, ऊ, ऋ, च, झ; वापी – त.

[४] स्थानमेवोक्तं ] अ, ई, ऊ, ऋ, झ ; एवमेवोक्तं – च.

[५] स्वतन्त्रं त्वधुना ] अ, ऊ, ऋ, झ; स्वतन्त्रमधुना –च, ई; स्वातन्त्रं त्वश्मने – त.

[६] श्रृणु ] अ, ई, ऋ, च, झ, त; श्रुणु – ऊ.

[७] श्रीभोगं ] अ, ई, ऊ, ऋ, च, त; त्रिभागं – झ.

[८] पुत्रकोष्ठं ] अ, ई, ऊ, ऋ, च, झ; पत्रकोष्ठं – त.

[९] श्रीभद्रमेव च ] अ, ई, ऊ, ऋ. श्रीभद्रसुन्दरम् – त, च; श्रिभद्रसुन्दरम् – झ.

[१०] श्रीकान्तं पुत्रकान्तं च ] सं० पाठः; चित्रकान्तविमानं - अ,ई,ऋ,च,त; चित्रकान्तं विमानं - ऊ,झ;

[११] सुन्दरम् तथा ] सं० पाठः; लक्ष्मीकान्तकम् - ई ; लक्ष्मिकान्तकम् – अ, ऊ, ऋ, च, झ, त.

[१२] कौसलं ] अ, ई, ऋ, झ, त; केवलं – ऊ; कौशलं . . . . । – च.

[१३] श्रीनिवासं ] अ, ई, ऊ, च, झ, त; श्रीनिवास......कान्तकम् । - ऋ.

[१४] पद्मकान्तकम् ] अ, ई, ऊ, च, झ; पद्मरागकम् – त.

[१५] कोष्ठ सुन्दरधामञ्च ] झ; कोष्ठं सुन्दरधामञ्च - अ, ई, ऊ, त; कोष्ठं सुन्दरधा (या) मं च - ऋ; कोष्ठं सुन्दरवामं च – च.

[१६] पार्वतीकान्तकं ] अ, ई, ऊ, ऋ; °कान्त सु चैव – च; पार्वति° – झ; °कामकं – त.

[१७] गौर्यालयं द्विरष्टधा ] अ, ई, ऋ, च, झ; °द्विराष्टधा° – ऊ ; लयमत्विराष्टथा – त.

[१८] मूलप्रासादमध्ये तु ] च; आलयप्रासादमध्यात्तु -अ,ऋ;°यप्रविष्ठ मध्यात्तु -ई;आलयं प्रासादमध्यात्तु -ऊ;°मध्यन्तु - झ;°प्रासादा मध्यां तु -त.

[१९] चतुर्दिक्सूत्र० ] च, झ, त; °दिक्सूत्रस्य - अ, ऊ, ऋ; °दिक्सूत्रं तु – ई.

[२०] निर्गमः ] त; विनिर्गमम् - अ; निर्गताम् – ई; विनिर्गतः – ऊ; विनिर्गमः – ऋ; निर्गमम् - च, झ.

तत्सूत्रं [१]शिवसूत्रं स्यात् [२]तत्कर्णे [३]कर्णसूत्रकम् ॥ ९॥
[४]अष्टदिक्सूत्रपार्श्वे [५]तु उमाकोष्ठं प्रकल्पयेत् ।
[६]तत्सूत्रादेविकोष्ठस्य [७]मध्यसूत्रं द्वयान्तरम् ॥ १०॥
शिवभागमिति ज्ञेयं तन्मानं [८]शृणु सुव्रत ।

[शिवभागमानम्]

[९]त्रिचतुःपञ्चषट्सप्तभागं वै परिकल्पयेत् ॥ ११॥
लिङ्गविस्तारमानं यत् शिवभागमिति स्मृतम् ।
[१०]अथवान्यप्रकारेण [११]शिवभागो विधीयते ॥ १२॥
स्वस्तिके लिङ्गतारार्धं [१२]शैवाधिक्यं त्रिपादकम् ।
[१३]गुणार्धं वर्धमानं स्यात्त्रिगुणं [१४]समखण्डके ॥ १३॥
[१५]अन्येषां लिङ्गनाहं यत् [१६]शिवभागविशालकम् ।

[पुनः सूत्रविन्यासः]

[१७]शिवभागावसाने तु [१८]कोष्ठमध्यमसूत्रकम् ॥ १४॥
[१९]तद्भागान्तर्गतं सूत्रं कर्तृनाशकरं भवेत् ।

---

[१] शिवसूत्रं स्यात् ] अ, ई, ऊ , ऋ, झ; शिवसूत्रस्यात् – च.
[२] तत्कर्णे ] ऋ, त; तत्कण्ठे – अ, ई, झ; कर्णात्कर्ण० च; तत्कण्ठं – ऊ.
[३] कर्णसूत्रकम् ] ई, झ, ऊ, ऋ, च, त; कण्ठसूत्रकम् – अ.
[४] अष्टदिक्सूत्र० ] अ, ई, ऊ, ऋ, झ ,त; अष्टत्रिंशत्सूत्रं – च.
[५] तु उमाकोष्ठं ] अ, ई, ऊ, ऋ; उमाकोष्ठं -च; तु उमाकोष्ठ – झ, त.
[६] तत्सूत्रादेविकोष्ठस्य ] अ, ई, ऋ; तत्सूत्रादेविकोष्ठस्यात् – ऊ; तत्सूत्रं देवि° – च; तत्सूत्रदेवि° – झ; तत्सुत्रमत् देवि° – त.
[७] मध्यसूत्रं द्वयान्तरम् ] अ; मध्यसूत्रद्व° – ई, ऊ, ऋ , झ; °सूत्रद्वयोत्तरम् – च. °सूत्रव्ययान्तरम् – त;
[८] शृणु सुव्रत ] अ, ई, ऋ, च, त; श्रुणु° – ऊ; °सुव्रता – झ.
[९] त्रिचतुःपञ्चषट्सप्तभागं वै ] अ, ई, ऋ, च, झ ,त; त्रिचतु पञ्च° – ऊ;
[१०] अथवान्यप्रकारेण ] अ, ई, ऊ, च, झ; अ . . . . रेण । - ऋ; अथवान्या० – त.
[११] शिवभागो विधीयते ] अ, ऊ, ऋ; °भागं° – ई, च, त; नवभागं विधियते – झ.
[१२] शैवाधिक्यं ] अ, ई, ऊ, च, झ; शैवाधिकम् - ऋ; शैवधिक्य – त.
[१३] गुणार्धं वर्धमानं ] अ, ई, ऊ, ऋ, झ; त्रिगुणं चार्धमानं स्यात् – च; गुणार्धवर्ध – त.
[१४] समखण्डके ] च; समखण्डकम् - अ, ई, ऊ, ऋ, झ; समकंटकं – त.
[१५] अन्येषां लिङ्गनाहं यत् ] अ, ई, ऊ, ऋ, च, झ; अन्येषा मलिङ्गना यत् – त.
[१६] शिवभागविशालकम् ] अ, ई, ऋ, च, झ; शिवभागं वि° – ऊ, त.
[१७] शिवभागाव° ] अ, ई, ऊ, ऋ, च, त; शिवभागव° – झ.
[१८] कोष्ठमध्यमसूत्रकम् ] अ, ई, ऊ, ऋ, झ , त; कोष्ठेधद्धेमसू° – च.
[१९] तद्भागान्तर्गतं सूत्रं ] अ, ई, ऊ, ऋ, च, त; °गन्तर्गतं सूत्र – झ.

[१]शिवभागस्य बाह्याङ्गं [२]सूत्रं संपत्समृद्धिदम् ॥ १५॥
तस्मात् सर्वप्रयत्नेन शिवभागावसानके ।
सूत्रं संकल्पयेद्विद्वान् गौरीकोष्ठस्य [३]मध्यगम् ॥ १६॥

[गौर्यालयस्थानानि षोडश]

एवं सूत्रं विनिश्चित्य [४]गौरीगेहं समाचरेत् ।
[५]प्राक्सूत्राद्दक्षिणे सौम्ये [६]श्रीभोगाख्यविमानकम् ॥ १७॥
अग्निदिक्सूत्रपार्श्वे तु पुत्रकोष्ठं समाचरेत् ।
[७]दक्षिणे [८]सूत्रपार्श्वे तु चित्रकान्तं [९]प्रकल्पयेत् ॥ १८॥
[१०]नैर्ऋते [११]सूत्रपार्श्वे तु [१२]श्रीभद्रं च विमानकम् ।
सुन्दरं वारुणे देशे [१३]सूत्रपार्श्वे प्रतिष्ठितम् ॥ १९॥
[१४]वायव्ये [१५]सूत्रपार्श्वे तु [१६]पुत्रकान्तविमानकम् ।
[१७]कौबेरसूत्रपार्श्वे तु विमानं [१८]गोमुखं स्मृतम् ॥ २०॥

---

[१] शिवभागस्य बाह्याङ्गं ] च; श्रीभागबाह्यसूत्रं यत् – ई; शिवभाग्बाह्यसूत्रं यत् – झ; शिवभागबाह्यसूत्रं यत् – त;
[२] सूत्रं संपत्समृद्धिदम् ] च; सम्पन्नं वै समृद्धिदम् – ई; सर्वसम्पत्समृद्धिदम् – झ, त.
[३] मध्यगम् ] झ, त; मध्यकम् – ई; मध्यमे - च.
[४] गौरीगेहं ] अ, ई, ऊ; गौरिगेहं – ऋ, च, झ.
[५] प्राक्सूत्राद्दक्षिणे ] ई, ऊ, ऋ, झ; प्राक्सूत्रं दक्षिणे – च;
[६] श्रीभोगाख्य० ] ई, ऊ, ऋ, च; श्रीसौभाग्य०- झ.
[७] "एवं सूत्रपार्श्वे तु पुत्रकोष्ठं समाचरेत्" इतीदं श्लोकार्धं अ, ई, ऊ, ऋ, झ मातृकासु श्लो० १८पू०-१८ उ० अन्तरे दृश्यते । (वं सूत्रपार्श्वे तु – अ, च, झ; दक्षिणे सूत्रपार्श्वे तु – ई)। 'त' मातृकायां श्लो०'१८ उ०-१९पू०' भागो न दृश्यते।
[८] सूत्रपार्श्वे तु ] अ, ई, ऊ, ऋ, च; सूत्रपाश्व तु – झ .
[९] प्रकल्पयेत् ] अ, ई, ऋ, च, झ; समाचरेत् – ऊ .
[१०] "नैर्ऋते सूत्रपार्श्वे तु चित्रकान्तं प्रकल्पयेत् " इत्ययमर्धश्लोकः अ, ई, ऊ, ऋ मातृकासु श्लो० १८ उत्तरार्धानन्तरं दृश्यते । (प्रकल्पयेत् ] अ, ई, ऋ; समाचरेत् – ऊ)
[११] सूत्रपार्श्वे ] अ, ई, ऊ,ऋ ; सूत्रपाश्वे – झ.
[१२] श्रीभद्रं च विमानकम् ] अ, ई, ऊ; °वि . . . .कम् – ऋ; श्रीभद्रान्तं वि° – च ; श्रिभद्रं च वि° – झ.
[१३] सूत्रपार्श्वे ] अ, ई, ऊ,ऋ ; सूत्रपाश्वे – झ.
[१४] वायव्ये ] अ, ई, ऊ,ऋ; वायवे – त, च .
[१५] सूत्रपार्श्वे तु ] अ, ई, ऊ,ऋ; सूत्रपाश्वे तु – झ.
[१६] पुत्रकान्तविमानकम् ] अ, ऋ; पुत्रकान्तं वि° – ई, ऊ, च , झ.
[१७] कौवेरसूत्रपार्श्वे तु ] अ; कुबेरे सू° – ई , ऋ ; कुबेरसू° – ऊ , च; कुबेरे सूत्रपाश्वे तु – झ; कौबेरे सू° – त.
[१८] गोमुखं स्मृतम् ] अ , ई, ऊ, ऋ, झ; गोमुखाख्रतम् - च.

[1]श्रीकान्तमीशदिक्कोणे कर्णसूत्रस्य [2]पार्श्वके ।
[3]शक्रपावकयोर्मध्ये [4]कौसलं कोष्ठमाचरेत् ॥२१॥
अनलान्तकयोर्मध्ये [5]श्रीनिवासविमानकम् ।
[6]याम्यनैर्ऋतयोर्मध्ये विमानं [7]विजयावहम् ॥२२॥
[8]वरुणनैर्ऋतयोर्मध्ये [9]विमानं पद्मकान्तकम् ।
[10]वरुणानिलयोर्मध्ये [11]कोष्ठसुन्दरमाचरेत् ॥२३॥
[12]कुबेरानिलयोर्मध्ये[13] [14]सुभद्रकं विमानकम् ।
[15]कुबेरेशानयोर्मध्ये [16]सुमङ्गलविमानकम् ॥२४॥
[17]शक्रईशानयोर्मध्ये [18]पार्वतीकान्तमाचरेत् ।
[19]श्रीभोगाद्यष्टकं कोष्ठं दिग्विदिक्षु प्रकल्पयेत् ॥२५॥
[20]कल्पयेदन्तरालेषु [21]कौसलाद्यष्टकं गृहम् ।

---

[1] श्रीकान्तमीशदिक्कोणे ] अ; श्रीकान्तं मीशकोणेषु – झ ; °दिग्भागे – त.

[2] पार्श्वके ] अ, ई, ऊ, ऋ; पाश्वके – झ.

[3] शक्रपावकयोर्मध्ये ] अ, ई; शक्रपार्श्वयोर्मध्ये – ऊ ; शक्रपा . . . . र्मध्ये – ऋ.

[4] कौसलं कोष्ठमाचरेत् ]अ, ई, ऋ; कौशलकोष्ठमादिशेत् – ऊ ; कौशलकोष्ठ° – च ; कौ . . . . माचरेत् – झ.

[5] श्रीनिवासविमानकम् ] अ, ई, त ; श्रीनिवासं वि° – ऊ , झ ; 'च' मातृकायां २२ श्लोकस्य द्वितीयतृतीयपादौ न दृश्येते ।

[6] याम्यनैर्ऋतयोर्मध्ये ] अ, ई; याम्ये नैर्ऋ° – ऊ; यम्ये नैऋत° – झ.

[7] विजयावहम् ] अ, ऊ; °भवम् – ई, त; विजयोद्भवम् – झ.

[8] वरुणनैर्ऋतयोर्मध्ये ] अ, ई, ऊ; वर्णनैऋत° – झ; नैर्ऋतवरुणयोर्मध्ये – त.

[9] विमानं पद्मकान्तकम् ] अ ; . . . . मानम् – ऋ .

[10] वरुणानिलयोर्मध्ये ] अ, ई; वरुणनि° – ऊ ; व . . . . यो° – झ.

[11] कोष्ठसुन्दरमाचरे ] च ; कोष्ठं सुन्दरमाचरेत् – अ, ई, ऊ, ऋ ; °सूत्रां तमाचरेत् – त.

[12] कुबेरानिलयोर्मध्ये ] अ, ई ; कुबेरनिल° – ऊ ; कुबेरानल० – च.

[13] "विमानं पद्मकान्तकम् " इत्ययं पादः 'त' मातृकायां श्लो० २४ प्रथमपादानन्तरमधिकतया दृश्यते ।

[14] सुभद्रकं विमानकम् ] अ; सुभद्रकविमा° – ई , ऊ , ऋ , च , त.

[15] कुबेरेशानयोर्मध्ये ] अ, ई; कुबेरनिलयो° – ऊ ; कुबेरैशानयोर्मध्ये – च.

[16] सुमङ्गलविमानकम् ] अ, ई, ऊ, ऋ; समङ्गल° – च.

[17] शक्रईशानयोर्मध्ये ] अ, ई, ऋ; शंकरईशा° – ऊ; शक्रशाङ्करयो° – च ; शक्रेशानयो° – त.

[18] पार्वतीकान्तमाचरेत् ] अ, ई, ऋ; °कान्तकं चरेत् – ऊ.

[19] श्रीभोगाद्यष्टकं ] अ, ई, ऋ; श्रीभोग्यदष्टकं – ऊ ; °ध्यष्ठकां – च; श्रिभोगा° – झ.

[20] कल्पयेदन्तरालेषु ] अ, ई, ऊ, ऋ; अल्पये° – झ; कलयेदन्त° – त.

[21] कौसलाद्यष्टकं गृहम् ] सं० पाठः; कौसल्याद्यष्टकं गृहं- अ, ई, ऋ; कौसलाद्यष्टकगृहम् - त; कौलल्याष्टकं°–ऊ; कौसलदष्टकं ग्रहम् –च; कासलाद्यष्टकं ग्रहम् – झ.

[1]अन्योन्यसङ्करं चेत्तु [2]तद्धाम राक्षसास्पदम् ॥ २६ ॥
[3]तस्मात् सर्वप्रयत्नेन [4]वर्गे वर्गे न सङ्करम् ।
[5]क्रमेण कल्पयेद्विद्वान् तल्लक्षणपुरस्सरम् ॥ २७ ॥

[कामकोष्ठमानम्]

[-कामकोष्ठविशालकम्]

[6]मूलालयसमं वापि [7]त्रिपादं वाऽर्धमेव वा ।
[8]गर्भार्धं तत्समं वापि [9]गौरीधामविशालकम् ॥ २८ ॥
अथवा हस्तमानेन [10]गौरीधाम प्रकल्पयेत् ।
त्रिवेदहस्तमारभ्य [11]नवपङ्क्तिकरान्तकम् ॥ २९ ॥
[12]विस्तारं [13]पञ्चधा प्रोक्तं [14]महापञ्चैकभूमिके ।
पञ्चषट्[15]हस्तमारभ्य [16]रुद्रभानुकरान्तकम् ॥ ३० ॥
[17]मुनिरिन्द्रकमारभ्य [18]कलापक्षकरान्तकम् ।
[19]नन्दनाडीकरारभ्य स्मृत्यन्तं पञ्चमानकम् ॥ ३१ ॥

---

[1] अन्योन्यसङ्करं चेत्तु ] अ, ऋ; °संग्रहं° – ई ; °शंकरं° – ऊ ; अ . . . . संकरं चेतु – झ ; °संकराच्चेतु – त.
[2] तद्धाम राक्षसास्पदम् ] अ, ई, ऋ ; °रक्षसस्पदम् – ऊ ; °सास्वदम् – च ; तद्धामं° – झ, त.
[3] तस्मात् सर्वप्रयत्नेन ] अ, ई, ऋ; सर्वात्सर्वं° – ऊ.
[4] वर्गे वर्गे न संकरम् ] अ; °वर्गेण शं° – ऊ ; °वर्गेण सं° – ई, ऋ , झ , त ; वर्गो वर्गेण° – च.
[5] क्रमेण कल्पयेद्विद्वान् ] अ, ई, ऊ; क्रमे . . . . कल्पये° – ऋ.
[6] मूलालयसमं ] ऊ, च , त; मूलालयं समं – अ, ई, ऋ, झ.
[7] त्रिपादं वार्धमेव वा ] अ, ई, ऊ, ऋ, च; त्रिपदं वर्धं° – झ .
[8] गर्भार्धं तत्समं वापि ] अ, ई, ऋ, च; झ; गर्भार्धसमं ° – ऊ ; गर्भार्थं° – त.
[9] गौरीधाम० ] अ, ई, ऋ,त; गौरिधामं विशालयम् – ऊ, च; गौरिधाम० – झ.
[10] गौरीधाम ] अ, ई, ऋ, त; गौरीधामं – ऊ, च; गौरिधामं – झ.
[11] नवपङ्क्तिकरान्तकम् ] अ, ई; नवपद्मकरान्तकम्–ऊ ;'ऋ'मातृकायां अक्षरलोपः; लाभपक्षवरा°–च; तव पत्यं तरान्तकम्-त.
[12] अयं श्लोकः 'च ' मातृकायां न दृश्यते ।
[13] पञ्चधा प्रोक्तं ] ई; चैकधा प्रोक्तं – अ, ऊ; च चतुर्मानं – त.
[14] महापञ्चैकभूमिके ]अ; महार्धं चैकभूमिक -ई; महार्धश्चैव भूमिकम् -ऊ; महार्धं चैक°-ऋ ; महार्द्यं चैव° -झ; महासमं चैक°-त.
[15] हस्तमारभ्य ] त; ०सप्तमारभ्य – अ, ई, ऊ, ऋ.
[16] करान्तकम् ] त ; ०दशान्तकम् – अ, ई, ऊ; कर . . . . - ऋ .
[17] मुनिरिन्द्रकमा० ] ई, ऊ, त; मुनिरादिकमा० – झ; 'अ,ऋ ' मातृकयोः श्लो० ३१पू० न दृश्यते ।
[18] कलापक्षकरान्तकम् ] सं० पाठः; कलापक्षं च कान्तकम् ० – ई, ऊ; कलापक्षं च . . . .– झ; कलापक्षं च रान्तकम् – त.
[19] नन्दनाडीकरारभ्य ] अ, ई, ऊ; नन्दनाडि°–ऋ, झ; नन्दनादि°–च; 'त'मातृकायां श्लो० ३१उ०, ३२पू० भागौ न दृश्येते ।

[1]एकादियुगभूम्यन्तं विस्तारं संप्रकीर्तितम् ।
[2]रुद्रभानुकरान्तादि [3] त्रयस्त्रिंशावसानकम् ॥ ३२ ॥
[4]चतुस्त्रिंशान्तविस्तारं [5]कलाभूमावसानकम् ।
विस्तारमेवमाख्यातम् [6]आयामं च [7]तथा शृणु ॥ ३३ ॥

[कामकोष्ठायामः]

[8]विस्ताराष्टांशमाधिक्यं ब्रह्मगर्भमिति स्मृतम् ।
[9]विस्तारात्सार्धमाधिक्यं विष्णुगर्भमिति स्मृतम् ॥ ३४ ॥
[10]विस्तारादर्धमाधिक्यं रुद्रगर्भमिति स्मृतम् ।
[11]एवमायाममाख्यातम् [12]उत्सेधमधुना शृणु ॥ ३५ ॥

[कामकोष्ठोत्सेधः]

तारे [13]सप्त तु भूतांशे [14]रसभूतयुगं समम् ।
[15]तारादष्टाधिकं तुङ्गं शान्तिकादि यथाक्रमम् ॥ ३६ ॥
[16]एवमुत्सेधमाख्यातं शृणु [17]मण्डपमानकम् ।

---

[1] एकादियुगभूम्यन्तं ] अ, ऊ; °युगभूत्यन्तम् – ई.

[2] 'त' मातृकायां 'श्लो' ३२ तृतीयपादस्थाने ' मुनिरात्रं त्रिकारभ्य कलापकुदकाराद्यादि ' इति दृश्यते ।

[3] रुद्रभानुकरान्तादि ] ई, ऊ, च; रुद्रभानुकरा . . . . दि – अ; झ; रुद्रभानुक . . . . दि – ऋ.

[4] चतुस्त्रिंशान्तविस्तारं ] ई, झ, त; त्रयस्त्रिंशान्तविस्तारं०–अ; त्रयस्त्रिंशान्त०–ऊ; त्रयस्त्रिंशान्न०–ऋ; चतुस्त्रिंसतिविस्तारं–च.

[5] कलाभूमावसानकम् ] अ, ई , ऋ; कलाभूमात्वसानकम् - ऊ ; कलाभूम्यअवसनकम् –च ; कलभूमावसनकम् – त.

[6] आयामं च ] अ , ई, ऊ, ऋ; अधमं च – च.

[7] तथा शृणु ] अ ; ततः शृणु – ई , ऊ , ऋ , झ , त ; तत शृणु - च.

[8] ' च ' मातृकायां श्लो० ३४ पूर्वार्धं न दृश्यते ।

[9] ' अ, ई , ऊ , त ' मातृकासु श्लो० ३४ उत्तरार्धं न दृश्यते ।

[10] विस्तारादर्धमाधिक्यं ] अ, ऋ ; विस्तारार्धसमा° – ई ; विस्तारदर्ध° – ऊ ; विस्ताराष्टांश° – च ; विस्तारमर्ध° – त.

[11] एवमायाममाख्यातम् ] अ , ई, ऊ; ए . . . . याममाख्यातम् – ऋ.

[12] उत्सेधमधुना शृणु ] अ, ई, ऋ; उत्सेधं च ततः° – ऊ ; मधुनोत्सेध तत° – च ; उत्सेधमधुनोच्यते – त.

[13] सप्त तु ] त; सप्तं तु - अ, ई , ऊ , ऋ ; संतत्तु – च.

[14] रसभूतयुगं समम् ] अ, ई, ऊ, ऋ; संभूतयुगसम्मितम् – च ; रसभूतं युगं° – झ.

[15] तारादष्टाधिकं तुङ्गं ] अ, ई, ऋ; ताराष्टाधिकं° – ऊ ; तारमष्टाधिक तुङ्ग – च ; ताराष्टाधिकं° – त.

[16] एवमुत्सेधमाख्यातं ] अ, ई, ऋ ; °माख्यातं – ऊ ; °मायाम सममण्डपम् - च.

[17] मण्डपमानकम् ] अ, ऋ; मण्डप° – ई , ऊ; °मण्डपलक्षणम् – च.

[कामकोष्ठमुखमण्डपमानम्]

मूलकोष्ठसमं तारम् [१]आयामं सममण्डपम् ॥ ३७ ॥
[२]अर्धं पादं त्रिपादं वा मुखमण्डपमाचरेत् ।
[३]सार्धदण्डं द्विदण्डं[४] वाऽभ्यन्तरालस्य वेशनम् ॥ ३८ ॥
[५]तत्संख्याहस्तमानेन [६]वान्तरालविशालकम् ।
अधिष्ठानादि[७]वर्गाढ्यं [८]सावकाशावसानकम् ॥ ३९ ॥
[९]भित्तिगण्डयुतं वापि [१०]तोरणाद्यैर्विचित्रितम् ।

[आयादिविधिः]

एवं मण्डपमाख्यातम् [११]आयादिरथ वक्ष्यते ॥ ४० ॥
[१२]अष्टाब्धिरसबाणेन [१३]वर्धयेद्भानुना हृतिः ।
[१४]आयमेतद् [१५]व्ययस्यापि [१६]नन्दसप्तशरादिभिः ॥ ४१ ॥
[१७]ह्रासयेद्दशभिर्योनिः [१८]अग्निबाणाब्धिनन्दयुक् ।

---

[१] आयामं सममण्डपम् ] ई ; आयासं सममण्डपम् – अ ; आयासं° – ऊ ; आयासं (मं) सम° – ऋ ; आयाममथ वक्ष्यते "सममण्डपम् " - त .

[२] अर्धं पादं त्रिपादं वा ] ई; अर्धपादं त्रिपादं वा–अ, ऋ; अर्धपादत्रि°–ऊ ; अर्धं पादत्रिपादं वा –च ; अर्धं वा त्रित्रि पादं वै –त .

[३] सार्धदण्डं द्विदण्डं वा ] अ, ई, ऋ ; सार्धदण्डं दण्डं वा – ऊ ; सार्धदण्ड त्रिदण्डं वा – च ; सार्धदण्डद्वि° – त .

[४] वाभ्यन्तरालस्य वेशनम् ] अ, ई, ऋ; अन्तरालस्य विशाकम् – ऊ.

[५] तत्संख्याहस्तमानेन ] अ, ई, ऊ, ऋ ; तत्संख्या हस्तमानेपि – च ; तत्संख्य हस्तमानेन – झ .

[६] वान्तराल० ] अ, ऋ; चान्तराल० – ई ; प्यन्तराल० – ऊ ; सान्तराल० – च , त .

[७] वर्गाढ्यं ] च ; वर्गाढ्यां – त ; गर्भाढ्यं – अ, ई, ऊ, ऋ .

[८] सावकाशावसानकम् ] ई , ऊ , ऋ , च , झ , त ; साकाशावसानकम् – अ .

[९] भित्तिगण्डयुतं ] ई , ऊ ;भित्तिगन्ध(ण्ड) युतं – अ, ऋ; भक्ति बन्धयुतं – च ; भुक्ति बन्धयुतं – झ भित्तिभेदयुतं – त .

[१०] तोरणाद्यैर्विचित्रितम् ] अ, ई, ऊ, ऋ; °विचित्रकम् – झ .

[११] आयादिरथ ] अ , ऋ ; आयादीनथ – ई , च ; आयाधिरथ – ऊ; आयादि मथ – त .

[१२] अष्टाब्धिरसवाणेन ] अ, ई, ऊ, ऋ, झ ; अष्टाब्धिरसवाणैश्च – च ; अष्टाब्जधरवाणेन – त.

[१३] वर्धयेद्भानुना हृतिः ] सं० पाठः; वर्धयेद्भानुना हुतिः – अ, ई ; वर्धयेनभानुनं हुतिः – ऊ ; वर्जयेद्भानुना° - ऋ; वर्द्धितं भानुना हृदम् - च ; वर्धयेद्भानुना हृदि – झ ; वर्थयेद्भानु° – त .

[१४]आयमेतद् ] सं० पाठः; आयामे तद् – अ, ऋ, त; आयामेऽथ ई; आयामे त – ऊ; , ऋ, च, त.

[१५] व्ययस्यापि ] अ, ई, ऋ, ; व्यवस्यापि – ऊ ; यमस्यापि – च ; व्यययास्यापि – त .

[१६] नन्दसप्तशरादिभिः ] अ, ई, ऊ, ऋ ; ननु सप्तरसेन च – त .

[१७] ह्रासयेद्दशभिर्योनिः] अ, ई , ऋ; हृदयेद्दशभिर्योनिः – ऊ ; भासयेद्दशभिर्योनौ – च ; ह्रासयैः दशभिः योनिः – त .

[१८] अग्निवाणाब्धिनन्दयुक्] अ, ई; अग्निवाणब्धि°–ऊ; अग्निब्रा..नन्दयुक्–ऋ; त्वग्निबाणाब्दिनन्दयुत्–च; °बणाब्धि तदनुयुक्–त.

[१]पर्वतेन च ऋक्षस्य नन्दाष्टाब्धिरसेन च ॥४२॥
तारेण [२]ह्रासयेद्वारनन्दसप्तऋतुदिग्भिः ।
[३]वारैश्च जनितं वारं [४]चतुष्पञ्चषडष्टकैः ॥४३॥
[५]वर्धयेन्नन्दसंख्याश्च [६]ह्रासयेदंशकस्य तु ।

[-आयव्ययौ]

[७]आयाधिक्याद्धनाधिक्यं [८]व्ययाधिक्याद्धनक्षयम् ॥४४॥

[-योनिः]

[९]ध्वजोक्षसिंहहस्ती च [१०]योनयः शुभदाः स्मृताः ।
[११]श्वानकाकखरधूमयोनय [१२]स्त्वशुभावहाः ॥४५॥

[-नक्षत्रम्]

कर्तुश्च जन्मनक्षत्रं वास्तुऋक्षावसानकम् ।
[१३]गणयेत्त्रिजन्मयुगलं [१४]वेदाष्टऋतुनन्दभम् ॥४६॥
[१५]शुभावहं दिनं ह्येतत् [१६]शेषं त्वशुभावहम् ।

---

[१] पर्वतेन च ऋक्षस्य ] अ, ई; पर्वन्तन च° – ऊ ; पर्वते नु च° – ऋ ; पदन्तन च° - च ; पर्वते नव ऋ° – झ ; वर्धते न° – त.

[२] ह्रासयेद्वारनन्दसप्तऋतुदिग्भिः ] सं० पाठः; °सप्तऋतुर्दिशिः - अ; ह्रासयेद्वारंनन्दसप्तऋतुर्दिशि – ई; ह्रासयेद्वारं नन्दसप्तचतुर्दिशि – ऊ ; °ह्रयेद्वारं नन्द सप्तऋतुर्दिशि – ऋ ; °भासयेद्वारे दन्तसप्तकृतित् गणम् – च ;

[३] वारैश्च जनितं वारं ] ई, ऋ , झ ; परैश्च जनितं वारं ] अ ; पारैश्च . . . . चतु° – ऊ; परैश्च गणितं° – च .

[४] चतुष्पञ्चषडष्टकैः ] अ, ई, ऋ; °षडाष्टकैः – ऊ; °षडष्टकैः – ऋ .

[५] वर्धयेन्नन्दसंख्याश्च ] अ,ई, ऋ ; वर्धये नन्दसंख्या च – ऊ ; वर्धयेनन्द संख्याभिः – च .

[६] ह्रासयेदंशकस्य तु ] अ, ई, ऋ; °दंशस्य – ऊ; भासयेदंशके नहि – च .

[७] आयाधिक्याद्धनाधिक्यं ] अ; °धिक्यं धनाधिक्यं –ई, ऋ; °क्य धनाधिक्यं - ऊ; °धिक्यं धनाधिक्यं –ऋ; °दिक्यं धनाधिक्यं - च.

[८] व्ययाधिक्याद्धनक्षयम् ] अ ; °क्यं धनक्षयः – ई ; °क्यं धनक्षयम् – ऊ , ऋ , च , झ .

[९] ध्वजोक्षसिंहहस्ती च ] ऊ; ध्वजोक्षस्सिंहहस्ती च - अ, ई; ध्वजोक्षासिंह हस्तिश्च – ऋ ; ध्वजोक्षा सिंह हस्तीन्द्र – च .

[१०] योनयः शुभदाः स्मृताः ] अ, ई, ऋ ; योनः शुभदाः° – ऊ , च .

[११] श्वानकाकखरधूमयोनयः ] सं० पाठः; श्वानकाकखरोधूमयोनयः- अ, ई, ऋ, च, झ, त; श्वानकाकखरोधूःन्यो० – ऊ.

[१२] योनयस्त्वशुभा वहाः ] अ, ई, ऋ ; °मताः – ऊ ; °त्वश्शुभा° – च .

[१३] गणयेत्त्रिजन्मयुगलं ] अ, ई, ऊ ; गणयेत्तिज° – ऋ ; जन्मये त्रिजन्मयुगले – च .

[१४] वेदाष्टऋतुनन्दभम् ] ई , ऋ , च ; ०नन्दहम् - अ ; °जतुनन्दभम् - ऊ .

[१५] शुभावहं दिनं ] अ, ऋ ; °वहदिनं – ई; °वहदिकं – ऊ.

[१६] शेषं त्वशुभावहम् ] अ; शेषास्त्वशुभावहाः – ई ; शेषत्वशुभावहम् -ऊ ; शेषं तु त्व° – ऋ ; छेषर्क्षान्त्वणुभावहाः – च .

[-वारः]

[1]बुधशुक्रेन्दुवाराश्च [2]गुरुवारः शुभप्रदः ॥ ४७ ॥

[-अंशम्]

तस्करो [3]भुक्तिशक्ती च [4]अधनो नृपतिः क्लिबः।
[5] नभीति [6]निधनं प्रेष्यं नवांशानि क्रमेण तु ॥ ४८ ॥
[7]अधनं [8]तस्करं षण्डं वर्जयेत्तु प्रयत्नतः।

[योगः]

शुभवारादिभिर्युक्तं [9]पुष्यऋक्षादि [10]सप्तभम् ॥ ४९ ॥
[11]रिक्ताख्यं मरणं नाशं [12]मृतं [13]सौख्यप्रसिद्धिदम्।
[14]प्रीत्यन्तं [15]सप्तयोगः स्यात् [16]मन्दवारोत्तरादिभिः ॥ ५० ॥
भानुवारे [17]विशाखा च शशिवारे [18]जलाधिपः।

---

[1] बुधशुक्रेन्दुवाराश्च ] अ ; °वारश्च – ई, ऋ ; °सुक्रेन्दुवारं च – ऊ .

[2] गुरुवारः शुभप्रदः ] अ; °प्रदम् –ऊ; °वारं शुभप्रदम् – ई; गुरुवारशुभ° - ऋ.

[3] भुक्तिशक्ती च ] सं० पाठः; भुक्तिशक्तिश्च - ई, झ; भुक्तिशस्तश्च – अ; भुक्तिशक्ति धनो – ऊ; भुक्तिहस्तश्च – ऋ; भुक्तिमुक्तिश्च – च.

[4] अधनो नृपतिः क्लिबः ] सं० पाठः; धनो नृपतिरक्लिबः- अ; °नृपतिक्लिपः – ई ; °नृपतिरकीबः – ऊ; जनो नृपतिरस्थि च – ऋ; °धन्योनरपतिर्क्के – च. क्लीव इत्यर्थे क्लिव इति पाठः छन्दोनुसारः।

[5] नभीति] सं० पाठः; न हीति -अ, ई, ऋ; नवमिति -ऊ, न हितिं -झ. 'च' मातृकायां श्लो° ४८ उत्तरार्धमारभ्य श्लो° ५१ द्वितीयपादान्तो भागो न दृश्यते।

[6] निधनं प्रेष्यं ] सं० पाठः ; निधनप्रोक्ष्य – अ ; निधन प्रेक्ष्य – ई, झ ; धनप्रोक्ष्य – ऊ ; निधनं प्रोक्ष्य – ऋ .

[7] अधनं ] सं० पाठः ; आयामं – अ ; आयाम – ई, ऊ, ऋ; अयमन् - झ.

[8] तस्करम् षण्डं ] सं० पाठः ; तत्स्थिरं षण्डं – अ , ई, झ ;तस्थिराष्टण्डं – ऊ ; स्थिरं षण्डं – ऋ .

[9] पुष्यऋक्षादि ] अ, ई, ऋ; पुष्यर्क्षादि – ऊ.

[10] सप्तभम् ] अ, ऊ, ऋ; सप्तकम् – ई.

[11] रिक्ताख्यं ] अ , ई; वेकताख्यं – ऊ; ऋक्षात्ताख्यं – ऋ .

[12] मृतं ] अ, ऋ; अमृतम् – ई, ऊ.

[13] सौख्यप्रसिद्धिदम् ] अ, ई, ऋ; सौख्यवृद्धितम् – ऊ.

[14] प्रीत्यन्तं ] अ, ऋ ; प्रत्यन्तं – ई ; प्रित्यन्तं - ऊ .

[15] सप्तयोगः ] अ, ऋ ; °योगं – ई , ऊ .

[16] मन्दवारोत्तरादिभिः ] अ, ई ; मन्दवारो . . . . दभिः – ऊ; नन्दवारो° – ऋ .

[17] विशाखा च ] अ, ऋ; विशाखादि – ई; विशाखैश्च – ऊ.

[18] जलाधिपः ] अ, ऊ, ऋ; जलाधिपम् – ई .

[1]भौमवारे [2]श्रविष्ठा हि बुधवारे तु वैष्णवम् ॥५१॥
[3]गुरोर्विधातृऋक्षादि [4]सप्त जन्मर्क्षकं भवेत् ।
एवं परीक्ष्य बहुधा शुभमानं तु संगृहेत् ॥५२॥

[मानसूत्रादिक्रमविधिः]

[सूत्रभेदाः]

मानं विन्याससूत्रं च [5]धरासूत्रोपपीठकम् ।
[6]प्रकृतिर्होमसूत्रं च सूत्रकल्पं प्रकल्पयेत् ॥५३॥

[-सूत्रक्रमः]

आयादिशुभसंयुक्तं मानं यन्मानसूत्रकम् ।
षडङ्गुलं समारभ्य त्रित्र्यंगुलविवर्धनात् ॥५४॥
नन्दमानं प्रकर्तव्यं विन्यासं सूत्रनिर्गमम् ।
नवाङ्गुलं समारभ्य अङ्गुलाङ्गुलवर्धनात् ॥५५॥
अष्टाविंशाङ्गुलं यावत् तावद् [7]भूसूत्रनिर्गमम् ।
तत्समं सोपपीठस्य कर्णवाद्बाह्यनिर्गमम् ॥५६॥
षडङ्गुलं समारभ्य अङ्गुलाङ्गुलवर्धनात् ।
[8]पञ्चविंशाङ्गुलं यावत् [9]सोपपीठस्य सूत्रकम् ॥५७॥
[10]तत्सूत्रात्प्रकृतेर्नीप्रं त्रिचतुष्पञ्चमात्रकम् ।
[11]होमसूत्रसमोपेतं चतुस्सूत्रमुदाहृतम् ॥५८॥

---

[1] भौमवारे – ई ] शशिवारे - अ, ऊ, ऋ ;

[2] श्रविष्ठा हि ] ई, ऋ ; श्रविष्ठाभि- अ ; श्रविष्ठाहु – ऊ.

[3] गुरोर्विधातृऋक्षादि ] अ, ऋ ; गुरोर्विधातृरि° – ई; गुरो प्रियन्यत्रदक्षाधि – ऊ .

[4] सप्त जन्मर्क्षकं ] अ, ऋ ; सप्त सप्तार्थकं – ई ; सप्त सप्त ऋक्षं – ऊ .

[5] धरासूत्रोपपीठकम् ] सं० पाठः; धारासारोपपीठकम् – अ, ई, ऊ, ऋ, त ; धारासारे . . . . पीठकम् – झ.

[6] प्रकृतिर्होम सूत्रं च ] ई ; प्रकृति होमसूत्रञ्च – अ ; प्रसिद्धि° – ऊ . प्रकृतिर्हो (र्हें)म° – ऋ.

[7] भूसूत्रनिर्गमं ] च ; भूस्तत्र निर्गमम् – ई .

[8] पञ्चविंशाङ्गुलं ] अ, ई, ऋ ; °विंशं गुलं – ऊ .

[9] सोपपीठस्य ] ई , ऊ , ऋ ; सोमपीठस्य – अ , च.

[10] तत्सूत्रात्प्रकृतेर्नीप्रं ] अ; °ते नीप्रं – ई , ऋ; °कृते नीप्र – ऊ ; तत्सूत्रान् पृकृन्त्तनीयत्रिं° – च .

[11] होमसूत्रसमोपेतं ] अ; सोमसूत्र° – ई ;°त्र ततोपेतं - ऊ; होम(गेम)सूत्र° - ऋ; 'च ' मातृकायां श्लो० ५८ उ० - ५९ पू० भागो न दृश्यते ।

[-पञ्चसूत्रक्रमः]

मानं विन्याससूत्रं [१]च अधिष्ठानस्य सूत्रकम् ।
[२]प्रकृतेर्होमसूत्रं च [३]सूत्रपञ्चकमेव हि ॥५९॥
एवं सूत्रक्रमं प्रोक्तं [४]नालीगृहविधिं श्रृणु ।

[गर्भगृहमानम्]

विस्तारमष्टधा कृत्वा रसांशं गर्भगेहकम् ॥६०॥
[५]रसांशैर्वेदभागःस्याद्वेदांशे [६]द्विभागं स्मृतम् ।
[७]पञ्चभागेऽग्निभागं तु [८]मुनिभागेन्द्रियं त्विति ॥ ६१ ॥
[९]नवांशे [१०]धातुभागं स्यात् [११]नालीगृहविशालकम् ।
शेषांशं भित्तिविस्तारं परितः कल्पयेत्तु सा ॥६२॥
एवं [१२]नालीगृहं प्रोक्तं पङ्क्तिमानमथ [१३]श्रृणु।

[प्रासादपङ्क्तिमानम्]

गुणभागं तु विस्तारम् आयामं [१४]गुणतो भवेत् ॥६३॥
अथवा [१५]त्र्यंशविस्तारे [१६]पञ्चपङ्क्त्यायतं तु वा ।
पञ्चपङ्क्तिविशालं स्यादायामं सप्तपङ्क्तिकम् ॥६४॥

---

[१] च अधिष्ठान° ] ई , ऊ , ऋ ; चाधिष्ठानस्य सूत्रकम् - अ.
[२] प्रकृतेर्होमसूत्रं च ] अ; ई ; प्रकृते होम° – ऊ ; प्रकृते होमसूत्रं तु – ऋ .
[३] सूत्रपञ्चकमेव हि ] ई; सूत्रपञ्चक्रमेण हि - अ; °सूत्रञ्च पञ्चक्रमेव° – ऊ; सूत्रपञ्चकमेव हि- ऋ; द्व्यङ्गुलार्धंन्त्र्यङ्गुलम् – च.
[४] नालीगृहविधिं ] ई , ऋ ; नालीग्रहविधिं – अ ; नाडिग्रहविधिं – ऊ ; नालिक्रमविधिं – च .
[५] रसांशैर्वेदभागः ] अ, ई, ऋ; °भागं – ऊ; सारांशेवेदभागं – च .
[६] द्विभागं स्मृतम् ] सं० पाठः ; द्वियगं स्मृतम् – अ ; द्वियग° – ई; द्वयग° – ऊ ; विद्विधा° – ऋ; °वंशविस्तृतम् – च .
[७] पञ्चभागेऽग्निभागं तु ] ई, च ; पञ्चभागेऽग्निगेहं तु – अ, ऋ; °भागेऽग्निगेहे – ऊ .
[८] मुनिभागेन्द्रियं त्विति ] अ ; °न्द्रियस्विति° – ई, च; °भागे नियें त्विति – ऊ; °न्द्रियस्तिति° – ऋ.
[९] 'च' मातृकायां श्लो० ६२ - ३०२ भागो न दृश्यते ।
[१०] धातुभागं ] अ,ऊ, ऋ ; धातुभागः – ई .
[११] नालीगृह° ] अ, ई, ऋ; नासिगृह° – ऊ .
[१२] नालीगृहं ] अ, ई, ऋ ; नासिगृहं – ऊ .
[१३] श्रृणु ] अ , ई, ऋ; श्रुणु – ऊ .
[१४] गुणतो ] अ, ई, ऋ; गणतो – ऊ; गुणता - झ .
[१५] त्र्यंशविस्तारे ] झ; त्रिंशविस्तारे – अ, ई, ऋ ; त्रिंशद्विस्तारे – ऊ .
[१६] पञ्चपङ्क्त्यायतं तु वा ] अ, ई, ऋ; °युतं तु वा – ऊ .

विस्तारं वेदषड्भागमायतं वा [1]षडष्टकम् ।
अथवा [2]कोष्ठविस्तारं कौशिकांशविभाजिते ॥ ६५॥
एकांशं कूटविस्तारमायामं तत्समं भवेत् ।
[3]तद्द्वयं [4]कोष्ठदीर्घं स्याच्छेषं हारान्तरं भवेत् ॥ ६६ ॥
आयामे कुरु कूटांशं त्यक्त्वा शेषं युगांशकम् ।
द्विभागं [5]कोष्ठदीर्घं स्यात् शेषं [6]हारान्तरं भवेत् ॥ ६७॥
[7]पङ्क्तिमानक्रमः प्रोक्तः अधिष्ठानविधिं शृणु ।

[अधिष्ठानविधिः]

[-अधिष्ठानद्वैविध्यम्]

[8]पादबन्धं प्रतिबन्धं च [9]द्विविधं तदुदाहृतम् ॥ ६८॥
[10]एकैकमष्टधा प्रोक्तं तद्भेदं शृणु सुव्रत।

[-पादबन्धाद्यष्टकम्]

[11]प्रथमं पादबन्धं स्याद् द्वितीयं [12]चाब्जकान्तकम् ॥ ६९॥
[13]श्रेणिबन्धं तृतीयं स्याच्चतुर्थं पुष्पपुष्कलम् ।
श्रीकान्तं पञ्चमं चैव षष्ठं चाम्भोजसुन्दरम् ॥ ७०॥
सप्तमं सुन्दराब्जं च भद्रबन्धमथाष्टकम् ।
पादबन्धाष्टकं [14]त्वेवं [15]प्रतिबन्धमथ शृणु ॥ ७१ ॥

---

[1] षडष्टकम् ] अ, ऊ, ऋ; षडाष्टकम् – ई.
[2] कोष्ठविस्तारं ] ई , ऊ , ऋ ; कोणविस्तारं – अ.
[3] तद्द्वयं ] अ, ई, ऋ ; तद्वयं – ऊ .
[4] कोष्ठदीर्घं ] ई, ऊ , ऋ ; कोष्ठदैर्घ्यं - अ.
[5] कोष्ठदीर्घं ] अ, ई, ऋ ; दीर्घकोष्ठं – ऊ .
[6] हारान्तरं ] अ, ई, ऋ ; तारान्तरं – ऊ .
[7] पङ्क्तिमानक्रमः प्रोक्तः ] अ ; °मानक्रमं प्रोक्तं – ई , ऋ ; °मानमिदं प्रोक्तं – ऊ .
[8] पादबन्धं प्रतिबन्धं च ] ऋ ; ०प्रतीबन्धं च - ई , ऊ ; प्रतिबन्धा प्रतिवन्धं च – अ .
[9] द्विविधं तदुदाहृतम् ] अ, ई , ऊ ; द्विविधं.....हृतम् - ऋ .
[10] एकैकमष्टधा ] अ, ई, ऋ ; एकेक° – ऊ .
[11] प्रथमं पादबन्धं स्याद् ] अ, ई ; ०पादबन्धः० – ऋ; 'ऊ' मातृकायां इदमर्धं न दृश्यते ।
[12] चाब्ज० ] ई, ऊ, ऋ, झ, त ; चाब्द° – अ.
[13] श्रेणि° ] अ, ऋ, त; श्रोणीबन्धं – ई ; श्रीणि° – ऊ; श्रणिबन्धं - झ.
[14] त्वेवं ] अ, ऋ ; त्वैवं – ई, झ ; चैव – ऊ, त .
[15] प्रतिबन्धमथ ]अ,ऊ, ऋ ; °बन्धं ततः - ई .

[-प्रतिबन्धाद्यष्टकम्]

प्रथमं प्रतिबन्धं च श्रीबन्धं च द्वितीयकम्।
[१]स्कन्दकान्तं तृतीयं स्याच्चतुर्थं कुम्भकान्तकम् ॥७२॥
पञ्चमं सर्वतोभद्रं [२]षष्ठकं मकरासनम् ।
[३]सप्तमं शम्भुबन्धं स्यादष्टमं चन्द्रबन्धनम् ॥७३॥
प्रतिबन्धाष्टकं [४]ह्येवमलङ्कारमथोच्यते ।

[अधिष्ठानालङ्कारः]

[-पादबन्धम्]

[५]अधिष्ठानस्य चोत्सेधं भानुद्विगुणितांशके ॥७४॥

[-प्रतिबन्धम्]

पादबन्धमिदं प्रोक्तं [६]द्वादशांशे धरातले ।
उपानोऽथ द्विभागं [७]स्याज्जगत्युच्चं गुणांशकम् ॥७५॥
[८]द्वयं सार्धं घटोत्सेधं कम्पमर्धांशमेव च ।
[९]त्रिपट्टस्योच्चमर्धांशं [१०]प्रत्युत्सेधं गुणांशकम् ॥७६॥
अर्धांशं [११]वाजनोत्सेधम् [१२]प्रतिबन्धमिति स्मृतम् ।

[-अम्भोजकेसरं शाम्भवं च]

[१३]उपानं त्वेकभागेन तद्द्वयं पङ्कजोदयम् ॥७७॥

---

[१] स्कन्दकान्तं तृतीयं ] ऊ ; . . . . तृतीयं – अ, ई, ऋ, त ; मनोहरं तृती . . . .– झ.

[२] षष्ठकं मकरासनम् ] ई,त; षष्ठं मकरमासनम् -अ; षष्ठं ममकरतासनम् – झ ; षष्टं कमरकासनम् -ऊ; षष्टं मकरकासनम् -ऋ .

[३] सप्तमं ] अ, ई, झ, त ; सप्तपं – ऊ ; 'ऋ' मातृकायां इदमर्धं न दृश्यते ।

[४] ह्येवमलङ्कारमथोच्यते ] अ, ऊ ; त्वेवमल° – ई ; ह्येतत् अलङ्कार° – ऋ .

[५] अधिष्ठानस्य चोत्सेधं ] अ, ई, ऊ ; अधिष्ठानसमोत्सेधं – ऋ .

[६] द्वादशांशे धरातले ] अ ; ई, ऊ, झ, त; द्वादशांशेऽथवा तले – ऋ .

[७] स्याज्जगत्युच्चं ] अ, ई ; स्याज्जगदीच्चं – ऊ ; स्याज्जगद्युच्चं – ऋ .

[८] द्वयं सार्धं० ] सं० पाठः; द्वयं चार्धं० – अ, ई, ऊ, ऋ .

[९] त्रिपट्टस्योच्चमर्धांशं ] अ ; त्रिपट्टस्योर्ध्वं – ई; त्रिपट्टस्सोच्च° – ऊ; त्रिपादस्योच्च° – ऋ .

[१०] प्रत्युत्सेधं ] अ, ई, ऋ ; प्रदुत्सेधं – ऊ .

[११] वाजनोत्सेधम् ] ई; वाजिनो° – आ, ऊ, ऋ.

[१२] प्रतिबन्धमिति ] ई , ऊ ; इति वन्धमिति – अ ; . . . . त्रि . . . .प्य . . . .मिति – ऋ .

[१३] उपानं त्वेकभागेन ] ई , झ, त; उपानश्चैकभागे तु – ऊ; उपानवे . . . . भागेन – ऋ; 'अ' मातृकायामिदं श्लोकार्धं न दृश्यते।

[1]कम्पमेकेन कर्तव्यं [2]जगत्युच्चं गुणांशकम् ।
[3]ऊर्ध्वपद्मं शिवांशं स्याद् वेत्रमानं शिवांशकम् ॥ ७८ ॥
[4]अम्बुजं त्वेकभागं स्याद् [5]गलमेकेन कम्पयेत् ।
[6]तदूर्ध्वे कम्पमेकांशं युगांशं [7]कुमुदोदयम् ॥ ७९ ॥
पद्ममेकेन [8]कर्तव्यं कम्पमेकेन कारयेत् ।
[9]गुणांशं गलमानं तु व्योमांशं कम्पमुच्यते ॥ ८० ॥
पद्ममेकेन कर्तव्यं [10]द्विभागं [11]वाजनोदयम् ।
ऊर्ध्वपद्मं शिवांशं स्याद् वेत्रमानं शिवांशकम् ॥ ८१ ॥
अष्टाविंशतिभागं स्याद् [12]अम्भोजं केसरं स्मृतम् ।
तदेव [13]वृत्तिकुम्भाश्रं शाम्भवं प्रतिबन्धके ॥ ८२ ॥

[-श्रेणीबन्धम्]

[14]द्विभागं पादुकोत्सेधं पद्ममानं गुणांशकम् ।
कम्पमेकेन कर्तव्यं [15]जगत्युच्चं [16]रसांशकम् ॥ ८३ ॥
शरांशं घटमानं स्याद् कम्पमेकेन कारयेत् ।
रसांशं कन्धरोत्सेधमेकांशं [17]वाजनं भवेत् ॥ ८४ ॥

---

[1] कम्पमेकेन ] झ, त ; कम्पमर्धेन – ई; कम्पमेव न – ऊ. 'अ, ऋ' मातृकायोरिदं श्लोकार्धं न दृश्यते।
[2] जगत्युच्चं ] ई, ऋ, झ, त; जगत्यश्रं – ऊ.
[3] 'ई, ऊ, झ, त' मातृकासु इदं श्लोकार्धं न दृश्यते।
[4] अम्बुजं ] ई, ऊ, ऋ, झ, त; अम्बुभं – अ.
[5] गलमेकेन ] ई , ऊ, ऋ, झ, त; तालमेकेन – अ.
[6] तदूर्ध्वे ] ई, ऊ, ऋ; तदूर्ध्वं – अ.
[7] कुमुदोदयम् ] अ, ऊ, ऋ ; कुमुदोन्नतम् – ई .
[8] कर्तव्यं ] ई, ऊ, ऋ कर्तव्य – अ.
[9] गुणांशं गलमानं ] अ , ई , ऋ ; गुणांशगल° – ऊ .
[10] द्विभागं ] ई, ऊ, ऋ ; विभागं – अ.
[11] वाजनोदयम् ] ई , ऊ, ऋ ; वाजिनोदयम् – अ.
[12] अम्भोजं केसरं स्मृतम् ] अ, ई; अम्भोज केसर स्मृतम् – ऊ ; . . . . भोजं° – ऋ .
[13] वृत्तिकुम्भाश्रं ] अ; °कुम्भास्त्र शा° – ई , ऋ ; °कुम्भास्त्रशा° – ऊ .
[14] द्विभागं ] अ, ई, ऋ ; द्विपादं – ऊ .
[15] जगत्युच्चं ] अ, ई, ऋ; जगत्युत्रं – ऊ .
[16] रसांशकम् ] अ, ऊ; घटांशकम् – ई ; रवांशकम् – ऋ .
[17] वाजनं ] ई; वाजिनं – अ, ऊ, ऋ .

पद्ममेकेन कर्तव्यं द्विभागं पट्टिका भवेत् ।
पद्ममेकेन कर्तव्यं कम्पमेकेन कारयेत् ॥८५॥
[1]श्रेणीबन्धमिदं प्रोक्तं [2]त्रिंशं भागोदये कृतम्।

[-श्रीबन्धम्]

[3]धरातलोच्चं विभजेत् [4]सप्तदशविभागया ॥८६॥
उपानं शिवभागं [5]स्यादब्जमर्धांशमेव च ।
[6]कम्पमर्धेन कर्तव्यं [7]जगत्युच्चं [8]युगांशकम् ॥८७॥
वेदांशं [9]कुमुदोच्चं तु अर्धांशं कम्पमानकम् ।
[10]त्रिपट्टभागमेवं स्यात् प्रत्युत्सेधं युगांशकम् ॥८८॥
[11]वाजनं चार्धभागं स्याच्छ्रीबन्धं [12]तदुदाहृतम् ।

[-पुष्पपुष्कलं सर्वतोभद्रं च]

[13]धरातलोच्चं [14]विभजेत्त्रयस्त्रींशद् विभागया ॥८९॥
द्विभागं पादुकोत्सेधं [15]युगांशं पद्ममानकम् ।
एकांशं कम्पमित्युक्तं [16]वप्रमानं षडंशकम् ॥९०॥
अर्धांशं पद्ममानं तु गलमानं तथा भवेत् ।

---

[1] श्रेणीबन्धमिदं ] ई ; श्रोणिबन्धमिति – अ ; श्रोणीबन्धमिति – ऊ, ऋ .
[2] त्रिंशं भागोदये ] अ; त्रिंशद्भागोदयं – ई ; त्रिंशद्भा° – ऊ, ऋ .
[3] धरातलोच्चं ] अ, ई; °तलोच्रं – ऊ ; धर . . . . लोच्चं – ऋ .
[4] सप्तदशविभागया ] ई; सप्तादशविभागधा(या) – अ ; सप्तदशविभागयाम् – ऊ; सप्तादशविभागया – ऋ.
[5] स्यादब्जमर्धांशमेव च ] ऊ; ०मेव वा – अ, ऋ; अब्जार्धांशकमेव वा – ई.
[6] कम्पमर्धेन ] अ, ई, ऋ; कम्पमेकेन – ऊ .
[7] जगत्युच्चं ] अ, ई, ऋ ; जगत्यूश्र्चं – ऊ .
[8] युगांशकम् ] अ, ऊ, ऋ ; शिवांशकम् – ई .
[9] कुमुदोच्चं तु अर्धां° ] ई, ऋ ; कुमुदोच्चं त्वर्धांशं° – अ; कुमुदोत्रं° – ऊ .
[10] त्रिपट्टभागमेवं स्यात् ] अ, ऋ; त्रिपट्टमेकभागं स्यात् – ई ; त्रिपट्टभागमेकं° – ऊ .
[11] वाजनं चार्धभागं ] ई ; वाजिनं त्वर्धभागं – अ, ऋ; वाजनं त्वर्ध° – ऊ.
[12] तदुदाहृतम् ] अ, ई, ऋ ; तदाहृतम् – ऊ .
[13] धरातलोच्चं ] अ, ई, ऋ ; °तलोश्र्चं – ऊ .
[14] विभजेत्त्रयस्त्रिंशद् विभागया ] ऊ; विभजेत्त्रयस्त्रिंशति भागया – अ, ई, ऋ .
[15] युगांशं पद्ममानकम् ] अ, ई, ऋ ; युगांशपद्म° – ऊ .
[16] वप्रमानं ] ई, ऋ ; ०माणं – अ, ऊ .

शिवांशं पद्ममानं [१]स्याद् घटमानं युगांशकम् ॥ ९१ ॥
[२]त्रियंशेन गलकम्पं [३]कण्ठमानं रसांशकम् ।
[४]उत्तरं [५]त्वेकभागेन पद्ममेकेन कल्पयेत् ॥ ९२ ॥
[६]द्विभागं [७]वाजनोत्सेधं पद्ममानं शिवांशकम् ।
कम्पमेकेन कर्तव्यं पुष्पपुष्कलमीरितम् ॥ ९३ ॥
तदेव [८]वृत्तकलशं [९]सर्वतोभद्रमुच्यते ।

[श्रीकान्तं स्कन्दकान्तं च]

चतुर्विंशतिभागं [१०]स्यादाधारायाममानकम् ॥ ९४ ॥
पादुकं त्वेकभागेन [११]जगत्युच्चं रसांशकम् ।
तत्समं घटमानं च कम्पमानं शिवांशकम् ॥ ९५ ॥
[१२]वेदांशं गलमानं तु शिवांशं कम्पमानकम् ।
एकांशं [१३]पद्ममानं तु [१४]कपोतोच्चं गुणांशकम् ॥ ९६ ॥
कम्पमेकेन कर्तव्यं [१५]पद्ममेकांशमानकम् ।
कुमुदोच्चं युगांशेन पद्ममेकेन कारयेत् ॥ ९७ ॥
[१६]कम्पमेकेन कर्तव्यं [१७]पद्मं तत्सममुच्यते ।

---

[१] स्याद् ] ई, ऊ ; वा – अ ; 'ऋ 'मातृकायां 'स्याद्' इति पदं नास्ति ।

[२] त्रियंशेन गलकम्पं ] सं०पाठः; तृतीयांशेन गलकंपं -अ; द्वियंशेन गलं कम्पं-ई; त्रयंगेन गलं कम्पं-ऊ; ०गलं कपम्-ऋ.

[३] कण्ठमानं ] ऊ; कणमानं – अ, ऋ; कर्णमानम् – ई.

[४] उत्तरं ] अ, ई, ऋ ; उत्तरे – ऊ.

[५] त्वेकभागेन ] अ, ऊ ; चैकभागेन – ई ; त्वेकभागे... – ऋ .

[६] द्विभागं ] ई, ऊ, ऋ; भागम् – अ.

[७] वाजनोत्सेधं ] ई ; वाजिनोत्सेधं – अ, ऊ, ऋ .

[८] वृत्तकलशं ] अ, ई, ऋ ; ०कमलम् – ऊ .

[९] सर्वतोभद्रमुच्यते ] अ , ऊ , ऋ ; °भद्रकं भवेत् - ई .

[१०] स्यादाधारायाममानकम् ] अ, ई, ऋ ; स्यादाधारं याम° – ऊ .

[११] जगत्युच्चं ] अ, ई, ऋ ; °त्युश्चं – ऊ .

[१२] वेदांशं गलमानं तु ] अ, ई, ऋ ; वेदांशगल° - ऊ .

[१३] पद्ममानं ] अ, ई, ऋ ; कम्पमानं – ऊ .

[१४] कपोतोच्चं ] ई , ऋ ; कपोपोच्चं – अ ; कपोतोश्चं – ऊ .

[१५] पद्ममेकांशमानकम् ] ई; पद्ममेकांशमानतः – अ, ऊ, ऋ .

[१६] कम्पमेकेन ] ई; पद्ममेकेन – अ, ऊ, ऋ .

[१७] पद्मं ] ई; कम्पं – अ, ऊ, ऋ .

[1]कपोतोच्चं द्वयं [2]सार्धमलिङ्गं [3]त्वर्धभागया ॥९८॥
त्रिपट्टमर्धभागेन [4]प्रत्युच्चमेकभागकम् ।
[5]अर्धांशं वाजनोत्सेधं [6]स्कन्दकान्तमुदाहृतम् ॥९९॥

[-सुन्दराम्बुजम्]

[7]उपानोच्चं द्विभागेन कम्पमेकेन कारयेत् ।
षडंशं [8]कमलोच्चं तु व्योमांशं गलमानकम् ॥१००॥
शिवांशं पद्मतुङ्गं तु भूतांशं तु घटोदयम् ।
पद्ममर्धांशमित्युक्तं कम्पमर्धेन कारयेत् ॥१०१॥
कण्ठतुङ्गं युगांशं तु व्योमांशं वेत्रतुङ्गकम् ।
[9]तत्सममम्बुजोत्सेधं [10]पट्टिकोच्चं गुणांशकम् ॥१०२॥
पद्ममंशेन कर्तव्यं कम्पमंशेन कारयेत् ।
अष्टाविंशतिभागेन सुन्दराम्बुजमीरितम् ॥१०३॥

[-उरगासनम् ]

तद्घटं [11]वृत्तरूपं स्याद् [12]उरगासनमेव हि ।

[-भद्रबन्धम् ]

[13]धरातलोच्चसप्तांशो द्विभागं [14]वप्रमानकम् ॥१०४॥
गुणांशं गलमानं तु पक्षांशं [15]पट्टिकोच्छ्रयम् ।

---

[1] कपोतोच्चं ] ई , ऋ ; कं(क)पोतोच्चं – अ ; कपोतोश्च्रं – ऊ .
[2] सार्धमलिङ्गं ] अ,ई ; वार्धमालिङ्गं – ऊ ; साध्यमालिङ्गं – ऋ .
[3] त्वर्धभागया ] ई , ऊ , ऋ; त्वर्धभागधा(या) – अ .
[4] प्रत्युच्चमेकभागकम् ] ई , ऋ ; प्रत्युच्चमेकभागयं(कं) – अ ; प्रत्युच्रमेकभागया – ऊ .
[5] अर्धांशं वाजनोत्सेधं ] ई; अर्धांशवाजनो - ऊ ; अर्धांशवाजिनोत्सेधं – अ ; °वाजि° – ऋ .
[6] स्कन्दकान्तमुदाहृतम् ] अ, ई , ऋ ; स्तत्यकान्तमुदाहृदम् – ऊ .
[7] उपानोच्चं ] अ, ई , ऋ ; °नोच्रं – ऊ .
[8] कमलोच्चं तु ] अ, ई , ऋ ; °लोश्च्रन्तु – ऊ .
[9] तत्सममम्बुजोत्सेधं ] ई, ऊ ; तत्समं . . . . जोत्सेधं – अ ; तत्सम जोत्सेधं – ऋ .
[10] पट्टिकोच्चं ] अ, ई , ऋ ; पट्टिकोश्च्रं – ऊ .
[11] वृत्तरूपं ] ऊ , ऋ ; प्र(वृ)त्तरूपं – अ ; वृतरूपं – ई.
[12] उरगासनमेव हि ] अ, ई , ऋ ; तुरगासन° – ई .
[13] धरातलोच्चसप्तांशो ] ई ; ०तलोच्चं सप्तांशो – अ, ऋ; °तलोश्च्रं सप्तांशं – ऊ .
[14] वप्रमानकम् ] ई ; वप्रमाणकम् – अ, ऋ ; वाप्रमानकम् – ऊ .
[15] पट्टिकोच्छ्रयम् ] अ, ई ; पट्टिकाश्रयम् – ऊ ; पट्टिकोच्छ्रयं – ऋ .

भद्रबन्धमिति [1]प्रोक्तं

[-कुम्भबन्धम्]

सप्तविंशतिभागया ॥१०५॥
[2]उपानोच्चं द्विभागेन [3]जगत्युच्चं रसांशकम् ।
षडंशं [4]कुमुदोच्चं तु कम्पमंशेन कल्पयेत् ॥१०६॥
[5]कण्ठतुङ्गं युगांशेन कम्पमंशेन कारयेत् ।
पद्ममर्धेन कर्तव्यं कपोतोच्चं [6]द्वियंशकम् ॥१०७॥
कम्पमंशेन कर्तव्यं त्रिपट्टमेकभागया ।
[7]प्रतिरुच्चद्वियंशेन अर्धांशं [8]वाजनोदयम् ॥१०८॥
सप्तविंशतिभागेन कुम्भबन्धं प्रकीर्तितम् ।

[अब्जबन्धं चन्द्रबन्धं च]

[9]द्वियंशं पादुकोत्सेधं [10]धात्वंशं [11]वप्रमानकम् ॥१०९॥
[12]कण्ठमेकेन [13]कर्तव्यमूर्ध्वपद्मं शिवांशकम् ।
गुणांशं घटमानं तु पद्ममानं शिवांशकम् ॥११०॥
[14]कम्पमेकेन कर्तव्यं गुणांशं गलमानकम् ।
कम्पमेकेन [15]कर्तव्यं पद्मं तत्सममुच्यते ॥१११॥

---

[1] प्रोक्तं ] अ, ई, ऋ ; ख्यातं – ऊ.
[2] उपानोच्चं ] अ, ई, ऋ ; °नोश्चं – ऊ.
[3] जगत्युच्चं ] अ, ई, ऋ ; जगद्युश्चं – ऊ.
[4] कुमुदोच्चं तु ] अ, ई, ऋ ; °दोश्चं तु – ऊ.
[5] कण्ठतुङ्गं युगांशेन ] अ ; कर्ण° – ई, ऊ ; कण्ठतुङ्ग युगां° – ऋ.
[6] द्वियंशकम् ] ऋ ; द्वयांशकम् – अ; द्वयंशकम् – ई, ऊ.
[7] प्रतिरुच्चद्वियंशेन अर्धांशं ] ई; प्रतिरुच्चद्वयांशेनार्धांशं -अ,ऋ; प्रतिरुश्चं द्वयंशेन अर्धांशं -ऊ; प्रतिरुच्चद्वयंशेन अर्धांशं -त.
[8] वाजनोदयम् ] ई ; वाजिनोदयम् – अ, ऊ, ऋ, झ, त.
[9] द्वियंशं ] ई, ऋ ; द्वयांशं – अ, ऊ.
[10] धात्वंशं ] अ, ई, ऋ ; धात्वांशं – ऊ.
[11] वप्रमानकम् ] अ, ई ; प्रकीर्तितम् – ऊ ; °माणकम् – ऋ.
[12] कण्ठमेकेन ] अ, ई, ऊ ; कर्णमेकेन – ऋ.
[13] कर्तव्यमूर्ध्वपद्मं ] अ, ई, ऊ ; कर्तव्य .... र्ध्वपद्मं – ऋ.
[14] कम्पमेकेन ] अ, ऊ ऋ ; पद्ममेकेन – ई.
[15] कर्तव्यं ] अ, ई, ऋ; कदिव्यम् – ऊ.

[१]कपोतोच्चं गुणांशं स्याद् [२]आलिङ्गं त्वेकभागया ।
पञ्चविंशतिभागेन चाब्जबन्धं प्रशस्यते ॥ ११२ ॥
तदेव वृत्तभागं स्याच्चन्द्रबन्धमिति स्मृतम् ।

[-अधिष्ठानसामान्यविधिः]

अंशं [३]वार्धं त्रिभागं वा शोभाबलसमन्वितम् ॥ ११३ ॥
न्यूनं वाप्यधिकं वापि योजयेत्तु [४]न दोषभाक् ।
पादबन्धमधिष्ठानं दिग्विदिक्षु प्रकल्पयेत् ॥ ११४ ॥
कल्पयेदन्तरालेषु प्रतिबन्धमसूरकम् ।
[५]अन्योन्यसङ्करं चेत्तु कर्ता मरणमाप्नुयात् ॥ ११५ ॥
[६]तस्मात्सर्वप्रयत्नेन सङ्करं न समाचरेत् ।
[७]पञ्चप्राकारबाह्ये तु [८]सङ्करं न तु दोषभाक् ॥ ११६ ॥
[९]वृत्तं कुम्भसमायुक्तं प्रतिबन्धमसूरकम् ।
वस्वंशं कुमुदोपेतं [१०]प्रतिबन्धमिति स्मृतम् ॥ ११७ ॥
[११]वर्गेण संकरं कुर्यादशुभं [१२]विपरीतके ।
[१३]कूटकोष्ठादिमानं तु [१४]सङ्करं शुभदं भवेत् ॥ ११८ ॥
[१५]जगती[१६]नीप्रमानं यत् कुम्भनीप्रं प्रकल्पयेत् ।

---

[१] कपोतोच्चं गुणांशं स्याद् ] अ ; कपोतोश्च्रं° – ऊ ; कपोतोच्चं . . . . णांशं° – ऋ .
[२] आलिङ्गं ] अ , ई , ऋ ; आलिङ्गे – ऊ .
[३] वार्धं त्रिभागं वा ] अ , ई , ऋ ; वार्धंत्रि° – ऊ .
[४] न दोषभाक् ] अ , ई , ऋ ; न दोषकम् – ऊ .
[५] अन्योन्यसङ्करं ] अ , ई , ऋ ; °शंकरं – ऊ .
[६] तस्मात्सर्वप्रयत्नेन ] अ , ई , ऊ ; . . . . त्सर्वं° – ऋ .
[७] पञ्चप्राकारबाह्ये तु ] अ , ऋ ; ०बाह्येषु - ई ; पञ्चप्राकारबाह्येवं – ऊ .
[८] सङ्करं न तु दोषभाक् ] ई; सङ्करो न च दोषकृत् – अ , ऊ , ऋ .
[९] वृत्तं कुम्भसमायुक्तं ] अ ; वृत्तकुम्भ° – ई , ऊ , ऋ .
[१०] प्रतिबन्धमिति ] अ, ई , ऊ , ऋ, त ; वप्रब... – झ.
[११] वर्गेण संकरं ] ई ; वर्गो . . . . ङ्करं – अ ; वर्गेण शंकरं – ऊ; व . . . . करं - ऋ .
[१२] विपरीतके ] अ , ई , ऋ ; विनिवर्तयेत् – ऊ .
[१३] कूटकोष्ठादिमानं ] अ, ई , ऋ, त, झ ; कुम्भकोष्ठादिमानं – ऊ .
[१४] सङ्करं ] अ , ई , ऋ ; शंकरं – ऊ .
[१५] जगती° ] ई ; जगतो – अ ; जगते – ऊ , ऋ .
[१६] नीप्रमानं ] अ , ई , ऋ; नीप्रमाणं – ऊ .

[1]चतुर्भागैकभागं वा [2]अर्धं वा कम्पनीप्रकम् ॥ ११९ ॥
[3]उत्सेधसमनीप्रं वा द्विगुणं [4]वाजनीप्रकम् ।
[5]तत्त्रिपादसमं वार्धं [6]महावाजननिर्गमम् ॥ १२० ॥
अधिष्ठानक्रमं प्रोक्तं श्रृणु नालस्य लक्षणम् ।

[नाललक्षणम्]

एकहस्तं समारभ्य [7]त्रित्र्यङ्गुलविवर्धनात् ॥ १२१ ॥
सप्तमानावसानं [8]यद्वाह्ये नालविनिर्गमम् ।
[9]तदायामं त्रिधा कृत्वा [10]व्योमांशं मूलविस्तरम् ॥ १२२ ॥
[11]तच्चतुर्थांशभिन्नं [12]यदग्रतारं प्रकल्पयेत् ।

[13]अग्रतारसमं वा यत्त्रिपादं [14]वाग्रस्योदयम् ॥ १२३ ॥
[15]मूलतारोदयं मूलं [16]सिंहवक्त्रेण घट्टितम् ।
विस्तारस्य [17]त्रिभागैकं [18]मध्ये नीप्रं प्रकल्पयेत् ॥ १२४ ॥

---

[1] चतुर्भागैकभागं ] अ , ई , ऋ ; चतुर्भागेकभागं – ऊ .
[2] अर्धं वा कम्पनीप्रकम् ] अ, ई, ऋ ; अर्धभागं वनीप्रकम् – ऊ.
[3] उत्सेधसम° ] ई , ऊ; उत्सेधं . . . . मनीप्रं – अ ; उत्सेध . . . . नी° – ऋ .
[4] वाजनीप्रकम् ] ई ; वाजिनीप्रकम् – अ ,ऋ ; वा त्रिनीप्रकम् – ऊ .
[5] तत्त्रिपादसमं ] ई , ऊ , ऋ; तत्त्रिभाग(द)समं – अ.
[6] महावाजननिर्गमम् ] ई ; महावाजिन° – अ, ऋ ; महोवाजिन° – ऊ .
[7] त्रित्र्यङ्गुलविवर्धनात् ] अ , ऊ , ऋ ; त्रित्रियङ्गुल° – ई .
[8] यद्वाह्ये नाल विनिर्गमम् ] सं० पाठः; यत्पोद्वा . . . .नाल°-अ; यत् योद्वाह्ये नाल°-ई; यत् पोत् बाह्ये नाल°-ऊ;यत् पोत् . . . . नाल°- ऋ; यत् प्रोद्वाह्ये-झ.
[9] तदायामं ] अ, ऋ ; तदाधारं (म) – ई ; तथा याम – ऊ .
[10] व्योमांशं ] अ, ई , ऋ; व्योमांश – ऊ .
[11] तच्चतुर्थांशभिन्नं ] अ, ई, ऋ, झ; तच्चर्धर्धं(?)भिन्नं – ऊ .
[12] यदग्रतारं ] अ, ई, ऋ ; यदग्रदारं – ऊ; यत्तत्तारं - झ.
[13] अग्रतारसमं वा यत्त्रिपादं ] अ , ऋ ; अग्रतारसमं वाथ त्रिपादं° – ई ; अग्रतारसमन्द्वाथ त्रिपादं – ऊ .
[14] वाग्रस्योदयम् ] सं० पाठः; वाग्रचोदयम् – अ, ई , ऋ ; वाग्रशोदयम् – ऊ
[15] मूलतारोदयं ] अ , ऋ ; मूलातारोदयं - ई ; °धारोदयं – ऊ .
[16] सिंहवक्त्रेण घट्टितम् ] अ , ई , ऋ ; °वक्त्रे घ° – ऊ .
[17] त्रिभागैकं ] अ , ई , ऋ ; त्रिभागेकं – ऊ .
[18] मध्ये नीप्रं ] अ , ई , ऋ ; अर्धनीप्यं – ऊ .

[1]अग्रवक्रे [2]समायुक्तमश्वकन्धरसादृशम् ।
पद्मपुष्पसमायुक्तं [3]सर्वालङ्कारसंयुतम् ॥ १२५ ॥
[4]भित्तितारसमं वेश्यमथवाष्टाङ्गुलाधिकम् ।
[5]संकल्प्य विधियुक्तेन स्थापयेत् [6]कोष्ठमध्यमे ॥ १२६ ॥
नाललक्षणमेवोक्तं [7]स्तम्भायामविधिं शृणु ।

[स्तम्भलक्षणम्]

[-स्तम्भमानम्]

प्रासादस्यांशमानेन स्तम्भमानं प्रकल्पयेत् ॥ १२७ ॥
कोष्ठमानं चतुर्विंशदेकांशं पादविस्तृतम् ।
[8]त्रिचतुष्पञ्चमात्रं वा भित्तिपादस्य विस्तृतम् ॥ १२८ ॥
चतुरङ्गुलमारभ्य अङ्गुलाङ्गुलवर्धनात् ।
[9]नन्दपङ्क्त्यङ्गुलं यावत् [10]कलाभूम्यवसानकम् ॥ १२९ ॥
[11]भित्तिपादस्य विस्तारं क्रमेण परिकल्पयेत् ।
तदग्रांशेन [12]मग्नं तु

[स्तम्भानां विविधरूपम्]

[13]युगाश्रं ब्रह्मकान्तकम् ॥ १३० ॥
अष्टाश्रं विष्णुकान्तं स्यात् षडश्रं स्कन्दकान्तकम् ।

---

[1] अग्रवक्रे ] ई ; अग्रवन्ते – अ ; अग्रवत्वे – ऊ ; अग्रवत्ते – ऋ .
[2] समायुक्तमश्वकन्धर० ] अ , ऋ ; ०मश्वगन्धर० – ई ; ०मश्वकन्दर० – ऊ .
[3] सर्वालङ्कारसंयुतम् ] ऊ, ऋ ; सर्वाकारसुसंयुतम् – अ ; सर्वालङ्कारसुन्दरम् – ई.
[4] भित्तितारसमं वेश्यमथ० ] अ, ई, ऋ ; भित्तितारसमावेश अथ० – ऊ .
[5] संकल्प्य विधियुक्तेन ] अ , ई ; संकल्पविधि° – ऊ ; . . . . युक्तेन - ऋ .
[6] कोष्ठमध्यमे ] अ, ई, ऋ ; टोषमध्यमे – ऊ .
[7] स्तम्भायामविधिं ] अ, ऊ, ऋ ; स्तम्भधामविधिं – ई .
[8] त्रिचतुष्पञ्च० ] ई , ऊ ; ...चतुष्पञ्च० – अ , ऋ .
[9] नन्दपङ्क्त्यङ्गुलं ] अ, ई , ऋ ; नन्दपङ्क्त्याङ्गुलं – ऊ .
[10] कलाभूम्यवसानकम् ] अ , ऋ ; °भूमावसानकम् - ई ; °भूम्यावसानकम् – ऊ .
[11] भित्तिपादस्य ] सं० पाठः ; भित्तिमानस्य – अ, ई, ऊ, ऋ .
[12] मग्नं ] ऋ; मग्रं – अ, ई, ऊ.
[13] युगाश्रं ] अ, ई, ऋ ; युगाग्रं – ऊ .

[1]आमूलादशपर्यन्तमीनाश्रं भानुकान्तकम् ॥ १३१ ॥
[2]अग्रादिमूलपर्यन्तमिन्द्रकान्तमिति स्मृतम् ।
सर्वाङ्गवृत्तरूपं [3]यदिन्द्रकान्तमितीरितम् ॥ १३२ ॥
[4]चतुरश्रोपरिष्टात्तु [5]कलाश्रं स्तम्भशेखरम् ।
[6]चतुरश्रं रसाश्रं यत् [7]स्तम्भं कौबेरकान्तकम् ॥ १३३ ॥
[8]चतुरश्रं मीनसार्धं [9]तलिपं वरुणाख्यकम् ।
[10]अश्रस्योपरि [11]वस्वश्रं तलिपं [12]भीमकान्तकम् ॥ १३४ ॥
[13]अश्रोपरिष्टाद्धर्माश्रं [14]मणिवज्रमिति स्मृतम् ।
[15]अश्रोर्ध्वे [16]वृत्तरूपं यत् [17]शिवकान्तमितीरितम् ॥ १३५ ॥
चतुरश्रोपरिष्टात्तु [18]चतुःषष्ट्यंशधारयुक् ।
कौशिकस्तम्भमाख्यातमश्रोर्ध्वे वसुकोणकम् ॥ १३६ ॥
[19]शिवच्छन्देति विख्यातमश्रं [20]यत्कर्णमानतः ।

---

[1] आमूलादशपर्यन्तमीनाश्रं ] ई,ऋ,झ; °दर्शपर्यन्तमी(मि)नाश्रं -अ; आमूलदेशपर्यन्तं मनाश्रं -ऊ; आमूलदेशपर्यन्तं ईनाश्रं-त.
[2] अग्रादि० ] अ , ई , ऊ ; आग्रादि° – ऋ .
[3] यदिन्द्रकान्त० ] अ , ई , ऊ ; यमिन्द्रकान्त० – ऋ .
[4] चतुरश्रोपरिष्टात्तु ] अ, ई, ऋ ; चतुरस्रो० – ऊ .
[5] कलाश्रं ] अ, ई, ऋ, झ, त ; कलिश्रं – ऊ .
[6] चतुरश्रं रसाश्रं ] ई ; चतुरश्ररसाश्रं – अ, ऋ ; चतुरस्रं नासाश्रं – ऊ .
[7] स्तम्भं कौबेरकान्तकम् ] ई , झ ; स्तम्भकौबेरकान्तकम् – अ, ऋ ; स्तम्भ . . . . वेर° – ऊ .
[8] चतुरश्रं मीनसार्धं ] सं० पाठः; चतुरश्रमिना सार्द्धं-अ; ०मिनासार्धा -ई; ०नासार्धं वा-ऊ; चतुरश्रमिनासार्धं-ऋ; ०मिनासध्यस- झ.
[9] तलिपं वरुणाख्यकम् ] ई ; तलिपं वरुणाश्रकम् – अ ; तलिं वरु° – ऊ ; °वारुणाश्रकम् – ऋ .
[10] अश्रस्योपरि ] अ, ई, ऋ, ; अग्रस्यो° – ऊ ; झ .
[11] वस्वश्रं ] अ , ई , ऋ ; वस्वग्रं – ऊ .
[12] भीमकान्तकम् ] अ , ई , ऋ ; हिमका° – ऊ .
[13] अश्रोपरिष्टाद्धर्माश्रं ] अ ; अश्रोपरिष्टधर्माश्रं – ई , ऊ , ऋ .
[14] मणिवज्रमिति ] अ, ई, ऋ; अभिवज्रं – ऊ .
[15] अश्रोर्ध्वे ] सं० पाठः ; श्रद्धोर्ध्वे – अ , ई , ऊ , ऋ.
[16] वृत्तरूपं ] ऊ, ऋ ; वृत्तं रूपं - अ .
[17] शिवकान्तमितीरितम् ] ई , ऊ , ऋ ; शिवकान्तमीरितम् – अ .
[18] चतुष्षष्ट्यंशधारयुक् ] अ , ई ; °तारयुक् – ऊ ; °जारयुक् – ऋ .
[19] शिवच्छन्देति ] ई , ऋ ; शिवच्छीन्देति – अ ; शिवचन्देति – ऊ .
[20] यत्कर्णमानतः ] ऋ ; यत्कण्ठमानतः – अ, ई ; यत्कण्ठमानतम् – ऊ.

[-पादाधारः]

[१]स्तम्भमूले प्रकर्तव्यं [२]पादाधारसमन्वितम् ॥ १३७॥
सर्वेषामेव पादानां [३]पादाधारं प्रकल्पयेत् ।
[४]कर्णार्धं वा तदर्धं वा पादाधारोदयं कुरु ॥ १३८॥
[५]तत्कर्णं तस्य विस्तारं [६]सर्वालङ्कारसंयुतम् ।
पादाधारमिति प्रोक्तं [७]स्तम्भानां भूषणं शृणु ॥ १३९॥

[-स्तम्भभूषणम्]

पादोत्सेधं तु [८]सप्तांशं [९]त्वेकांशे वेदिकोच्छ्रयम् ।
वेदिकारहितं वापि सहितं वा प्रकल्पयेत् ॥ १४०॥
[१०]पादोदये तु भूतांशे [११]द्विभागं चोदये [१२]गृहेत् ।
[१३]चतुःसप्ततिभागांशे [१४]वेदांशं बोधिकोदयम् ॥ १४१॥
तत्समं [१५]वीरकण्ठं च [१६]फलकान्तं समं भवेत् ।
एकांशं तु गलोत्सेधं [१७]घटोच्चत्वनिभागया ॥ १४२॥
गलमंशेन कर्तव्यं तत्समं [१८]पालिकांशकम् ।

---

[१] स्तम्भमूले ] अ , ई , ऋ ; स्थंभ° – ऊ .
[२] पादाधारसमन्वितम् ] अ , ई , ऋ ; प्रादाधार° – ऊ .
[३] पादाधारं ] अ ; पादायामं – ई , ऋ ; वा पादायामं – ऊ .
[४] कर्णार्धं ] ई , ऋ, झ ; कण्ठार्धं – अ, ऊ.
[५] तत्कर्णं तस्य ] ई ; तत्कण्ठं तस्य – अ, ऋ ; तत्कण्ठतस्य – ऊ ; 'झ' मातृकायां अक्षरलोपः।
[६] सर्वालङ्कारसंयुतम् ] अ , ई , ऋ ; सर्वालंकसमन्वितम् – ऊ .
[७] स्तम्भानां भूषणं शृणु ] अ , ई , ऋ ; स्थंभानां तुषणं श्रुणु – ऊ .
[८] सप्तांशं ] अ ; सप्तांशे – ई , ऊ , ऋ .
[९] त्वेकांशे वेदिकोच्छ्रयम् ] अ , ऋ ; त्वेतांशे° – ई ; °कोश्च्रयम् – ऊ .
[१०] पादोदये तु ] ई , ऋ ; पादोदये(कु) – अ ; पादोदयं तु – ऊ .
[११] द्विभागं ] ई , ऊ , ऋ ; द्विपादं – अ,.
[१२] गृहेत् ] सं॰ पाठः ; ग्रहेत् - ऊ; गृहे – अ, ऋ; ग्रहे – ई ; ग्रहेत् – ऊ.
[१३] चतुःसप्ततिभागांशे ] अ , ई , ऋ ; चतुस्सप्तत्रिभा° – ऊ .
[१४] वेदांशं बोधिकोदयम् ] अ , ऋ ; वेदांशं सोधिकोदयम् – ई ; वेदांशे त्वाधिकोदयम् – ऊ .
[१५] वीरकण्ठं च ] अ ; वीरखण्डं च – ई , ऋ ; विरकाण्ठञ्च – ऊ .
[१६] फलकान्तं ] ई , ऊ , ऋ ; फलकान्तः – अ ;.
[१७] घटोच्चत्वनिभागया ] अ ; घटोच्चं तु त्रिभा° – ई ; घटोश्च्रं त्व° – ऊ; घटोच्चं त्वनि° – ऋ.
[१८] पालिकांशकम् ] अ , ऋ ; पालिकाण्डकम् – ई ; पालिमां° – ऊ .

[1]पद्ममेकेन कर्तव्यं [2]पालिदीर्घं गुणांशकम् ॥ १४३ ॥
अब्जतुङ्गं त्रिभागेन पत्रतुङ्गं च तत्समम् ।
शेषान्तमायतं पादं [3]कण्ठं पालिमुखं भवेत् ॥ १४४ ॥
[4]तत्कण्ठं घटविस्तारं [5]तत्कण्ठं फलकायतम् ।
[6]बोधिकोच्चसमं व्यासमायामं त्रिगुणं तु वा ॥ १४५ ॥
[7]तदायामं च वेदांशं [8]छायाकारं [9]द्वियंशकम् ।
[10]फलकोच्चं तु भूतांशं द्विभागं [11]फलकोदयम् ॥ १४६ ॥
त्रिभागं [12]नागवक्रं स्यात् [13]छायाकारमथापि वा ।

[मञ्चलक्षणम्]

[14]मञ्चोच्चं [15]गुणधा [16]भज्य व्योमांशं प्रस्तरोदयम् ॥ १४७ ॥
[17]कपोतं त्वेकभागं [18]स्यादेकांशं धातुभागिकम् ।
[19]गुणांशमुत्तरोत्सेधम् एकांशं [20]वाजनोदयम् ॥ १४८ ॥

---

[1] पद्ममेकेन ] अ , ई , ऋ ; पद्ममेत्रेन – ऊ .
[2] पालिदीर्घं ] ई , ऋ; पाली° – अ; पाला° – ऊ .
[3] कण्ठं पालिमुखं ] अ ; कर्णं पालि° – ई , ऋ . कण्ठपाला° – ऊ .
[4] तत्कण्ठं घटविस्तारं ] अ ; तत्कर्णं° – ई , ऋ ; °तत्कण्ठघटविस्तार – ऊ .
[5] तत्कण्ठं ] अ ; तत्कर्णं – ई , ऋ ; तत्कण्ठ – ऊ .
[6] बोधिकोच्चसमं ] अ , ऋ ; बोधिकोच्चं समं – ई ; बोधिकोश्त्रं – ऊ .
[7] तदायामं च ] ई ; तदायांशं च – अ , ऋ ; तदाधांशं च – ऊ .
[8] छायाकारं ] ई , ऋ ; चायाकारं – अ ; छायाकं – ऊ .
[9] द्वियंशकम् ] ई ,ऋ ; द्वयांशकम् – अ ; द्वयंशकम् – ऊ .
[10] फलकोच्चं ] अ , ई , ऋ ; फलकोश्त्रं – ऊ .
[11] फलकोदयम् ] अ , ई , ऊ ; पालिकांशकम् – ऋ .
[12] नागवक्रं ] अ , ई , ऋ ; नागवस्त्रं – ऊ .
[13] छायाकार० ] सं० पाठः; छायातार० – अ, ई, ऊ , ऋ .
[14] मञ्चोच्चं ] अ , ई , ऋ ; मञ्चोश्त्रं – ऊ .
[15] गुणधा ] अ , ई , ऊ ; गुणया – ऋ .
[16] भज्य व्योमांशं ] अ , ई ; भव्ये एक अंशं – ऊ . भव्योमांशं – ऋ .
[17] कपोतं त्वेकभागं ] अ , ई ; कपोतकत्वेकभागं – ऊ ; ज(क)पोतकं त्वेक° – ऋ .
[18] स्यादेकांशं ] अ , ई , ऋ ; च एकांशं – ऊ .
[19] गुणांशमुत्तरोत्सेधम् ] अ , ई , ऋ ; गुणांशमुत्तरेत्सेधम् – ऊ .
[20] वाजनोदयम् ] ई ; वाजिनोदयम् – अ , ऊ , ऋ .

[1]त्रिभागं [2]नागवक्त्रं स्यात् छायाकारमथापि वा ।
शेषमम्बुजमानं स्याद् [3]आसनं तेन शोभितम् ॥ १४९ ॥

[वेदिकालक्षणं गललक्षणं च]

एवं प्रस्तरमाख्यातं वेदिकालक्षणं श्रृणु ।
गलोत्सेधं तु वेदांशे एकांशं वेदिकोदयम् ॥ १५० ॥
उत्तरं त्वेकभागेन शेषभागं गलोदयम् ।
अष्टांशे [4]वेदिकोत्सेधे वेदांशं गलमानके ॥ १५१ ॥
कम्पमेकांशमित्युक्तं द्विभागं पद्मतुङ्गकम् ।
[5]वाजनं त्वेकभागेन वेदिकां कल्पयेद्बुधः ॥ १५२ ॥

[प्रस्तरादिशीर्षान्तं वर्गविस्तारमानम्]

[6]पादबाह्यसमं मध्यं प्रस्तरस्य विशालकम् ।
रुद्रांशे नन्दभागं वा [7]नन्दांशे सप्तभागिकम् ॥ १५३ ॥
अष्टांशे सप्तभागं वा वेदिविस्तारमानकम् ।
वेदिविस्तारमाख्यातं गलवेशं ततः श्रृणु ॥ १५४ ॥
[8] एक द्वित्रिकदण्डैर्वा गलवेशं समाचरेत् ।
गलविस्तारमानं यत् [9]कोष्ठशीर्षमिति स्मृतम् ॥ १५५ ॥

[शीर्षलक्षणम्]

[10]शीर्षोच्चे तु च सप्तांशे पद्ममेकेन कल्पयेत् ।
उदरं [11]वेदभागं स्याच्चक्रमंशेन कल्पयेत् ॥ १५६ ॥

---

[1] श्लो० १४९ पू० – १४७ पू० समानौ दृश्येते ।
[2] नागवक्त्रं ] अ , ई , ऋ ; रागवक्त्रं – ऊ .
[3] आसनं तेन शोभितम् ] अ ; आसन्नतेन° – ई ; आसनन्तन° – ऊ .
[4] वेदिकोत्सेधे ] अ , ऊ , ऋ ; °त्सेधं – ई .
[5] वाजनं ] ई ; वाजिनं – अ , ऊ , ऋ .
[6] पादबाह्यसमं ] ई , ऋ ; पद्यबाह्यसमं – अ ; पादं बाह्य° – ऊ .
[7] नन्दांशे सप्तभागिकम् ] ई , ऊ , ऋ; वेदिविस्तारमानकम् – अ .
[8] एक द्वित्रिकदण्डैर्वा ] ई , ऋ ; एकद्वित्रिदण्डैर्वा – अ ; एक द्वित्रिकदण्डे वा – ऊ .
[9] कोष्ठशीर्षमिति स्मृतम् ] अ , ऊ , ऋ ; कोष्ठशीर्षविनिस्मृतम् – ई .
[10] शीर्षोच्चे तु च सप्तांशे ] ई ; शीर्षोच्चे तुश्च सप्तांशे – अ ; शीर्षोच्चे तु सप्तांशे – ऊ ; शीर्षोश्चे . . . . प्तांशे – ऋ .
[11] वेदभागं ] अ , ई , ऋ ; वेदं भागं – ऊ .

[1]कपोतनीव्रमेकांशं तत्समं लम्बमानकम् ।
गलतारे तु [2]वेदांशे [3]भूतांशं [4]मध्यविस्तरम् ॥ १५७॥
गलतारसमं यत्तत् [5]पालिकस्य तु [6]विस्तृतम् ।
[7]तत्त्रिभागैकभागेन [8]छायाब्जं परिकल्पयेत् ॥ १५८॥

[स्थूपिकालक्षणम्/मानम्]

[9]स्थूप्यूर्ध्वं सप्तधा भज्य [10]वलग्नं त्वेकभागया ।
कुम्भमानं गुणांशं स्यात् [11]द्व्यांशं पालिकोदयम् ॥ १५९॥
[12]कुड्मलं त्वेकभागेन कल्पयेत्तु विचक्षणः ।
स्थूपिकोत्सेधमानं यत् [13]स्थूपिकुम्भस्य मानकम् ॥ १६०॥
उत्सेधमेवमाख्यातं नासिकालक्षणं शृणु ।

[नासिकालक्षणम्]

गलतारे [14]त्रियंशं वा [15]पञ्चांशांशमथापि वा ॥ १६१॥ ।
[16]चतुर्भागैकभागं वा [17]महानास्यास्तु विस्तरम् ।
तत्समं वा तदर्धं वा [18]त्रिशिरोनिर्गमं भवेत् ॥ १६२॥

---

[1] कपोतनीव्रमेकांशं ] सं० पाठः; कपोतनीप्रमेकांशं – अ, ऋ; कपोतं नीप्र° – ई; कपोतनिव्र° – ऊ.
[2] वेदांशे ] सं० पाठः; वेदांशं – अ, ई, ऊ, ऋ.
[3] भूतांशं ] ई; भूतांशे – अ, ऊ, ऋ.
[4] मध्यविस्तरम् ] अ, ई, ऋ; मर्यवि° – ऊ.
[5] पालिकस्य ] सं० पाठः; बलिकस्य - अ, ई, ऊ, ऋ.
[6] विस्तृतम् ] अ, ऊ; विस्तरम् – ई; विस्मृतम् – ऋ.
[7] तत्त्रिभागैकभागेन ] अ, ई, ऋ; °भागेश्च – ऊ.
[8] छायाब्जं परिकल्पयेत् ] अ, ई, ऋ; नवाब्जं परि° – ऊ.
[9] स्थूप्यूर्ध्वं ] अ, ई; स्थूप्यूर्ध्वे – ऊ; स्तूप्यूर्ध्वं – ऋ.
[10] वलग्नं त्वेकभागया ] ई, ऊ; वलग्नत्वेकभागया – अ, ऋ.
[11] द्व्यांशं ] अ; द्वियंशं – ई, ऋ; द्वयंशं – ऊ.
[12] कुड्मलं त्वेकभागेन ] सं० पाठः; कुण्डलं त्वेकभागेन -अ; कुश्मगं° - ई; कुड्मलं त्वेकभागेन -ऊ; कुश्मल...भागेन -ऋ.
[13] स्थूपिकुम्भस्य मानकम् ] अ, ऋ; °कुम्भस्य नाभिकम् – ई; °कुम्भसमानकम् – ऊ.
[14] त्रियंशं ] ई, ऋ; त्रियांशं – अ; त्रयांशं – ऊ.
[15] पञ्चांशांशमथापि वा ] अ, ई, ऋ; पञ्चांशं सम° – ऊ.
[16] चतुर्भागैकभागं वा ] अ, ई, ऋ; चतुर्भागेक° – ऊ.
[17] महानास्यास्तु ] ई; महानास्यां तु – अ; ऋ; महानास्यं – ऊ.
[18] त्रिशिरोनिर्गमं ] ऊ; त्रिशिरा नि° – अ, ई, ऋ.

ललाटे [1]तु महानासी [2]शीर्षस्य त्वनुकूलवान् ।
[3]स्तूपिकुम्भावसानं [4] यच्छृङ्गोत्सेधमुदाहृतम् ॥ १६३ ॥
[5]पालिकान्तं महानासी शृङ्गोत्सेधं प्रकल्पयेत् ।
[6]नासीलक्षणमेवोक्तं [7]द्वारमानविधिं शृणु ॥ १६४ ॥

[द्वारमानम्]

[8]तलिपोच्चं समादाय [9]दशनन्दाष्टधा भजेत् ।
[10]एकांशरहितं शेषं द्वारोत्सेधं विधीयते ॥ १६५ ॥
[11]तच्छेषं रसधा भज्य [12]भुवङ्गोच्चं गुणार्धकम् ।
[13]पतङ्गांशं द्विभागार्धं कल्पयेत्तु विचक्षणः ॥ १६६ ॥
तदुत्सेधार्धविस्तारं पद्मपुष्पादिभूषितम् ।

[एकभूमिप्रासादानामुत्सेधगण्यकम्]

द्वारस्य लक्षणं प्रोक्तं [14]शृणु शान्त्यादिगण्यकम् ॥ १६७ ॥

[-शान्तिकम्]

[15]शान्तिकोत्सेधगण्यं तु तिथिभागविभाजिते ।
अश्विन्यंशमधिष्ठानं [16]पादोच्चं पञ्चभागया ॥ १६८ ॥

---

[1] तु महानासी ] ई, ऋ ; तु महानासि – अ ; महानासि – ऊ ;.
[2] शीर्षस्य त्वनुकूलवान् ] सं० पाठः; शीर्षस्यां त्वनुकूलवान् – ई ; शीर्षस्यानुकूलवान् – अ , ऊ .
[3] स्तूपिकुम्भावसानं ] अ ; स्थूपि° – ई , ऊ , ऋ .
[4] यच्छृङ्गोत्सेधमुदाहृतम् ] अ, ई, ऋ ; °धं मुदाहृदम् – ऊ .
[5] पालिकान्तं महानासी ] सं० पाठः; बलिकान्तं महानासी – अ , ई , ऋ ; घलिकान्तं महानासि – ऊ .
[6] नासीलक्षणमेवोक्तं ] ई , ऋ ; नासिल० - अ , ऊ .
[7] द्वारमानविधिं ] अ , ई , ऋ ; द्वारमानं विधि – ऊ .
[8] तलिपोच्चं समादाय ] ई , ऋ ; तलिपोच्चं समादायं – अ ; तलावोश्च्नं समादाय – ऊ .
[9] दशनन्दाष्टधा ] अ , ई , ऋ ; दशनवाष्टधा – ऊ .
[10] एकांशरहितं ] अ , ई , ऋ ; एकांशं° – ऊ .
[11] तच्छेषं ] अ , ई , ऋ ; तच्चेषं – ऊ .
[12] भुवङ्गोच्चं ] अ , ई , ऋ ; भुंगोश्चं – ऊ .
[13] पतङ्गांशं द्विभागार्धं ] ई ; पतङ्गांशद्विभागोर्ध्वं – अ ; पदागांशं द्विभागेन – ऊ ; पतङ्गांशद्विभागोर्धं – ऋ .
[14] शृणु शान्त्यादिगण्यकम् ] अ , ई ; श्रुणुशा° - ऊ ; शृणु ...न्त्यादि° – ऋ .
[15] शान्तिकोत्सेधगण्यं तु ] अ , ई , ऊ ; शालिको° – ऋ .
[16] पादोच्चं ] अ , ई ; पा . . . . ञ्चभागया – ऋ . 'ऊ' मातृकायां श्लो० १७ चतुर्थपादः प्रमादादत्र लिखितः ।

[1]द्व्यंशं तु मञ्चमानं स्याद् द्वियंशं गलमानकम् ।
शिखरोच्चं गुणांशं तु स्थूप्युच्चं शशिभागया ॥ १६९ ॥
शान्तिकं त्विति विख्यातं

[-पौष्टिकम्]

[2]पौष्टिकं तु कलाधिकम् ।
[3]अक्ष्यांशकमधिष्ठानं [4] सार्धभूतांशमङ्घ्रिकम् ॥ १७० ॥
[5]मञ्चमानं द्विभागं स्यात् तत्समं गलमानकम् ।
[6]सार्धाग्न्यंशं शिरोत्सेधं [7]शिखामानं शिवांशकम् ॥ १७१ ॥
[8]पौष्टिकं सदनं [9]ह्येतज्जयदं शृणु सुव्रत ।

[-जयदम्]

[10]सार्धाक्ष्यंशमधिष्ठानं षडंशं [11]तलिपायतम् ॥ १७२ ॥
[12]मञ्चमानं [13]द्वियंशेन गलमानं च तत्समम् ।
शिखरं च [14]शिखामानं पूर्ववत्परिकल्पयेत् ॥ १७३ ॥

[-अद्भुतम्]

[15]स्मृत्यंशमद्भुतोत्सेधं [16]कलांशं वै धरातलम् ।

---

[1] श्लो० १६९ 'अ, ऊ, ॠ' मातृकासु न विद्यते ।
[2] पौष्टिकं तु ] अ, ई, ॠ; पौष्टकं तु – ऊ.
[3] अक्ष्यंशकमधिष्ठानं ] सं० पाठः; अक्ष्यं शङ्कमधिष्ठानं – अ, ई, ॠ; अष्टांशं वाधिष्ठानं – ऊ.
[4] सार्धभूतांशमङ्घ्रिकम् ] सं० पाठः; सर्वभूतांशमप्रियम् – अ, ऊ, ॠ; °मप्रिजम् – ई.
[5] मञ्चमानं ] सं० पाठः; पञ्चमानं – अ, ई, ऊ, ॠ.
[6] सार्धाग्न्यंशं शिरोत्सेधं ] अ, ई, ॠ; °ग्न्यंशगलोत्सेधं – ऊ.
[7] शिखामानं शिवांशकम् ] सं० पाठः; शिरोमानं शिवांशकम् – अ; शिरमानं शिखांशकम् – ई; शिरोमामं शिखांशकम् – ॠ.
[8] पौष्टिकं ] अ, ई, ॠ; पुष्टिकं – ऊ.
[9] ह्येतज्जयदं ] अ, ई, ॠ; ह्येतत् जयतं – ऊ.
[10] सार्धाक्ष्यंशमधिष्ठानं ] अ, ई, ॠ; साध्याक्ष्यंशमधिष्ठानं – ऊ.
[11] तलिपायतम् ] अ, ई, ॠ; °युतम् – ऊ.
[12] मञ्चमानं ] सं० पाठः; पञ्चमानं – अ, ई, ऊ, ॠ.
[13] द्वियंशेन ] ई, ॠ; द्व्यांशेन – अ, ऊ.
[14] शिखामानं ] अ, ई; शिवमानं च पूर्वं – ऊ; शिखा . . . . त्परिकल्पयेत् – ॠ.
[15] स्मृत्यंशमद्भुतोत्सेधं ] अ, ई, ॠ; सत्यंशाद्भूतो° – ऊ.
[16] कलांशं ] ई, ऊ, ॠ; करांशं - अ.

[1]पादोच्चं सार्धषड्भागं मञ्चमानं [2] द्वियंशकम् ॥ १७४ ॥
[3]द्वियंशं गलमानं तु वेदांशं शिखरोदयम् ।
[4]सार्धांशेन शिखामानमद्भुतं सदनं स्मृतम् ॥ १७५ ॥

[-सार्वकामिकम्]

[5]त्रिपादाधिकमक्ष्यंशम् अधिष्ठानोदयं भवेत् ।
[6]षडंशं तलिपोच्चं [7]स्यात्पादोनाग्न्यंशमञ्चकम् ॥ १७६ ॥
द्विपादांशं गलोत्सेधं युगांशं [8]शिखरोदयम् ।
[9] सपादांशं शिखामानम् [10]एतद्वै [11]सार्वकामिकम् ॥ १७७ ॥

[-सामान्यविधिः]

अथवान्यप्रकारेण सामान्यं शान्तिकादिके ।
[12]षड्त्रिंशद्विभजेदुच्चम् [13]अधिष्ठानं गुणांशकम् ॥ १७८ ॥
[14]रुद्रांशं तलिपोत्सेधं मञ्चमानं गुणांशकम् ।
[15]अनलांशमुपग्रीवमक्ष्यंशं मञ्चमानकम् ॥ १७९ ॥
[16]सार्धाग्न्यंशगलोत्सेधं [17]पक्षार्धं शीर्षकं भवेत् ।

---

[1] पादोच्चं ] अ , ई , ऋ ; पादोश्च्रं – ऊ .
[2] द्वियंशकम् ] ई , ऋ ; द्वयांशकम् – अ ; द्वयं° – ऊ .
[3] द्वियंशं ] ई , ऋ ; द्वयांशं – अ ; द्वयंशं – ऊ .
[4] सार्धांशेन शिखामानमद्भुतं ] ई ; °शिरोमानमद्भुतं - अ ; सार्धांशा शिखरमानं च तभूतं - ऊ ; °शिखामानं° - ऋ .
[5] त्रिपादाधिकमक्ष्यंशम् ] ई , ऋ ; त्रियादाधिकमक्ष्यंशम् – अ ; त्रिपादादिमष्टांशं – ऊ .
[6] षडंशं तलिपोच्चं ] अ , ई , ऋ ; °पोश्च्रं – ऊ .
[7] स्यात्पादोनाग्न्यंशमञ्चकम् ] अ , ई , ऋ ; स्यात्पादेनाग्न्यं मञ्च° – ऊ .
[8] शिखरोदयम् ] अ , ई, ऊ ; शिखरो . . . . - ऋ .
[9] सपादांशं ] ई , ऊ; . . . . शं – अ , ऋ ;
[10] एतद्वै ] अ , ई, ऋ ; एतत्वे – ऊ .
[11] सार्वकामिकम् ] ई , ऊ , ऋ ; सर्वकामिकम् – अ.
[12] षड्त्रिंशद्विभजेदुच्चम् ] अ , ई , ऋ ; °जेदुश्च्रम् – ऊ .
[13] अधिष्ठानं ] अ , ई , ऋ ; अधिष्ठानां – ऊ .
[14] रुद्रांशं तलिपोत्सेधं ] अ , ई , ऋ ; निद्रांशे तलि° – ऊ .
[15] अनलांशमुपग्रीवमक्ष्यंशं मञ्चमानकम् ] अ ई , ऋ ; °ग्रीवं अष्टांशमञ्च° – ऊ .
[16] सार्धाग्न्यंशगलोत्सेधं ] अ , ई ; सार्धाग्न्यंशं ग° – ऊ , ऋ .
[17] पक्षार्धं ] सं० पाठः; पक्षांशं - अ , ई ; पक्भांशं – ऊ ; प..शं – ऋ .

शिखामानं [१]गुणांशं स्याद् [२]एकभूमेन कीर्तितम् ॥ १८० ॥
[३]गण्यमेवं [४]समाख्यातमलङ्कारं प्रवक्ष्यते ।

[श्रीभोगादिविमानलक्षणम्]

[-श्रीभोगम्]

[५]अङ्घ्रिबन्धमधिष्ठानं [६]ब्रह्मकान्ताङ्घ्रिसंयुतम् ॥ १८१ ॥
[७]आयताश्रशिरोयुक्तं [८]महानासीचतुष्टयम् ।
[९]कलाल्पनासिकोपेतं चतुष्कूटसमन्वितम् ॥ १८२ ॥
अष्टाश्रं [१०]शीर्षकण्ठं तु [११]गलोत्सेधान्तमुन्नतम् ।
शिखापञ्चकसंयुक्तं [१२]श्रीभोगमिति विद्यते ॥ १८३ ॥

[-पुत्रकोष्ठम्]

स्थाणुबन्धधरोपेतं [१३]स्कन्दकान्ताङ्घ्रिसंयुतम् ।
[१४]आयताश्रशिरोपेतं [१५]चतुर्नासिसमन्वितम् ॥ १८४ ॥ ।
[१६]महानासिविनिष्क्रान्तं [१७] तद्दण्डं द्वित्रिदण्डकम् ।
[१८]महानासिकयोर्मध्ये [१९]क्षुद्रनासिद्वयान्वितम् ॥ १८५ ॥

---

[१] गुणांशं स्यात् ] अ , ई , ऋ ; गुणांश° – ऊ .
[२] एकभूमेन ] ऋ ; एकभूमेव - अ , ई ऊ .
[३] गण्यमेवं ] अ , ई , ऋ ; गण्यमेव – ऊ .
[४] समाख्यातमलङ्कारं प्र° ] ई ; समाख्यातं . . . . रः प्रवक्ष्यते – अ ; समाख्यातमलङ्कार प्र° – ऊ ; समा . . . . रः प्र° – ऋ .
[५]अंघ्रिबन्धमधिष्ठानं ] झ ; अप्रबन्धमधिष्ठानं – अ ; अप्रिबन्ध० – ई, ऋ ; अप्रिबन्धधिष्ठानां – ऊ.
[६] ब्रह्मकान्ताङ्घ्रि० ] सं० पाठः; ब्रह्मकान्ताग्नि० – अ, ई, ऊ, ऋ, झ.
[७] आयताश्रशिरोयुक्तं ] अ , ऊ, ऋ ; °ताश्रं शि° – ई .
[८] महानासी० ] ई ; महानासि० - अ , ऋ ; महनासी – ऊ .
[९] कलाल्पनासिकोपेतं ] अ,ई ; कलाल्पकासि° – ऊ ; कलाल्पे नासि° – ऋ .
[१०] शीर्षकण्ठं तु ] ई ; शीर्षकं कण्ठं – अ , ऊ , ऋ .
[११] गलोत्सेधान्तमुन्नतम् ] अ , ई , ऋ ; दलेत्सेधान्त° – ऊ .
[१२] श्रीभोगमिति ] अ, ई , ऋ ; त्रिभोग° – ऊ .
[१३] स्कन्दकान्ताङ्घ्रिसंयुतम्० ] अ , ई , ऋ ; चन्द्रकान्ताङ्घ्रि० – ऊ .
[१४] आयताश्रशिरोपेतं ] ई ; आयताश्रं शिरोपेतं - अ ; आयताश्रीशिरो° – ऊ ; आयताश्रि° – ऋ .
[१५] चतुर्नासिसमन्वितम् ] अ , ऊ , ऋ ; चतुर्नासी° – ई .
[१६] महानासिविनिष्क्रान्तं ] सं० पाठः ; महानासिविनिष्ठान्तं – अ , ऋ ; महानासी विनिष्ठान्त – ई ; °नासित्यधिष्ठान्तं – ऊ .
[१७] तद्दण्डं द्वित्रिदण्डकम् ] अ ; दण्डकद्वि° – ई ; तदण्डं° – ऊ , ऋ .
[१८] महानासिकयोर्मध्ये ] अ ; महानासीद्वयो° – ई ; °नासिद्वयो° – ऊ ; म . . . . याममध्ये – ऋ .
[१९] क्षुद्रनासिद्वयान्वितम् ] अ; क्षुद्रनासीद्व° – ई , ऊ , ऋ .

[1]भद्रनास्युच्चपार्श्वे तु [2]क्षुद्रनासीविभूषितम् ।
[3]पादं प्रत्यल्पनासाढ्यं पुत्रकोष्ठमिति स्मृतम् ॥ १८६ ॥

[-चित्रकान्तम्]

पादबन्धधरा पृथ्वी स्तम्भशेखरसंयुतम् ।
कोष्ठमध्ये महानासी गलभद्रसमन्वितम् ॥ १८७ ॥
तत्पार्श्वे क्षुद्रनास्याढ्यं पादं प्रत्यल्पनासिकम् ।
सर्वालङ्कारसंयुक्तं चित्रकान्ताख्यकोष्ठकम् ॥ १८८ ॥

[-श्रीभद्रम्]

तलिपाख्यं तलोपेतं विष्णुकान्ताङ्घ्रिसंयुतम् ।
चतुष्कोणे चतुष्कूटम् अष्टाश्रं शीर्षयान्वितम् ॥ १८९ ॥
शालामध्ये द्विपार्श्वे तु महानासीचतुष्टयम् ।
महानासीद्वयोर्मध्ये क्षुद्रनासीविभूषितम् ॥ १९० ॥
पादं प्रत्यल्पनासाढ्यं तोरणाद्यैरलङ्कृतम् ।
एवं लक्षणसंयुक्तं श्रीभद्रं [4]तदिहोच्यते ॥ १९१ ॥

[-सुन्दरम्]

[5]अङ्घ्रिबन्धमधिष्ठानं भीमकान्ताङ्घ्रिसंयुतम् ।
[6]शिखरे ऋतुनासाढ्यम् [7]अल्पनासीद्वयान्तरे ॥ १९२ ॥
[8]प्रासादे मण्डपे मध्ये तोरणाद्यैर्विचित्रितम् ।
एवं लक्षणसंयुक्तं [9]नाम्ना सुन्दरमुच्यते ॥ १९३ ॥

---

[1] भद्रनास्युच्चपार्श्वे तु ] अ , ऋ ; भद्रनास्योच्च° – ई ; भद्रनास्युश्च्र° – ऊ .

[2] क्षुद्रनासीविभूषितम् ] अ ,ई, ऋ ; क्षुद्रनासिवि° – ऊ .

[3] पादं प्रत्यल्पनासाढ्यं ] अ ; °नास्याढ्यं – ई , ऋ ; पाद प्रत्यल्पनासार्धं – ऊ . 'ई' मातृकायां श्लो० १८६ तृतीयपादादि – श्लो० १९१ प्रथमपादान्तो भागो अधिकतया विद्यते।

[4] तदिहोच्यते ] अ , ऊ , ऋ ; नामद्रुच्यते – ई .

[5] अङ्घ्रिबन्धमधिष्ठानं ] सं० पाठः ; अ . . . . धिष्ठानं ; अ; अप्रिबन्धमधिष्ठानं – ई ; अपिबन्धमधिष्ठानं – ऊ ; . . . .मधिष्ठानं – ऋ

[6] शिखरे ऋतुनासाढ्यम् ] अ , ई , ऋ ; शिखरेन तु नासाढ्यं – ऊ ;

[7] अल्पनासीद्वयान्तरे ] सं० पाठः ; अल्पनासिचयान्तरे – अ ; अल्पनासीद्यान्तरे – ई , ऊ ; अल्पनासिद्यान्तरे – ऋ .

[8] प्रासादे मण्डपे ] अ , ई ; प्रासादमण्टपे – ऊ ; ०मण्टपे – ऋ .

[9] नाम्ना ] अ , ई , ऋ ; नाम्या – ऊ .

[-पुत्रकान्तम्]

पादबन्धधरोपेतं [१]वरुणस्तम्भसंयुतम् ।
[२]शिखापञ्चकसंयुक्तं [३]पुत्रकान्तविमानकम् ॥ १९४॥

[गोमुखम्]

कौबेराङ्घ्रिसमायुक्तं [४]पादबन्धमयूरकम् ।
कलाल्पनासिकोपेतं [५]महानासिद्वयान्वितम् ॥ १९५॥
[६]सर्वालङ्कारसंयुक्तं [७]गोमुखं त्विति विद्यते ।

[श्रीकान्तम्]

पादबन्धमधिष्ठानं [८]श्रीवत्सस्तम्भसंयुतम् ॥ १९६॥
[९]आयताश्रशिरोपेतं [१०]महानासिद्वयान्वितम् ।
चतुष्कूटसमायुक्तं [११]नागरद्विचितान्वितम् ॥ १९७॥
पादं प्रत्यल्पनासाढ्यं [१२]पञ्जराष्टकसंयुतम् ।
सर्वालङ्कारसंयुक्तं [१३]श्रीकान्तमिति विद्यते ॥ १९८॥

[पार्वतीकान्तम्]

प्रतिबन्धधरायुक्तं [१४]धारास्तम्भसमन्वितम् ।
[१५]अष्टाविंशाल्पनासाढ्यं [१६]भद्रनासिद्वयान्वितम् ॥ १९९॥

---

[१] वरुणस्तम्भ० ] सं० पाठः ; वारणस्तम्भ० - ई ; वारणं स्तम्भ० – अ , ऋ ; वारण स्थम्भ° – ऊ .
[२] शिखापञ्चकसंयुक्तं ] अ , ई , ऋ ; शिखरं पञ्चकरैर्युक्तं – ऊ .
[३] पुत्रकान्तविमानकम् ] ई , ऊ ,ऋ , पत्रकान्तविमानकम् – अ.
[४] पादबन्धमयूरकम् ] अ , ई , ऊ ; पादबन्धमपूरकम् – ऋ .
[५] महानासि० ] अ , ऋ ; महानासी० – ई , ऊ .
[६] सर्वालङ्कारसंयुक्तं ] ई , ऊ ; सर्वाभरणसंयुक्तं – अ ; सर्वे . . . . संयुक्तम् – ऋ .
[७] गोमुखं त्विति ] अ , ई , ऋ ; °द्विति – ऊ .
[८] श्रीवत्सस्तम्भ° ] ई ; श्रीवत्सं स्तम्भ° ] अ , ऋ ; श्रीवत्सस्थम्भ° – ऊ .
[९] आयताश्रशिरोपेतं ] ई , ऊ; आयताग्रशिरोपेतं – अ , ऋ .
[१०] महानासिद्वयान्वितम् ] अ , ऋ ; महानासी° – ई ; . . . . हानासि° – ऋ .
[११] नागरद्विचितान्वितम् ] सं० पाठः ; नागरद्व चितान्वितम्- अ, ऋ ; नागाराद्वचिता° – ई ; नागरं द्वचिता° – ऊ .
[१२] पञ्जराष्टकसंयुतम् ] ई ; पञ्चकसंयुतम् – अ , ऋ ; पञ्चराष्टकसं° – ऊ .
[१३] श्रीकान्तमिति ] अ , ई , ऋ ; श्रीकान्तं त्विति – ऊ .
[१४] धारास्तम्भसमन्वितम् ] अ , ई , ऊ ; धरास्तम्भ° – ऋ .
[१५] अष्टाविंशाल्पनासाढ्यं ] अ , ई , ऋ ; ०विंशत्यल्पनासार्धं – ऊ .
[१६] भद्रनासिद्वयान्वितम् ] अ , ऊ , ऋ ; भद्रनासी° – ई .

भद्रकूटसमायुक्तं [1]तोरणाद्यैर्विचित्रितम् ।
[2]पञ्जराष्टकसंयुक्तं पार्वतीकान्तमीरितम् ॥२००॥

[सुमङ्गलम्]

धर्मकान्ताङ्घ्रिसंयुक्तमाधारं [3]प्रतिबन्धके ।
[4]त्रयस्त्रिंशाल्पनासाढ्यं [5]शिखरे ऋतुनासिकम् ॥२०१॥
[6]वेदिभद्रसमायुक्तं [7]सुमङ्गलमिति स्मृतम् ।

[सुभद्रम्]

चन्द्रकान्ताङ्घ्रिसंयुक्तं [8]प्रतिबन्धमसूरकम् ॥२०२॥
[9]शालायामं त्रिभागैकं मुखभद्रसमन्वितम् ।
[10]प्रस्तारोर्ध्वे तु पद्मं स्यात् [11]वेदिकाकण्ठशीर्षकम् ॥२०३॥
षण्महानासिकोपेतं [12]विंशत्संख्याल्पनासिकम्।
शिखापञ्चकसंयुक्तं सुभद्रमिति विद्यते ॥२०४॥

[- कोष्ठसुन्दरम्]

प्रतिबन्धयुता पृथ्वी भानुकान्ताङ्घ्रिसंयुतम् ।
प्रस्तरोपरि कोणेषु कर्णकूटसमन्वितम् ॥२०५॥
वस्वश्रं [13]शीर्षकं कण्ठं [14]गलोत्सेधं समुच्यते।

---

[1] तोरणाद्यैर्विचित्रितम् ] अ , ई ; तोरणाद्यै वि० – ऊ ; तोर . . . . चित्रितम् – ऋ .
[2] पञ्जराष्टकसंयुक्तं ] ई ; पञ्चराष्ट्रसमायुक्तं – अ , ऊ , ऋ .
[3] प्रतिवन्धके ] अ , ई , ऊ ; प्र . . . . बन्धके – ऋ .
[4] त्रयस्त्रिंशाल्पनासाढ्यं ] अ , ई , ऋ ; त्रयत्रिंशाल्पनासार्धं – ऊ .
[5] शिखरे ऋतुनासिकम् ] अ , ई , ऋ ; शिखरे तु° – ऊ .
[6] वेदिभद्रसमायुक्तं ] अ ,ऊ , ऋ ; वेदीभद्र° – ई .
[7] सुमङ्गलमिति स्मृतम् ] अ , ई , ऊ ; सुमङ्गलमि . . . . – ऋ .
[8] प्रतिवन्धमसूरकम् ] ऊ ; प्रतिबन्धमसुसकम् – अ ; प्रतिबन्धं सुवृत्तकम् – ई ; प्रतिबन्धमसुप्रकम् – ऋ .
[9] शालायामं त्रिभागैकं ] अ , ई , ऋ ; °यामत्रिभा° – ऊ .
[10] प्रस्तारोर्ध्वे तु पद्मं स्यात् ] सं० पाठः ; . . . . पद्मं स्यात् – अ , ऋ ; . . . . पद्मं स्यात् – ई ; °पद्मास्य – ऊ .
[11] वेदिकाकण्ठशीर्षकम् ] ऊ ; °शीर्षके – अ ; . . . . कर्णशीर्षकम् – ई ; वेदिकाकर्णशीर्षकम् – ऋ .
[12] विंशत्संख्याल्पनासिकम् ] ई , ऊ ; विंशदाख्याल्पनासिकम् – अ ; विच . . . . ख्याल्पनासिकम् – ऋ .
[13] शीर्षकं कण्ठं ] अ ; शीर्षकण्ठं यत् - ई ; शीर्षकर्णं – ऋ .
[14] गलोत्सेधं समुच्यते ] अ ; °धान्तमुन्नतम् – ई ; °धान्त तुन्नतम् – ऊ ; गलोत्सेध . . . . – ऋ .

[1]वेदिकाबन्धुरं कण्ठं [2]चित्रकान्तविमानवत् ॥२०६॥
[3]पञ्जराष्टकसंयुक्तं [4]कोष्ठसुन्दरमीरितम् ।
[5]...

[-विजयावहम्]

[6]चरणं रुद्रकान्तं स्यादाधारं प्रतिबन्धकम् ॥२०७॥
वेदिभद्रसमायुक्तं [7]कूटहारान्तरावृतम् ।
[8]कन्धरं शीर्षकाकारं [9]श्रीभद्रकविमानवत् ॥२०८॥
एवं लक्षणसंयुक्तं विमानं विजयावहम् ।
[10]...

[श्रीभोगादिविमानानां स्थानम्]

[11]श्रीभोगाद्यष्टकं दिक्षु विधिना [12]स्थापयेद्बुधः ॥२०९॥
[13]पार्वतीकान्तकोष्ठाढ्यम् अष्टमं चान्तरालके ।
कल्पयेदुक्तमार्गेण यथावित्तानुसारतः ॥२१०॥
[14]कामकोष्ठविधिः प्रोक्तो देवतास्थापनं श्रृणु ।

[कामकोष्ठे देवतास्थापनम्]

[महानासीदेवताः]

[15]जम्भिनीं पूर्वदिग्भागे

---

[1] वेदिकाबन्धुरं कण्ठं ] अ, ऊ; वेदिकासुन्दरं कर्णं – ई; °कर्णं – ऋ.
[2] चित्रकान्तविमानवत् ] अ, ऋ; °विमानकम् - ई; °कान्तं° – ऊ.
[3] पञ्जराष्टकसंयुक्तं ] सं० पाठः; पञ्चराष्ट्रक० - अ, ई, ऋ; पञ्चराष्टक° – ऊ.
[4] कोष्ठसुन्दरमीरितम् ] झ; तोषसुन्दरमीरितम् – अ, ई, ऊ; तोषसुन्दर.... रितम् – ऋ.
[5] अत्र पद्मकान्तकोष्ठस्य निर्देशो न विद्यते ।
[6] चरणं रुद्रकान्तं ] अ, ई, ऋ; चरणरुद्र° – ऊ.
[7] कूटहारान्तरावृतम् ] अ, ऊ, ऋ; ०रान्वितम् – ई.
[8] कन्धरं शीर्षकाकारं ] अ; ०गीषकाकारं – ई; कन्दरं गीर्षका° – ऊ; कन्धरगीषका° – ऋ.
[9] श्रीभद्रकविमानवत् ] अ, ऊ, ऋ; श्रीभद्रकविमानकम् – ई.
[10] अत्र कौशलश्रीनिवासयोः कोष्ठयोर्निर्देशो न विद्यते ।
[11] श्रीभोगाद्यष्टकं ] ई, ऊ, ऋ, झ; श्रीभोग्याद्यष्टकं - अ.
[12] स्थापयेद्बुधः ] झ; दापयेद्बुधः – अ, ऊ, ऋ; धापयेद्बुधः – ई.
[13] पार्वतीकान्तकोष्ठाढ्यम् ] सं० पाठः; पार्वतीकान्तकोष्ठाभ्याम् – अ, ई, ऊ, ऋ, झ.
[14] कामकोष्ठविधिः प्रोक्तो ] अ, ई, ऋ; °विधिं प्रोक्तं – ऊ.
[15] जम्भिनीं ] ऋ; जंभनी – अ; जंभीनी – ई, ऊ.

[1]स्तम्भिनीं दक्षिणे न्यसेत् ॥२११॥
[2]मोहिनीं पश्चिमे देशे [3]भेदिनीं चोत्तरे न्यसेत् ।
कोणे [4]सिंहं वृषं [5]स्थाप्य अथवा वृषभं न्यसेत् ॥२१२॥
अथवा [6]पूर्वदेशे तु [7]इन्द्राणीं चैव विन्यसेत् ।
[8]रौद्रीं दक्षिणदेशे तु वारुणे [9]वैष्णवीं न्यसेत् ॥२१३॥
ब्राह्मीमुत्तरदेशे तु स्थापयेत्तु विचक्षणः ।
देवतास्थापनं प्रोक्तं [10]देवीमानं ततः शृणु ॥२१४॥

[- नागरमानम्]

[11] स्तम्भोत्सेधदशांशे तु भूतांशं कन्यसोदयम् ।
रसांशं श्रेष्ठमानं तु [12]तयोर्मध्येऽष्टभाजिते ॥२१५॥
नवधा [13]देविमानं स्यात् नागरं देविमानकम् ।

[- द्राविडमानम्]

[14]स्वाधिष्ठानसमं नीचं [15]पादाधिक्यं तु मध्यमम् ॥२१६॥
[16]श्रेष्ठमर्धाधिकं मानं द्राविडं [17]देविमानकम् ।

---

[1] स्तम्भिनीं ] अ , ऋ ; स्तंभिन्ये – ई ; स्तंभिनी – ऊ .
[2] मोहिनीं ] अ , ऋ ; मोहिनी – ई , ऊ .
[3] भेदिनीं चोत्तरे ] अ ,ऋ ; भेदिनी° - ई ; भेदिनी उत्तरे - ऊ .
[4] सिंहं वृषं ] अ , ऊ , ऋ ; सिंह वृषं – ई .
[5] स्थाप्य अथवा ] ई , ऊ, ऋ ; स्थाप्याथवा – अ.
[6] पूर्वदेशे तु ] अ , ई ,ऋ ; पूर्वदेशेषु – ऊ .
[7] इन्द्राणीं ] अ, ई ; ऐन्द्राणीं – ऊ , ऋ .
[8] रौद्रीं दक्षिणदेशे ] अ , ऋ ; रौद्री० – ई ; °दक्षिणे° – ऊ .
[9] वैष्णवीं ] अ , ई , ऋ ; वैष्णवं – ऊ .
[10] देवीमानं ] अ , ऊ , ऋ ; देविमानम् – ई .
[11] स्तम्भोत्सेधदशांशे तु ] अ , ई , ऋ ; ०दशांशेषु – ऊ .
[12] तयोर्मध्येऽष्टभाजिते ] अ , ई ; °ध्येषुभा° – ऊ ; तयोर्मध्येष्टहस्त . . . . जिते – ऋ .
[13] देविमानं ] अ , ई , ऋ ; देवी° – ऊ .
[14] स्वाधिष्ठानसमं ] अ , ऋ ; स्वाधिष्ठाना० – ई ; स्वाधिष्ठानं० – ऊ .
[15] पादाधिक्यं तु मध्यमम् ] अ , ई , ऋ ; पादाधिक्य मध्य° – ऊ .
[16] श्रेष्ठमर्धाधिकं ] ऊ ; श्रेष्ठमध्यादिकं – अ , ऋ ; श्रेष्ठं मध्याधिकं – ई .
[17] देविमानकम् ] अ , ई , ऊ ; देवमानकम् – ऋ .

[- वेसरमानम्]

[1]नालीगृहविशालं यत् नवभागविभाजिते ॥२१७॥
सप्तांशमुत्तमं प्रोक्तं भूतांशं [2]कन्यसं भवेत् ।
[3]तयोर्मध्येऽष्ट यन्मानं वेसरं देविमानकम् ॥२१८॥

[- सामान्यमानम्]

[4] द्वारोत्सेधे विकारांशे [5]ऊर्ध्वाधोंशं क्षयं न्यसेत् ।
शेषं [6] देव्याश्च मानं स्याद् एतत्सामान्यमेव हि ॥२१९॥
[7]आयादिशुभसंयुक्तं देवीमानं परिग्रहेत् ।
[8]अङ्गमानादिकं सर्वं मध्यमं दशतालकम् ॥२२०॥

[देवीप्रतिष्ठा]

[9]एवं लक्षणसंयुक्तां [10]देवीं [11]संगृह्य देशिकः ।

[-अङ्कुरार्पणादि]

ततोऽङ्कुरार्पणं कुर्यान्नवमे [12]सप्तमेऽपि वा ॥२२१॥
पञ्चमे त्रिदिने वापि सद्योऽङ्कुरमथापि वा ।
[13]बालदेवीं समभ्यर्च्य प्रतिष्ठादिनपूर्वके ॥२२२॥
[14]शिल्पिकर्मावसाने तु [15]देवीं [16]संगृह्य देशिकः ।

---

[1] नालीगृहविशालं यत् नवभाग० ] अ , ई , ऋ ; नालीग्रहविलाशश्च वन्नव° – ऊ .
[2] कन्यसं भवेत् ] अ , ऋ ; कन्यकं० – ई ; कन्यशं० – ऊ .
[3] तयोर्मध्येऽष्ट यन्मानं ] अ , ई , ऋ ; °मध्येष्ठय° – ऊ .
[4] द्वारोत्सेधे ] ई , ऋ, झ ; चारोत्सेधे - अ ; द्वारोत्सेध –ऊ.
[5] ऊर्ध्वाधोंशं क्षयं ] सं० पाठः ; ऊर्ध्वाधोंशं चयं – अ ; ऊर्ध्वाधोंश द्वयं – ई , ऋ, झ ; ऊर्द्धांसे द्वयं – ऊ .
[6] देव्याश्च मानं ] सं० पाठः ; देवीज्यमानं – अ , ऋ ; देवीस्यमानं – ई ; देवीमानं – ऊ ; देव्या च मानं – झ.
[7] आयादिशुभसंयुक्तं देवीमानं ] अ , ई , ऊ ; °शुभ . . . . युक्तम् देविमानं – ऋ .
[8] अङ्गमानादिकं ] ई, ऊ , ऋ ; अग्रमानादिकं - अ .
[9] एवं लक्षणसंयुक्तां ] ई , ऊ , ऋ ; सर्वलक्षण संयुक्तं अ .
[10] देवीं ] ई , ऊ , ऋ ; देवी – अ .
[11] संगृह्य ] अ , ई , ऋ ; संग्राह्य – ऊ .
[12] सप्तमेऽपि वा ] अ , ऊ , ऋ ; सप्तमेऽथ वा – ई .
[13] बालदेवीं ] ई , ऋ ; बालां देवीं - अ ; बालदेवी – ऊ .
[14] शिल्पिकर्मावसाने तु ] ऊ , ऋ ; शिल्पी कर्मावसाने तु – अ ; शिल्पिकर्मावसाने न – ई .
[15] देवीं ] अ , ऊ , ऋ ; गौरीं – ई .
[16] संगृह्य ] अ , ऋ ; संग्राह्य – ई , ऊ .

प्रासादपूर्वदिग्भागे [१]मण्डपे शालिकोपरि ॥२२३॥
वस्त्रेणास्तीर्य तस्योर्ध्वे [२]शाययेदूर्ध्ववक्त्रकम् ।
[३]प्राक् शिरोमां महादेवीं [४] [५]गौरीगायत्रियार्चयेत् ॥२२४
वस्त्रेणाच्छाद्य तां देवीं तन्मूलेनैव देशिकः ।
तस्य दक्षिणभागे तु स्नपनं संप्रकल्पयेत् ॥२२५॥
तस्य मण्डपरक्षार्थं [६]पूर्वादीनि यथाक्रमम् ।
कुम्भमध्ये समभ्यर्च्य [७]लोकपालास्त्रकान् [८]क्रमात् ॥२२६॥

[रत्नन्यासः]

[९]हैमराजतपात्रे वा ताम्रपात्रेऽथवा [१०]बुधः ।
कांस्यपात्रेऽथवा मध्ये कल्पयेच्चन्दनेन तु ॥२२७॥
[११]द्वादशाङ्गुलविस्तारं [१२]व्योमाङ्गुलसमुन्नतम् ।
चतुरश्रसमायुक्तं मध्ये [१३]पद्मं समालिखेत् ॥२२८॥
[१४]माणिक्यं कर्णिकामध्ये [१५]पूर्वे मरकतं न्यसेत् ।
प्रवालमग्निदिग्भागे इन्द्रनीलं तु याम्यके ॥२२९॥
नैर्ऋते पुष्यरागं च वज्रं [१६]वरुणदिग्दले ।

---

[१] मण्डपे ] ई , ऊ ; मण्टपे – अ , ऋ .
[२] शाययेदूर्ध्व वक्त्रकम् ] ऊ , ऋ ; शाययेदूर्ध्ववस्त्रकम् – अ ; च्छाययेदूर्ध्व वक्त्रकम् – ई.
[३] प्राक् शिरोमां महादेवीं ] अ , ऊ ; प्राक् शिरोम° – ई ; प्राक्छिरोमां° – ऋ .
[४] ०दशांशे तु ] अ , ई , ऋ ; ०दशांशेषु – ऊ .
[५] गौरीगायत्रियार्चयेत् ] ई, ऋ ; गौरीगायत्रितोच्चरे(ये)त् – अ ; गौरीगायत्र्यार्चयेत् –ऊ.
[६] पूर्वादीनि ] अ , ई , ऋ ; पूर्वदीनि – ऊ .
[७] लोकपालास्त्रकान् ] ई ; लोकपालास्त्रिकान् ग्रहान् – अ ; लोकपालास्त्रकान् गृहान् – ऊ ; लोकापालास्त्रकान् गृहान् – ऋ .
[८] क्रमात् ] सं० पाठः ; ग्रहान् – अ, ई ; गृहान् - ऊ, ऋ .
[९] हैमराजतपात्रे वा ] अ , ऋ ; हेमराजत° – ई ; हेमरजत० - ऊ .
[१०] बुधः ] अ , ऊ , ऋ ; पुनः – ई .
[११] द्वादशाङ्गुलविस्तारं ] ई , ऊ , ऋ ; द्वादशाङ्गुलिविस्तारं – अ .
[१२] व्योमाङ्गुलसमुन्नतम् ] ई(२) ; व्योमाङ्गुलसमन्वितम् – अ, ई (१), ऊ.
[१३] पद्मं ] अ , ई , ऋ ; पात्रं – ऊ .
[१४] माणिक्यं ] ई , ऋ ; माणिक्यं – अ ; ऊ .
[१५] पूर्वे मरकतं ] ई , ऊ ; पूर्वमरतकं - अ , ऋ .
[१६] वरुणदिग्दले ] अ ; वरुणदग्दले – ऊ ; वारुणदिग्दले – ई, ऋ .

[1]गोमेदं वायुदेशे तु मौक्तिकं सोमदिग्दले ॥२३०॥
वैडूर्यमीशदेशे तु वामाद्यैश्च समन्वितम् ।
[2]अर्चयेद्गन्धपुष्पाद्यैर्वामाद्यैः शक्तिबीजकैः ॥२३१॥
शुद्धवस्त्रेण [3]संछाद्य [4]त्रिपाद्यूर्ध्वे तु विन्यसेत् ।

[अक्षिमोक्षणम्]

[5]शिरसी दुत् र्जमङ्गैश्च [6]लेखयेद्धेमसूचिना ॥२३२॥
[7]भ्रूरेखां प्रथमं लिख्य [8]नेत्रमन्त्रमनुस्मरन् ।
प्रथमं मधुना तर्प्य द्वितीयं सर्पिषा बुधः ॥२३३॥
तृतीयं [9]पयसा तर्प्य चतुर्थं शुद्धवारिणा ।
पञ्चमं हिमतोयेन तन्मूलेनैव देशिकः ॥२३४॥
गन्धपुष्पैः समभ्यर्च्य [10]दर्पणं दर्शयेद्बुधः ।
उत्पलं दर्शयेत्पश्चात् [11]कर्पूरशकलं ततः ॥२३५॥
क्षीरं च दधिकुम्भं च घृतकुम्भं च दर्शयेत् ।
[12]बृहतीफलकानी च मधुकुम्भं च दर्शयेत् ॥२३६॥
[13]अञ्जनं [14]कन्दुकं चैव सवस्त्रं केशशोधनम् ।
कुङ्कुमं कृष्णगन्धं च शालिपुष्पं च तण्डुलम् ॥२३७॥
[15]तिलमुद्गसमूहं च दर्शयेत्तु विचक्षणः ।

---

[1] गोमेदं ] अ, ऊ, ऋ ; गोमेधं – ई.
[2] अर्चयेद्गन्धपुष्पाद्यैर्वामाद्यैः शक्तिबीजकैः] अ, ऊ, ऋ ; °र्वामादिशक्तबीजतः– ई.
[3] संछाद्य ] अ, ई, ऋ ; संचाद्य – ऊ.
[4] त्रिपाद्यूर्ध्वे तु ] ई ; त्रिपादोर्ध्वे तु – अ ; त्रिपादूर्ध्वे तु – ऊ, ऋ.
[5] शिरसी दुत् र्जमङ्गैश्च ] अ ; शिरीसदुर्जमङ्गोऽथ – ई ; शिरीषदुश्चमन्त्रोश्चं – ऊ ; शिरीसदुर्जमङ्गोश्च – ऋ.
[6] लेखयेद्धेमसूचिना ] अ, ई, ऋ ; °सूचिनम् – ऊ.
[7] भ्रूरेखां ] अ, ई ; भूरेखां – ऊ ; °प्रथमं . . . . त् – ऋ.
[8] नेत्रमन्त्रमनुस्मरन् ] ई, ऊ ; वक्रमन्त्रमनुस्मरन् – अ ; . . . . – ऋ.
[9] पयसा ] ई, झ ; मधुना – अ, ऊ, ऋ .
[10] दर्पणं ] ऊ ; तर्प्यान्ते – अ, ऋ ; तर्प्यन्ते – ई.
[11] कर्पूरशकलं ] अ, ई, ऋ ; कपूरं० – ऊ.
[12] बृहतीफलकानी च ] ऊ ; बृहतीफलहानिं च – अ, ई ; 'ऋ' मातृकायाम् इदमर्धं न दृश्यते ।
[13] 'अ' मातृकायां श्लो० २३७-२३८ भागो न दृश्यते।
[14] कन्दुकं ] ई, ऋ ; कान्तकं – ऊ; कत्तुकं – झ.
[15] 'ऋ, झ' मातृकायोः अक्षरलोपः।

[1]प्रच्छन्नपटमावर्ज्य सवत्सां गां प्रदर्शयेत् ॥ २३८ ॥
[2]दर्शयेद्ब्रह्मकन्याश्च [3]ब्राह्मणान् संप्रदर्शयेत् ।
[4]प्राणिनो [5]दर्शयेत्पश्चात् गौरीबीजमनुस्मरन् ॥ २३९ ॥

[जलाधिवासनम्]

ततः [6]संस्थाप्य [7]देवेशीम् [8]अलङ्कृत्यातिसुन्दरम् ।
ग्रामप्रदक्षिणं कृत्वा सर्वालङ्कारसंयुतम् ॥ २४० ॥
[9]जलतीरे प्रपामध्ये विन्यसेद्देशिकोत्तमः ।
पुण्याहं वाचयेत्तत्र [10]जलाधिवासनार्थकम् ॥ २४१ ॥
[11]स्नपनं कारयेत्तत्र [12]जलाधिवासनार्थकम् ।
स्नपनं [13]कारयेत्तत्र [14]जलक्रीडां समाचरेत् ॥ २४२ ॥
जलमध्ये समापूर्य गङ्गादीनां समर्चयेत् ।
तन्मध्ये शाययेद्गौरीं [15]जप्त्वाघमर्षणं मनुम् ॥ २४३ ॥
[16]रवेरस्तमयात्पूर्वे गौरीमादाय देशिकः ।
[17]जलतीरे [18]प्रपामध्ये [19]विन्यसेत्स्नपनार्हकैः ॥ २४४ ॥

---

[1] प्रच्छन्न० ] ई, ऋ ; प्रश्चिन्न० – ऊ; प्रच्छिन्न० – झ.
[2] दर्शयेद्ब्रह्मकन्याश्च ] अ , ई ; °कन्याश्च – ऊ ; °कर्णं च – ऋ .
[3] ब्राह्मणान् संप्रदर्शयेत् ] ऊ ; ब्राह्मणानां प्रदर्शयेत् – अ, ई, ऋ, झ .
[4] प्राणिनो ] अ; प्राणिनां - ई, ऊ, झ ; प्राणानां – ऋ .
[5] दर्शयेत्पश्चात् ] ई , ऊ , ऋ ; दापयेत्पश्चात् – अ .
[6] संस्थाप्य ] अ ; संस्नाप्य - ई , ऊ , ऋ , झ .
[7] देवेशीम् ] ई , ऊ; झ ; देवेशं – अ, ऋ .
[8] अलङ्कृत्यातिसुन्दरम् ] ई, ऋ ; अलङ्कृत्यादिसुन्दरम् – अ, ऊ, झ .
[9] जलतीरे प्रपामध्ये ] ई , ऋ ; जलमध्ये प्रपामध्ये – अ ; जलतीर प्रभा° – ऊ .
[10] जलाधिवासनार्थकम् ] अ , ई , ऊ ; ०वासनार्चकम् – ऋ .
[11] स्नपनं करयेत्तत्र ] अ , ऋ ; स्न . . . . येत्तत्र – ऋ . 'ऊ' मातृकायामिदमर्धं न दृश्यते ।
[12] जलाधिवासनार्थकम् ] अ , ई , ऊ ; ०वासनार्चकम् – ऋ .
[13] कारयेत्तत्र ] अ , ई , ऋ ; वाचयेत्तत्र – ऊ .
[14] जलक्रीडां ] अ , ई , ऋ ; जलक्रीडं – ऊ .
[15] जप्त्वाघमर्षणं ] अ , ई , ऋ ; जप्त्वागम° – ऊ .
[16] रवेरस्तमयात्पूर्वे ] अ , ई , ऋ ; °स्तमनात्पूर्वे – ऊ .
[17] जलतीरे ] अ , ई, ऋ ; जलमध्ये – ऋ .
[18] प्रपामध्ये ] अ , ई ; प्रभामध्ये – ऊ ; प्रपां मध्ये – ऋ .
[19] विन्यसेत्स्नपनार्हकैः ] ई ; विन्यसेत्स्नपनाहके – अ , ऋ ; विन्यसेत्स्नपनार्हके – ऊ .

[मण्डपकृत्यम्]

संस्नाप्य च समादाय सर्वालङ्कारसंयुतम् ।
[१]धामप्रवेशनं [२]कुर्याद् यागमण्डपे चोत्तरे ॥२४५॥
विन्यस्य [३]चाष्टमृद्रव्यभस्मबिल्वदलादिभिः।
[४]संस्नाप्य शुद्धतोयेन [५]गौरीगायत्रिया बुधः ॥२४६॥
चित्रवस्त्रैरलङ्कृत्य गन्धपुष्पस्त्रगादिभिः ।
ततो मण्डपमासाद्य वास्तुहोमं समाचरेत् ॥२४७॥
पर्यग्निकरणं कृत्वा स्नात्वा संपूज्य मण्डपम् ।
ततस्संमृज्य [६]दर्भाग्रैर्वेदिकाप्रोक्षणं कुरु ॥२४८॥
स्थण्डिलं कारयेत्तत्र [७]त्वष्टद्रोणैश्च शालिभिः ।
[८]तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि ॥२४९॥
तदर्धैर्लाजपुष्पैश्च तन्मध्ये नलिनं लिखेत् ।
प्रोक्षयेद्धृदयेनैव पूजयेत्सिंहमासनम् ॥२५०॥
ततो [९]गौरीं समादाय [१०]मण्डपे वायुगोचरे ।
[११]विन्यस्याभ्यर्च्य तस्याग्रे [१२]रक्षासूक्तं जपेत्क्रमात् ॥२५१॥
[१३]बध्वा प्रतिसरं [१४]मन्त्रैः [१५]शङ्खघोषसमन्वितम् ।

---

[१] धामप्रवेशनं ] ई , ऊ , ऋ ; या(धा)म प्रदक्षिणं – अ .
[२] कुर्याद् यागमण्डपे चोत्तरे ] सं० पाठः; कुर्याद्यागमण्डपमुत्तरे - अ ; यागमण्डपचोत्तरे – ई , ऊ , ऋ .
[३] चाष्टमृद्रव्य० ] अ, ऊ; चाष्टमृद्रव्यं भस्वविल्वदलादिभिः – ई ; चाष्टमृद्रव्यभस्मविल्वन्द . . . .– ऋ .
[४] श्लो° २४६ उत्तरार्धं श्लो° २४७ पूर्वार्धं च 'ऊ' मातृकायां न दृश्येते ।
[५] गौरीगायत्रिया ] ई , ऋ ; गौरीगायत्रितो - अ .
[६] दर्भाग्रैर्वेदिकाप्रोक्षणं कुरु ] अ ; °वेदिकां प्रोक्षयेत् गुरुः – ई ; दर्भाग्रे . . . . काप्रोक्षणं – ऊ ; दर्भाग्रे० – ऋ .
[७] त्वष्टद्रोणैश्च ] अ , ऋ ; अष्टद्रो° – ई , ऊ .
[८] तदर्धैस्तण्डुलैर्भूष्य ] अ , ई ; तदर्धैस्थण्डिलै° – ऊ ; तदधैस्तण्डु° – ऋ .
[९] गौरीं ] अ , ई , ऋ ; गौरी – ऊ .
[१०] मण्डपे ] अ , ई ; मण्डपं – ऊ ; मण्टपे – ऋ .
[११] विन्यस्याभ्यर्च्य ] अ , ई , ऋ ; विन्याभ्यर्च्य – ऊ .
[१२] रक्षासूक्तं ] ई, ऋ ; रक्षासूत्रं – अ, ऊ .
[१३] बध्वा ] अ , ई , ऋ ; न्यत्वा – ऊ .
[१४] मन्त्रैः ] अ , ऊ , ऋ ; मन्त्रं – ई .
[१५] शङ्खघोषसमन्वितम् ] ई ; शङ्खघोषैः परस्परम् – अ ; °घोषपुरस्सरम् – ऊ ; °घोषैः पुरस्सरम् – ऋ .

धूपदीपं ततो दत्वा [१]विप्राशीर्वचनैस्सह ॥ २५२ ॥

[-बालबिम्बविसर्जनम्]

ततो बालगृहं गत्वा यात्राहोमं समाचरेत् ।
कुम्भे वा करके वापि समावाह्य [२]महेश्वरीम् ॥ २५३ ॥
[३]बालबिम्बं परित्यज्य नद्यां वा कूपवापिके ।

[मुखमण्डपे कुम्भन्यासादि]

ततः संपूज्य गन्धाद्यैः [४]करकस्थां महेश्वरीम् ॥ २५४ ॥
शिरसा वाहयित्वा तु शङ्खघोषपुरस्सरम् ।
[५]सर्वालङ्कारसंयुक्तं मुखमण्डपमाविशेत् ॥ २५५ ॥
इन्द्रईशानयोर्मध्ये वेदिकोर्ध्वे तु विन्यसेत् ।
[६]आदाय चाष्टकरकान् [७]कूर्चपल्लवसंयुतान् ॥ २५६ ॥
सवस्त्रान् हेमसंयुक्तान् [८]स्थापयेदष्टदिक्षु च ।
शयनं कर्णिकामध्ये [९]चाण्डजाद्यैरधोमुखम् ॥ २५७ ॥
अथवा चित्रवस्त्रेण शयनं [१०]कल्पयेत्तथा ।
ततो गौरीं समादाय शयने शाययेद्बुधः ॥ २५८ ॥
संपूज्य गन्धपुष्पाद्यैः गौरीबीजेन देशिकः ।

[होमः]

[११]ततोऽग्नियजनं कुर्यात्पूर्वोक्तविधिना सह ॥ २५९ ॥
[१२]समिदाज्यान्नलाजैश्च प्रत्येकं [१३]होममाचरेत् ।

---

[१] विप्राशीर्वचनैस्सह ] अ, ई, ऋ ; विप्रशीर्व° – ऊ.
[२] महेश्वरीम् ] ई ; जलेश्वरीम् – अ, ऊ, ऋ ; जलेश्वरम् – झ.
[३] बालबिम्बं ] ई, ऋ ; बालाबिम्बं – अ ; बालबिम्ब – ऊ.
[४] करकस्थां ] अ, ई, ऋ ; करकस्थं – ऊ.
[५] सर्वालङ्कारसंयुक्तं ] अ, ऊ, ऋ ; पूर्वालङ्कार° – ई.
[६] आदाय चाष्टकरकान् ] अ, ई, ऋ ; °कलशान् – ऊ.
[७] कूर्चपल्लवसंयुतान् ] अ, ई, ऋ ; चूतपल्लव° – ऊ.
[८] स्थापयेदष्टदिक्षु च ] अ, ऊ, ऋ ; °द्दिग्विदिक्षु च – ई.
[९] चाण्डजाद्यैरधोमुखम् ] अ, ई, ऋ ; अण्डजाद्यै° – ऊ.
[१०] कल्पयेत्तथा ] अ, ई, ऋ ; °येत्ततः – ऊ.
[११] ततोऽग्नियजनं ] अ, ई ; ततोऽग्निं° – ऊ ; °शयनं – ऋ.
[१२] समिदाज्यान्नलाजैश्च ] अ, ई, ऋ ; समिधाज्या° – ऊ.
[१३] होममाचरेत् ] अ, ई, ऋ ; ओममा° – ऊ.

[1]समिद्धृदयमन्त्रेण शिरसा च घृतं हुनेत् ॥२६०॥
[2]शिखया चरु होतव्यं लाजं कवचमन्त्रतः।
गौरीमिमाय मन्त्रेण दशवारं हुनेत् सुधीः ॥२६१॥
शतमर्धं तदर्धं वा द्रव्यं प्रति हुतं चरेत्।
[3]द्रव्यान्ते व्याहृतिं हुत्वा [4]व्याहृत्यन्ते [5]स्पृशेदुमाम् ॥२६२॥
[6]वर्धनीं चैव संस्पृश्य जप्त्वा [7]चाहुतिसंख्यया।
[8]प्रायश्चित्ताहुतिं हुत्वा [9]शतं मन्त्रेण देशिकः ॥२६३॥

[अधिवासनानन्तरदिवसकृत्यम्]

एवं जागरणं रात्रौ प्रभाते स्नानमाचरेत्।
[10]सौरादिकलशानिष्ट्वा तदन्ते होममाचरेत् ॥२६४॥
ततो गर्भगेहं गत्वा स्थलशुद्धिं [11]समाचरेत्।

[पीठस्थापनम्]

द्वारतारं त्रिधा कृत्वा [12]मध्येऽष्टांशविभाजिते ॥२६५॥
तदेकांशं त्रिधा कृत्वा कलांशं [13]दक्षिणे न्यसेत्।
व्योमांशं [14]वामभागेन न्यस्त्वा सूत्रं प्रसारयेत् ॥२६६॥
तत्सूत्रं [15]शक्तिसूत्रं स्यात् [16]शतैर्मध्यं प्रकल्पयेत्।

---

[1] समिद्धृदयमन्त्रेण ] अ, ई, ऋ; समिद्दय० – ऊ.
[2] श्लो° २६१, २६२ पूर्वार्धं च 'ऊ' मातृकायां न दृश्यन्ते।
[3] द्रव्यान्ते व्याहृतिं ] अ, ई, ऋ; °न्तेन व्या° – ऊ.
[4] व्याहृत्यन्ते ] अ, ई, ऋ; व्यावृत्यान्ते – ऊ.
[5] स्पृशेदुमाम् ] अ, ई, ऊ; स्पृशेद्रमाम् – ऋ.
[6] वर्धनीं चैव संस्पृश्य ] अ, ई; वर्धनी नैव सा स्पृश्य – ऊ; वर्धनी नैव संस्पृश्य – ऋ.
[7] चाहुतिसंख्यया ] ई, ऊ, ऋ; जाहुतिसंख्यया – अ.
[8] प्रायश्चित्ताहुतिं हुत्वा ] अ, ई, ऋ; °हुति कृत्वा – ऊ.
[9] शतं मन्त्रेण ] अ, ई; शतमन्त्रेण – ऊ, ऋ.
[10] सौरादिकलशानिष्ट्वा ] झ; सौरादिशकलान्यष्ट्वा - अ; सौरादीशकलान्यष्ट्वा – ई, ऋ; सौरादिकंलान्यष्ट्वा – ऊ.
[11] समाचरेत् ] अ, ई, ऊ; प्रकल्पयेत् – ऋ.
[12] मध्येऽष्टांशविभाजिते ] ई, ऋ; मध्यष्टं शालि० -ऊ; मध्यष्टांशं ०-झ. श्लो° २६५ चतुर्थपादादि- २६६ प्रथमपादान्तो भागो 'अ' मातृकायां न दृश्यते।
[13] दक्षिणे ] ई, ऊ; दक्षिणां – अ, ऋ.
[14] वामभागेन ] अ, ई, ऋ, झ; वायुभागेन – ऊ.
[15] शक्तिसूत्रं ] अ, ई, ऊ; शक्ति .... त्रं – ऋ.
[16] शतैर्मध्यं प्रकल्पयेत् ] अ, ई, ऋ, झ; शान्ते मध्ये प्रकल्पयेत् – ऊ.

तत्सूत्रं मध्यमे स्थाप्य [१]गौरीपीठं यथा दृढम् ॥२६७॥
[२]गर्भेऽष्टाष्टांशके भागे [३]दैविके स्थापनं कुरु ।
[४]पीठं प्रक्षाल्य चास्त्रेण [५]पञ्चगव्याभिषेचनम् ॥२६८॥
[६]पिण्डिमस्त्रेण संपूज्य गन्धपुष्पादिना बुधः ।
[७]वस्त्रेणाच्छादनं कुर्यात्प्रणवेनैव देशिकः ॥२६९॥

[ग्रामप्रदक्षिणम्]

ततो यागगृहं गत्वा चास्त्रेण [८]जुहुयाच्छतम् ।
पादप्रक्षालनं कृत्वा चाचम्य विधिना बुधः ॥२७०॥
[९]परिचारकमाहूय सोष्णीषं [१०]सोत्तरीयकम् ।
यजमानसमायुक्तं बन्धुवर्गैः समन्वितम् ॥२७१॥ ।
दैवज्ञेन समायुक्तं स्वस्तिसूक्तसमन्वितम् ।
[११]गब्लिके शिबिके वाथ [१२]खेटके वा रथेऽपि वा ॥२७२॥
देवीमारोपयेद्विद्वान् वाद्यघोषसमन्वितम् ।
[१३]वितानच्छत्रसंयुक्तं धूपदीपसमन्वितम् ॥२७३॥
ग्रामप्रदक्षिणं नीत्वा द्वारदेशे समन्ततः ।
संपूज्य [१४]विधिना द्वारं पुष्पाक्षतसमन्वितम् ॥२७४॥

---

[१] गौरीपीठं ] ई, झ ; गौरीवीजं – अ, ऊ, ऋ.
[२] गर्भेऽष्टाष्टांशके भागे ] ई ; गर्भोऽष्टदिग्भागे – अ ;गर्भाऽष्टाष्टांशके भागे – ऊ ; गर्भै . . . . कभागे – ऋ .
[३] दैविके स्थापनं ] ई , ऊ ; दैविके स्थानं – अ ; दैविक स्थापनं – ऋ .
[४] पीठं प्रक्षाल्य चास्त्रेण ] अ , ई ,ऋ ; पीठप्रक्षाम्बुजास्त्रेण – ऊ .
[५] पञ्चगव्याभिषेचनम् ] अ , ऊ , ऋ ; पञ्चगव्याभिषेचयेत् – ई .
[६] पिण्डिमस्त्रेण संपूज्य ] अ , ऊ ; पिण्डीमस्त्रेणसंप्रोक्ष्य – ई ; पिण्डीमस्त्रेण° – ऋ .
[७] वस्त्रेणाच्छादनं ] अ , ई , ऋ ; वस्त्रेणाच्चादनं – ऊ .
[८] जुहुयाच्छतम् ] अ , ई , ऋ ; जुहुयाश्चतः – ऊ .
[९] परिचारकमाहूय ] अ ; परिचारकसंयुक्तं – ई , ऊ ; परिचारकसं... ऋ .
[१०] सोत्तरीयकम् ] ई ; चोत्तरीयकम् – अ , ऊ , ऋ .
[११] गब्लिके शिबिके° ] ऋ; गलिके शिबिके वाथ – अ ; गब्लिके शिंजिके० – ई ; गजके° – ऊ .
[१२] खेटके वा ] अ , ई , ऋ ; कटके वा – ऊ .
[१३] वितानच्छत्रसंयुक्तं ] ई ,ऊ , ऋ ; वितानंच्छत्रसंयुक्तं – अ .
[१४] विधिना द्वारं ] अ , ऋ ; विधिवत् द्वारं – ई , ऊ .

[गर्भगृहे गौरीस्थापनम्]

गर्भगेहं प्रविश्याथ पुण्याहं वाचयेत्ततः ।
[1]गर्तं संपूजयेद्द्रत्नान् स्थाप्य पूर्वोक्तमार्गतः ॥२७५॥
[2]स्थापयेत्तां महादेवीं [3]मूलमूर्तेस्तु मन्त्रतः ।
दृढीकृत्वाष्टबन्धेन [4]शक्तिसूत्रं निरीक्षयेत् ॥२७६॥
[5]स्नापयेद्गन्धतैलेन [6]सुगन्धामलकादिभिः ।
पञ्चगव्यामृतैः स्नाप्य [7]नालिकेरोदकैर्जलैः ॥२७७॥
संस्नाप्य च महादेवीं नववस्त्रेण वेष्टयेत् ।

[ब्रह्मवर्धन्युद्धारणम्]

संपूज्य गन्धपुष्पाद्यैः प्रणवेनैव देशिकः ॥२७८॥
पूर्णाहुतिं ततो दत्वा [8]संग्रहेद्द्ब्रह्मवर्धनीम् ।
शङ्खध्वनिसमायुक्तं ब्रह्मघोषसमन्वितम् ॥२७९॥
[9]छत्रचामरसंयुक्तं सर्वातोद्यसमन्वितम् ।
धामप्रदक्षिणं कृत्वा द्वारपूजां समाचरेत् ॥२८०॥
बिम्बाग्रे स्थापयेद्विद्वान् त्रिपाद्युपरि [10]विन्यसेत् ।

[मन्त्रन्यासः]

देवीं संपूज्य गन्धाद्यैः मन्त्रन्यासं समाचरेत् ॥२८१॥
[11]शशिनीं मूर्ध्नि विन्यस्य [12]वक्त्रस्थानेऽङ्गदां न्यसेत् ।

---

[1] गर्तं संपूजयेद्द्रत्नान् ] ई, ऋ ; गर्तं संपूजयेत् दृत्तात् – अ ; ग . . . . म् संपूज्ययेत् रत्नान् – ऊ .
[2] स्थापयेत्तां महादेवीं ] अ , ऋ ; °येत्तन्महादेवीं – ई ; स्थापयेत्तु° – ऊ .
[3] मूलमूर्तेस्तु ] सं० पाठः ; मुहूर्ते तस्य - अ, ई, ऋ, झ ; मूलमूर्ते तस्य – ऊ .
[4] शक्तिसूत्रं ] ई , ऊ ; शक्तिसूक्तं – अ , ऋ .
[5] स्नापयेद्गन्धतैलेन ] अ ; स्थापयेत् गन्ध° – ई , ऊ , ऋ .
[6] सुगन्धामलकादिभिः ] अ , ई ; सुकुन्दामल° – ऊ ; °म.....भिः – ऋ .
[7] नालिकेरोदकैर्जलैः ] ई , ऊ, ऋ ; नारिके° - अ .
[8] संग्रहेद्द्ब्रह्मवर्धनीम् ] ई ; संग्रहेत्० – अ , ऊ ; °हेद्ब्र......र्धनीम् - ऋ .
[9] छत्रचामरसंयुक्तं ] अ , ई , ऋ ; चत्रचामर० – ऊ .
[10] विन्यसेत् ] अ ; वर्धनीम् – ई , ऊ ; . . . . - ऋ .
[11] शशिनीं ] ई , ऊ , ऋ ; शशिनं – अ .
[12] वक्त्रस्थानेऽङ्गदां न्यसेत् ] सं० पाठः ; वक्त्रस्थाने अङ्गदां° – अ , ई , ऋ ; वक्त्रस्थानेंगताल्न्यसेत् – ऊ .

[1]इष्टदां हृदये न्यस्य [2]मरीचीं गुह्यदेशके ॥२८२॥
[3]पादांशे [4]मालिनीं न्यस्त्वा गौरीबीजेन संयुतम् ।
[5]षडङ्गं विन्यसेद्विद्वान् [6]मातृकान्यासमाचरेत् ॥२८३॥
[7]गौरीकला न्यसेत्पश्चात् शक्तिन्यासं तथा चरेत् ।
वर्णं [8]पदं च भुवनं [9]तत्त्वं तत्त्वेशिसंयुतम् ॥२८४॥
कलामन्त्रं [10]सबीजेन ललाटे विन्यसेद्गुरुः ।

[जीवन्यासादि]

[11]जीवन्यासं ततः कृत्वा हृदये [12]सोऽपि देशिकः ॥२८५॥
वर्धन्या बीजमादाय [13]देवीहृन्मध्यमे न्यसेत् ।
तज्जलेनैव संस्नाप्य [14]तापसापं निवेदयेत् ॥२८६॥
स्नापयेत्सर्वकलशैर्वेदकुम्भपुरस्सरम् ।
ततः [15]शुद्धोदकैः स्नाप्य [16]स्थलशुद्धिं समाचरेत् ॥२८७॥
मन्त्रोदकेन संस्नाप्य मन्त्रान्नं दापयेद्गुरुः ।
ततो देवीमलङ्कृत्य [17]वस्त्रपुष्पस्त्रगादिभिः ॥२८८॥
नैवेद्यं दापयेद्विद्वान् [18]षड्रसैश्च समन्वितम् ।

---

[1] इष्टदां ] अ , ई , ऊ ; इष्टदि – ऋ .
[2] मरीचीं गुह्यदेशके ] ई , ऋ ; मरीचं गुह्यदेशके – अ ; मरीचिं गुह्यदेशिके – ऊ .
[3] पादांशे ] ऊ ; पादांशं – अ, ई , ऋ .
[4] मालिनीं ] ई , ऊ , ऋ ; मालिनिं – अ .
[5] षडङ्गं विन्यसेद्विद्वान् ] अ ; षडङ्गनाचरे° – ई ; . . . . गानाश्चरेद्वि° – ऊ ; षडङ्ग . . . . द्वान् – ऋ .
[6] मातृकान्यासमाचरेत् ] अ , ऊ , ऋ ; मातृकान्यां समा° – ई .
[7] गौरीकला ] ऊ , ऋ ; गौरीकलां – अ, ई .
[8] पदं च ] अ , ई , ऋ ; पादं च – ऊ .
[9] तत्त्वं तत्त्वेशिसंयुतम् ] ई ; तत्वतत्वेशिसंयुतम् – अ , ऊ , ऋ .
[10] सबीजेन ] अ , ई , ऋ ; न्यसीद्येन – ऊ .
[11] जीवन्यासं ततः कृत्वा ] अ , ई , ऊ ; जीव . . . . हुत्वा – ऋ .
[12] सोऽपि देशिकः ] अ ; सोपदेशिकः – ई , ऊ , ऋ .
[13] देवीहृन्मध्यमे ] ई , ऊ ; देवीसृन्मध्यमे – अ ; देवीं हृन्मध्यमे – ऋ .
[14] तापसापं निवेदयेत् ] ई , ऊ, ऋ ; तापसावन्निवेदयेत् – अ.
[15] शुद्धोदकैः ] अ , ई , ऊ ; शुद्धोद . . . . स्थल° – ऋ .
[16] स्थलशुद्धिं ] अ , ई , ऋ ; स्थूलशुद्धिं – ऊ .
[17] वस्त्रपुष्पस्त्रगादिभिः ] अ , ई , ऋ ; पत्रपुष्प° – ऊ .
[18] षड्रसैश्च ]अ , ऋ ; षड्रसेन – ई ; षड्रशैश्च – ऊ .

[नित्याग्नौ गौरीपूजा]

[1]पानीयाचमनं दत्वा नित्याग्निं संप्रकल्पयेत् ॥२८९॥
कुण्डे वा स्थण्डिले वापि [2]चुल्लिमध्येऽथवा बुधः ।
तूष्णीं हुताशनं [3]स्थाप्य दीपयेदिन्धनैस्सह ॥२९०॥
प्रणवेनैव संप्रोक्ष्य गौरीमावाह्य पूजयेत् ।
[4]निरीक्षणादिभिः शोध्य [5]घृतान्नं देशिकोत्तमः ॥२९१॥
पुष्पाग्रैर्वाथ [6]पत्रैर्वा जुहुयाद्देविमन्त्रतः ।
प्रत्येकं षोडशं हुत्वा [7]चरुणा [8]च घृतेन च ॥२९२॥
पूर्णाहुतिं ततो हुत्वा [9]गौरीगायत्रिया बुधः ।
[10]तेनैवाभ्यर्च्य देवेशीम् आवाह्याग्निं [11]विसर्जयेत् ॥२९३॥
[12]मूले संपूजयेद्देवीं प्रणम्यानुज्ञया सह ।

[बलिदानक्रमः]

[13]द्वारादिवाहनान्तं वा [14]पीठान्तं वा बलिं ददेत् ॥२९४॥
[15]द्वारदक्षिणपार्श्वे तु ज्ञानशक्तिं प्रपूजयेत् ।
वामपार्श्वे क्रियाशक्तिं तदग्रे वृषभं यजेत् ॥२९५॥
श्रीदेवीमग्निदिग्भागे दक्षिणे [16]सप्तमातरः ।

---

[1] पानीयाचमनं दत्वा नित्याग्निं ] ई , ऊ ; पानीयाचमनित्याग्निं – अ ; पानीया . . . . त्याग्निं – ऋ .
[2] चुल्लिमध्येऽथवा बुधः ] अ , ऋ ; चुल्लिमध्येऽपि वा पुनः – ई ; चुल्लीमध्येऽ° – ऊ .
[3] स्थाप्य दीपयेदिन्धनैस्सह ] अ , ई ; °येद्दिन्यनैस्सह – ऊ ; स्थाप्य . . . . पयेदिन्ध° – ऋ .
[4] निरीक्षणादिभिः ] अ , ई , ऊ ; °दिभि – ऋ .
[5] घृतान्नं देशिकोत्तमः ] ई , ऊ ; . . . . देशिकोत्तमः – अ, ऋ .
[6] पत्रैर्वा ] अ , ई , ऋ ; पात्रैर्वा – ऊ .
[7] 'अ' मातृकायां श्लो० २९२ चतुर्थपादादि-२९३ प्रथमपादान्तो भागो नास्ति।
[8] च घृतेन ] ई , ऋ , झ ; चाघृतेन – ऊ .
[9] गौरीगायत्रिया बुधः ] ई, ऊ , ऋ ; गौरीगायत्रि(मन्त्रतः)तो बुधः – अ.
[10] तेनैवाभ्यर्च्य देवेशीम् ] अ , ई , ऊ ; ते . . . . र्च्य० – ऋ .
[11] विसर्जयेत् ] अ , ई , ऋ ; विवर्जयेत् – ऊ .
[12] मूले संपूजयेद्देवीं ] अ , ऊ , ऋ ; मूलेन पूजयेद्देवीम् – ई .
[13] द्वारादिवाहनान्तं वा ] अ , ई , ऋ ; ०वाहनन्ते वा – ऊ .
[14] पीठान्तं वा ] अ , ई , ऋ ; पीठान्ते वा – ऊ .
[15] द्वारदक्षिणपार्श्वे ] ई , ऊ ,ऋ ; द्वारं दक्षिणपार्श्वे – अ .
[16] सप्तमातरः ] ई ; सप्तमातृकाः - अ ; सप्तमातरम् – ऊ , ऋ .

[१]मातङ्गिनीसमोपेतं [२]नैर्ऋते जाह्नवीं स्वयम् ॥२९६॥
पश्चिमे तु [३]धरादेवीं वायव्ये [४]मोहिनीं यजेत् ।
उत्तरे तु [५]शचीदेवीं सावित्रीमीशगोचरे ॥२९७॥
गोपुरद्वारपार्श्वे तु [६]शङ्खपद्मनिधी यजेत् ।
अणिमा पूर्वदिग्भागे महिमा चाग्निगोचरे ॥२९८॥
दक्षिणे गरिमा देवी लघिमा [७]नैर्ऋते दिशि ।
पश्चिमे [८]त्वीशिकादेवी [९]वशित्वं वायुगोचरे ॥२९९॥
[१०]सोमे प्राप्तिमहादेवी [११]प्राकाम्या त्वीशगोचरे ।
[१२]नैर्ऋतेऽरुन्धतीं यष्ट्वा [१३]लघिमादेविदक्षिणे ॥३००॥
[१४]ईशे प्राकाम्यवामेऽपि संयजेदमृतेश्वरीम् ।
[१५]सोमशंकरयोर्मध्ये [१६]सुन्दरीमर्चयेद्गुरुः ॥३०१॥
महापीठाग्रके मन्त्री कमलास्त्रं समर्चयेत् ।
[१७]अन्धिनी [१८]जृम्भिनी रौद्री [१९]शान्तिनीन्द्रविकारिणी ॥३०२॥

---

[१] मातङ्गिनीसमोपेतं ] अ , ऋ ; मातनी° – ई ; मातंगनी° – ऊ .
[२] नैर्ऋते जाह्नवीं स्वयम् ] अ , ऋ ; °जाह्नवी° - ई ; नैऋते जांनवी° – ऊ .
[३] धरादेवीं ] अ , ई , ऋ ; धरांदेवीं – ऋ .
[४] मोहिनीं ] अ , ई; मोहनं – ऊ; . . . .हिनीम् – ऋ .
[५] शचीदेवीं ] अ , ई , ऋ ; शशी° – ऊ .
[६] शङ्खपद्मनिधी ] ई , ऋ; शङ्खपद्मनिधिं - अ , ऊ .
[७] नैर्ऋते ] अ , ई , ऋ ; नैऋते – ऊ .
[८] त्वीशिकादेवी ] अ ; त्वीशका – ई ; मशीत्वी – , ऊ , ऋ .
[९] वशित्वं ] अ, ई ; वशीत्वी – ऊ ; नशीत्वी - ऋ .
[१०] सोमे ] अ , ई , ऋ ; सोम – ऊ .
[११] प्राकाम्या त्वीशगोचरे ] अ ; ०दीश – ई ; प्राकाम्यमीश° – ऊ ; ०मीश० ऋ .
[१२] नैर्ऋतेऽरुन्धतीं ] ई ; नैर्ऋते रुन्धनीं – अ , ऋ ; नैऋते . . . . न्धनीं – ऊ .
[१३] लघिमादेवि० ] अ , ई, ऋ ; लखिमादेवि० – ऊ .
[१४] ईशे प्राकाम्यवामेऽपि ] सं० पाठः; ईशे प्राकाम्यमेवापि - ई , ऊ , ऋ ; ईशा प्राकाम्यमेवापि - अ .
[१५] सोमशंकरयोर्मध्ये ] अ , ई , ऊ ; सोमशांकर° – ऋ .
[१६] सुन्दरीमर्चयेद्गुरुः ] अ , ई , ऋ ; °गुरु – ऊ .
[१७] अन्धिनी ] अ, ऊ, ऋ ; अण्डिनी – ई .
[१८] जृम्भिनी रौद्री ] ऋ ; जृम्भिनी रात्री – अ ; कुन्भिनी रौद्री – ई ; जंभिनी रौद्री – ऊ .
[१९] शान्तिनीन्द्रविकारिणी ] ई ; शान्तिनी प्रविकारिणी – अ, ऋ ; शान्तित्रियविकारिणी – ऊ .

[1]स्तम्भिनी [2]च षडेताश्च शक्तयो [3]जीवनायिकाः ।
[4]स्तम्भिनी [5]कर्णिकामध्येऽन्धिनी पूर्वदिग्दले ॥३०३॥
[6]जृम्भिनी दक्षिणे भागे [7]रौद्री वारुणदिग्दले ।
[8]सोमेन्द्रियविकारी च [9]शान्तीशानबलिं ददेत् ॥३०४॥
[10]द्वारादिबलिपीठान्तं बलिबेरसमन्वितम् ।
सर्वातोद्यसमायुक्तं बलिं [11]दत्वा यथाक्रमम् ॥३०५॥

[कामकोष्ठे पूजा]

पादप्रक्षालनं कृत्वाऽऽलयं प्रविशेद्गुरुः ।
गीतवाद्यसमोपेतं जयशब्दसमन्वितम् ॥३०६॥
[12]धामप्रदक्षिणं पश्चाद् देवीं [13]विन्यस्य मण्डपे ।
[14]नीराजनं ततः कृत्वा केवलं [15]लोकशान्तये ॥३०७॥
ततो [16]गौरीं समभ्यर्च्य धूपदीपादिकं ददेत् ।
[17]तोषयेद्देवदेवेशीं प्रणिपत्य [18]क्षमापयेत् ॥३०८॥
[19]निर्माल्यधारिणीं यष्ट्वा रात्रौ पूजावसानके ।

---

[1] स्तम्भिनी ] अ , ऋ ; स्तंभिनीं – ई ; स्तंभिनं – ऊ .
[2] च षडेताश्च ] अ ; च षडेतान – ई ; षण्डेतानि – ऊ ; षडेतानि – ऋ .
[3] जीवनायिकाः ] ऋ; जीवनाधिकाः –अ; जीविनायकाम्–ई ; जीवनाधिका–ऊ ; जिह्वनायकाः–च ; जीवनाडिकाः–झ .
[4] स्तम्भिनी ] ई , ऊ , ऋ ; स्तम्विनी – अ .
[5] कर्णिकामध्येऽन्धिनी ] अ , ऊ , ऋ ; °अण्डिनी – ई .
[6] जृम्विनी ] अ ; जृम्भिनी – ई , ऊ , ऋ ; जम्भिनी – च .
[7] रौद्री ] ई , ऊ , ऋ ; रौद्रि – अ ; रौद्रीं – च .
[8] सोमेन्द्रियविकारी ] ई , ऊ , ऋ ; सोमे त्रयविकारी - अ ; ईसेतु द्रावकारीं – च .
[9] शान्तीशानबलिं ] ऊ , ऋ ; शान्तिनिशान बलिं – अ ; शान्ति शास्ता बलिं – ई ; स्तम्भिव्यान्तर बलिं – च .
[10] द्वारादिबलिपीठान्तं ] अ , ई , ऋ ; °बलपीठा° – ऊ .
[11] दत्वा यथाक्रमम् ] अ , ई , ऊ , ऋ ; दद्याद्यथा° – च .
[12] धामप्रदक्षिणं पश्चाद् ] अ , ई , ऊ , ऋ ; देवीं प्रदक्षिणवशात् – च .
[13] विन्यस्य मण्डपे ] अ , ई , ऋ ; विन्य पश्चिमे – ऊ .
[14] नीराजनं ] ऋ , च ; नीराञ्जनं – अ , ई , ऊ .
[15] लोकशान्तये ] अ , ऊ , ऋ ; लोह शा° – ई .
[16] गौरीं ] अ , ई , ऋ ; देवीं – ऊ .
[17] तोषयेद्देवदेवेशीं ] अ , ई , ऋ ; दोषयेद्देवदेवीशं – ऊ .
[18] क्षमापयेत् ] अ , ई , ऊ , ऋ ; समापयेत् – च .
[19] निर्माल्यधारिणीं ] ई , ऋ ; निर्माल्यधारिणं – अ, च , झ; निर्माल्यं धारिणीं – ऊ .

एवं [१]प्रत्यहमभ्यर्च्य [२]यथावित्तानुसारतः ॥ ३०९ ॥
एवं यः कुरुते मर्त्यः स [३]पुण्यां गतिमाप्नुयात् ॥ ३०९ १/२ ॥

[४]॥ इति सूक्ष्मशास्त्रे कामकोष्ठविधिः चतुःपञ्चाशत्तमः पटलः ॥

---

[१] प्रत्यहमभ्यर्च्य ] च, झ ; प्रति समभ्यर्च्य – अ, ई, ऊ, ऋ ;.

[२] यथावित्तानुसारतः ] अ , ई , ऊ ; या . . . . त्तानु० – ऋ .

[३] पुण्यां ] अ , ई , ऋ ; पुण्यं – ऊ .

[४] इति सूक्ष्मशास्त्रे कामकोष्ठविधिः चतुःपञ्चाशत्तमः पटलः] सं० पाठः; इति सूक्ष्मशास्त्रे कामकोष्ठविधिः त्रिपञ्चाशत् पटलः ॥ अ; इति सूक्ष्मशास्त्रे कामकोष्ठविधिः अष्टचत्वारिशत् पटलः ॥ ई ; इति सूक्ष्मागमे कामकोष्ठविधिपटलो चतुःपंचाशत्॥ ऊ ; इति सूक्ष्मशास्त्रे कामकोष्ठविधिः त्रिपंचाशःपटलः ॥ ऋः ; इति सूक्ष्मशास्त्रे क्रियापादे कामकोष्ठविधिपटलः ॥ च ; इति सूक्ष्मशास्त्रे कामकोष्ठविधिं नाम पंचषष्ठिपटलः ॥ झ .

## [पञ्चपञ्चाशत्तमः पटलः[1]]

### [कल्याणविधिः]

वक्ष्ये [2]कल्याणकं कर्म श्रृणु त्वं तत्प्रभञ्जन।

[कल्याणकालः]

प्रतिष्ठादिनमारभ्य चतुर्थे पञ्चमेऽपि वा॥ १॥
[3]सप्तमे नवमे [4]वापि दशमे तद्दिनेऽपि वा।
शुभवारादिभिर्युक्ते कल्याणं कारयेद् [5]बुधः॥ २॥

[पूर्वकर्मक्रमः]

[6]तद्दिनस्य तु पूर्वे तु अङ्कुराण्यर्पयेद्बुधः।
[7]तद्दिनस्य तु पूर्वाह्णे जलक्रीडां समाचरेत्॥ ३॥
[8]ततो मध्याह्नसमये [9]पूर्वकर्म समाचरेत्।
एवं कृत्वा [10]दिवाकाले [11]रात्रौ [12]कल्याणमाचरेत्॥ ४॥
[13]सायाह्नस्यापरार्धे तु तद्दिने देशिकोत्तमः।
पूर्वोक्तविधिमार्गेण कौतुकं बन्धयेद्बुधः॥ ५॥

[भस्मपूरणादिक्रियाः]

[14]नवकुम्भं समादाय क्षालयेदस्त्रमन्त्रतः।

---

[1] अयं पटलः अ (टि.१९१, पृ० ३०२-३०८), ई (टि.३६, पृ० २१६-२२२), उ (टि.०३७, पृ० २३-३०), ऊ (टि.३८, पृ० ६८४-६९७), ऋ (टि.९७, पृ० २४९-२५४), च (टि.९५५, पृ० ५७-६२), झ (टि.१०१६, पृ० ५१-५८) इत्येतेषु कोशेषु दृश्यते।
[2] कल्याणकं कर्म ] सं० पाठः; कल्याणकर्मं च – अ, ई, ऊ, ऋ, च, झ; कल्याणकर्मं तु – उ.
[3] 'अ, ऋ, च' मातृकासु श्लो० '२ पू०' न दृश्यते।
[4] वापि दशमे तद्दिनेऽपि वा ] ई, उ, ऊ; चैव प्रति संवत्सरं तु वा – झ.
[5] बुधः ] अ, ई, उ, ऊ, ऋ, च; ततः – झ.
[6] 'ऊ' मातृकायां श्लो० '३ पू०' न दृश्यते।
[7] तद्दिनस्य तु ] अ, ई, उ, ऊ, ऋ, च; ततो देव्यास्तु – झ.
[8] 'च' मातृकायां श्लो० '४ पू०' न दृश्यते। 'ऋ' मातृकायां श्लो० ४ प्रथमपादो न दृश्यते।
[9] पूर्व० ] झ; पूर० – अ, ई, उ, ऊ, ऋ.
[10] दिवाकाले ] अ, ई, उ, ऊ, ऋ, झ; तु देवेशि – च.
[11] 'च' मातृकायां श्लो० ४ चतुर्थपादः श्लो० ५ प्रथमपादश्च न दृश्येते।
[12] कल्याणमाचरेत् ] अ, ई, ऊ, ऋ, झ; कल्याणमारभेत् – उ.
[13] सायाह्नस्यापरार्धे तु ]अ, ई, ऋ; सायाह्नस्यापराह्ने तु – उ; सायाह्नस्य परार्धे तु – ऊ, झ.
[14] नवकुम्भं ] ई, च; नवकुम्भान् – अ, उ, ऊ, ऋ, झ.

तन्तुनावेष्ट्य [1]संधूप्य भस्मना [2]पूरयेद्गुदा ॥ ६ ॥
वस्त्रेणाच्छाद्य [3]तद्वस्त्रं [4]विश्वेत्तातेति बन्धयेत्।
[5]लाक्षयाष्टमृदा वापि [6]विन्यसेद्ग्रन्थिमध्यमे ॥ ७ ॥
जप्त्वा [7]वृषभगायत्रीं [8]दापयेद्वृषलाञ्छनम्।
पूजयेद्गन्धपुष्पाद्यैः [9]तन्मूलेनैव देशिकः ॥ ८ ॥
ताम्बूलं [10]नालिकेरं च क्रमुकस्य [11]फलं क्रमात्।
[12]कदलीफलकल्हारं दाम [13]कुङ्कुमचन्दनम् ॥ ९ ॥
कर्पूरं हिमतोयं च [14]चित्रवस्त्रं च भूषणम्।
क्षौमं [15]शार्दूलकं चर्म [16]चामरं छत्रदर्पणम् ॥ १० ॥
[17]कन्दुकं कृष्णगन्धं च केशशोधनमञ्जनम्।
पृथक् पात्रे तु [18]विन्यस्य यजमानेच्छया [19]गृहेत् ॥ ११ ॥

---

[1] संधूप्य ] ई, ऊ, ऋ, च, झ; (स)वन्धूप्य – अ; संपूर्य – उ.

[2] पूरयेद्गुदा ] अ, ई, ऊ, ऋ, च, झ; पूजयेद्गुदा – उ.

[3] तद्वस्त्रं ] अ, उ, ऊ, च; तद्वक्रं – ई, झ; तत्सर्वं – ऋ.

[4] विश्वेत्तातेति ] अ, उ, ऋ, झ; विश्वेक्तातेति–ई; विश्वोक्तान्तेमि – ऊ; विश्वेत्तं तेनु – च [ ऋग्वेद ८.१००.६ ; १०.४९.११ ].

[5] लाक्षयाष्टमृदा वापि ] सं० पाठः; लाक्षया चाष्टमृद्वापि – अ; लाक्षा चाष्टौ च मृद्वापि – ई; लाक्षां तु वाष्टमृद्वापि – उ; लाक्षाद्यं चाष्टमृद्वापि – ऊ; लाक्षयानाष्टमृद्वापि – ऋ; लाक्षा चाष्टमृदा वापि – च; लाक्षधा च मृदा वापि – झ.

[6] 'ऋ' मातृकायां श्लो० ७ चतुर्थपादमारभ्य ८ चतुर्थपादान्तो भागो न दृश्यते।

[7] वृषभगायत्रीं ] अ, ई, उ, ऊ; वृषभगायत्र्या – च; वृषभगायत्रि – झ.

[8] दापयेद्वृष० ] अ, ई, झ; धारयेद्वृष० – उ; दापयेद्वृष० – ऊ; भावयेद्वृष० – च.

[9] तन्मूलेनैव ] अ, ई, ऊ, च, झ; तज्जलेनैव – उ.

[10] नालिकेरं ] ई, उ, ऊ, ऋ, झ; नारिकेलं – अ, च.

[11] फलं क्रमात् ] अ, ई, ऊ, ऋ, झ; फलं क्षपा – उ; फलेक्ष्मवाः – च.

[12] कदलीफलकल्हारं दाम] झ; कदलीफलं च कल्हारं दाम – अ, ई, उ, ऊ, ऋ; कदलीफलकल्हारदामं – च.

[13] कुङ्कुमचन्दनम् ] अ; चन्दनकुङ्कुमम् – ई, उ, च; कुङ्कुमं चन्दनम् – ऊ; चन्दनकुङ्कुमे – झ. 'ऋ' मातृकायां लुप्तम्।

[14] चित्र० ] अ, ई, उ, ऊ, च, झ; वित्त० – ऋ.

[15] शार्दूलकं चर्म ] सं० पाठः; शार्दूलचर्मं च – अ, ई, उ, ऊ, ऋ, च, झ.

[16] चामरं ] ई, उ, ऊ, च, झ; चारम० - ऋ. 'अ' मातृकायां श्लो० १० चतुर्थपादः श्लो० ११ प्रथमपादश्च न दृश्येते।

[17] कन्दुकं कृष्णगन्धं ] सं० पाठः; कन्दुकं कृष्णपुष्पं - ई, ऊ, ऋ; कन्तुकं कृष्णपक्षं - उ; कन्तुकं कृष्णगन्धं - च; कौतुकं कृष्णपुष्पं - झ.

[18] विन्यस्य ] अ, ई, उ, ऊ, ऋ, झ; संगृह्य पृथक् – च.

[19] गृहेत् – अ, ई, झ; गृहे – उ; ग्रहेत् – ऊ, ऋ, च.

[1]अस्त्रेणैव तु संप्रोक्ष्य प्रणवेनाभिमन्त्रयेत्।
परिचारकमाहूय सोष्णीषं [2]सोत्तरीयकम्॥ १२॥
[3]सर्वद्रव्यसमायुक्तं ब्रह्मघोषसमन्वितम्।
[4]सर्वभक्तजनैः सार्धं यजमानसमन्वितम्॥ १३॥
गीतवाद्यसमोपेतं सर्वालङ्कारसंयुतम्।
भस्मकुम्भं समादाय प्रणवेन [5]समर्चयेत्॥ १४॥
[6]शिवेन चास्त्रमन्त्रेण [7]त्यजेत्तद्वृषलाञ्छनम्।
भस्म [8]संगृह्य तारेण ललाटे [9]देविहृद्गले॥ १५॥
[10]संतर्प्य [11]गौरीबीजेन [12]सर्वद्रव्यं करे ददेत्।

[गौर्यै कल्याणज्ञापनम्]

प्रणम्य परया भक्त्या [13]स्थित्वा देव्यग्रके बुधः॥ १६॥
सर्वश्रृङ्गारवेषाढ्यां [14]सुविकीर्णालकान्विताम्।
[15]धूम्रवर्णां महाभोगां [16]चित्रिणीं पूजयेत्ततः॥ १७॥
अम्बिके [17]गौरि कल्याणि [18]कारुण्याकरचन्द्रिके।

---

[1] 'ऋ' मातृकायां श्लो० १२ प्रथमपादमारभ्य श्लो० १३ प्रथमपादान्तो भागो न दृश्यते।

[2] सोत्तरीयकम् ] ई, उ, च, झ; चोत्तरीयकम् – अ, ऊ.

[3] सर्वद्रव्यसमायुक्तं ] अ, ई, ऊ, झ; सर्वद्रव्यं समादाय – उ, च.

[4] 'झ' मातृकायां '१३ उ०' न दृश्यते।

[5] समर्चयेत् ] अ, ई, उ, ऊ, ऋ, झ; समन्वितम् – च.

[6] शिवेन चास्त्रमन्त्रेण ] सं० पाठः ; शिवशास्त्रेति - अ, ई, उ, ऋ; शिव(सा)स्त्रादि० – ऊ; शिवशास्त्रेण – च; शिवो जयति - झ.

[7] त्यजेत्तद्वृष० ] अ, ई, ऋ, च, झ; त्यजेद्वृषभ० – उ; त्येजत्तत् वृषभ० – ऊ.

[8] संगृह्य ] अ, ई, ऋ, च, झ; संग्राह्य – उ, ऊ.

[9] देविहृद्गले ] उ, ऊ, झ; देवीहृद्गले – अ, ई; देविसृग्गले – ऋ; देहहृद्गणैः – च.

[10] संतर्प्य ] ई, उ, ऋ, च, झ; सन्तप्य – अ, ऊ.

[11] गौरी० ] ई, उ, ऋ, च; गौरि० - अ, ऊ, झ.

[12] 'ऋ' मातृकायां श्लो० १६ द्वितीयपादमारभ्य श्लो० १७ चतुर्थपादान्तो भागो न दृश्यते।

[13] स्थित्वा ] अ, ई, उ, ऊ, झ; स्तुत्वा – च.

[14] सुविकीर्णालकान्विताम् ] अ, ई, च; सुवकीर्णालकान्वितम् – ऊ; सुवकिर्णालकान्वितम् – झ. 'उ' मातृकायां श्लो० १७ द्वितीयतृतीयपादौ न दृश्येते।

[15] धूम्रवर्णां ] सं० पाठः; धूमवर्ण० – अ; धूम्रवर्ण० - ई, ऊ, झ; धूम्रवर्णं - च .

[16] चित्रिणीं ] अ, ई, ऊ; यक्षिणीं – उ; चित्रिणां – च; चित्रिणं – झ.

[17] गौरि कल्याणि ] अ, ई, उ, झ; देवि कल्याणि – ऊ; गौरी कल्याणी – च.

[18] कारुण्याकर० ] ई, च, झ ; कारुण्याकार० – अ ; कारुण्यकर० - ऊ; करुणाकर० – उ.

[१]जगदार्तिविनाशाय [२]शम्भुपत्नी [३]भविष्यसि ॥ १८ ॥
[४]इत्युक्त्वा तु महादेवीं प्रणिपत्य [५]गुरूत्तमः ।

[प्रपाकल्पनम्]

[६]धाम्न ईशानदिग्भागे प्रपां [७]कृत्वाऽतिसुन्दराम् ॥ १९ ॥
गोमयालेपनं कृत्वा पिष्टचूर्णैर्विचित्रयेत् ।
तन्मध्ये [८]सितरक्तेन स्वस्तिकं कारयेद्बुधः ॥ २० ॥
पुण्याहं वाचयेत्तत्र [९]दध्यन्नं कदलीफलम् ।
रक्तपुष्पसमोपेतं बलिं दद्याद् [१०]विशेषतः ॥ २१ ॥

[शिवपूजा]

ततो [११]देवगृहं गत्वा पूजयेत् [१२]परमेश्वरम् ।
[१३]कुम्भे [१४]संगृह्य देवेशं शिवहस्तसमन्वितम् ॥ २२ ॥
[१५]चित्रवस्त्रैरलङ्कृत्य पुष्पाभरणभूषितम् ।
गजे [१६]वा गब्लिके वापि शिबिके [१७]वाधिरोपयेत् ॥ २३ ॥
[१८]स्नपनं कारयेद्विद्वान् [१९]चक्रवर्त्युपचारतः ।

---

१ जगदार्ति० ] ई, उ; भजदार्ति० – अ, ऋ; भजादार्तिं – ऊ; जगदाम्नि० – च; जगतार्ति० – झ.
२ शम्भुपत्नी ] अ, ई, उ, ऊ, ऋ; शुभपत्नि – च; शम्भुपत्नि – झ.
३ भविष्यसि ] अ, ई, उ; भविष्यति – ऋ, च, झ; भविष्यशि – ऊ.
४ इत्युक्त्वा तु ] अ, ई, ऊ, ऋ; इत्युक्त्वा तां – उ; इत्युक्त्वा उतां – च; विज्ञाप्यध – झ.
५ गुरूत्तमः ] अ, ई, ऊ, ऋ, च, झ; वेशेषतः – उ.
६ धाम्न ईशान० ] सं० पाठः; धामस्येशान० - अ, ई, ऋ; धामास्येशान० - ऊ; धामस्यैशान० - उ, च, झ.
७ कृत्वाऽतिसुन्दराम् ] अ, ई; कृत्वादिसुन्दरम् – च; कृत्वातिसुन्दरम् – उ, ऊ, ऋ; कृत्वा त्रिसुन्दरम् – झ.
८ सितरक्तेन ] अ, ई, ऋ; सितुल्तेन – ऊ; सितरत्नेन – उ, च, झ.
९ दध्यन्नं ] अ, ई, ऊ, ऋ, च; दत्वान्नं – उ. 'झ' मातृकायां लुप्तम्।
१० विशेषतः ] अ, ई, ऊ, ऋ, झ; विचक्षणः – उ, च.
११ देव० ] उ, च; देवी० – अ, ई, ऋ; देवीं – ऊ; देवि० – झ.
१२ परमेश्वरम् ] अ, ई, उ, ऊ, ऋ, च; परमेश्वरीम् – झ.
१३ कुम्भे ] उ, च; कुम्भं – अ, ई, ऊ, ऋ, झ.
१४ संगृह्य ] अ, ई, उ, ऋ, च, झ; संग्राह्य – ऊ.
१५ चित्रवस्त्रै० ] अ, ई, ऊ, ऋ, च, झ; चित्रवर्णै० – उ.
१६ वा गब्लिके ] ई, उ, ऋ, झ; वा गबूलिके – अ; वाथ रथे – ऊ; वा गल्लिके – च.
१७ वाधिरोपयेत् ] ऋ, च; वा शिरो वहेत् – अ, ई; वापि रोपयेत् – उ; वे शिरो वहेत् – ऊ; वाथापि वा – झ.
१८ स्नपनं ] अ, ई, ऊ, ऋ, झ; भवनं – उ; पवनिं – च.
१९ चक्रवर्त्युपचारतः ] ई, उ; चक्रवत्युपचारतः – अ, ऊ, झ; चक्रवर्त्युपचारकैः – च. 'ऋ' मातृकायां लुप्तम्।

[1]ततो देवीगृहं गत्वा [2]मण्डपे स्थण्डिलं कुरु॥ २४॥
तत्र सिंहासनं कल्प्य [3]वस्त्रोर्ध्वे स्थापयेद् [4]विभुम्।
[5]तदग्रे स्थण्डिलं कृत्वा [6]निर्दोषैः [7]सिकतैः सितैः॥ २५॥
अग्निकार्योक्तमार्गेण [8]शिवाग्निं संप्रकल्पयेत्।
समिदाज्यान्नलाजैश्च [9]माषशालियवैस्तिलैः॥ २६॥
[10]सर्षपैर्नालिकेरैश्च [11]फलैश्च [12]जुहुयाद्बुधः।
[13]सद्यादिनेत्रपर्यन्तं प्रत्येकं षोडशं हुनेत्॥ २७॥
पूर्णाहुतिं ततो [14]दत्वा सर्वद्रव्यसमन्वितम्।

[मन्त्रवस्त्रम्]

[15]मनुहस्तसमायामं [16]तच्चतुर्थांशविस्तृतम्॥ २८॥
[17]नानाचित्रसमायुक्तं [18]क्षौमं [19]कार्पासकं तु वा।
[20]मन्त्रवस्त्रमिति प्रोक्तं [21]माङ्गल्यं च ततः शृणु॥ २९॥

---

[1] 'ऋ' मातृकायां श्लो० '२४ उ० - २५ पू' भागो न दृश्यते।
[2] मण्डपे ] अ, उ, ऊ, च; मण्डले – ई; मण्डपं – झ.
[3] वस्त्रोर्ध्वे ] अ, ई, उ, च; सस्त्रोर्ध्वे – ऊ; वस्त्रोध्वे – झ.
[4] विभुम् ] अ, ई, ऊ, झ; ततः – उ; गुरुः – च.
[5] तदग्रे ] अ, ई, उ, ऊ, ऋ, झ; तदूर्ध्वे – च.
[6] निर्दोषैः ] अ, ई, उ, ऊ, ऋ, झ; तदूर्ध्वे – च.
[7] सिकतैः सितैः ] ई, उ, ऊ, झ; सिकतैरपि – अ, ऋ; सैकतैः सितैः – च.
[8] शिवाग्निं संप्रकल्पयेत् ] अ, ई, ऋ, च; अग्निकार्यं प्रकल्पयेत् – उ; शिवाग्निं प्रकल्पयेत् – ऊ; शिवाग्निं संप्र...येत् – झ.
[9] माषशालियवैस्तिलैः ] अ, ई, ऊ, ऋ, झ; माषमालियवैस्तिलैः – उ; माषमालियवैस्थताः – च.
[10] सर्षपैर्नालिकेरैश्च ] उ; सर्षपं नालिकेरं च – अ, ई, ऊ, ऋ; सर्षपैर्नालिकेरं च – च; सर्षपं नारिकेलं च – झ.
[11] फलैश्च ] ई, उ, ऊ ; फलैस्तु- अ, ऋ, झ; विलैस्तु – च.
[12] जुहुयाद्बुधः ] अ, ई, उ, ऋ, झ; जुहुयात्ततः – ऊ, च.
[13] सद्यादिनेत्र० ] ई, उ, ऊ, ऋ, च, झ; सद्यादिनेतृ० – अ.
[14] दत्त्वा ] च; हुत्वा - अ, ई, उ, ऊ, ऋ, झ .
[15] मनुहस्तसमायामं ] ई, उ, च; . . . . हस्तसमायामं – अ; मनुहस्तं समादाय – ऊ; मनुहस्तसमाधाम० – झ. 'ऋ' मातृकायां श्लो० २८ तृतीयपादमारभ्य श्लो० २९ तृतीयपादान्तो भागो न दृश्यते।
[16] तच्चतुर्थांशविस्तृतम् ] अ, ई, उ, झ; तच्चतुर्थंशविस्तृतम् – ऊ; तच्चतुर्थं सविस्तृतम् – च.
[17] नानाचित्र० ] अ, उ, ऊ, च, झ; नानाछत्र० – ई.
[18] क्षौमं ] अ, ई, उ, ऊ; चित्रं – च; क्षौम० – झ.
[19] कार्पासकं ] अ, उ; कार्पासतं – ऊ; कार्पासिकं – ई, च, झ.
[20] मन्त्रवस्त्रमिति ] अ, ई, च; मन्त्रं वस्त्रमिति – उ; मन्त्रवस्त्रमिदं – ऊ; वस्त्रमन्त्रमि . . . . – झ.
[21] माङ्गल्यं ] ई, ऊ; मङ्गल्यं – अ, उ, ऋ, च, झ.

[माङ्गल्यकल्पनम्]

[1]गुञ्जषोडशमारभ्य [2]गुञ्जद्वयविवर्धनात्।
[3]यावद्वात्रिंशगुञ्जान्तं [4]गृहेन्माङ्गल्यकाञ्चनम्॥ ३०॥
[5]गणेशाकृतिकं [6]वाथ [7]पद्माकृतिमथापि वा।
[8]शिवलिङ्गाकृतिं वापि [9]माङ्गल्यं परिकल्पयेत्॥ ३१॥
बिन्दुपञ्चकसंयुक्तं पार्श्वे सुषिरसंयुतम्।
[10]हेमसूत्रद्वयोपेतं [11]गौरीकण्ठानुकूलकम्॥ ३२॥
[12]एवं लक्षणसंयुक्तं [13]माङ्गल्यं गन्धसंयुतम्।

[कल्याणक्रियाः]

भूषणं मन्त्रवस्त्रं च स्वङ्गदामसमन्वितम्॥ ३३॥
[14]संगृह्यान्तः प्रविश्याथ गीतवाद्यसमन्वितम्।
शङ्खध्वनिसमोपेतं गत्वा [15]देव्यालयं गुरुः॥ ३४॥
[16]संपूज्य गन्धपुष्पाद्यैर् [17]मन्त्रवस्त्रेण वेष्टयेत्।

---

[1] गुञ्ज० ] सं० पाठः; कुञ्ज० – अ, ऋ, च, झ; कुञ्जं – ई; कुण्ड० – उ; गुञ्च० – ऊ.
[2] गुञ्जद्वयविवर्धनात् ] ऊ; कुञ्जद्वयविवर्धनात् - अ,ई,ऋ; कुण्डद्वयविवर्धनात् -उ; कुञ्जद्विद्विविवर्धनात् -च; कुञ्जद्वयविवर्धनम्-झ.
[3] यावद्वात्रिंशगुञ्जान्तं ] सं० पाठः; यावद्वात्रिंशकं जातं – अ; यवद्वात्रिंशत्कुञ्जान्तं – ई; यावद्वात्रिंशत्कुण्डान्तं – उ; यावद्वात्रिंशकुञ्जान्तं – ऊ; यावद्वात्रिंशकुञ्जान्तं ] ऋ; यावत्रिंशद्विकुञ्जान्तं – च; यावद्वात्रिंशकुञ्जान्ता – झ.
[4] गृहेन्माङ्गल्यकाञ्चनम् ] ई; गृहे मङ्गलकाञ्चनम् – अ; गृहे मङ्गल्यकाञ्चनम् – उ; गृहेन्मङ्गल्यकाञ्चनम् - ऊ; गृहेन्मङ्गल्यकाञ्जनम् – ऋ, च; गृहे मङ्गल्यसूत्रकम् – झ.
[5] गणेशाकृतिकं ] ई, उ, ऊ, ऋ, च; गणेशं कृतिकं – अ, झ.
[6] वाथ ] अ, ई, ऊ, ऋ, झ; वा तु – उ; वापि – च.
[7] पद्माकृतिमथापि ] ई, उ, ऊ, च; पद्माकृतिरथापि – अ, ऋ; पद्माकू . . . . रधापि – झ.
[8] शिवलिङ्गाकृतिं वापि ] ई, च, झ; शिवलिङ्गाकृतिर्वाथ – अ, उ, ऋ; शिवलिङ्गाकृतिर्वापि – ऊ.
[9] माङ्गल्यं ] ई, ऊ; मङ्गल्यं – अ, उ, ऋ, च, झ.
[10] हेमसूत्रद्वयोपेतं ] ई, उ, ऊ, ऋ, च, झ; हेमसूत्रञ्चयोपेतं – अ.
[11] गौरीकण्ठा० ] ई, उ, ऊ; गौरिकर्णा० – अ, च, झ; गौरीकर्णा० – ऋ.
[12] 'ऋ' मातृकायां श्लो० ३३ प्रथमपादमारभ्य श्लो० ३४ प्रथमपादान्तो भागो न दृश्यते।
[13] माङ्गल्यं ] ई, ऊ; मङ्गल्यं – अ, उ, च, झ.
[14] संगृह्यान्तः ] अ, ई, उ; संगृह्यान्त – ऊ, झ; संग्राह्यान्तः – च.
[15] देव्यालयं ] अ, ई, ऊ, ऋ, झ; देवालयं – उ, च.
[16] 'च' मातृकायां श्लो० ३५ पू० न दृश्यते।
[17] मन्त्र० ] उ; वर्म० – अ, ई, ऋ; देवी० – झ.

बद्ध्वा [१]माङ्गल्यसूत्रं च गौरीबीजेन देशिकः ॥ ३५ ॥
आवाह्य [२]करकेऽभ्यर्च्य [३]सर्वालङ्कारसंयुताम्।
[४]कुम्भेशवामे देवेशीं स्थापयेत्तदनन्तरम् ॥ ३६ ॥
[५]गन्धपुष्पादिना यष्ट्वा [६]पार्वतीपरमेश्वरौ।
[७]शिवद्विजकुलोत्पन्नः [८]कृतदीक्षाभिषेककः ॥ ३७ ॥
[९]शिवशास्त्रविचारज्ञः [१०]पुत्रभ्रातृकलत्रवान्।
[११]शुक्लचन्दनलिप्ताङ्गः [१२]शुक्लमाल्यैरलङ्कृतः ॥ ३८ ॥
[१३]पञ्चाङ्गभूषणोपेतः [१४]सोष्णीषः सोत्तरीयकः।
विष्णुमन्त्रं जपेद्भक्त्या संगृहेद्धेमवर्धनीम् ॥ ३९ ॥
शिवाग्रे स्थण्डिलं कृत्वा [१५]सुश्वेतद्रोणतण्डुलैः।
तन्मध्ये नलिनं [१६]लिख्य [१७]त्रिपादीं विन्यसेद्बुधः ॥ ४० ॥
तदूर्ध्वे [१८]स्थलिकां [१९]न्यस्य [२०]गुरुः पूर्वमुदङ्मुखः।

---

[१] माङ्गल्य० ] ई, उ, ऊ; मङ्गल्यं च – अ; मङ्गल्य० – च, ऋ; .... गल्य० – झ.
[२] करके ] अ, उ, ऋ, च, झ; करणे – ई; करेके – ऊ.
[३] सर्वालङ्कारसंयुताम् ] सं० पाठः; सर्वालङ्कारसंयुतम् – अ, ई, उ, ऊ, ऋ, च, झ.
[४] कुम्भेशवामे देवेशीं ] ऋ; कुम्भेशवामदेवेशीं-अ, ई, उ; कुम्भेशीदेवदेवेशीं-ऊ; कुम्भेवशामे देवेशं-च; कुम्भेशपामदेविशि-झ.
[५] गन्धपुष्पादिना यष्ट्वा ] अ, ई, उ, ऊ, ऋ, च; गन्धपुष्पादिनाभ्यर्च्य – झ.
[६] पार्वतीपरमेश्वरौ ] ई; पार्वतीं परमेश्वरम् - अ, ऊ, च; पार्वतीपरमेश्वरम् – उ; पार्वतीं परमेश्वरः – ऋ; .... र्वतिपरमेश्वरौ – झ.
[७] 'ऋ' मातृकायां श्लो० ३७ तृतीयपादमारभ्य ३८ तृतीयपादान्तो भागो न दृश्यते।
[८] कृतदीक्षाभिषेककः ] अ, ई, उ, ऊ; कृतदीक्षाभिषेचकः – च; कृतादीक्षाभिषेकवान् – झ.
[९] शिवशास्त्रविचारज्ञः ] अ, ई, ऊ; शिवशास्त्रविचारज्ञं – उ, झ. 'च' मातृकायां 'श्लो० ३८ पू०' न दृश्यते।
[१०] पुत्रभ्रातृकलत्रवान् ] अ; पुत्रभ्रातृकलत्रकः – ई; पुत्रभ्रातृकलत्रकम् – उ; पुत्रपौत्रकलत्रवान् – ऊ, झ.
[११] शुक्लचन्दनलिप्ताङ्गः ] ई, ऊ; चन्दनेनोपलिप्ताङ्गः – अ; शुक्लचन्दनलिप्ताङ्गम् – उ; शुक्लबन्धनलिप्ताङ्गः – च; शुक्लचन्दनलि . . . . गः – झ.
[१२] शुक्लमाल्यैरलङ्कृतः ] अ, ई, ऊ, ऋ, च, झ; शुक्लमाल्यैरलङ्कृतम् – उ.
[१३] पञ्चाङ्गभूषणोपेतः ] अ, ई, उ, ऊ, ऋ, च; पञ्चाङ्गलक्षणोपेतं – झ.
[१४] सोष्णीषः सोत्तरीयकः ] अ, ई, उ, ऊ, ऋ, च; सोष्णिषं सोत्तरियकम् – झ.
[१५] सुश्वेतद्रोणतण्डुलैः ] ई, झ; सुश्वेतद्रोणतण्डुले–अ; .... श्वेतद्रोणतण्डुलैः–ऊ; सुश्वेतद्रोण ....–ऋ; सुश्वेतैर्द्रोणतण्डुलैः–उ, च.
[१६] लिख्य ] ई, उ, च, झ; गृह्य – अ, ऋ; कृत्वा – ऊ.
[१७] त्रिपादीं विन्यसेद्बुधः ] अ, ई, उ, ऊ, ऋ; त्रिपादिं विन्यसेत्सह – च; त्रिपादीन्विन्यसेद्बुधः – झ.
[१८] स्थलिकां ] अ, ऋ; स्थालिकां – ई, च; स्थण्डिले – उ; स्थण्डिलं – ऊ, झ.
[१९] न्यस्य ] अ, ई, उ, ऊ, ऋ, च; कन्यां – झ.
[२०] गुरुः पूर्वमुदङ्मुखः ] ई, ऊ, ऋ; गुरुः पूर्वमुदर्भ(ङ्)मुखः – अ; स गुरुः पूर्वदङ्मुखः – उ; स गुः पूर्वदङ्मुखः – च; गुरुपूर्वाशाङ्मुखा – झ.

[1]शिवहस्तसमोपेतः [2]स्थित्वा [3]कुम्भेशपृष्ठके॥४१॥
[4]विष्णुमन्त्रं [5]समुच्चार्य [6]श्रीकण्ठं गौरिसंयुतम्।
[7]देवीहस्तं समादाय [8]शिवहस्ते समर्पयेत्॥४२॥
अनादिगोत्रसंभूत[9] लोकनाथ जगत्पते।
[10]आदिगोत्रामुमादेवीं [11]गृहाण लोकशान्तये॥४३॥
इत्युक्त्वा [12]सोदकं दद्यात् शिवहस्ते [13]स मन्त्रवित्।
[14]देव्यास्तु दक्षहस्तं च [15]शिवहस्ते [16]शिवान्तिकम्॥४४॥
तत्तन्मन्त्रेण विन्यस्य धूपं दीपं ददेद्गुरुः।
[17]ततो [18]हुताशनं यष्ट्वा [19]संबन्धाहुतिमाचरेत्॥४५॥
[20]मधुदुग्धाज्यकदली[21]सितखण्डसमन्वितम्।

---

[1] शिवहस्तसमोपेतः ] अ, ऊ; शिवहस्तसमोपेतम् – ई, उ, च, झ; शिवहस्त . . . . – ऋ. 'ऊ' मातृकायां श्लो० '४१ उ० '४२ पूर्वोत्तरार्धयोर्मध्ये दृश्यते।

[2] 'ऋ' मातृकायां श्लो० ४१ चतुर्थपादमारभ्य ४२ तृतीयपादान्तो – भागो न दृश्यते।

[3] कुम्भेशपृष्ठके ] अ, ई, ऊ, झ; कुम्भे प्रतिष्ठके – उ, च.

[4] विष्णुमन्त्रं ] अ, ई, उ, ऊ, झ; विष्णुं मन्त्री – च.

[5] समुच्चार्य ] अ, ऊ; समर्च्याथ – ई; समभ्यर्च्य – उ, च, झ.

[6] श्रीकण्ठं ] ई, उ, ऊ, च; श्रीकर्णं – अ; श्रिकर्णं – झ.

[7] देवी० ] अ, ऊ, च; देवि० – ई, उ, झ.

[8] शिवहस्ते ] अ, ई, उ, ऋ, झ; शिवहस्तं – ऊ, च.

[9] अनादिगोत्र संभूत ] अ, ई, उ, ऊ, ऋ, च; ०संभूतो – झ.

[10] आदिगोत्रामुमादेवीं ] अ, उ, ऋ; आदिगोत्रामुमां देवीं – ई, ऊ; आदिगोत्रममुं देवीं – च; आदिगोत्रमुमादेवि – झ.

[11] गृहाण ] अ, ई, उ, ऊ, ऋ, झ; गृहाणां – च.

[12] सोदकं ] अ, ई, ऊ, च, झ; ह्युदकं – उ; सोदकां – ऋ.

[13] स मन्त्रवित् ] अ, ई, उ, ऊ, ऋ, झ; समन्त्रकः – च.

[14] देव्यास्तु दक्षहस्तं च ] सं० पाठः; देव्यां च (व्याश्च)दक्षहस्तं च – अ; न देव्यदेविहस्तं च – ई; दे . . . . देविहस्तं च – ऋ; देव्यग्रे
देविहस्तं च – उ, ऊ, च; . . . . व्याग्रे देविहस्तं च – झ.

[15] शिवहस्ते ] सं० पाठः; शिवहस्तं – अ, ई, उ, ऊ, ऋ, च, झ.

[16] शिवान्तिकम् ] अ, ई, ऊ, ऋ, झ; शिवाग्रके – उ, च.

[17] 'ऊ' मातृकायां 'श्लो० ४५ उ०' न दृश्यते।

[18] हुताशनं ] ई, उ, च, झ; हुत्वा(ता)शनं – अ; हुत्वाशनं – ऋ.

[19] संवन्धाहुतिमाचरेत् ] अ, ई, च, झ; ०मारभेत् –उ.'ऋ'मातृकायां श्लो० ४५ चतुर्थपादमारभ्य ४६ चतुर्थपादान्तो भागो न दृश्यते।

[20] मधुदुग्धाज्य० ] अ, झ; मधुदत्वाज्य० – ई; मधु . . . . ज्य० – ऊ; मधुदध्याज्य० – उ; मधुगन्धाज्य० – च.

[21] सितखण्ड० ] अ, ई, ऊ; सितकण्ठ० – च; सिताखण्ड० – उ, झ.

मधुपर्कं ततो दत्वा [1]हृन्मन्त्रेणैव देशिकः ॥ ४६ ॥
पाद्यमाचमनं दत्वा धूपं दीपं प्रदापयेत्।
शिवहस्तेन संस्पृश्य [2]वर्धनीं [3]पूजयेद्धृदा ॥ ४७ ॥
[4]बीजमुख्यं जपेद्विद्वान् [5]शङ्खघोषसमन्वितम्।

[पादुकापूजा]

पुण्याहं वाचयेत्तत्र पादुकाराधनार्थकम् ॥ ४८ ॥
[6]अग्नेश्चोत्तरपार्श्वे तु [7]गोमयालिप्तभूतले।
[8]स्थण्डिले [9]दारुपीठोर्ध्वे [10]चित्रवस्त्रैर्विभूषिते ॥ ४९ ॥
[11]अश्मानं स्थापयेद्विद्वान् [12]चन्दनाद्यैर्विलेपितम्।
धर्मासनं समभ्यर्च्य प्रोक्षयेदस्त्रवारिणा ॥ ५० ॥
[13]गौरीदक्षपदाम्भोजं [14]शिवहस्तेन [15]संगृहेत्।
[16]अश्मोपरि समारोप्य [17]चाष्टाङ्गेन प्रपूजयेत् ॥ ५१ ॥
शिवहस्तेन [18]संग्राह्य गौरीहस्तं गुरूत्तमः।

---

[1] 'च' मातृकायां श्लो० ४६ चतुर्थपादः ४७ प्रथमपादश्च न दृश्येते।
[2] 'अ, ई, ऊ, ॠ' मातृकासु श्लो० ४७ चतुर्थपादः श्लो० ४८ प्रथमपादश्च न दृश्येते।
[3] पूजयेद्धृदा ] उ, च; पूजयेद्गुरुः – झ.
[4] बीजमुख्यं जपेद्विद्वान् ] उ; बीजसंख्यं जपेद्विद्वान् – च; वर्धनी पूजयेद्विद्वान् – झ.
[5] 'ॠ' मातृकायां श्लो० ५२ तृतीयपादादारभ्य श्लो० ५३ प्रथमपादान्तो भागः श्लो० ४८ प्रथमपादद्वितीयपादयोर्मध्ये दृश्यते।
[6] अग्नेश्चोत्तर० ] अ, उ, ऊ, ॠ, झ; अग्नेरुत्तर० – ई; अग्निरुद्र० – च.
[7] 'ॠ' मातृकायां 'गोमया' इति भागो न दृश्यते।
[8] 'ॠ' मातृकायां 'श्लो० ४९ उ०' न दृश्यते।
[9] दारुपीठोर्ध्वे ] अ, ई, उ; दारुपीर्द्धे – ऊ; दारुपीठे वा – च; दारुपीठोध्वे – झ.
[10] चित्रवस्त्रैर्विभूषिते ] उ, ऊ; चित्रवस्त्रैर्विभूषितैः – अ, ई, झ; चित्रवस्त्रविभूषिते – च.
[11] अश्मानं ] अ, ई, उ, ऊ, ॠ; अग्रये – च; अह्मानं – झ.
[12] चन्दनाद्यैर्विलेपितम् ] अ, ई; चन्दनोदैर्विलेपितम् – उ; चन्दनोदैविलेपितम् – ऊ; चन्दनोदैर्विभूषितम् – च; चन्दनोदैविलेपितः – झ. 'ॠ' मातृकायां श्लो० ५० द्वितीयपादमारभ्य श्लो० ५१ द्वितीयपादान्तो भागो न दृश्यते।
[13] गौरीदक्षपदाम्भोजं ] अ, ई, उ, ऊ, झ; गौरीदक्षपदाम्भोजे – च.
[14] शिवहस्तेन ] ई, उ, ऊ, च, झ; शिवहस्तं च – अ.
[15] संगृहेत् ] अ, ई, उ, झ; संग्रहेत् – ऊ, च.
[16] अश्मोपरि ] अ, ई, उ, ऊ, ॠ, झ; अग्रोपरि – च.
[17] चाष्टाङ्गेन प्रपूजयेत् ] अ, ई, उ, ऊ, ॠ, झ; साष्टाङ्गैः संप्रपूजयेत् – च.
[18] संग्राह्य ] ऊ, च; संगृह्य – अ, ई, उ, ॠ, झ.

ततः [१]शिष्यं समाहूय ग्राहयेद् [२]देविपादुके॥५२॥
[३]वह्निं प्रदक्षिणीकृत्य [४]तत्स्थाने [५]पादुके न्यसेत्।
संपूज्य देवदेवेशीं धूपं दीपं ददेद्गुरुः॥५३॥
अन्येन देशिकेनैव [६]पट्टबन्धयुतेन [७]च।
साङ्गुलीयकरेणैव लाजं [८]संग्राह्य देशिकः॥५४॥
[९]दम्पत्योरुभयहस्तेन हुत्वा [१०]लाजं शिवाणुना।
[११]ततोऽश्मानं समारोप्य पूर्ववद् [१२]गौरिपादुकाम्॥५५॥
[१३]आराध्य पूर्वमार्गेण पूजयेत् कुम्भवर्धनीम्।
एवं [१४]त्रिवारं हुत्वा तु [१५]व्याहृतिं जुहुयात्ततः॥५६॥
शतमर्धं तदर्धं वा जुहुयान्मूलमन्त्रतः।
पूर्णाहुतिं ततो [१६]हुत्वा [१७]विसृज्य शिवपावकम्॥५७॥
[१८]तद्भस्म च विसृज्याथ नैवेद्यं दापयेद् [१९]गुरुः।
[२०]सर्वोपचारैः संतोष्य संगृहेत् कुम्भवर्धनीम्॥५८॥

---

[१] शिष्यं ] अ, ई, उ, ऋ, च, झ; शिष्यान् – ऊ.
[२] देविपादुके ] अ, ई, ऋ, झ; देविपादुकाम् – उ; देविपादुकैः – ऊ; देविपादुकम् – च.
[३] वह्निं प्रदक्षिणीकृत्य ] अ, उ, ऋ, च, झ; वह्नेः प्रदक्षिणं कृत्वा – ई; वह्निं प्रदक्षिणीकृत्वा – ऊ.
[४] तत्स्थाने ] अ, ई; आस्थाने – उ; स्वस्थाने – ऊ, च, झ. 'ऋ' मातृकायां लुप्तम्।
[५] पादुके ] अ, ई, ऋ; पादुकां – उ, ऊ; पादुकं – च, झ.
[६] 'ऋ' मातृकायां श्लो० ५४ द्वितीयपादमारभ्य श्लो० ५५ द्वितीयपादान्तो भागो न दृश्यते।
[७] च ] अ, ई, च, झ; वा – उ.
[८] संग्राह्य ] ऊ, च; संगृह्य - अ, ई, उ, झ.
[९] दम्पत्योरुभयहस्तेन ] उ; दम्पत्योरुभयोस्तेन - अ, ई; दम्पत्योरूपयोस्तेन - ऊ; दम्पत्योर्द्वयहस्तेन - च; नपत्योरुभयहस्ते - झ.
[१०] लाजं शिवाणुना ] ई, उ, ऊ, च, झ; च हृदयाणुना – अ.
[११] ततोऽश्मानं ] अ, ई, ऋ, झ; तथाश्मानं – उ; ततोऽश्मनं – ऊ; ततोग्मानं – च.
[१२] गौरिपादुकाम् – अ, ई, उ, च; गौरीपादुकम् – ऊ; गौरिपादुकम् – ऋ, झ.
[१३] आराध्य ] अ, ई, उ, ऋ, च, झ; कारयेत् – ऊ.
[१४] त्रिवारं हुत्वा तु ] अ, ई, ऊ, ऋ, झ; त्रिवारकं कृत्वा – उ; त्रिवारकं हुत्वा – च.
[१५] व्याहृतिं ] अ, ई, उ, ऊ, ऋ; संहृतीर् – च; व्याहृती – झ.
[१६] हुत्वा ] ई, उ, ऊ, च, झ; (हुत्वा)दत्वा – अ; दत्वा – ऋ.
[१७] विसृज्य ] ई, उ, ऊ, ऋ, च, झ; ससृज्य – अ.
[१८] तद्भस्म ] अ, ई, उ, ऋ, च; तद्धस्तं – ऊ; तद्भस्मं – झ.
[१९] गुरुः ] अ, ई, उ, ऊ, ऋ, झ; बुधः – च.
[२०] 'ऋ' मातृकायां श्लो० ५८ उ० ५९ पू०' भागो न दृश्यते।

[शय्यागृहकार्याणि]

ब्रह्मघोषसमायुक्तं शङ्खवाद्यसमन्वितम्।
[1]विशेच्छय्यागृहं रम्यं शयने [2]स्थापयेद्गुरुः॥५९॥
[3]द्विसन्धिकेऽग्निमाहूय सायं [4]प्रातर्हुतं चरेत्।
[5]समिदाज्येन चरुणा प्रत्येकं [6]पञ्चविंशतिः॥६०॥
द्रव्यं प्रति विशेषेण व्याहृत्याहुतिमाचरेत्।

[अवसानकार्याणि]

[7]पञ्चमेऽहनि संप्राप्ते प्रातःसन्ध्यावसानके॥६१॥
चूर्णोत्सवं ततः [8]कुर्याज् [9]जलक्रीडां समाचरेत्।
जलक्रीडावसाने तु तीर्थं [10]संग्राह्य देशिकः॥६२॥
सर्वालङ्कारसंयुक्तं छत्रचामरसंयुतम्।
[11]ग्रामप्रदक्षिणं कृत्वा [12]स्नपनमण्डपं विशेत्॥६३॥
[13]देवस्य [14]देवदेव्याश्च स्नपनं कारयेद्गुरुः।
शिवाग्निं तत्र संकल्प्य पूर्वोक्तविधिना [15]बुधः॥६४॥
अघोरेण शतं हुत्वा [16]पूर्णाहुतिमथाचरेत्।

---

[1] विशोच्छय्यागृहं रम्यं ] सं० पाठः; तदिच्छयागृहं रम्यं – अ; विशेच्छय्यागृहे रम्ये – ई, उ; प्रविशेच्छय्यागृहं रम्यं – ऊ; . . . . च्छयागृहं रम्यं – ऋ; विशेषश्चैर्यं गृहे रम्ये – च; विशेच्छर्याग्रहे रम्ये – झ.
[2] स्थापयेद्गुरुः ] अ, ई, ऊ, ऋ, च; स्थापनं गुरुः – उ; शाययेद्गुरुः – झ.
[3] द्विसन्धिकेऽग्निमाहूय ] अ, ई, ऊ, ऋ; हसन्तिकेऽग्निमाहूय – उ, च; तमग्निसंगदाहूय – झ.
[4] प्रातर्हुतं ] अ, ई, उ, ऊ, ऋ; प्रातस्तुकं – च; प्रातहुतं – झ.
[5] समिदाज्येन चरुणा ] ई, ऊ, ऋ, च, झ; समिदाज्यो हि चरुणा – अ; समिदाज्यचरुणां तु – उ.
[6] पञ्चविंशतिः ] ई, उ, ऊ, ऋ, च; पञ्चविंशतिम् – अ; पञ्चविंशति – झ.
[7] 'उ, च' मातृकयोः श्लो० ६१ पूर्वोत्तरार्धयोर्मध्ये " पञ्चमेऽहनि पर्यन्तं तत्तन्मूलमनुस्मरन् " इत्यर्धमेकमधिकं दृश्यते।
[8] कुर्याज् ] अ, ई, उ, ऊ, ऋ; कृत्वा – च, झ.
[9] 'ऋ' मातृकायां श्लो० ६२ द्वितीयपादमारभ्य श्लो० ६३ द्वितीयपादान्तो भागो न दृश्यते।
[10] संग्राह्य ] अ, ई, च; संगृह्य – उ, ऊ, झ.
[11] ग्रामप्रदक्षिणं कृत्वा ] अ, ई, ऊ, ऋ; ग्रामप्रदक्षिणवशात् – उ, च; ग्रामप्रदक्षिणं नित्वा – झ.
[12] स्नपनमण्डपं विशेत् ] सं० पाठः; स्नपनं मण्डपं विशेत् – अ, ऊ, ऋ; स्नपनमण्डपमाविशेत् – ई; नीत्वा स्नपनमण्डपे – उ; नीत्वा स्नपनमण्डपमाचरेत् – च; स्नपनं मण्डपमाविशेत् – झ.
[13] देवस्य ] अ, ई, उ, ऊ, ऋ, झ; देवश्च – च.
[14] देवदेव्याश्च ] ई, उ, च; देवं देवीं च – अ; पञ्चविंशं च – ऊ; देवदेवीं च – ऋ, झ.
[15] बुधः ] अ, ई, उ, ऊ, ऋ, झ; सह – च.
[16] पूर्णाहुतिमथाचरेत् ] च; हुतिं समाचरेत् ] अ, ई, उ, ऊ, ऋ, झ .

अग्निं विसृज्य [१]संयोज्य कुम्भमध्ये विचक्षणः ॥ ६५ ॥
ततो गर्भगृहं गत्वा लिङ्गशुद्धिं समाचरेत्।
[२]कुम्भोदकेन संस्नाप्य स्नापयेत्स्नपनोदकैः ॥ ६६ ॥
ततः संस्नाप्य [३]देवेशीं [४]स्नपनाद्यैर्विधानतः।
[५]स्नानमेवं समापाद्य नित्यपूजां समाचरेत् ॥ ६७ ॥
रात्रौ पूजावसाने तु भोगाङ्गं संप्रपूजयेत्।
उमास्कन्दादिदेवानां कुम्भहीनं समाचरेत् ॥ ६८ ॥
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्। ६८[१]/२

॥ [६]इति सूक्ष्मशास्त्रे कल्याणविधिः पञ्चपञ्चाशत्तमः पटलः ॥

---

[१] संयोज्य ] अ, ई, उ, ऊ, ऋ, झ; संप्रोक्ष्य – च.

[२] 'ऋ' मातृकायां श्लो० '६६ उ०-६७ पू' भागो न दृश्यते।

[३] देवेशीं ] अ, ई, उ, ऊ, च; देवेशं – झ.

[४] स्नपनाद्यैर्विधानतः ] अ, ई, ऊ, झ; ०विशेषतः – उ; ०विधानतत् – च.

[५] स्नानमेवं समापाद्य ] उ, ऊ; स्नानमे...मापाद्य – अ; स्नानवेदीं समापाद्य – ई; स्नानमेवं समासाद्य – ऋ, च; स्तानमेव समापाद्य – झ.

[६] इति सूक्ष्मशास्त्रे कल्याणविधिः पञ्चपञ्चाशत्तमः पटलः] सं० पाठः; अ : इति सूक्ष्मशास्त्रे कल्याणविधि क(च)तुःपञ्चाशः पटलः ॥; ई : इति सूक्ष्मशास्त्रे कल्याणकर्मविधिरेकोनपञ्चाशत्पटलः ॥; उ : इति सूक्ष्मशास्त्रे कल्याणविधिपटलः ॥; ऊ : इति सूक्ष्मागमे कल्यार्णकर्मविधिपटलो पञ्चचतुः इति॥; ऋ : इति सूक्ष्मशास्त्रे कल्याणकर्मविधिः चतुःपञ्चाशः पटलः ॥; च : इति सूक्ष्मशास्त्रे क्रियापादे कल्याणकर्मविधिपटलः ॥; झ : इति सूक्ष्मशास्त्रे प्रतिष्ठातन्त्रे कल्याणविधिं नाम षद्वष्टिपटलः ॥

## [षट्पञ्चाशत्तमः पटलः[1]]

## [गौरीसंकोचविधिः]

[2]गौरीसंकोचनं वक्ष्ये [3]शृणु त्वं तत्प्रभञ्जन।
आयुरारोग्यजयदं पुत्रपौत्रसमृद्धिदम्॥ १॥

[तरुणालयः]

आद्यं द्वितीयमेवं तु [4]द्विविधं तरुणालयम्।
[5]कर्षणाद्यर्चनान्तं तु [6]तरुणालयं संगृहेत्॥ २॥
प्रासादे पतिते भिन्ने लिङ्गे [7]वा चलिते तथा।
अन्यानि सर्वकर्माणि भाषितानि समानि च॥ ३॥
[8]मूलस्थानं विनिश्चित्य बालस्थानं तु कारयेत्।
[9]ततो बालालयं [10]कृत्वा तस्मान्मूले प्रवेशयेत्॥ ४॥

[यागमण्डपम्]

प्रासादाग्रे तु कर्तव्यं दक्षिणे चोत्तरेऽपि वा।
[11]विंशद्धस्तप्रविस्तारम् उत्तमं मण्डपं[12] भवेत्॥ ५॥

---

[1] अयं पटलः अ[१] (टि.१९१, पृ० ३०८-३१२), अ[२] (पृ० ३१८-३२१), ई[१] (टि.३६, पृ० २२३-२२६), ई[२] (पृ० २३३-२३७), ऊ (टि.३८, पृ० ६९८-७०५), ऋ[१] (टि.९७, पृ० २५४-२५७), ऋ[२] (पृ० २६२-२६५), ज (टि.१००३, पृ० २१५-२१९), झ (टि.१०१६, पृ० ६२-६६) इत्येतेषु कोशेषु दृश्यते। 'अ, ई, ऋ' मातृकासु अयं पटलो द्विवारं लिखितः, प्रथमवारे गौरीसंकोचविधिरिति, द्वितीयवारे तु गौरीसंप्रोक्षणविधिरिति। श्लो० १ पू० प्रथमपादं पटलपुष्पिकां च विहाय उभयत्रापि पाठौ समानावेव दृश्येते।

[2] गौरीसंकोचनं ] अ[१], ई[१], ऋ[१], ज; गौरीसंप्रोक्षणं – अ[२], ई[२], ऊ, झ; गौरीप्रोक्षणं – ऋ[२].

[3] 'ऋ[१] ' मातृकायां श्लो० १ द्वितीयपादमारभ्य श्लो० २ चतुर्थपादपर्यन्तो भागो न दृश्यते।

[4] द्विविधं ] अ[१-२], ई[१-२], ऊ, ऋ[२], ज; द्वितियं – झ.

[5] कर्षणाद्यर्चनान्तं तु ] ई[१-२], ऋ[२], ज, झ; कर्षणाद्यचनान्तं तु – अ[१], अ[२]; कर्षणाद्यर्चनानान्तु – ऊ, ऋ[१].

[6] तरुणालयं संगृहेत् ] सं० पाठः; तरुणालय संगृहेत् ] अ[२], ई[१], ई[२]; तरुणालयं च संगृहेत् -अ[१], ऋ[१]; तरुणालय संग्रहेत् -ऊ, ऋ[२]; तरुणाल संग्रहेत् – ज; तरुणाय संग्रहेत् – झ.

[7] वा ] अ[१], ऊ, ऋ[१]; च – अ[२], ई[१-२], ऋ[२], ज, झ.

[8] मूलस्थानं ] सं० पाठः; मूलस्थाने – अ[१-२], ई[१-२], ऊ, ऋ[१-२], ज, झ.

[9] ततो ] सं० पाठः; तदूर्ध्वे - अ[१-२], ई[१-२], ऊ, ऋ[१-२], ज, झ.

[10] कृत्वा ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; गत्वा – ऊ.

[11] विंश० ] अ[२], ई[१-२], ऊ, ज, झ; त्रिंश० – अ[१]. 'ऋ[१], ऋ[२]' मातृकयोः श्लो० ५ उ०- श्लो० ६ पू०' भागो न दृश्यते।

[12] मण्डपशब्दः अत्र नपुंसकलिङ्गे प्रयुक्तः ।

[1]मध्यमं रविहस्तं स्याद् [2]दशहस्तं तु कन्यसम्।
षट्त्रिंशद्धात्रसंयुक्तम् उत्तमं मण्डपं [3]स्मृतम्॥ ६॥
षोडशस्तम्भसंयुक्तं मण्डपं [4]मध्यमाधमे।
दिशश्च विदिशश्चैव [5]निश्छिद्रव्योमसंभवम्[6]॥ ७॥
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्।
[7]वितानध्वजसंयुक्तं दर्भमालासमावृतम्॥ ८॥
[8]लाजैः पुष्पैः फलैः सार्धम् [9]अष्टमङ्गलभूषितम्[10]।
[11]स्तम्भांश्च वेष्टयेत्तत्र प्रत्येकं [12]वस्त्रवेष्टितम्॥ ९॥

[वेदिका]

मण्डपं तु त्रिधा कृत्वा [13]मध्यभागे तु [14]वेदिका।
[15]रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम्॥ १०॥
[16]वेद्या मूले तु परितः [17]उपवेदीं प्रकल्पयेत्।

---

[1] मध्यमं ] अ[१], ई[१-२], ऊ, ज, झ; मण्डपं – अ[२].
[2] दश० ] अ[२], ई[१-२], ऊ, ज, झ; रवि० – अ[१].
[3] स्मृतम् ] अ[२], ई[१-२], ऋ[२], ज, झ; भवेत् – अ[१], ऊ, ऋ[१].
[4] मध्यमाधमे ] अ[२], ऊ, ऋ[२]; मध्यमं भवेत् - ई[१]; मध्यमायतम् – अ[१], ऋ[१]; मध्यमेधमे – ई[२], झ; मण्डपाधमम् – ज.
[5] निश्छिद्र० ] ऋ[१]; निश्छिद्रं - अ[१], ज, झ; निहितं – अ[२], ऊ, ऋ[२]; निश्चित्र० – ई[१]; निहित्रं – ई[२].
[6] व्योमसंभवम् ] अ[१-२], ई[१], ऊ, ऋ[१-२], ज, झ; होमसंभवम् – ई[२].
[7] वितानध्वजसंयुक्तं ] अ[१], ई[१], ऊ, ऋ[१], ज; तोरणध्वजसंयुक्तं – अ[२], ई[२], ऋ[२]; तोरध्वजसमायुक्तं – झ.
[8] लाजैः – ई[२]; यवैः – अ[१], ई[१], ऋ[१]; दामैः – अ[२], ऊ, ऋ[२]; दीपैः – ज; धामैः – झ.
[9] अष्टमङ्गलभूषितम् ] अ[२]; अष्टमङ्गलपूजितम् – अ[१], ई[१-२], ऊ, ऋ[१-२], झ; मषमङ्गलपूजितम् – ज.
[10] 'अ[१]' मातृकायां श्लो० ८ उ०-९ पू० भागो द्विवारं लिखितः।
[11] स्तम्भांश्च वेष्टयेत्तत्र ] अ[१]; स्तम्भानि वेष्टयेत्तत्र – अ[२], ई[१-२], ऋ[२], ज; स्तम्भं निविष्टयेत्तत्र – ऊ; स्तम्भनी वेष्टयेत्तत्र – झ.
'ऋ[१]' मातृकायां श्लो० ९ प्रथमपादमारभ्य -१० तृतीयपादपर्यन्तो भागो न दृश्यते।
[12] वस्त्रवेष्टितम् ] अ[१], ई[१], ज; वस्त्रसंयुतम् – अ[२], ई[२], ऊ, ऋ[२], झ.
[13] मध्यभागे तु ] अ[१-२], ई[१-२], ऊ, ज, झ; मध्यभागेन – ऋ[२].
[14] वेदिका ] अ[१-२], ई[२], ऋ[२], ज, झ; वेदिकाम् – ऊ, ई[१].
[15] रत्निमात्रसमुत्सेधं ] अ[१]; अरत्निमात्रमुत्सेधं – अ[२], ई[१-२], ऊ, ऋ[२]; रत्निमात्रमुत्सेधं – ज, झ.
[16] वेद्या ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; वेदि० – ऊ.
[17] उपवेदीं ] अ[१], ई[१-२], ऊ, ऋ[१], ऋ[२]; उपवेदिं – अ[२]; उपवेदी – ज, झ.

युगाङ्गुलसमुत्सेधं [1]द्विगुणं [2]नीव्रमुच्यते॥ ११॥
[3]कुण्डानि परितः कुर्यात् किञ्चिद्भेदं विशेषतः।
नवाग्निं वाथ पञ्चाग्निमेकाग्निं [4]वा समाचरेत्॥ १२॥
योनिकुण्डानि सर्वाणि योनौ योनिं [5]न कारयेत्।
[6]श्रोत्रार्धांशोच्चमानेन [7]क्षेत्रं पञ्चैकभागिकम्॥ १३॥
[8]तत्पुरस्ताद्बहिः [9]न्यस्त्वा भवेत् पिप्पलपत्रवत्।
योनिकुण्डं ततः [10]कृत्वा लक्षणं सम्यगाचरेत्॥ १४॥

[मण्डपे स्थानशुद्धिः]

उद्वास्य शिल्पिनं पश्चाद् [11]गोमयेनोपलेपयेत्।
पुण्याहं वाचयेत्तत्र ब्राह्मणान् भोजयेत्ततः॥ १५॥
पश्चाद् [12]उद्वास्य चोच्छिष्टं [13]पुनः पुण्याहमाचरेत्।
[14]समर्यकपदे सम्यग् वास्तुहोमं तु कारयेत्॥ १६॥

---

[1] द्विगुणं ] अ[१-२], ई[१], ऊ, ऋ[१-२], ज, झ; गुणांशं – ई[२].
[2] नीव्र० ] झ; तीप्र० – अ[१], अ[२]; नीप्र० – ई[१-२], ऋ[१], ऋ[२]; निप्र० – ऊ; नीवृ० – ज.
[3] कुण्डानि ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; कण्ठानि – ऊ.
[4] वा समाचरेत् ] अ[२], ऊ, ऋ[२]; समुदाचरेत् – अ[१], ई[१], ज; सम्यगाचरेत् – ई[२], झ; समुदाच(ह)रेत् – ऋ[१].
[5] न कारयेत् ] ई[१-२], ऋ[२], ज, झ; तु कारयेत् – अ[१], अ[२]; न कल्पयेत् – ऊ; निवेदयेत् – ऋ[१].
[6] श्रोत्रार्धांशोच्चमानेन ] अ[२], ई[१], ऋ[२], ज; श्रोत्रांशाद्धोचमानेन – अ[१]; श्रोत्रांशोचमानेन – ई[२]; श्रोत्रार्थांशौचमानेन – ऊ; श्रोत्रांशंशोचमानेन – झ. 'ऋ[१]' मातृकायां श्लो० १३ तृतीयपादमारभ्य श्लो० १४ प्रथमपादपर्यन्तो भागो न दृश्यते।
[7] क्षेत्रं पञ्चैकभागिकम् ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; क्षेत्रपौञ्चेकभागिका – ऊ.
[8] 'झ' मातृकायां लुप्तम्।
[9] न्यस्त्वा भवेत् ] झ; सत्वा – अ[१]; स्नात्वा भवेत् – अ[२], ऋ[२]; नीत्वा भवेत् – ई[१]; णास्त्वा भवेत् – ई[२]; घत्वात् भवेत् – ऊ; णिस्त्वाद्भवेत् – ज.
[10] कृत्वा ] अ[१], ई[१], ऊ, ऋ[१], ज; कुर्याल्ल – अ[२], ई[२], ऋ[२], झ.
[11] गोमयेनोपलेपयेत् ] अ[१], ऊ, ऋ[१]; गोमयेनानुलेपयेत् – अ[२], ई[१-२], ऋ[२], ज; गोमयेन तु लेपयेत् – झ.
[12] उद्वास्य चोच्छिष्टं ] अ[२], ई[१], ऊ, ऋ[२]; ०योच्छिष्टं - अ[१]; उच्छिष्टमुद्वास्य – ई[२]; ०वोच्छिष्टं – ऋ[१]; उद्वास्य दुच्छिष्टं - ज, झ.
[13] पुनः पुण्याहमाचरेत् ] अ[२], ई[२], ऋ[२], ज, झ; पुण्याहमपि वाचये(रे)त् – अ[१]; पुण्याहमपि वाचयेत् – ऊ; पुण्याहमाचरेद्बुधः – ई[१]. 'ऋ[१]' मातृकायां श्लो० १६ द्वितीयपादमारभ्य श्लो० १७ चतुर्थपादपर्यन्तो भागो न दृश्यते।
[14] समर्यकपदे ] ई[१]; समर्थपदे - ऊ; समर्यवदे - ज; समरियपदे - झ. 'अ[१]' मातृकायां श्लो० १६ उ० न दृश्यते। 'अ[२], ई[२], ऋ[२]' मातृकासु श्लो० १६ उ०-१७ पू० भागो न दृश्यते।

पर्यग्निकरणं कुर्यात्पुनः पुण्याहमाचरेत्।

कृत्वा तु विधिना स्नानं [1]शुक्लचन्दनलेपितः ॥ १७॥
[2]शुक्लवस्त्रधरोष्णीषः शुक्लमाल्यैरलङ्कृतः[3]।
अङ्कुराण्यर्पयेद्धीमान् स्थानशुद्धिं समाचरेत्॥ १८॥

[गर्भगेहे स्थानशुद्धिर्गौरीपूजा च]

उत्तराभिमुखो भूत्वा [4]सकलीकरणं कुरु।
गर्भगेहं प्रविश्याथ [5]स्थानशुद्धिं ततः कुरु॥ १९॥
गौरीशुद्धिं ततः [6]कृत्वा [7]स्नापयेद्रजन्युदकैः।
पुण्याहं [8]तु ततः कृत्वा शुद्धोदैरभिषेचयेत्॥ २०॥
[9]पञ्चगव्येन संस्नाप्य [10]बिल्वपत्रेण [11]घर्षयेत्।
[12]दर्भमूलाद्वा [13]वल्मीकक्षेत्रमृद्गृह्य लेपयेत्॥ २१॥
गन्धोदकेन संस्नाप्य पूजयेद्धृदयेन तु।
[14]चन्दनागरुकोष्ठैश्च कुङ्कुमोशीरकेसरैः॥ २२॥
[15]त्वगेलापत्रकर्पूरैः [1]आलोड्य [2]गौरीं [3]लेपयेत्।

---

[1] शुक्लचन्दनलेपितः ] ऋ[२]; शुक्लचन्दनलेपितम् – अ[१-२], ई[१], ज, झ; शुक्लचन्दनलेपतः – ई[२]; शुक्लचन्दनलेपनम् – ऊ.

[2] शुक्लवस्त्रधरोष्णीषः ] ई[२], ऋ[२]; शुक्लवस्त्रधरोष्णीष० – अ[१-२], ऋ[१]; शुक्लवस्त्रधरोष्णीषं – ई[१], ऊ, ज, झ.

[3] शुक्लमाल्यैरलङ्कृतः ] अ[२], ई[२], ऋ[१], ऋ[२]; ०अलङ्कृतम् – अ[१], ई[१], ऊ, ज, झ.

[4] सकलीकरणं कुरु – अ[१-२], ई[१], ऊ, ऋ[१-२], ज, झ; सकलीकृतविग्रहः – ई[२].

[5] स्थान० ] अ[१-२], ई[१-२], ऋ[२], ज, झ; स्नान० – ऊ. 'ऋ[१]' मातृकायां लुप्तम्।

[6] 'ऋ[१]' मातृकायां श्लो० २० द्वितीयपादमारभ्य २१ तृतीयपादपर्यन्तो भागो न दृश्यते।

[7] स्नापयेद्रजन्युदकैः ] ऊ; स्नापयेद्रजनोदकैः – अ[१-२], ई[१], ऋ[२], ज, झ; स्थापयेद्रजनोदकैः – ई[२]. 'अ[१]' मातृकायां श्लो० २० द्वितीयपादमारभ्य चतुर्थपादपर्यन्तो भागो न दृश्यते। 'रजनोदकैः' इत्यस्य स्थाने 'रजन्युदकैः' इति स्मृतं स्यात्।

[8] तु ] अ[२], ई[१], ऊ, ऋ[२], ज, झ; च – ई[२].

[9] पञ्चगव्येन ] अ[१-२], ई[१-२], ऊ, ऋ[२], ज; पञ्चगव्यं तु – झ.

[10] बिल्वपत्रेण ] अ[१], ई[१-२], ऊ, ज, झ; बिल्वपत्रैस्तु – अ[२], ऋ[२].

[11] घर्षयेत् ] अ[१-२], ई[१], ऊ, ऋ[२], ज; कर्षयेत् – ई[२]; घोषयेत् – झ.

[12] दर्भमूलाद्वा ] सं० पाठः; दर्भमूले तु – अ[१-२], ई[१-२], ऊ, ऋ[२], ज, झ.

[13] वल्मीकक्षेत्र० ] अ[१]; वल्मीके क्षेत्रे – अ[२], ऋ[२]; वल्मीके क्षेत्र० – ई[१-२], ऊ; वल्मिकं क्षेत्रे – ज; वल्लिके क्षेत्र० – झ.

[14] चन्दनागरुकोष्ठैश्च ] सं० पाठः; चन्दनागरुकोष्ठं च – अ[१-२], ई[१]; ई[२], ऊ, ऋ[१-२], ज, झ.

[15] त्वगेलापत्र० ] अ[२], ई[२], ऋ[२], झ; त्वगेलापति० – अ[१], ऋ[१]; त्वगेलापत्ति० – ई[१]; त्वगेलापत्रि० – ऊ; कृगेलपत्र० – ज.

पिण्डिकाब्जं [४]समालिप्य [५]प्रोक्षयेच्छक्तिबीजकम्॥ २३॥
[६]शिरसा [७]वामहस्ते तु हेमसूत्रं तु कौतुकम्।
अष्टपुष्पैः समभ्यर्च्य [८]सामान्यपुष्पपूरितम्॥ २४॥
नववस्त्रेण संवेष्ठ्य [९]गौरीपीठं क्रमेण तु।

[अग्निकार्यम्]

ततो बालगृहं [१०]गत्वा [११]पूजयेद्गन्धसंयुतम्॥ २५॥
यात्राहोमं तु कर्तव्यं तदग्रे होममाचरेत्।
स्थण्डिलं हस्तमात्रेण निर्दोषैः सिकतैरपि॥ २६॥
[१२]अग्न्याधानादिकं सर्वम् [१३]अग्निकार्योक्तमाचरेत्।
[१४]समिधा सद्यमन्त्रेण ईशानेन घृतं हुनेत्॥ २७॥
अघोरेण [१५]चरुं हुत्वा [१६]प्रत्येकं पञ्चविंशतिः।
[१७]प्रासादबीजमुख्यैश्च व्योमव्यापिदशाक्षरैः॥ २८॥
[१८]शक्त्याद्यैश्चैव वामाद्यैः प्रत्येकं षोडशं हुनेत्।

---

[१] आलोड्य ] ऊ; आलोड्या – अ[१-२], ऋ[१], ऋ[२]; बालोस्या – ई[१]; आलोढ्य – ई[२]; लालयोढ्यं – ज; नालोढ्यं – झ.
[२] गौरीं ] सं० पाठः; गौरि – अ[१-२], ई[१-२], ऊ, ऋ[१-२], ज, झ.
[३] लेपयेत् ] अ[२], ई[२], ऊ, ऋ[२], ज, झ; पालयेत् – अ[१], ई[१], ऋ[१].
[४] समालिप्य ] अ[१-२], ई[१-२], ऊ, ऋ[१], ज, झ; समालिख्य – ऋ[२].
[५] प्रोक्षयेच्छक्तिबीजकम् अ[१], घोषयेच्छक्ति० ] ऊ; ई[१-२], ऋ[१], ज, झ; पूरये० – अ[२]; 'ऋ[२]' मातृकायां लुप्तम्।
[६] 'ऋ[१]' मातृकायां श्लो० २४ प्रथमपादमारभ्य २५ तृतीयपादपर्यन्तो भागो न दृश्यते।
[७] वामहस्ते ] अ[१-२], ऊ, ऋ[२]; वामहस्तं – ई[१-२], ज, झ.
[८] सामान्यपुष्पपूरितम् ] सं० पाठः; सामान्यं पुष्पपूरितम् ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; सामान्यपुष्पपूरिते – ऊ.
[९] गौरीपीठं ] अ[२], ऋ[२]; गौरीपीठ० – अ[१], ई[१], ऊ, ज, झ; गौरीबीज० – ई[२].
[१०] गत्वा ] झ; पश्चात् – अ[१-२], ई[१-२], ऊ, ऋ[१-२], ज.
[११] पूजयेद्गन्धसंयुतम् ] ऋ[२]; पूजयेद्गौरिसंयुतम् – अ[१-२], ई[१-२], ऊ, ऋ[१], ज. 'झ' मातृकायां लुप्तम्।
[१२] अग्न्याधानादिकं ] ई[२], ऊ, ऋ[१], ऋ[२]; अग्न्याधानाधिकं – अ[१-२], ई[१]; अग्न्यादानादिकं – ज, झ.
[१३] अग्निकार्योक्तमाचरेत् ] अ[१], ई[१], ऊ, ऋ[१], ज, झ; अग्निकार्यं समाचरेत् – अ[२], ई[२], ऋ[२].
[१४] समिधा ] अ[२], ऊ, ऋ[२], ज, झ; समिदा – अ[१], ई[१-२], ऋ[१].
[१५] चरुं ] अ[१], ई[१-२], ऊ, ऋ[१], झ; शतं – अ[२]; चरु – ज. 'ऋ[२]' मातृकायां लुप्तम्।
[१६] प्रत्येकं ] अ[१-२], ई[१-२], ऊ, ऋ[२], ज, झ; प्रत्यक्षं – ऋ[१].
[१७] प्रासादबीजमुख्यैश्च ] अ[१-२], ई[१-२], ऋ[२]; प्रासादबीजमुख्येन – ऊ; प्रासादं शक्तिबीजैश्च – ज; प्रासादबीजै मुख्यैश्च – झ. 'ऋ[१]' मातृकायां श्लो०'२८ उ०-२९ पू०' भागो न दृश्यते।
[१८] शक्त्याद्यैश्चैव ] अ[१], ई[१], ऊ, ऋ[२], ज, झ; शक्त्याद्यैश्च – अ[२], ई[२].

स्पृष्ट्वा तु जुहुयाद्धोमं गौरीबीजमनुस्मरन्॥ २९॥

[गौर्याः अष्टशक्तीनां च तत्तन्मन्त्राणां तत्तत्कुम्भे विन्यासः]

तस्याग्रे स्थण्डिलं कृत्वा [१]शालिभिर्विमलैः शुभैः।
कुम्भं वा करकं वापि स्थण्डिलोपरि विन्यसेत्॥ ३०॥
[२]ससूत्रं सापिधानं च हेमपल्लवसंयुतम्।
[३]नालिकेरफलैर्युक्तं लम्बकूर्चसमन्वितम्॥ ३१॥
[४]गौरीस्थं कुम्भे चावाह्य [५]कुम्भमध्ये तु विन्यसेत्।
स्थापयेद्वाममन्त्रेण अघोरेणावकुण्ठयेत्॥ ३२॥
सान्निध्यं शक्तिमन्त्रेण पञ्चमेनार्चयेत् [६]क्रमात्।
दर्शयेच्छक्तिमुद्रां च [७]मुकुलीं [८]पद्ममुद्रिकाम्॥ ३३॥
[९]नमस्काराख्यमुद्रां च [१०]बध्वास्त्रं दिक्षु योजयेत्।
सूत्रादिभिः समोपेतान् [११]अभितोऽष्टघटान् न्यसेत्॥ ३४॥
वामादिशक्तयश्चाष्टौ [१२]इन्द्रादीशानमन्तकम्।
कुम्भमध्ये समावाह्य [१३]तत्तद्बीजमनुस्मरन्॥ ३५॥
पूजयेद्गौरीमन्त्रेण गन्धपुष्पादिभिः क्रमात्[१४]।

---

[१] शालिभिर्विमलैः ] अ[१-२], ई[१], ऊ, ऋ[१-२], ज, झ; शालिभिस्तण्डुलैः – ई[२].

[२] ससूत्रं सापिधानं च हेमपल्लवसंयुतम् ] ई[१-२], ज; ससूत्रान् सापिधानांश्च हेमपल्लवसंयुतान् – अ[१], ऊ, ऋ[१]; ससूत्रं सापिधानं च हेमपल्ल . . . . युतम् – झ. 'अ[२], ऋ[२]' मातृकयोः श्लो० ३१ पू०-३२ पू० भागो न दृश्यते।

[३] नालिकेरफलैर्युक्तं लम्बकूर्चसमन्वितम् ] ई[२], झ; नालिकेरफलैर्युक्तान् लम्बकूर्चसमन्वितान् – अ[१], ऋ[१], ज; नालिकेरफलैर्युक्तां लम्बकूर्चसमन्विताम् – ई[१]; नालिकेरफलोपेतान् लम्बकूर्चसमन्वितम् – ऊ.

[४] गौरी० – ई[१-२], ऊ, ऋ[१].गौरि० ] अ[१], ज, झ;

[५] 'ऋ[१]' मातृकायां श्लो० ३२ द्वितीयपादमारभ्य श्लो० ३३ प्रथमपादपर्यन्तो भागो न दृश्यते।

[६] क्रमात् ] अ[१], ई[१-२], ऊ, ऋ[१], ज, झ; बुधः – अ[२]. 'ऋ[२]' मातृकायां लुप्तम्।

[७] मुकुलीं ] ऋ[२], झ; मुकुली – अ[१-२], ई[१], ऊ, ऋ[१]; मुकुलं – ई[२]; मुकलिं – ज.

[८] पद्ममुद्रिकाम् ] अ[२], ई[२], ऊ, ऋ[१], ऋ[२]; पद्ममुद्रितः – अ[१]; पद्ममुद्रकम् – ई[१]; पद्ममुद्रिका – ज; पद्ममुद्रिकम् – झ.

[९] नमस्काराख्य० ] अ[१], ई[१], ऊ, ऋ[१-२], ज, झ; नमस्कारादि० – अ[२], ई[२].

[१०] वध्वास्त्रं ] अ[२], ई[१-२], ऊ, ऋ[१-२], ज; बल्वास्त्रं – अ[१]. 'झ' मातृकायां लुप्तम्।

[११] अभितोऽष्ट० ] अ[२], ई[१-२], ऊ, ऋ[१-२], ज; अभितोऽष्टौ – अ[१]; अभिमष्ट० – झ.

[१२] इन्द्रादी० ] अ[१], ई[२], ऋ[१], ज, झ; शक्रादी० – अ[२]; इन्द्र ई० – ई[१]; इन्द्रमी० – ऊ. 'ऋ[२]' मातृकायां लुप्तम्।

[१३] तत्तद्बीज० ] अ[२], ई[१-२], ऋ[२], ज, झ; तत्तन्मन्त्र० – अ[१], ऊ, ऋ[१].

[१४] 'ऋ[१]' मातृकायां श्लो० ३६ द्वितीयपादमारभ्य श्लो० ३७ द्वितीयपादपर्यन्तो भागो न दृश्यते।

नैवेद्यं धूपदीपं च ताम्बूलं च निवेदयेत्॥ ३६॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत्।
[1]पूर्णाहुतिं च शिरसा घटम् [2]उद्धारयेत्ततः॥ ३७॥

[गौरीबिम्बच्छेदनम्]

[3]अस्त्रेण छेदयेद्बिम्बं [4]तटाके चैव निक्षिपेत्॥ ३७ १/२॥

॥ इति सूक्ष्मशास्त्रे गौरीसंकोचविधिः षट्पञ्चाशत्तमः पटलः[5]॥

---

[1] पूर्णाहुतिं च शिरसा ] ई[१-२], ऊ, ऋ[१], ज, झ; पूर्णाहुतिश्च शिरसा -अ[१]; पूर्णाहुतिं ततो हुत्वा-अ[२]; पूर्णाहुतिं ततः कृत्वा - ऋ[२].

[2] उद्धारये० ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; उद्धापये० – ऊ.

[3] अस्त्रेण छेदये० ] ई[१-२], ऋ[१], ऋ[२]; अस्त्रेणाच्छादये० – अ[१-२], ज; वस्त्रेणाश्चादये० – ऊ; अस्त्रेणाच्छेदये० – झ.

[4] तटाके चैव ] अ[१-२], ई[१], ऊ, ऋ[१], ज; तटाकेनैव – ई[२], ऋ[२], झ.

[5] इति सूक्ष्मशास्त्रे गौरीसंकोचविधिः सप्तपञ्चाशत्तमः पटलः ] सं० पाठः; अ[१]: इति सूक्ष्मशास्त्रे गौरीसंकोचविधिः पञ्चपञ्चाशत्पटलः॥; ई[१]: इति सूक्ष्मशास्त्रे गौरीसंकोचविधिः पञ्चाशत्पटलः॥; ऋ[१]: इति सूक्ष्मशास्त्रे गौरीसंकोचविधिः पञ्चपञ्चाशः पटलः॥; ज: इति सूक्ष्मशास्त्रे गौरिसंकोचविधिं द्विचत्वारिंशत्पटलः॥; 'ऊ; झ: इति सूक्ष्म... गौरिसंप्रोक्षणं नाम अष्टषष्टिपटलः॥

## [सप्तपञ्चाशत्तमः पटलः[१]]

## [गौरीबालस्थापनविधिः]

[२]गौरीसंस्थापनं वक्ष्ये श्रृणु त्वं तत्प्रभञ्जन।
आयुरारोग्यजयदं [३]पुत्रपौत्रसमृद्धिदम्॥ १॥

[तरुणालयद्वैविध्यम्]

आद्यं द्वितीयमेवं तु [४]द्विविधं तरुणालयम्।
[५]मूलालयस्य यत्पूर्वं [६]तदाद्यं तरुणालयम्॥ २॥
[७]अनादरात् प्रमादाद्वा [८]भिन्ने छिन्नेऽनवीकृते।
[९]यत्कृतं तद्द्वितीयाख्यं तरुणालयमुत्तमम्॥ ३॥
अन्यानि सर्वकर्माणि भाषितानि समानि च।

[तरुणालयगुणाः- तरुणालयस्य मुख्यत्वम् ]

[१०]मूलस्थानं विनिश्चित्य बालस्थानं तु कारयेत्॥ ४॥
बालबिम्बं प्रतिष्ठाप्य [११]पश्चान्मूले न कारयेत्।
बालस्थानं विना यत्र पुत्रपौत्रविनाशनम्॥ ५॥
तस्मात् सर्वप्रयत्नेन [१२]बालस्थानं विधीयते।

---

[१] अयं पटलः अ (टि.१९१, पृ० ३१४-३१७), ई (टि.३६, पृ० २२९-२३३), ऊ (टि.३८, पृ० ७१०-७१८), ऋ (टि.९७, पृ० २५९-२६२), झ (टि.१०१६, पृ० ५८-६२) इत्येतेषु कोशेषु दृश्यते।
[२] गौरीसंस्थापनं ] अ, ऊ, ऋ; गौरीसंकोचनं – ई, झ.
[३] पुत्रपौत्रसमृद्धिदम् ] अ, ई, ऋ, झ; पुत्रपौत्राभिवृद्धिदम् – ऊ.
[४] द्विविधं ] अ, ई, ऋ, झ; द्वितीयं – ऊ.
[५] 'ऋ' मातृकायां श्लो० २ उ०-३ पू० भागो न दृश्यते।
[६] तदाद्यं ] ऊ; तद्दैव्यं – अ; तद्देव्यास् – ई; तद्देव्यां – झ.
[७] अनादरात् प्रमादाद्वा ] सं० पाठः ; अनादे च प्रमादे वा - ई; आनादः पादमेवं तु – अ; अनादप्रदमेवं तु – ऊ; आराद्य प्रसमेवं तु – झ
[८] भिन्ने छिन्नेऽनवीकृते ] ई; छिन्ने छिन्ने . . . . – अ; चिन्नभिन्ने नविकृते – ऊ; भिन्ने च्छिन्ने रं विकृते – झ .
[९] यत्कृतं ] ई, ऊ, झ; अकृतं – अ; . . . . त्कृतं – ऋ .
[१०] मूलस्थानं ] अ, ऊ, ऋ; मूले स्थाने – ई; मूलस्थाने – झ .
[११] पश्चान्मूले न कारयेत् ] अ, ई, ऊ, ऋ ; पश्चान्मूलं तु कारयेत् ] झ .
[१२] बालस्थानं ] अ, ई, ऋ, झ; बालस्थापनं – ऊ.

[तरुणालयस्थानम्]

[१]तस्याग्रे चोत्तरे वापि दक्षिणे वा विशेषतः ॥ ६ ॥
ईशाने वा विशेषेण कारयेत्तरुणालयम्।

[अङ्कुरार्पणम्]

[२]पञ्चसप्तनवाहे वा [३]त्रियहे वाङ्कुरार्पणम् ॥ ७ ॥

[बालबिम्बनिर्माणद्रव्याणि]

[४]शैलजं लोहजं [५]चैव दारुजं मृण्मयं तथा।
कारयेत्तु विशेषेण लक्षणोक्तेन देशिकः ॥ ८ ॥
शमीबिल्वमधूकैश्च [६]अश्वत्थोदुम्बरैरपि।
[७]बालशक्तिः प्रकर्तव्या कारयेत्तु विचक्षणः ॥ ९ ॥

[बालबिम्बस्योत्सेधः]

द्वादशाङ्गुलमुत्सेधम् [८]अधमाधममेव हि।
[९]अङ्गुलाङ्गुलवृध्या तु [१०]नवशक्तीः प्रकल्पयेत् ॥ १० ॥
स्वयोनिं कारयेत्पीठम् अथवा [११]चेष्टकामयम्।

[आद्यतरुणालयमानम्]

सप्तपञ्चत्रिहस्तं वा कर्तव्यं तरुणालयम् ॥ ११ ॥
[१२]एवमादिसमाख्यातं

[द्वितीयतरुणालयनिरूपणं प्रमाणं च]

द्वितीये तरुणालये।

---

[१] 'ऋ' मातृकायां श्लो० ६ उ० - ७ पू० भागो न दृश्यते।

[२] पञ्चसप्तनवाहे वा ] ई, ऊ, झ; पञ्चाहे वा – अ. 'ऋ' मातृकायां लुप्तम्।

[३] त्रियहे वाङ्कुरार्पणम् ] ई; त्रियाहे वा० – अ; त्रियहेका० – ऊ; त्रियहैका० – ऋ; त्रियाहेका० – झ.

[४] शैलजं ] ई, ऊ, ऋ, झ; शौलजं – अ.

[५] चैव ] अ, ई, ऋ, झ; वा – ऊ.

[६] अश्वत्थोदुम्बरैरपि ] अ; अश्वत्थौदुम्बरैस्तथा – ई; अश्वत्थोदुम्बरैस्तथा – ऊ, झ; अश्वत्थोदुम्बरै... – ऋ.

[७] बालशक्तिः प्रकर्तव्या ] अ, ऊ; बालशक्तिं प्रकर्तव्यं – ई; .... लशक्तिः प्रकर्तव्या – ऋ; बालशक्ति प्रकर्तव्यं – झ.

[८] अधमाधम० ] सं० पाठः; मध्यमाधम० – अ, ई, ऊ, ऋ, झ.

[९] अङ्गुलाङ्गुलवृध्या तु ] ई, झ; अङ्गुल्याङ्गुलिवृध्या तु – अ; अङ्गुल्याङ्गुलवृद्धादि – ऊ; अङ्गुल्याङ्गुलि.... – ऋ.

[१०] नवशक्तीः ] ई; नवशक्तिं - ऊ, झ; नवशक्तिः –अ; 'ऋ' मातृकायां श्लो० १० चतुर्थपादमारभ्य श्लो० ११ तृतीयपादान्तो भागो न दृश्यते।

[११] चेष्टकामयम् ] ई, ऊ, झ; चेष्टकामया – अ.

[१२] 'ऊ' मातृकायां श्लो० १२ प्रथमपादः तृतीयपादश्च विपर्यस्तौ दृश्येते।

[१]आयतं [२]चतुरश्रं वा पूर्ववद् [३]भवनं क्रमात्॥ १२॥
गौरीमेवं समापाद्य [४]मूलगर्भार्धमेव हि।
[५]त्रियंशं वा चतुर्थांशं प्रोक्तं बालगृहान्वितम्॥ १३॥
गौरीपीठान्तरे बिम्बं बालबिम्बसमन्वितम्।
वृत्तं वा चतुरश्रं वा स्थापयेच्छक्तिपीठकम्॥ १४॥
[६]रत्नन्यासं विना चेत्तु पादशैलं विनाचरेत्।

[यागमण्डपकल्पनम्]

[७]बालालये विशेषस्तु मण्डपं [८]स्वेष्टदेशके॥ १५॥
[९]पूर्वे वा दक्षिणे वापि [१०]चैशान्ये चोत्तरेऽपि वा।
दशाष्टनवहस्तं वा सप्तहस्तं त्रिहस्तकम्॥ १६॥
षोडशस्तम्भसंयुक्तं सर्वालङ्कारसंयुतम्।
तन्मध्ये वेदिकां कुर्यान्नवभागैकभागतः॥ १७॥
[११]हस्तमात्रसमुत्सेधं दर्पणोदरसंनिभम्।
गोमयालेपनं कृत्वा ब्राह्मणान् भोजयेत्ततः॥ १८॥
[१२]पुण्याहप्रोक्षणं कृत्वा वास्तुहोमं समाचरेत्।
तद्धोमं विधिवत्कृत्वा पर्यग्निकरणं कुरु॥ १९॥
[१३]वस्त्रैर्यच्छालिभिर्युक्तं शयनं संप्रकल्पयेत्।

---

[१] आयतं ] सं० पाठः; आयामं – अ, ऋ; आयाम० – ई; आयमं – ऊ; अयामं – झ.
[२] चतुरश्रं वा ] अ, ई, ऊ, ऋ; चतुरश्राभं – झ.
[३] भवनं ] अ, ई, ऊ, ऋ; भुवनं – झ.
[४] मूलगर्भार्धमेव – अ, ई, ऋ, झ; मूलगर्भस्समेव – ऊ.
[५] त्रियंशं वा चतुर्थांशं – अ, ई, ऋ, झ; ब्यंशवो चतुर्थ्यंशं – ऊ.
[६] 'ऋ' मातृकायां श्लो० १५ प्रथमपादमारभ्य -१६ प्रथमपादान्तो भागो न दृश्यते।
[७] बालालये विशेषस्तु ] सं० पाठः; तरुणालये विशेषं तु - अ, ई, झ; तरुणालय० – ऊ.
[८] स्वेष्टदेशके ] अ; त्विष्टदेशके – ई; स्वेष्टदेशिके – ई; मिशदेशके – झ.
[९] 'झ' मातृकायां श्लो० १६ पू० - १७ उ० भागो न दृश्यते।
[१०] चैशान्ये ] अ, ऋ; ऐशान्ये – ई; चैशाने – ऊ.
[११] हस्त० ] अ, ई, ऊ, ऋ; पूर्वे – झ .
[१२] 'ऋ' मातृकायां श्लो० १९ न दृश्यते।
[१३] वस्त्रैर्यच्छालिभिर्युक्तं ] अ; वस्त्रैर्यशालिभिर्युक्तं – ई, ऊ, ऋ; वस्त्रैरशालिभिर्युक्तं – झ.

[अधिवासनम्]

बेरशुद्धिं ततः कृत्वा [१]धामप्रदक्षिणं कुरु ॥ २० ॥
[२]अक्षिमोक्षणमेवं स्याद्रक्षासूत्रप्रबन्धनम्।
त्रिरात्रमेकरात्रं वा यामं [३]वा त्वर्धयामकम् ॥ २१ ॥
जलाधिवासनं [४]कुर्याद् [५]पिण्डिकोर्ध्वे तु विन्यसेत्।
वस्त्रेण वेष्टयित्वा तु [६]सदर्भं पुष्पसंयुतम् ॥ २२ ॥
[७]पीठस्य मध्यमे न्यस्य [८]कण्ठमात्रं जले न्यसेत्।

[यागमण्डपे कार्यम्]

[९]मण्डपे शाययेद्धीमान् प्राक्[१०]शिराः शयनेन तु ॥ २३ ॥
वस्त्रेणाच्छादनं कृत्वा [११]हृदा च पुष्पदर्भकैः।
[१२]निद्राकुम्भं तु विन्यस्य पूजयेद्देशिकोत्तमः ॥ २४ ॥
वेदिकोर्ध्वे न्यसेद्धीमान् वर्धनीं चैव विन्यसेत्।
वामादिशक्तिकुम्भांस्तु[१३] [१४]इन्द्रादीशानमन्तकम् ॥ २५ ॥
संपूज्य गन्धपुष्पाद्यैर्गौरीबीजमनुस्मरन्।
[१५]वस्त्रं वा हेमपट्टं वा [१६]कूर्चं वा नालिकेरकम् ॥ २६ ॥

---

[१] धाम॰ ] अ, ई, ऋ, झ; ग्राम॰ – ऊ.
[२] अक्षि॰ ] अ, ई, ऊ, झ; अक्ष॰ – ऋ.
[३] वा त्वर्ध॰ ] अ, ऋ; वाप्यर्ध॰ – ई; वार्ध॰ – ऊ; वा अर्ध॰ – झ.
[४] कुर्याद् ] ई, ऊ, ऋ; चैव – झ. 'अ' मातृकायां लुप्तम्।
[५] पिण्डिकोर्ध्वे ] (अब्दि) – अ; अब्धि॰ – ई, ऊ, ऋ; गब्धि॰ – झ.
[६] सदर्भं पुष्पसंयुतम् ] अ, ई; कुम्भपुष्पसमन्वितम् – ऊ; सदर्गं पुष्पसंयुतम् – झ; सदर्भं पुष्प . . . . – ऋ.
[७] 'ऋ' मातृकायां श्लो॰'२३ पू॰ - २४ पू' भागो न दृश्यते।
[८] कण्ठमात्रं ] अ; कण्ठमात्र॰ – ई, ऊ; कर्णमात्रं – झ.
[९] मण्डपे शाययेद्धीमान् ] सं॰ पाठः; मण्डपं कारयेद्धीमान् – अ, ई, ऊ, झ.
[१०] शिराः ] अ; शिरं – ई, झ; शिरः – ऊ.
[११] हृदा च ] अ; हृदिना – ई, ऊ, झ.
[१२] निद्रा॰ ] ई, ऊ, ऋ, झ; निद्रां – अ.
[१३] वामादिशक्तिकुम्भांस्तु इति चेत् साधु ।
[१४] इन्द्रादीशान॰ ] ई, ऊ; इन्द्रमीशान॰ – अ, ऋ; वामादीशान्त॰ – झ.
[१५] वस्त्रं वा हेमपट्टं वा ] सं॰ पाठः; वस्त्रं वा हेमपल्लं वा – अ; वस्त्रहेमसपल्लं वा – ई; वस्त्र . . . .पल्लवान् . . . . – ऊ; वस्त्रं हेमसपल्लं वा – ऋ; वस्त्रहेमसपल्लावां – झ.
[१६] कूर्चं वा ] अ, ई, ऊ, ऋ; कूर्चवान् – झ.

मूलशक्तिं तदग्रे तु स्थण्डिलं [१]कारयेत्ततः।
यागमण्डपवर्धन्यां [२]परिचारकरोद्धृतम्॥ २७॥
तदग्रे स्थण्डिलं कृत्वा व्योमव्यापिं [३]समुच्चरेत्।
गौरीं संपूज्य [४]विधिवन्निवेद्य पायसान्नकम्॥ २८॥
गौरीमावाहयेत् [५]कुम्भे [६]अर्चयेद्गन्धपुष्पकैः।

[यात्राहोमः]

यात्राहोमं ततः [७]कुर्याद् [८]अग्निकार्योक्तमार्गतः॥ २९॥
[९]समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान्।
गौरीबीजमनुस्मृत्य स्पर्शाहुतिशतं [१०]हुनेत्॥ ३०॥
[११]सोष्णीषः सोत्तरीयश्च कुम्भमुत्थाप्य देशिकः।
[१२]यागमण्डपकुम्भे तु [१३]वेद्यां वै स्थण्डिलोपरि॥ ३१॥
गौरीबीजमनुस्मृत्य गन्धपुष्पस्रगादिभिः।

[अग्निकार्यम्]

नवाग्निं वाथ पञ्चाग्निम् एकाग्निं [१४]सर्वयोनिकम्॥ ३२॥
[१५]स्थण्डिले वा प्रकर्तव्यम् अग्निकार्यं समाचरेत्।
[१६]खदिराश्वत्थबिल्वं च पालाशं वह्निमेव च॥ ३३॥

---

[१] 'ऋ' मातृकायां श्लो० २७ द्वितीयपादमारभ्य श्लो० २८ द्वितीयपादान्तो भागो न दृश्यते।
[२] परिचारकरोद्धृतम् ] अ; परिचारकदुद्धृतम् – ई; परिचारकमुद्धृतम् – ऊ, झ.
[३] समुच्चरेत् ] अ, ऊ; समुच्चरन् – ई, झ.
[४] विधिवन्निवेद्य ] सं० पाठः; नैवेद्यं – अ; निवेद्यं – ई, ऊ, ऋ, झ.
[५] कुम्भे ] सं० पाठः; कुम्भम् – अ, ई, ऊ, ऋ, झ.
[६] अर्चयेद्गन्धपुष्पकैः ] अ, ऋ; अर्चयेद्गन्धपुष्पकम् – ई, झ; अर्चये गन्धपुष्पकैः – ऊ.
[७] कुर्याद् ] अ, ई, ऊ, ऋ; कृत्वा – झ.
[८] अग्निकार्योक्तमार्गतः ] अ, ई, ऊ, झ; अग्निकार्योक्तमाचरेत् – ऋ.
[९] समिदाज्यचरून् ] अ, ऊ, ऋ, झ; समिदाज्यचरुं – ई.
[१०] हुनेत् ] सं० पाठः; जपेत् – अ .
[११] सोष्णीषः सोत्तरीयश्च ] ई; सोष्णीषं चोत्तरीयं च – अ, ऊ, ऋ; सोष्णीषं सोत्तरियं च – झ.
[१२] 'ऋ' मातृकायां श्लो० ३१ उ०-३२ उ० भागो न दृश्यते।
[१३] वेद्यां वै ] अ, ई; वेद्यांशो – ऊ; वैद्यां वै – झ.
[१४] सर्वयोनिकम् ] ई, झ; सर्व(र्प)योनिकम् – अ; सर्वयोनिकः – ऊ.
[१५] स्थण्डिले ] अ, ऊ, ऋ; स्थण्डिलं – ई, झ.
[१६] खदिराश्वत्थ० ] ई; खादिरं वाथ – अ, ऊ, ऋ, झ.

[1]समिदाज्यान्नकैर्मन्त्रैर्होमं कुर्यात्पृथक् पृथक्।
गौरीगायत्रिमन्त्रेण घृतं हुत्वा विशेषतः॥ ३४॥
अग्न्याधानादिकं सर्वं [2]मण्डपे पूजयेत् क्रमात्।

[प्रातःकार्यम्]

प्रभाते विमले होमं कृत्वा [3]पूर्वं [4]तु शक्तिना॥ ३५॥
आचार्यं पूजयित्वा तु वस्त्रहेमाङ्गुलीयकैः।
दैवज्ञं पूजयित्वा तु [5]भक्तांश्च परिचारकैः ॥ ३६॥

[बिम्बस्थापनम्]

उत्थाप्य [6]शयनाद्गौरीं तरुणालयमध्यमे।
[7]संस्थाप्य गौरीं [8]सुस्निग्धां पीठस्य पदमध्यमे॥ ३७॥
कुम्भस्थां गौरीं [9]संस्थाप्य गौरीमन्त्रेण विन्यसेत्।
[10]वामादिशक्तितः कुम्भं [11]तत्तत्स्थानेऽभिषेचयेत्॥ ३८॥
मन्त्रपुष्पं न्यसेद्धीमान् मन्त्रान्नं च निवेदयेत्।
धूपं दीपं [12]ददेद्गौर्यै प्रभूतहविषं ददेत्॥ ३९॥
होमं नित्योत्सवं कुर्याद् [13]भोगाङ्गयजनं क्रमात्।
[14]महोत्सवं तु देवेश्याः सर्वसम्पत्करं नृणाम्॥ ४०॥

---

[1] समिदाज्यान्नकैर्मन्त्रैर् ] ई; समिदाज्यान्तकैर्मन्त्रैर् – अ; समिदाज्यान्नमात्रैश्च – ऊ; समिदाज्यान्न(न्त)कैर्मन्त्रैर् – ऋ; समिधाज्यान्नकैर्मन्त्रैर् – झ.

[2] मण्डपे ] सं० पाठः; मण्डपं – अ, ई, ऊ, ऋ, झ.

[3] पूर्वं ] सं० पाठः; पूर्वे – अ, ई, ऊ, ऋ, झ.

[4] तु शक्तिना ] ई; शक्तिना – अ; तु शक्तिनाम् – ऊ, झ; तु...नाम् – ऋ.

[5] भक्तांश्च ] झ; भक्तानां – अ, ई, ऊ, ऋ.

[6] शयनाद्गौरीं ] अ, ऋ, झ; शयनं गौरीं – ई, ऊ.

[7] संस्थाप्य ] अ, ई, ऊ, ऋ; संस्नाप्य – झ.

[8] सुस्निग्धां ] ऋ; सुस्निग्धं – अ, ई, ऊ, झ.

[9] संस्थाप्य ] ऊ, झ; संस्नाप्य – अ, ई, ऋ;.

[10] वामादिशक्तितः ] अ; वामादिशक्तिना – ई, ऊ, ऋ, झ.

[11] तत्तत्स्थानेऽभिषेचयेत् ] झ; तत्तत्स्थानाभिषेचनम् – अ, ई, ऊ; तन्म...स्थानाभिषेचनम् – ऋ.

[12] ददेद्गौर्यै ] अ, ऊ, ऋ; ददेद्गौरीं – ई, झ .

[13] भोगाङ्गयजनं क्रमात् ] ई, ऊ, ऋ; भोगाङ्गं यजनात्क्रमात् – अ; भोगाङ्गं यजनं क्रमात् – झ.

[14] महोत्सवं तु देवेस्याः] सं० पाठः; देवेशिं – अ ; ०देवेशं – ई; देवेशीम् – ऊ, ऋ.

[नवीकृतप्रासादे गौर्याः पुनरानयनम् ]

प्रासादं पूर्ववत्कृत्वा मूले गौरीं सुयोजयेत् ।
संप्रोक्षणं ततः कुर्यात् प्रायश्चित्तं समाचरेत् ॥ ४१ ॥

॥ [1]इति सूक्ष्मशास्त्रे गौरीबालस्थापनविधिः सप्तपञ्चाशत्तमः पटलः ॥

---

[1] इति सूक्ष्मशास्त्रे गौरीबालस्थापनविधिः सप्तपञ्चाशत्तमः पटलः सं० पाठः; अ : इति सूक्ष्मशास्त्रे गौरीबाललिङ्गस्थापनविधिः षट्पञ्चाशत्पटलः ॥; ई : इति सूक्ष्मशास्त्रे गौरीसंकोचविध्येकपञ्चाशः पटलः ॥; ऊ : इति सूक्ष्मागमे गौरीबालस्थापनविधिपटलो षट्पञ्चाशतितमः ॥; ऋ : इति सूक्ष्मशास्त्रे गौरीबाललिङ्गस्थापनपटलः पञ्चाशः ॥; ञ : इति सूक्ष्मशास्त्रे गौरिबालस्थापनं नाम सप्तषष्टिपटलः ॥

## [अष्टपञ्चाशत्तमः पटलः[१]]

## [गौरीसंप्रोक्षणविधिः]

### [यागमण्डपकृत्यम्]

पञ्चगव्येन संप्रोक्ष्य प्रविशेद् [२]यागमण्डपम्।
स्थण्डिलं शालिभिः कुर्याद् [३]अष्टद्रोणैश्च शालिभिः ॥ १ ॥
[४]तण्डुलैश्च तिलैश्चैव लाजैः पुष्पैश्च दर्भकैः।
तन्मध्ये नलिनं [५]लिख्य [६]साष्टपत्रं सकर्णिकम् ॥ २ ॥
शिरसा वाहयित्वा तु प्रदक्षिणमथाचरेत्।
सर्वातोद्यसमायुक्तं [७]वेदघोषसमन्वितम् ॥ ३ ॥
शनैः प्रदक्षिणं कुर्याद् [८]उमासूक्तं [९]जपेत् क्रमात्।
मण्डपं तु प्रविश्याथ [१०]वेदिकोर्ध्वे तु विन्यसेत् ॥ ४ ॥
गौरीबीजमनुस्मृत्य कुम्भं तत्रैव [११]पूजयेत्।
अभितः स्थापयेत्कुम्भान् [१२]वामादिशक्तयस्तथा ॥ ५ ॥

---

[१] अयं पटलः अ[१] (टि.१९१, पृ० ३१२-३१४), अ[२] (पृ० ३२१-३२३), ई[१] (टि.३६, पृ० २२६-२२८), ई[२] (पृ० २३७-२३९), ऊ (टि.३८, पृ० ७०५-७०९), ऋ[१] (टि.९७, पृ० २५७-२५८), ऋ[२] (पृ० २६५-२६७), ज (टि.१००३, पृ० २१९-२२१), झ (टि.१०१६, पृ० ६६-६८) इत्येतेषु कोशेषु दृश्यते। 'अ, ई, ऋ' मातृकासु अयं पटलो द्विवारं दृश्यते, प्रथमवारे गौरीसंकोचविधिरिति, द्वितीयवारे तु गौरीसंप्रोक्षणविधिरिति; '१ पू०' श्लोकप्रथमपादं पटलपुष्पिकां च विहाय उभयत्रापि पाठौ समानावेव दृश्येते।

[२] यागमण्डपम् ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; यागमण्डपे – ऊ.

[३] अष्टद्रोणैश्च शालिभिः ] अ[२], ई[१-२], ऊ, ऋ[२], ज, झ; अष्टद्रव्यैश्च शोभनैः – अ[१], ऋ[१].

[४] तण्डुलैश्च तिलैश्चैव लाजैः पुष्पैश्च दर्भकैः ] अ[१], ई[१], ऋ[१], ज; तण्डुलैश्चैव लाजैश्च दर्भैः पुष्पैः परिस्तरेत् – अ[२], ऋ[२]; तण्डुलैश्च यवैश्चैव लाजपुष्पैश्च दर्भकैः -ई[२]; स्थण्डिलैश्च तिलैश्चैव लाजैः पुष्पैश्च दर्भकैः - ऊ; तण्डुलैश्चैव लाजैश्च तिलैर्दर्भैश्च पुष्पकैः - झ.

[५] लिख्य ]अ[१-२], ई[१-२], ऋ[२], ज,झ; कुर्यात् -ऊ.'ऋ[१]' मातृकायां श्लो०२ चतुर्थपादमारभ्य श्लो०३ तृतीयपादपर्यन्तो भागो न दृश्यते।

[६] साष्टपत्रं ] अ[१], ई[१], ऊ; अष्टपद्मं – अ[२]; अष्टपत्रं – ई[२], ऋ[२], झ; अष्टपत्र – ज.

[७] वेद०] अ[१]. ब्रह्म० ] अ[२], ई[१-२], ऊ, ऋ[२], ज, झ;'ऋ[१]' मातृकायां लुप्तम्।

[८] उमासूक्तं ] ई[१-२], ऊ, ऋ[१], ज, झ; महासूत्रं – अ[२]; महासूक्तं – ऋ[२]. 'अ[१]' मातृकायां लुप्तम्।

[९] जपेत् ] अ[२], ई[१-२], ऊ, ऋ[१], ऋ[२]; जपन् – अ[१]; जपं – ज; नपेत् – झ.

[१०] वेदिकोर्ध्वे तु ] अ[१], ई[१], ऊ, ज; वेदिकोपरि – अ[२], ई[२], ऋ[२], झ; विदिकोर्ध्वे विन्य० – ऋ[१].

[११] पूजयेत् ] अ[१-२], ई[१-२], ऊ, ऋ[२], ज, झ; विन्यसेत् – ऋ[१].

[१२] वामादिशक्तयस्तथा ] अ[१], ई[१-२], ऊ; वामादीः शक्तयस्तथा – अ[२], ऋ[१], ऋ[२]; वामादिशक्तयः क्रमात् – ज.

स्वनाममन्त्रैरभ्यर्च्य गन्धपुष्पादिभिर्यजेत्।
[1]तत्तन्मूर्त्याकृतिं ध्यात्वा स्वस्वबीजेन [2]कुम्भके॥ ६॥
[3]गन्धपुष्पादिभिश्चैव पूजयेत्तु निवेद्यकम्।
ऋगाद्यध्ययनं [4]कुर्याद् उमासूक्तं [5]जपेत् क्रमात्॥ ७॥
श्रीसूक्तं रुद्रसूक्तं च [6]ततः पुरुषसूक्तकम्।
[7]शान्तिसूक्तं जपेद्धीमान् [8]क्रमेण तु विशेषतः॥ ८॥

[अग्निकार्यम्]

[9]आचार्यो मूर्तिपैः सार्धं ततो होमं समाचरेत्।
अग्न्याधानादिकं सर्वम् [10]अग्निकार्योक्तमाचरेत्॥ ९॥
[11]समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान्।
[12]होमद्रव्याणि [13]सप्तैते जुहुयाद्वै क्रमेण तु॥ १०॥
[14]पलाशोदुम्बराश्वत्थ[15]बिल्वं च [16]खदिरं तथा।
[17]सद्येन जुहुयादाज्यम् [18]अघोरेण चरुं हुनेत्॥ ११॥

---

[1] तत्तन्मूर्त्याकृतिं ] अ[१-२], ई[२], ऊ, ऋ[१]; तत्तन्मूर्त्याकृतं – ई[१], ज; तत्तन्मुक्त्याकृतिं – झ.
[2] कुम्भके ] अ[१-२], ई[१-२], ऊ, ऋ[२]; कुम्भकैः – ज, झ. 'ऋ[१]' मातृकायां लुप्तम्।
[3] 'ऋ[१]' मातृकायां '७'-तमः श्लो० न दृश्यते।
[4] कुर्याद् ] अ[१-२], ई[१-२], ऊ, ऋ[२]; कृत्वा – ज, झ.
[5] जपेत्क्रमात् ] अ[२], ई[१-२], ऊ, ऋ[२], ज, झ; शतं जपेत् – अ[१].
[6] ततः पुरुषसूक्तकम् -] अ[२]; पुरुषसूक्तं त्रियम्बकम् ] अ[१], ई[१-२], ऊ, ऋ[१], झ; पुरुषसूक्तत्रयम्बकम्-ज. 'ऋ[२]' मातृकायां लुप्तम्।
[7] शान्तिसूक्तं ] झ; शान्तिद्वयं – अ[१-२], ई[१-२], ऋ[१-२], ज; शान्तद्वयं – ऊ.
[8] क्रमेण ] ई[२]; दक्षिणे – अ[१-२], ई[१], ऊ, ऋ[१-२], ज, झ.
[9] 'अ[१], ऊ, ऋ[१]' मातृकासु - श्लो० '९' न दृश्यते।
[10] अग्निकार्योक्तमाचरेत् ] अ[२], ऋ[२], ज, झ; अग्निकार्योक्तमार्गतः – ई[१], ई[२].
[11] समिदाज्यचरून् ] अ[१-२], ऋ[१], ऋ[२]; समिदाज्यचरुं – ई[१], ई[२]; समिधाज्यचरून् – ऊ, ज; समिधाज्यचरू – झ.
[12] 'ऊ' मातृकायां श्लो० '१० उ०' न दृश्यते।
[13] 'वै सप्त' इति चेत् साधु ।
[14] पलाशो० ] अ[१-२], ऊ, ऋ[१-२], ज, झ; पलाशौ० – ई[१], ई[२].
[15] ०बिल्वं च ] अ[१], ई[१-२], ऊ, ऋ[१], ज; ०बिल्वैश्च – अ[२], ऋ[२], झ.
[16] खदिरं ] अ[१], ई[१-२], ऊ, ऋ[१], ऋ[२]; खदिरैः – अ[२]; खादिरं – ज; खादिरैः – झ.
[17] सद्येन ] अ[२], ई[२], ऋ[२]; मूलेन – अ[१], ई[१], ऊ, ऋ[१], ज, झ.
[18] 'ऋ[१]' मातृकायां श्लो० ११ चतुर्थपादमारभ्य श्लो० १२ तृतीयपादपर्यन्तो भागो न दृश्यते।

[1]लाजं वामेन मन्त्रेण [2]सर्षपं कवचेन तु।
[3]यवं हुत्वा तु शिखया [4]तिलमन्त्रेण होमयेत्॥ १२॥
[5]शतस्य त्रितयं वापि तस्यार्धं [6]वार्धमेव वा।
प्रत्येकं जुहुयाद्धीमान् द्रव्यान्ते व्याहृतिं हुनेत्॥ १३॥
[7]सर्वद्रव्यसमायुक्तं [8]हव्यवाहेन होमयेत्।
एवं जागरणं रात्रौ प्रभाते प्रोक्षणं कुरु॥ १४॥

[अधिवासानन्तरदिवसकृत्यम्]

आचार्यो मूर्तिपैःसार्धं विधिना स्नानमाचरेत्।
[9]पूर्णाहुतिं च शिरसा हुत्वाग्निं च विसर्जयेत्॥ १५॥
[10]शक्तिकुम्भं समुद्धृत्य [11]कृत्वा हर्म्यप्रदक्षिणम्।
सर्वातोद्यसमायुक्तं सर्वालङ्कारसंयुतम्॥ १६॥
[12]पुत्रभ्रातृकलत्रैश्च सर्वसम्पत्सुखावहम्।

[गौरीप्रतिष्ठा]

गर्भगेहं प्रविश्याथ स्थापयेत् स्थण्डिलोपरि॥ १७॥
सुमुहूर्तं निरीक्ष्याथ दैवज्ञः [13]संनिवेदयेत्।

---

[1] 'ई[२]' मातृकायां श्लो० १२ पू०-१३ उ० भागो न दृश्यते।
[2] सर्षपं ] अ[१], ई[१], ऊ, ऋ[२], ज, झ; सर्षपान् – अ[२].
[3] यवं हुत्वा तु शिखया ] अ[२], ई [१], ज, झ; एवं हुत्वा तु शिरसा – अ[१]; एवं हुत्वा तु शिखया – ऊ; यवं हुत्वा - शिखया तु – ऋ[२].
[4] तिलमन्त्रेण ] अ[२], ज, झ; मूलमन्त्रेण – अ[१]; तिलं मन्त्रेण – ई[१]; तिलमन्त्रेण – ऊ, ऋ[२]; 'ऋ[१]' मातृकायां लूसम्।
[5] शतस्य त्रितयं ] अ[१], ई[१], ऊ, ऋ[१]; शतं वा त्रिशतं – अ[२], ऋ[२]; शतस्य त्रतयं – ज; शतस्य त्रिशतं – झ.
[6] वार्धमेव ] अ[१-२], ऊ, ऋ[१-२], ज, झ; चार्धमेव – ई[१].
[7] सर्व० ] अ[१-२], ई[१-२], ऋ[१-२], ज, झ; एवं – ऊ.
[8] हव्यवाहेन होमयेत् ] ई[१], ज; व्यवाहेन तु होमयेत् – अ[१], ऋ[१]; हव्यं वा होमयेद्बुधः – अ[२], ऊ; हव्यं वामेन होमयेत् – ई[२]; द्रव्यं वा होमयेद्बुधः – ऋ[२]; हव्यवामेन होमयेत् – झ.
[9] 'ऋ[१]' मातृकायां श्लो० १५ उ०-१६पू० भागो न दृश्यते।
[10] शक्ति० ] अ[१], ई[१-२], ऊ, ज; शान्ति० – अ[२], ऋ[२], झ.
[11] कृत्वा ] अ[१-२], ई[१-२], ऊ, ऋ[२], ज; हुत्वा – झ.
[12] पुत्रभ्रातृ० ] अ[२], ई[१-२], ऊ, ऋ[२], ज, झ; पितृभ्रातृ० – अ[१], ऋ[१]; पुत्रपौत्र० – ऊ.
[13] संनिवेदयेत् ] ऊ; संनिवेशयेत् - अ[१-२], ई[१-२], ऋ[१],ऋ[२], ज, झ.

[1]तत्रैव विन्यसेद्गौरीम् [2]अष्टत्रिंशत्कलां न्यसेत्॥ १८॥
[3]कुम्भान्मन्त्रं समादाय [4]गौरीमध्ये तु विन्यसेत्।
[5]शक्त्यादिशक्तिपर्यन्तं [6]कुम्भात् पीठे तु विन्यसेत्॥ १९॥
मन्त्रपुष्पं ततो दत्वा [7]मन्त्रान्नं च निवेदयेत्।
[8]नववस्त्रेण संवेष्ट्य [9]गन्धपुष्पस्त्रगादिभिः॥ २०॥
[10]प्रभूतहविषं दत्वा ताम्बूलं च निवेदयेत्।
मुखवासं [11]ददेद्धीमान् चुलूकोदकसंयुतम्॥ २१॥
ऋगाद्यध्ययनं कुर्याद् [12]स्तोत्रं नृत्तं च वाद्यकम्[13]।
[14]प्रोक्षणान्ते विशेषेण [15]उत्सवं सम्यगाचरेत्॥ २२॥
[16]एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्॥ २२ १/२॥

॥ इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिरष्टपञ्चाशत्तमः पटलः[17]॥

---

[1] तत्रैव विन्यसेद्गौरीम् ] अ[१], ई[१], ऊ, ऋ[१], झ; गौरिमिष्टं त्रिमात्रेण – अ[२], ई[२]; गौरीमष्टन्विमात्रेण – ऋ[२].
[2] अष्ट० ] अ[१-२], ई[१], ऊ, ऋ[१-२], ज, झ; एक० – ई[२].
[3] कुम्भान्मन्त्रं ] अ[२], ई[२], ऋ[२], झ; कुम्भाद्बीजं – ऊ. 'अ[१], ई[१], ऋ[१], ज' मातृकासु श्लो० '१९' न दृश्यते।
[4] गौरी० ] ऊ, ऋ[२]; गौरीं – अ[२], ई[२]; गौरि० – झ.
[5] 'ऊ, ऋ [२]' मातृकयोः श्लो०'१९ उ०' न दृश्यते।
[6] कुम्भात् पीठे ] सं० पाठः; कुम्भे पीठं – अ[२], ई[२], झ.
[7] 'ऋ[१]' मातृकायां श्लो० २० द्वितीयपादमारभ्य श्लो० २२ प्रथमपादपर्यन्तो भागो न दृश्यते।
[8] 'अ[१]' मातृकायां श्लो०'२०उ०-२१पू०' भागो न दृश्यते।
[9] गन्धपुष्पस्त्रगादिभिः ] अ[२], ई[१-२], ऋ[२], ज, झ; गन्धपुष्पादिभिर्दधेत् – ऊ.
[10] प्रभूतहविषं ] अ[२], ई[२], ऋ[२], ज; प्रभूतं च हविर् – ई[१]; प्रभातहविषं – झ. 'ऊ' मातृकायां श्लो० १९ पू० न दृश्यते।
[11] ददेद्धीमान् ] अ[१-२], ई[१], ऊ, ऋ[२], ज, झ; ददेद्देवीं – ई[२].
[12] स्तोत्रं नृत्तं ] अ[२], ऊ, झ; गीतं नृत्यं – अ[१]; स्तोत्रनृत्तं – ई[१-२], ऋ[२], ज. 'ऋ[१]' मातृकायां लूप्तम्।
[13] 'ज, झ' मातृकयोः श्लो० २२ पू०-२२ उ० प्रोक्षणान्ते विशेषेण स्नपनैरभिषेचयेत्' इत्येकमर्धमधिकं दृश्यते।
[14] प्रोक्षणान्ते ] अ[१], ई[१-२], ऊ, ऋ[१-२], ज, झ; प्रोक्ष्यान्ते तु – अ[२].
[15] उत्सवं ] अ[२], ई[१-२], ऋ[२], झ; चोत्सवं – अ[१], ऊ, ऋ[१]; उत्सव्यं – ज.
[16] 'अ[१], ई[१], ऊ, ऋ[१], ज' मातृकासु श्लो० २२ पू० न दृश्यते।
[17] इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिःअष्टपञ्चाशत्तमः पटलः सं० पाठः]; अ[२]: इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिस्सप्तपञ्चाशत्पटलः॥; ई[२]: इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिद्विपञ्चाशत्पटलः॥; ऊ: सूक्ष्मागमे गौरीसंप्रोक्षणविधिपटलो पञ्चपञ्चाशतिः॥; ऋ[२]: इति सूक्ष्मशास्त्रे गौरीसंप्रोक्षणविधिः सप्तपञ्चाशः पटलः॥; ज: इति सूक्ष्मशास्त्रे गौरिसंकोचविधिं द्विचत्वारिंशत्पटलः॥; झ: इति सूक्ष्म .... गौरिसंप्रोक्षणं नाम अष्टषष्टिपटलः॥

## [एकोनषष्टितमः पटलः[1]]

### [गौरीव्रतविधिः]

गौरीव्रतं प्रवक्ष्यामि शृणु त्वं तत्प्रभञ्जन ।
[2]अकालमृत्युशमनं [3]सर्वसौभाग्यदायकम् ॥ १ ॥
सर्वशत्रुप्रशमनं सर्वैश्वर्यप्रदायकम् ।
अभीष्टफलदं नित्यं सत्यं सत्यं प्रभञ्जन ॥ २ ॥

[व्रतकालः]

श्रावणे पूर्वपञ्चम्यां [4]प्रोष्ठे पूर्वत्रयोदशी ।
[5]आश्विने पूर्वनवम्यां कार्तिके पूर्वसप्तमी ॥ ३ ॥
[6]आर्द्रमासे [7]पूर्णिमायां पुष्ये पूर्वचतुर्दशी ।
[8]माघे त्वपरपञ्चम्यां फाल्गुने [9]त्वपराष्टमी ॥ ४ ॥
चैत्रे [10]कृष्णदशम्यां तु वैशाखे कृष्णसप्तमी ।
ज्येष्ठे पूर्वद्वितीयायाम् आषाढे तु सिताष्टमी ॥ ५ ॥
अथवा [11]गौरीनक्षत्रे मासे मासे विशेषतः ।
[12]गौरीव्रतमनुष्ठेयं विधिनानेन यत्नतः ॥ ६ ॥

[व्रतमण्डपकल्पनम्]

पर्वताग्रे नदीतीरे पुष्पोद्यानेऽथवा गृहे ।

---

[1] अयं पटलः अ (टि.१९१, पृ० ३२३-३२६), ई (टि.३६, पृ० २३९-२४२), ऊ (टि.३८, पृ० ७१९-७२१), ऋ (टि.९७, पृ० २६७-२७०), झ (टि.१०१६, पृ० ६८-७१) इत्येतेषु कोशेषु दृश्यते।

[2] अकालमृत्युशमनं ] अ, ऋ; अकालमृत्युजयदं – ई; अकालमृत्युशयनं – ऊ; अकाले मृत्युशमनं – झ.

[3] सर्व० ] अ, ऊ, ऋ; पुत्र० – ई, झ.

[4] प्रोष्ठे पूर्व० ] अ, ई, ऋ, झ; प्रोष्ठपूर्वे – ऊ.

[5] आश्विने पूर्वनवम्यां ] सं० पाठः ;

[6] आर्द्र० ] अ, झ ; आर्द्रा० - ई, ऊ, ऋ .

[7] पूर्णिमायां ] सं० पाठः ; तु पूर्णायां – अ , ई , ऊ, ऋ, झ.

[8] माघे ] अ, ई, ऊ, ऋ; मघे – झ.

[9] त्वपराष्टमी ] ई, ऊ, ऋ, झ; तु पराष्टमी – अ.

[10] कृष्णदशम्यां ] सं० पाठः कृष्णदशमी - अ , ई , ऊ, ऋ, झ.

[11] गौरी० ] सं० पाठः; गौरि – अ, ई, ऊ, ऋ, झ.

[12] गौरीव्रत० ] अ, ई, झ; गौरीघृत० – ऊ.

[1]देव्यालयाग्रे पश्चाद्वा गोष्ठे देवालयेऽपि वा ॥७॥
मण्डपं कारयेद्विद्वान् [2]पञ्चदशकरायतम् ।
[3]आयामसमविस्तारं [4]षड्त्रिंशद्गात्रसंयुतम् ॥८॥
मण्डपं वा प्रपां वापि [5]कूटाकारमथापि वा ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥९॥
वितानध्वजसंयुक्तं दर्भमालाभिरावृतम् ।
तरङ्गवेष्टनोपेतं [6]दर्पणैरुपशोभितम् ॥१०॥
नानाश्चर्यगुणोपेतं मण्डपं परिकल्पयेत् ।

[वेदिकाकल्पनम् ]

तन्मध्ये त्वेकपार्श्वे वा वेदिकां परिकल्पयेत् ॥११॥
[7]शिखिपादसमाकारं दिशि भद्रसमन्वितम् ।
विस्तारार्धसमुत्सेधं दर्पणोदरसंनिभम् ॥१२॥
मध्ये [8]वेद्युन्नतं तद्वद् [9]उपवेदिसमावृतम् ।

[वेदिकायां गौरीस्थापनं प्रदक्षिणं च]

[10]मध्ये [11]गौरीं तु [12]संस्थाप्य [13]स्नपनैरभिषेचयेत् ॥१३॥
पुण्याहं वाचयेत्तत्र कौतुकं बन्धयेद्गुरुः ।
नैवेद्यं दापयेत्पश्चाद्यात्राहोमं समाचरेत् ॥१४॥

---

[1] देव्यालयाग्रे पश्चाद्वा ] अ; देव्यालयाग्रेऽपि च वा – ई; देवालयाग्रे . . . . – ऊ; देव्यालया . . . . पश्चाद्वा – ऋ; देव्यागृहालयेद्वा पश्चाद् – झ.

[2] पञ्चदश० ] ई, ऊ, झ; पञ्चाशत० – अ; पञ्चादश० – ऋ.

[3] आयामसमविस्तारं ] ई; आयामविस्तराभ्यां तु – ऊ, ऋ; आयामविस्ताराभ्यां तु – अ; आयामसमविस्ता . . . . – झ.

[4] षड्त्रिंशद्गात्रसंयुतम् ] अ, ई, ऋ; षड्त्रिंशद्गात्रसंयुतः – ऊ; . . . . गात्रसंयुतम् – झ.

[5] कूटाकार० ] ई, झ; कूटागार० – अ, ऋ; कूटहार० – ऊ.

[6] दर्पणैरुपशोभितम् ] अ, ई, ऋ, झ; दर्पणोदरसंनिभम् – ऊ.

[7] 'ऊ' मातृकायां श्लो० १२ पू०-२७ उ० भागो न दृश्यते। 'झ' मातृकायां लुप्तम्।

[8] वेद्युन्नतं ] अ, ऋ, झ; स्यादुन्नतं – ई.

[9] उपवेदिसमावृतम् ] अ, ऋ; उपवेदीसमन्वितम् – ई; उपवेदिसमायुतम् – झ.

[10] 'अ, ई, ऋ' मातृकासु श्लो० १३उ०-१५पू० भागो न दृश्यते। एष भागः 'झ' मातृकायामेव दृश्यते।

[11] गौरीं ] सं० पाठः; गौरि – झ.

[12] संस्थाप्य ] सं० पाठः; संस्थाप्य – झ.

[13] स्नपनैरभिषेचयेत् ] सं० पाठः; स्नपै . . . .येत् - अ, ई, ऊ, ऋ, झ.

धामप्रदक्षिणं कृत्वा मण्डपं तु प्रवेशयेत् ।

[मण्डपे गौरीपूजा]

[1]पाद्यादिकं ततो दत्वा [2]श्रुत्वा देवीपराक्रमम् ॥ १५ ॥
[3]कारुण्यं हास्यसंयुक्तं वीरं वा रौद्रमेव वा ।
श्रृङ्गारचरितं वापि श्रावयेद्देविसंनिधौ ॥ १६ ॥
पुनः संपूज्य देवेशीं धूपदीपादिना ततः ।
वेदैश्च विविधैः स्तोत्रैर्नृत्तगीतादि[4]वाद्यकैः ॥ १७ ॥
प्रदक्षिणनमस्कारैः संतोष्य परमेश्वरीम् ।
ततः पूर्वोक्तमार्गेण [5]पानीयार्घ्यादिकं ददेत् ॥ १८ ॥
[6]ततोऽस्तमयवेलायां सायरक्षां प्रकल्पयेत् ।
[7]आरात्रिकं ततो दत्वा [8]पञ्चविंशतिसंख्यकम् ॥ १९ ॥
भस्म दत्वा स्वबीजेन दर्पणं [9]दर्शयेत् ततः ।
ततो [10]जयाकुलेनैव [11]नीराजनादिभिः [12]यजेत् ॥ २० ॥
[13]देव्यग्रे कल्पयेन्नृत्तं भरतोक्तं यथाक्रमम् ।

[प्रार्थना]

[14]गौरीचिह्नं समादाय [15]मञ्जूषे स्थाप्य देशिकः ॥ २१ ॥

---

[1] पाद्यादिकं ततो ] झ; सुभद्रं सर्वतो – अ; वसु . . . . तो – ई; सु . . . . तो – ऋ.
[2] श्रुत्वा देवी० ] सं० पाठः; . . . .देवी० – अ; कृत्वा देव० – ई; श्रुत्वा देव० – ऋ; श्रत्वा देवि० – झ.
[3] कारुण्यं हास्यसंयुक्तं ] सं० पाठः; कारुण्यं हास्यवृत्तं वा – ऋ, झ; कारुण्यं हास्यं वृत्तं वा – अ; कारुण्यहास्यसंयुक्तं – ई.
[4] ०वाद्यकैः ] अ, ऋ; ०चार्भकैः – ई; ०वाद्यैकैः – झ.
[5] पानीयार्घ्यादिकं ] ऋ; पानीयादिमकं – अ; पानीयाश्वादिकं – ई. 'झ' मातृकायां लूसम्।
[6] ततोऽस्तमय० ] अ; ततोऽस्तमन० – ई; तोऽस्तमय० – ऋ; ततो हुतमान० – झ (छन्दोभङ्गः).
[7] 'अ, ऋ' मातृकयोः श्लो० १९उ०-२०उ० भागो न दृश्यते। अयं भागः 'ई, झ' मातृकयोरेव दृश्यते।
[8] पञ्चविंशतिसंख्यकम् ] ई; पञ्चविंशतिसंख्यका – झ.
[9] दर्शयेत् ] झ; दर्शनं – ई.
[10] जया० ] ई; जाया० – झ.
[11] नीराजनादिभिः ] सं० पाठः; नीराजनकृति – ई; 'झ' मातृकायां लूसम्।.
[12] यजेत् ] सं० पाठः; त्यजेत् – ई, झ.
[13] देव्यग्रे ] ई; देव्याग्रे – अ, झ; देवाग्रे – ऋ
[14] गौरीचिह्नं ] सं० पाठः; गौरीगणं – अ, ई, ऋ; गौरिच्छिन्न – झ.
[15] मञ्जूषाशब्दः पुंलिङ्गे प्रयुक्तः ।

[1]चिह्ने संपूज्य [2]देवेशीं सर्वदेवसमन्विताम् ।
आहूय दीक्षितान् सर्वान् तानालोक्य [3]विचक्षणः ॥ २२ ॥
[4]व्यसनव्याधिदुर्भिक्षऋणादिक्लेशशत्रवः ।
[5]सर्वे नश्यन्तु [6]युष्माकं महादेव्याज्ञया सदा ॥ २३ ॥
इत्युक्त्वा तान् विसृज्याथ [7]कौतुकं विसृजेज्जले ।
ततः [8]साधकमालोक्य [9]पापभक्षणमन्त्रतः ॥ २४ ॥
[10]दार्वासने समारोप्य [11]अङ्गेऽक्षरकलां न्यसेत् ।
गौरीचिह्नं समादाय साधकस्य प्रदापयेत् ॥ २५ ॥
गौरीमन्त्रं [12]जपन्नेव [13]साधकः शिरसा वहेत् ।

[व्रतफलम्]

चिह्नदर्शनमात्रेण सर्वपापं विनश्यति ॥ २६ ॥
संग्रामसमये [14]नेतुर्मृगयाने [15]महद्भये ।
एवमादिषु कालेषु यो नरः शिरसा वहेत् ॥ २७ ॥
तस्य देहे [16]वसेद्गौरी सत्यं सत्यं प्रभञ्जन[17] ।

---

[1] चिह्ने ] अ, ई, ऋ; छिन्ने – झ.
[2] देवेशीं सर्वदेवसमन्विताम् ] अ, ई, ऋ; देवीशं सर्वदेवसमन्वितम् – झ.
[3] विचक्षणः ] ऋ, झ; विचक्षणाः – अ; विचक्षणान् – ई.
[4] व्यसनव्याधिदुर्भिक्ष ऋणादिक्लेश० ] ई, ऋ; व्यसनव्याधिदुर्भिक्षं ऋणाधिक्ये च – अ; व्यसनं व्याधिदुर्भिक्षं ऋराणिक्लेश० – झ.
[5] सर्वे नश्यन्तु ] अ, ई, ऋ; सर्वरश्लन्ति – झ.
[6] युष्माकं ] अ; युष्मभ्यं – ई, ऋ, झ.
[7] कौतुकं विसृजेज्जले ] सं० पाठः; कैलासे विसृजेज्जले – अ; कैलासं विसृजेज्जले – ई; कैलासं विसृ . . . . जले – ऋ; कैलानारं क . . . . जलैः – झ.
[8] साधकमालोक्य] अ, ई, ऋ; संपां सामालोक्य – झ.
[9] पापभक्षणमन्त्रतः ] ई, ऋ; पापं भक्षणमन्त्रतः – अ; पापभक्षणयत्रतः – झ.
[10] दार्वासने ] अ, ई, ऊ; दावासने – झ.
[11] अङ्गेऽक्षरकलां ] सं० पाठः; अंगाक्षरकलां – अ, ई, ऋ, झ.
[12] जपन्नेव ] अ, ऋ, झ; जपेनैव – ई.
[13] साधकः शिरसा ] अ, ऋ; साधकस्य शिरो – ई; साधका शिरसा – झ.
[14] नेतुर्मृगयाने ] सं० पाठः; नेत्र० – ई, ऋ; नेत्रे – अ.
[15] महद्भये ] अ, ऋ; महाभये – ई; महद्भयम् – झ.
[16] वसेद्गौरी ] अ, ई, ऊ, ऋ; वस्याद्गौरि – झ.
[17] 'झ' मातृकायां श्लो० २८पू०-२८उ०' मध्ये 'नवाहं व . . . . त्रिध्यन्तकं कियात्' इत्येकोऽर्धश्लोकोऽधिको दृश्यते।

बहुनोक्तेन किं देवी [१]सांनिध्यं कुरुते सदा ॥२८॥

[दक्षिणा]

सर्वेषां दक्षिणां दद्यादाचार्यं पूजयेत्तदा ।
गौरीव्रतमिदं प्रोक्तं परं शिवव्रतं शृणु ॥२९॥

॥इति सूक्ष्मशास्त्रे गौरीव्रतविधिरेकोनषष्टितमः पटलः[२]॥

---

[१] सांनिध्यं कुरुते सदा – ऊ, ऋ; . . . . कुरु मे सदा – अ; संनिधिं कुरुते सदा – ई; संनिधीं कुरुते सदा – झ.

[२] इति सूक्ष्मशास्त्रे गौरीव्रतविधिरेकोनषष्टितमः पटलः ] सं० पाठः; अः इति सूक्ष्मशास्त्रे गौरीव्रतविधिरष्टपञ्चाशत्पटलः; ईः इति सूक्ष्मशास्त्रे गौरीव्रतविधित्रिपञ्चाशत्पटलः; ऊः इति सूक्ष्मागमे गौरीव्रतविधिपटलो सप्तपञ्चाशत; ऋः इति सूक्ष्मशास्त्रे गौरीव्रतविधिः अष्टपञ्चाशः पटलः; झः इति सूक्ष्मशास्त्रे गौरिव्रतव्रतन्नाम एकोनसप्ततिपटलः।

## [षष्टितमः पटलः[१]]

## [मत्स्यलीलाविधिः]

मत्स्यलीलाविधिं वक्ष्ये [२]श्रृणु त्वं तत्प्रभञ्जन।
प्राणिनां [३]भोगमोक्षं स्याद् भूपतीनां सुखं भवेत्॥ १॥
[४]मीनादिकन्यापर्यन्तं मत्स्यलीला [५]प्रशस्यते।

### [मत्स्यलीलात्रैविध्यम्]

[६]एतत् त्रिविधमाख्यातम् [७]उत्तमाधममध्यमम्॥ २॥
समुद्रे वापि नद्यां वा तटाके कूपकेऽपि वा।
[८]श्रेयानब्धिमत्स्यःस्यात् [९]नदीमत्स्यश्च [१०]मध्यमः॥ ३॥
[११]तटाकवाप्योर्मत्स्यश्च [१२]अधमस्तु प्रकीर्तितः।

### [बेरत्रैविध्यम्]

अभिषेककृतं बेरम् उत्तमं तु [१३]प्रचक्षते॥ ४॥
[१४]पौराण्यायतनं बेरं मध्यमं [१५]परिकीर्तितम्।

---

[१] अयं पटलः अ (टि.१९१, पृ० ३२६-३३०), ई (टि.३६, पृ० २४२-२४७), ऊ (टि.३८, पृ० ७२२-७३१), ऋ (टि.९७, पृ० २७०-२७४), ज (टि.१००३, पृ० २४४-२४९) इत्येतेषु कोशेषु दृश्यते।

[२] श्रृणु त्वं ] अ, ई, ऋ, ज; श्रृणुध्वं – ऊ.

[३] भोगमोक्षं ] ऊ. ; भोगमेवं - अ, ई, ऋ, ज.

[४] मीनादिकन्यापर्यन्तं ] अ, ऊ, ऋ; मीनादिकन्नपर्यन्तं – ई; मिनादिकन्यपर्यन्तं – ज.

[५] प्रशस्यते ] अ, ई, ऋ, ज; परस्यते – ऊ.

[६] एतत् ] ऊ, ऋ; एतं – अ, ई; एवं – ज.

[७] उत्तमाधममध्यमम् ] ई, ऊ, ऋ; उत्तमाधममध्यमे – अ; उत्तमायथमध्यमे – ज.

[८] श्रेयानब्धिमत्स्यःस्यात् ] सं० पाठः ; अब्धिः श्रेयान् समत्स्यः - ऋ; अब्धिश्रेयान् समत्स्या – अ; अब्धिः श्रेयान् समत्स्य० – ई; अब्धिश्रेयान् समत्स्य० – ऊ

[९] नदीमत्स्यश्च ] सं० पाठः ; नदीमत्स्यं - ई; नदीमध्यं – अ, ऊ, ऋ, ज.

[१०] मध्यमः ] सं० पाठः ; मध्यमम् - अ, ई, ऊ, ऋ; मध्यमे – ज.

[११] तटाकवाप्योर्मत्स्यश्च ] सं० पाठः; तटाके वापि – अ, ई, ज; तटाकं वापि – ऊ, ऋ.

[१२] अधमस्तु प्रकीर्तितः ] अ; अधमं तु प्रकीर्तितम् – ई, ऊ; अमं तु परिकीर्तितं – ऋ; अथमं तु प्रकिर्तितम् – ज.

[१३] प्रचक्षते ] अ, ऊ, ऋ; प्रशस्यते – ई, ज.

[१४] पौराण्यायतनं ] ई, ऊ, ऋ, ज; पौण्यायतनं – अ.

[१५] परिकीर्तितम् ] अ, ऋ; तु प्रकीर्तितम् – ई, ऊ; प्रकीत्तितम् – ज.

[1]सद्योनिष्कृतिबेरं तु [2]अधमं चोच्यते [3]तथा ॥ ५ ॥
उत्तमं बेरमेवं तु [4]समुद्रादिदर्शनं मतम्।
[5]मध्यमं बेरमेवं तु नद्यादिदर्शनं मतम् ॥ ६ ॥
[6]अधमं बेरमेवं स्यात् [7]वापीतटाकयोर्मतम्।

[दर्शनभेदत्रयम्]

[8]शतक्रोशावधिर्यावदुत्तमं दर्शनं मतम् ॥ ७ ॥
[9]पञ्चाशत्क्रोशमेवं तु [10]मध्यमं दर्शनं मतम्।
द्वादशक्रोशमेवं तु [11]अधमं दर्शनं मतम् ॥ ८ ॥
एवं [12]कृतयुगे प्रोक्तम् अन्यत्सर्वं प्रयत्नतः।
वेदांशांशविहीनं स्यात् क्रमेण परिकल्पयेत् ॥ ९ ॥

[कालत्रैविध्यम्]

[13]कन्यसं दिनमेकं स्यान्मध्यमं त्रिदिनं भवेत्।
[14]शरसंख्यं चोत्तमं च [15]दिनसंख्याक्रमेण तु ॥ १० ॥

[लीलाद्वैविध्यम्]

ग्रामादिस्थानसंयुक्तम् एतत्सर्वं समाचरेत्।

---

[1] सद्योनिष्कृतिबेरं तु ] अ; सद्यनिष्कृतिबेरं च – ई; सद्यनिष्कृतिबेरं तु – ऊ, ॠ, ज.
[2] 'अ' मातृकायां श्लो० '५उ०' द्वितीयपादमारभ्य -'६पू०' प्रथमपादान्तो भागो न दृश्यते।
[3] तथा ] सं० पाठः; मया – अ, ई, ऊ, ॠ, ज.
[4] समुद्रादिदर्शनं ] अ, ऊ, ॠ; समुद्रादर्शनं – इ, ज.
[5] मध्यमं ] ई; मध्यमे – अ, ॠ; मध्यादि० – ऊ; मध्यम० – ज.
[6] अधमं ] ई, ऊ; अधमे – अ, ॠ; अथमे – ज.
[7] वापीतटाकयोर्मतम् ] सं० पाठः; तटाकं वापिरेव - अ; तटाकं वपिमेव – ई, ऊ, ॠ, ज.
[8] शतकोशावधिर्यावदुत्तमं दर्शनं मतम् ] अ; शतकोशार्णविधिर्यावदुत्तमे दर्शनं मतम् – ई; शतकोशावतीर्थवत् मतमुत्तमदर्शनम् – ऊ; शतकोशावधिर्यावदुत्तमे दर्शनं मतम् – ॠ; शतकोशविधिर्यावदुत्तमे दर्शनं मतम् – ज.
[9] पञ्चाशत्कोशमेवं ] अ, ई, ॠ, ज; वंशात्कोशमेवं तु – ऊ.
[10] मध्यमं ] ऊ; मध्यमे – अ, ई, ॠ, ज.
[11] अधमं ] ऊ; अधमे – अ, ई, ॠ, ज.
[12] कृतयुगे ] अ, ई, ऊ, ॠ; कृतयुगं – ज.
[13] कन्यसं दिनमेकं ] अ, ई, ॠ; कन्यसं दीममेवं – ऊ; अन्यसदिनमेव – ज.
[14] शरसंख्यं चोत्तमं च ] ऊ; शिरसंख्योत्तमं चैव – अ; शरसंख्या चोत्तमं चैव – ई, ॠ; शसुख्य चोत्तमं चैव – ज.
[15] दिनसंख्या क्रमेण तु ] अ, ई, ॠ; दिशंख्या० – ऊ; दिन संख्य० – ज.

तल्लीला [1]द्विविधा प्रोक्ता [2]वासं यानं च कथ्यते॥ ११॥

[यानभेदः]

[3]यानं चेदालये कार्यं नयेद्[4]आस्थानमण्डपात्।
सर्वालङ्कारसंयुक्तं मण्डपं [5]भूषयेत्सुधीः॥ १२॥
[6]सुवारे सुदिने चैव रात्रौ पूजावसानके।
देवदेव जगन्नाथ [7]जगदार्तिविनाशन॥ १३॥
[8]स्वामिन्ननुगृहीतोऽस्मि इति विज्ञापनं क्रमात्।
स्वर्णादिसूत्रं संगृह्य रक्षाबन्धं [9]पुरोक्तवत्॥ १४॥
अपरेद्युर्दिवाकाले नयेद् [10]आस्थानमण्डपे।
प्रातःसन्ध्यवसाने तु [11]सूरिबृन्दैश्च सेवितम्॥ १५॥
राजोपचारैः सर्वैश्च तोषयेत्परमेश्वरम्।
[12]मध्याह्ने पूजनान्ते तु सर्वालङ्कारसंयुतम्॥ १६॥
सर्ववाद्यैरलङ्कृत्य [13]पताकाद्यैरलङ्कृतम्।
मत्स्यस्थानं समुद्दिश्य यानं पूर्ववदाचरेत्॥ १७॥
तत्काले तु विशेषेण भूपतिर्देशिकैः सह।
कर्पूरं रजनीचूर्णं [14]नागवल्लीदलैरपि॥ १८॥
विकिरेत्सर्ववर्णैश्च तत्र स्थाने प्रविश्य च।

---

[1] द्विविधा प्रोक्ता ] अ; द्विविधं प्रोक्तं – ई, ऊ, ऋ; द्विगुणविधिं प्रोक्तं – ज.
[2] वासं यानं ] ई; वासधा(या)नं – अ; वासयानं – ऊ, ऋ; वा सायनं – ज.
[3] यानं चेदालये ] ई, ऋ; दानं चोत्पलये – अ; यानं चेदालयं – ऊ, ज.
[4] आस्थानमण्डापात् ] अ, ऋ; आस्थानमण्डपम् – ई, ऊ; आस्थानमण्डपे – ज.
[5] भूषयेत्सुधीः ] अ, किं तु कर्षयेत् – ई; . . . . षयेत्सुधीधिः – ऋ; प्रति भूशयेत् – ज.
[6] सुवारे सुदिने ] अ, ई, ऋ, ज; सुवरै दिनैश्च – ऊ.
[7] जगदार्तिविनाशन ] अ, ई, ऊ, ऋ; जगदार्तिविनामुना – ज.
[8] स्वामिन्ननुगृहीतो ] अ, ई, ऋ; स्वामिनेनुगृहीतो – ऊ; देवं ननु गृहीतोस्मि – ज.
[9] पुरोक्तवत् ] अ, ई, ऋ; पूर्वोक्तवत् – ऊ; पूरोक्तवत् – ज.
[10] आस्थानमण्डपे ] ई, ज; आस्थानमण्डपम् – अ, ऊ, ऋ.
[11] सूरिबृन्दैश्च ] अ, ऊ, ऋ, ज; सूरिबृन्देन – ई.
[12] मध्याह्ने ] अ, ऊ; मध्याह्न – ई, ऋ; मध्यान्ने – ज.
[13] पताकाद्यैरलङ्कृतम् ] अ, ई, ऊ, ऋ; सर्वघोषैःरलङ्कृतम् – ज.
[14] नागवल्लीदलैरपि ] अ, ई, ऋ; नववल्ली० – ऊ; रागवल्लि० – ज.

उत्तरे पश्चिमे वापि पूर्वे वा दक्षिणेऽपि वा॥ १९॥
तत्र स्थाने [१]प्रपां कृत्वा वितानाद्यैरलङ्कृतम्।
देवं मध्ये तु विन्यस्य तदग्रे [२]मत्स्यपूजनम्॥ २०॥
ओदनानि [३]सुविन्यस्य ओदनस्येति पूजयेत्।
[४]तण्डुलैस्तिललाजैश्च [५]मत्स्यं सम्यक् समर्चयेत्॥ २१॥
[६]मलिम्नाय [७]महामत्स्यो दीपरूपो [८]महोदरः।
[९]एवं मन्त्रं समुच्चार्य मत्स्यानां भोजनं नयेत्॥ २२॥
मत्स्यलीलां समालोक्य [१०]सायाह्नात्पूर्वमाचरेत्।
तदन्ते [११]यानं कार्यं तु लीलागानं च [१२]गायकः॥ २३॥
विनोदवाद्यसंयुक्तं पूर्वस्थाने प्रवेशयेत्।
स्नपनं शान्तिहोमं च [१३]कुर्याच्च [१४]परमेश्वरम्॥ २४॥
तदन्ते [१५]सायरक्षां च [१६]कुर्यात् पूर्ववदर्चनम्।
[१७]पूर्वे तु नित्यपूजां [१८]विशेषपूजां च कारयेत्॥ २५॥
तदन्ते स्नपनं कृत्वा रक्षाबन्धं विसृज्य च।

---

[१] प्रपां ] अ, ई, ऋ, ज; प्रभां – ऊ.
[२] मत्स्यपूजनम् ] ई, ज; मत्स्यं विन्यसेत् – अ; मस्य पूजनम् – ऊ. 'ऋ' मातृकायां लुप्तम्।
[३] सुविन्यस्य ] सं० पाठः; विनिन्यिस्य – अ, ई, ऊ, ऋ, ज.
[४] तण्डुलैस्तिल० ] अ, ई, ऋ, ज; तण्डुलैस्तिलै० – ऊ.
[५] मत्स्यं ] अ, ई, ऋ, ज; मस्यं – ऊ.
[६] मलिम्नाय ] अ, ऋ; मलिम्नाव – ई; मलिंन्याय – ऊ; मलिकाय – ज.
[७] महामत्स्यो ] अ, ई, ऋ, ज; महामत्स्ये – ऊ.
[८] महोदरः ] अ, ई, ऋ; महोदरा – ऊ; ०ह होदरे – ज.
[९] एवं मन्त्रं ] ई, ज; वाममन्त्रं – अ, ऊ, ऋ.
[१०] सायाह्नात्पूर्वमाचरेत् ] अ, ई, ऋ; सायाह्नापूर्वमाचरेत् – ऊ; सयान्नपूर्वमाचरेत् – ज.
[११] यानं कार्यं ] अ; यानकार्यं – ई, ऊ, ऋ; यानकार्ये – ज.
[१२] गायकः ] अ, ई, ऋ; गायका – ऊ; गाधकम् – ज.
[१३] कुर्याच्च ] अ, कारयेत् – ई, ऊ; स्नापयेत् – ज. 'ऋ' मातृकायां लुप्तम्।
[१४] परमेश्वरम् ] अ, ई, ऋ, ज; परमेश्वरः – ऊ.
[१५] सायरक्षां च ] अ; सायरक्षान्ते – ई; सायरक्षा च – ऊ, ऋ; सायरक्षा तु – ज.
[१६] कुर्यात् पूर्ववदर्चनम् ] अ, ऊ, ऋ; पूर्वदर्चनं कुरु – ई; पूर्ववद्दर्चनं प्रति – ज.
[१७] पूर्वे तु ] सं० पाठः; पूर्वं तु - अ; पूर्ववन् – ई, ऊ, ऋ, ज.
[१८] विशेषपूजां च कारयेत् ] सं० पाठः; च शेषपूजां च कारयेत् - अ; च विशेषपूजा . . . . – ई; च विशेषपूजां च कारयेत् – ऊ, ऋ; च विशेषोत्पूहदन्तके – ज.

आलयस्य [१]समीपं चेद् यानमेवं विधीयते॥ २६॥
[२]यानमेवं समाख्यातं वासं चैव ततः शृणु।

[वासभेदः]

रात्रौ पूजावसाने तु कर्ता देशिकसंयुतः॥ २७॥
महेशाग्रे तु कर्तव्यं प्रार्थयित्वा विचक्षणः।
[३]एकमूर्तिस्वरूपं तु पञ्चधा परिकल्पयेत्॥ २८॥
[४]लोकरक्षार्थमेवं हि श्रूयतां तत्प्रभञ्जन।
अम्बिकासहितो देवो जगदुत्पत्तिकारणम्॥ २९॥
मत्स्यलीलां समुद्दिश्य गम्यतामिति शंकर।
एवं प्राथ्य तु तत्काले [५]भगवदाज्ञया सह॥ ३०॥
[६]पुनः प्रतिसरं बध्वा वाहनं [७]प्रति संनयेत्।
[८]तत्र प्रभाते कर्तव्यं [९]सर्वालङ्कारसंयुतम्॥ ३१॥
सर्ववाद्यैरलङ्कृत्य जयघोषसमन्वितम्।
राजोपचारसहितं यानं [१०]पथि शनैः शनैः॥ ३२॥
कर्पूरं रजनीं लाजं विकिरेत् समलङ्कृतम्।
[११]मनोरम्येऽन्यदेशे [१२]वा भक्ष्यादीनि निवेदयेत्॥ ३३॥
[१३]ताम्बूलादि विचित्राणि दापयेच्छिवसन्निधौ।

---

[१] समीपं चेद् ] ई, ऊ, ज; समीपस्थे – अ; समीप . . . . – ऋ.
[२] यानमेवं ] अ, ऋ; एवं यानं – ई, ज; यानमेव – ऊ.
[३] एकमूर्तिस्वरूपं ] अ, ऋ, ज; एकरूपामूर्तिस्वरूपां – ई; एवं मूर्तिस्वरूपं – ऊ.
[४] लोकरक्षार्थमेवं हि ] ई, ज; लो . . . . मेवं हि – अ, ऋ; लोकरक्षार्थमेवं तु – ऊ.
[५] भगदाज्ञया सह ] सं० पाठः; भगवानुज्ञया सह- ज; भगवदनुज्ञया . . . . – अ; भगवनुज्ञया सह – ई; भगदनुज्ञया सह – ऊ; भगवदनुज्ञ . . . . – ऋ.
[६] पुनः प्रतिसरं बध्वा ] सं० पाठः; पूर्ववत्प्रतिसरं वध्वा – अ. ई, ऊ, ऋ, झ.
[७] प्रति संनयेत् ] ई, ज; प्रतिसरं नयेत् – अ, ऊ, ऋ.
[८] तत्र ] अ; ततः – ई, ऊ, ऋ, ज.
[९] सर्वालङ्कारसंयुतम् ] अ, ऊ, ऋ; सर्वालङ्कारशोभितम् – ई, ज.
[१०] पथि ] अ, ऋ; पन्थाः – ई; प्रति – ऊ; बन्धः – ज.
[११] मनोरम्येऽन्यदेशे ] ज; मनोरम्येन देशे – अ, ई, ऊ, ऋ.
[१२] वा ] अ, ई, ऊ, ऋ; व – ज.
[१३] ताम्बूलादि ] सं० पाठः; ताम्बूलानि – अ, ई, ऊ, ऋ, ज.

दिनं प्रति विशेषेण स्नपनं शान्तिहोमकम्॥ ३४॥
नित्यपूजाविधानेन [१]नित्यमेवं समाचरेत्।
उद्दिश्य [२]स्नानदेशे तु [३]प्रपां कृत्वा सलक्षणाम्॥ ३५॥
मध्ये वेदिकया युक्तामूर्ध्वे सिंहासनं नयेत्।
महेशं तत्र विन्यस्य लीलागानमथ शृणु॥ ३६॥
[४]वसन्तलीलां [५]कृत्वाथ सूरिबृन्दैश्च सेवितम्।
[६]मत्स्यभोजनमध्ये तु [७]तण्डुलादि पृथक् पृथक्॥ ३७॥
[८]ओदनस्येतिमन्त्रेण ओदनादीनि विन्यसेत्।
मत्स्यलीलां समालोक्य [९]मत्स्यानां भोजनं क्षिपेत्॥ ३८॥
एवं प्रतिदिनं [१०]कुर्यान्निश्चित्य दिवसान्तकम्।
नित्यपूजाविहीनं चेत् प्रायश्चित्तं तथाऽऽचरेत्॥ ३९॥
[११]अज्ञानान्मोहतो वापि प्रायश्चित्तविहीनकम्।
प्रायश्चित्तविहीनं चेद् [१२]राजराष्ट्रस्य दोषकृत्॥ ४०॥
तस्मात्सर्वप्रयत्नेन नित्यपूजां समाचरेत्।
लीलावसाने कर्तव्यं विमुखं यानमुच्यते॥ ४१॥
[१३]राजसत्कारमार्गेण पूर्वस्थाने निवेशयेत्।
स्नपनं शान्तिहोमं च प्रभूतहविषं ददेत्॥ ४२॥
राजा च राजपत्नी च देशिकेन सहैव तु।

---

[१] नित्यमेवं ] अ, ई, ज; नित्यमेनं – ऊ; नित्यदेशं – ऋ.
[२] स्नानदेशे ] अ, ई; स्थानदेशे – ऊ, ऋ, ज.
[३] प्रपां ] अ, ई, ऋ, ज; प्रभां – ऊ.
[४] वसन्तलीलां ] अ, ई, ऋ, ज; वसन्ते लीला – ऊ.
[५] कृत्वाथ ] अ, ऋ; कृत्वा च – ई, ऊ; कृत्वा तु – ज.
[६] मत्स्यभोजनमध्ये ] अ, ई, ऋ; मत्स्यभोजनार्धे – ऊ; मत्स्यभोजनमग्रे – ज.
[७] तण्डुलादि ] अ, ऊ, ऋ, ज; तण्डुलानि – ई.
[८] ओदनस्येति॰ ] ई, ऊ, ऋ; ओदनस्वेति॰ – अ; ओं दनस्योति – ज.
[९] मत्स्यानां भोजनं ] ई, ऋ, ज; मत्स्नानाम्भोजनं – अ; मत्स्यरोमाभोजनं – ऊ.
[१०] कुर्यान् ] अ, ई, ज; कुर्यात् – ऊ; कार्यं – ऋ.
[११] अज्ञानान्मोहतो ] अ, ई, ऋ; अंजना मोहतो – ऊ; अज्ञातहोमतो – ज.
[१२] राजराष्ट्रस्य दोषकृत् ] अ, ई, ज; राजराष्ट्रं विनश्यति – ऊ.
[१३] राजसत्कारमार्गेण ] अ, ई, ज; राजसत्कारमात्रेण – ऊ, ऋ.

[1]मेलामन्त्रं समुच्चार्य पुष्पं [2]मूर्धनि दापयेत्॥ ४३॥
मनसा [3]चिन्तितं कार्यं [4]प्रार्थयित्वा विचक्षणः।
[5]एवमेवं प्रकारेण मत्स्यलीलां समाचरेत्[6]॥ ४४॥
[7]मत्स्यलीलाविधिः प्रोक्तो मौक्तिकग्रहणं शृणु॥ ४५॥

॥ इति सूक्ष्मशास्त्रे मत्स्यलीलाविधिः षष्टितमः पटलः[8]॥

---

[1] मेलामन्त्रं ] अ, ई, ऊ, ऋ; मेलां मन्त्र० – ज.

[2] मूर्धनि दापयेत् ] अ, ई, ऋ; मूर्ध्नि निधापयेत् – ऊ; मूर्ध्नि निदापयेत् – ज.

[3] चिन्तितं कार्यं ] सं० पाठः; चिन्त्य यत्कार्यं – अ, ई, ऋ, ज; चिन्तयेत्कार्यं – ऊ.

[4] प्रार्थयित्वा ] अ; प्रासयित्वा – ई, ऊ; प्राशयित्वा – ऋ, प्रार्थयित्व – ज.

[5] एवमेवं ] अ; एवमेव – ई, ऊ, ऋ, ज.

[6] 'ऊ' मातृकायां श्लो० '४४' उत्तरार्धानन्तरं 'एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात' इत्यर्धमधिकं दृश्यते।

[7] मत्स्यलीलाविधिः प्रोक्तो ] अ, ई; मत्स्यलीलाविधि प्रोक्तं – ऊ; मध्यलीलाविधिः प्रोक्तः – ऋ; मस्यलीलाविधि प्रोक्तं – ज.

[8] इति सूक्ष्मशास्त्रे मत्स्यलीलाविधिःषष्टितमः पटलः ] सं० पाठः; अ, ऋ: इति सूक्ष्मशास्त्रे मत्स्यलीलाविधिरेकोनषष्टितमः पटलः॥ ई: इति सूक्ष्मशास्त्रे मत्स्यलीलाविधिश्चतुःपञ्चाशः पटलः॥ ऊः इति सूक्ष्मागमे मत्स्यलीलाविधिपटलो अष्टपञ्चाशतिमः॥ जः इति सूक्ष्मशास्त्रे मत्स्यलीलविधिं नाम पञ्चचत्वारिंशत्पटलः॥



## [एकषष्टितमः पटलः[1]]

## [मौक्तिकग्रहणविधिः]

मौक्तिकग्रहणं वक्ष्ये श्रूयतां तत्प्रभञ्जन।

[मौक्तिकग्रहणकालः]

फाल्गुने चैत्रमासे वा [2]कार्त्तिके वा परेऽपि वा॥ १॥
पूर्वपक्षे प्रशस्तं हि अपरे वा प्रकीर्तितम्।
[3]पूर्वपक्षे गृहीतं चेदष्टमी नवमी तथा॥ २॥
[4]द्वितीया च [5]तृतीया च [6]चतुर्थी [7]पञ्चमी तथा।
वर्जयेत्तु प्रयत्नेन शेषं संगृह्य बुद्धिमान्॥ ३॥
कृष्णपक्षे गृहीतं चेत् [8]चतुर्थी पञ्चमी तथा।
अष्टमी नवमी चैव [9]दशमी च त्रयोदशी॥ ४॥
वर्जयेत्तु प्रयत्नेन [10]अन्याश्च [11]तिथयः शुभाः।
अथवान्यप्रकारेण [12]ऋक्षेण ग्रहणं मतम्॥ ५॥
अश्वयुग् रोहिणी चैव पुष्यश्च [13]मघ एव च।
[14]आषाढादित्रये चैव [15]हस्तं [1]श्रवणमेव च॥ ६॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ३३०-३३४), ई (टि.३६, पृ० २४७-२५१), ऊ (टि.३८, पृ० ७३२-७३९), ऋ (टि.९७, पृ० २७४-२७६, पृ० २८३-२८४, पृ० २९१-२९२), ज (टि.१००३, पृ० २४९-२५२) इत्येतेषु कोशेषु दृश्यते। 'ऋ' मातृकायां २४ उ०-३९ पू० भागो द्विवारं दृश्यते।

[2] कार्त्तिके वा परेऽपि वा ] अ, ई, ऊ, ऋ; द्वितीये – ई; कृर्तिकेव परेऽपि च – ज.

[3] 'ऊ' मातृकायं श्लो० ३ पू० द्वितीयश्लोकस्य पूर्वोत्तरार्धयोर्मध्ये विद्यते।

[4] द्वितीया ] अ, ऊ, ऋ, ज; द्वितीये – ई.

[5] तृतीया ] अ, ऊ, ऋ, ज; तृतीये – ई.

[6] चतुर्थी ] अ, ऊ, ऋ, ज; चतुर्थे – ई.

[7] पञ्चमी तथा ] सं० पाठः; पञ्चमेऽपि – ई, ज; पञ्चम्येव – अ, ऋ; पञ्चमी पि – ऊ.

[8] 'अ, ई, ऊ, ऋ' मातृकासु श्लो० ४ द्वितीयपादो न दृश्यते।

[9] दशमी च त्रयोदशी ] सं० पाठः; त्रयोदशी दशम्येव – अ, ऊ, ऋ; त्रयोदशी दर्समेव – ई, ज.

[10] अन्याश्च ] अ, ई, ऋ, ज; अन्यश्च – ऊ.

[11] तिथयः शुभाः ] अ; तिथयो भवेत् – ई, ऊ, ऋ, ज.

[12] ऋक्षेण ] अ, ई, ऋ, ज; लक्षण० – ऊ.

[13] मघ० ] अ, ई, ज; मख० – ऊ, ऋ.

[14] 'ई' मातृकायां श्लो० ६ उ० - श्लो० ८ पू० भागो न विद्यते।

[15] हस्तं ] ज; तिष्यं – अ, ऊ, ऋ.

एतदृक्षं गृहीत्वा तु अन्यदृक्षं तु कन्यसम्।
शुक्रवारं [2]च मन्दं [3]च आदित्यं वर्जयेत्क्रमात्॥ ७॥
[4]वज्रं [5]सिद्धिं [6]वरीयांश्च परिघं शिवमेव च।
[7]सिद्धं साध्यं शुभं चैव [8]ब्राह्मं माहेन्द्रमेव च॥ ८॥
[9]प्रीतिरायुष्मदेवं च सौभाग्यं शोभनं तथा।
धृतिश्शूलं [10]प्रकर्तव्यं [11]गण्डो वृद्धिरिहोच्यते॥ ९॥
[12]एते च [13]शुभदाः प्रोक्ता [14]अन्ये [15]ये तांश्च वर्जयेत्।
मेषश्च [16]कर्कटश्चैव [17]सिंहो वृश्चिक एव च॥ १०॥
[18]कुम्भश्चैव शुभा ज्ञेया अन्यराशीन्विवर्जयेत्।
एवं कालविधानज्ञः [19]तत्काल इदमारभेत्॥ ११॥

[पूर्वेद्युः कार्याणि]

[20]निश्चितदिवसात्पूर्वे प्रातःसन्ध्यावसानके।
कृताभिषेकबेराग्रे स्थण्डिलं कल्पयेत्सुधीः॥ १२॥

---

[1] श्रवणमेव ] ऊ, ज; श्रमणमेव – अ; श्रवण एव च – ऋ.
[2] च मन्दं ] अ, ऋ, ज; मन्दं – ऊ.
[3] च आदित्यं ] ऋ, ज; चादित्यं – अ; आदित्ये – ऊ.
[4] वज्रं ] अ, ऊ, ऋ; वज्रं वज्रं – ज.
[5] सिद्धिं – अ, ऋ, ज; सिद्धं – ऊ.
[6] वरीयांश्च ] सं० पाठः; सर्वासु मातृकासु लुप्तोऽस्ति ।
[7] सिद्धं साध्यं – अ, ऊ; सिद्धस्साध्यः – ई; सिद्धिं साध्यं – ऋ; सिद्धसाध्य० – ज.
[8] ब्राह्मं ] अ, ऊ, ऋ; ब्राह्मे – ई; ब्राह्म० – ज.
[9] प्रीतिरायुष्मदेवं ] सं० पाठः; प्रीतिरायुष्यदेवं – अ, ऋ; प्रीतिरायुष्यमेवं ] ई; प्रीतिरायुष्मदेवश्च –ऊ; प्रतिरायुष्यमेवं – ज.
[10] प्रकर्तव्यं ] अ; च कर्तव्यं – ई, ऊ, ऋ, ज.
[11] गण्डो ] ई, ऋ, ज; गन्धो – अ; गण्डा – ऊ.
[12] एते च ] सं० पाठः; एताश्च – अ, ई, ऊ, ऋ, ज.
[13] शुभदाः ] ई, ऊ, ऋ; शुभदा – अ, ज.
[14] अन्ये ] अ, ई; अन्या –ऊ, ऋ; अन्य० – ज.
[15] ये तांश्च ] अ; एतानि – ई, ऊ; येतानि – ऋ; ०योगानि – ज.
[16] कर्कटश्चैव ] अ, ई, ऋ; कटकश्चैव –ऊ, ज.
[17] सिंहो ] अ, ई, ऋ; सिंह० –ऊ, ज.
[18] कुम्भश्चैव ] ई, ऋ, ज; कुम्भांश्चैव – अ; कुम्भंश्चैव – ऊ.
[19] तत्काल इदमारभेत् ] ज; तत्कालमिदमा भवेत् – अ; तत्कालं तु दमा भवेत् – ई; तत्काले इदमाचरेत् – ऊ; तत्काल इदमाभवेत् – ऋ.
[20] निश्चित० ] सं० पाठः; निश्चित्य – अ, ई, ऊ, ऋ, ज.

राजचिह्नानि सर्वाणि तदूर्ध्वे स्थापयेत्क्रमात्।
देवदेवं [1]नमस्कृत्य विज्ञापनमथाचरेत्॥ १३॥
मौक्तिकग्रहणार्थाय रत्नं [2]संगृह्य संमतम्।
तस्मात्सर्वप्रयत्नेन [3]तत्तदङ्गजनैः सह॥ १४॥
ध्वजादि[4]छत्रपर्यन्तं [5]ढक्कावाद्यसमन्वितम्।
[6]अशरीवाद्यसंयुक्तं [7]केशवाद्यसमन्वितम्॥ १५॥
एतत्सर्वं गृहीत्वा तु यानं पूर्ववदुच्यते।

[मण्डपकल्पनम्]

[8]अब्धितीरे विशेषेण कूटं वापि प्रपां कुरु॥ १६॥
तन्मध्ये वेदिकायुक्तं सर्वलक्षणसंयुतम्।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥ १७॥
पताकादि[9]वितानैश्च [10]पूगाद्यैश्चैव शोभयेत्।

[नित्यपूजा समुद्रदेवपूजा च]

एवं मण्डपमावेश्य सिंहासनोपरि [11]स्थितम्॥ १८॥
नित्यपूजां प्रयत्नेन नित्यवत्पूजनं कुरु।
तद्दिनस्य दिवाकाले [12]अब्धिदेवान् समर्चयेत्॥ १९॥
अम्बुराशे नमस्तुभ्यं मौक्तिकग्रहणाय च।
[13]सुराब्धे तु नमस्तुभ्यं मौक्तिकग्रहणाय च॥ २०॥

---

[1] नमस्कृत्य ] ई, ऋ, ज; नमस्कृत्वा – अ, ऊ.
[2] संगृह्य ] अ, ऊ, ऋ; संग्राह्य – ई, ज.
[3] तत्तदङ्ग० ] ई, ऊ, ऋ, ज; तन्तदङ्ग० – अ.
[4] ०छत्र० ] ई, ऋ, ज; ०चित्र० – अ, ऊ.
[5] ढक्कावाद्य० ] सं० पाठः; ढिक्कावाद्य० – अ; मण्डित्वा० – ई; धृत्वा वाद्य० – ऊ; नृत्यवाद्य० – ऋ; डिण्डिवाद्य० – ज.
[6] अशरी० – अ, ऋ; अशनि० – ई, ऊ, ज.
[7] केश० – अ, ई; कोश० –ऊ, ऋ; क्रोश० – ज.
[8] अब्धितीरे ] ज; समुद्रतीरे – अ, ई, ऋ; समुद्रतीर० – ऊ.
[9] ०वितानैश्च ] अ, ई, ऋ, ज; ०विधानैश्च –ऊ.
[10] पूगाद्यैश्चैव ] अ, ई, ऋ, ज; उरगाद्यैश्चैव – ऊ.
[11] स्थितम् ] ऊ, ऋ; स्थितः –अ, ई, ज.
[12] अब्धिदेवान् ] सं० पाठः; समुद्रदेवान् – अ, ऊ (छन्दोभङ्गः); समुद्रदेशान् – ई; . . . . द्रदेवान् – ऋ; समुदेवान् – ज.
[13] सुराब्धे ] ई; क्षीराब्धे – अ; साराब्धे – ऊ, ऋ; 'ज' मातृकायां श्लो० २० उ० न विद्यते।

[1]क्षीरार्णव नमस्तुभ्यं मौक्तिकग्रहणाय च।
दध्यब्धे तु नमस्तुभ्यं मौक्तिकग्रहणाय च॥ २१॥ [2]
मध्वब्धे तु नमस्तुभ्यं मौक्तिकग्रहणाय च।
इक्ष्वब्धे तु नमस्तुभ्यं मौक्तिकग्रहणाय च॥ २२॥
[3]सर्प्यब्धे[4] तु नमस्तुभ्यं मौक्तिकग्रहणाय च।
[5]क्षाराब्धे तु नमस्तुभ्यं मौक्तिकग्रहणाय च।
एवमेव प्रकारेण अर्चयेद्देशिकोत्तमः॥ २३॥

[उडुपेन मौक्तिकस्थानगमनम्]

उडुपादि समानीय [6]सर्वालङ्कारसंयुतम्।
देवं सम्यक् समारोप्य [7]पटमारोपयेद् ध्वजम्॥ २४॥
देवदक्षिणवामे तु मालिनी [8]देशिकः स्थितः।
देवाग्रे सर्ववाद्यैश्च लीलागानं च वादयेत्॥ २५॥
राजोपचारवत्सर्वं मौक्तिकस्थानमाविशेत्।
[9]पूर्ववद्यन्त्रमार्गेण मौक्तिकग्रहणं मतम्॥ २६॥
[10]पवन्यादि समापूर्य पूर्वस्थाने निवेशयेत्।

[मौक्तिकग्रहणं शालायां मौक्तिकनिवेशनं च]

पश्चिमे [11]निर्ऋतौ वापि ऐशान्ये चोत्तरेऽपि वा॥ २७॥
मुक्ताग्रहणशालां च कल्पयेद्देशिकोत्तमः।

---

[1] क्षीरार्णव ] अ; क्षीरार्णाय – ई, ऋ; क्षीराब्धे – ऊ.
[2] 'ज' मातृकायां श्लो० २१ उ०- श्लो० २२ पू० मध्ये श्लो० २३ पू० अर्धमधिकं विद्यते।
[3] 'ई, ज' मातृकायोः श्लो० २२ उ० - २३ पू० मध्ये इदमर्धं दृश्यते।
[4] सर्प्यब्धे ] ई; सारब्धे – ज.
[5] क्षाराब्धे ] ई, ऋ, ज; क्षीराब्धे – अ; शुद्धोदकेब्धे – ऊ.
[6] सर्वालङ्कारसंयुतम् ] अ, ऊ; ०शोभितम् – ई, ज.
[7] पटमारोपयेद् ध्वजम् ] ई, ऊ, ज; पन्योपयेध्वजम् – अ; परमारोपयेद् ध्वजम् – ऋ.
[8] देशिकः स्थितः ] अ; देशिकस्थितिः – ई, ऋ, ज.
[9] पूर्ववद्यन्त्रमार्गेण ] अ, ई, ऊ; सर्ववाद्यैत्रमार्गेण – ज. 'ऊ' मातृकायां श्लो० २६ उ० - श्लो० २७ पू० भागो न विद्यते।
[10] पवन्यादि ] ई; पर्यन्यादि – अ; वर्धन्यादि – ऋ; सधान्यादि – ज.
[11] निर्ऋतौ ] अ, ऋ, ज; रजतं – ई; हेन्यतौ – ऊ.

[1]शालायां रत्नमाविश्य [2]सायाह्नसमयावधि॥ २८॥
[3]सायाह्नेऽस्तमये काले स्नपनं [4]शान्तिहोमकम्।
नित्यपूजां प्रयत्नेन नित्यवत्सम्यगाचरेत्॥ २९॥
एवं प्रतिदिनं कार्यं [5]तत्तीरे यजनं कुरु।
एवमेव [6]क्रमेणैव पक्षाहान्तं समाचरेत्॥ ३०॥

[प्रासादे पुनर्गमनं यजनं च]

[7]द्रव्यजालं समानीय [8]पुनर्गत्वा गृहं प्रति।
आस्थानमण्डपं प्राप्य सूरिबृन्दैश्च सेवितम्॥ ३१॥
स्नपनं शान्तिहोमं च ततो नैमित्तिकार्चनम्।
मूलालये प्रकर्तव्यं पूर्ववत्पूजनं नयेत्॥ ३२॥
नित्यकर्मविहीनं [9]चेद्राजराष्ट्रस्य नाशनम्।
तस्मात्सर्वप्रयत्नेन नित्यपूजां पुरोक्तवत्॥ ३३॥
महाहविर्निवेद्याथ तोषयेत्परमेश्वरम्।

[रत्नविभजनम्]

महेशाग्रे विशेषेण गोमयालेपनं कुरु॥ ३४॥
पिष्टचूर्णैरलङ्कृत्य सर्वत्र [10]ज्वलद्दीपकैः।
देवाग्रे [11]विन्यसेद्रत्नं [12]तद्द्रव्यमष्टधा [13]भजेत्॥ ३५॥

---

[1]शालायां रत्नमाविश्य ] सं० पाठः; तच्छालायां रत्नमाश्ये – अ, ऊ, ऋ; तच्छालायां रत्नमारभ्य – ई; तच्छालां रत्नमाविश्य – ज.
[2] सायाह्नसमयावधि ] ई; सायाह्नास्तमथावधि – अ; सायाह्नं तमसावधि – ऊ, ऋ; साधान्तं मासावधि – ज.
[3] सायाह्नेऽस्तमये ] अ, ऋ, ज; सायाह्ने तमसा० – ई; सायाह्नास्तमये – ऊ.
[4] शान्तिहोमकम् ] ई, ऊ, ऋ; ज; शान्तिहोमकः – अ.
[5] तत्तीरे ] अ, ऊ, ई, ऋ; तद्दिने – ज.
[6] क्रमेणैव ] ई, ऊ, ऋ, ज; क्रमेण (प्रकारेण) – अ.
[7] द्रव्यजालं ] अ, ऊ, ऋ, ज; द्रव्यकालं – ई.
[8] पुनर्गत्वा ] अ, ऊ, ई, ज; पुनस्स्नात्वा – ऋ.
[9] चेद्राजराष्ट्रस्य ] अ, ई, ऋ, ज; ०राष्ट्रव्य० – ऊ.
[10] ज्वलद्दीपकैः ] ई, ऊ; जलदीपकैः – अ, ऋ, ज.
[11] विन्यसेद्रत्नं ] ई, ऊ, ऋ, ज; विन्यसेद्रक्तं – अ.
[12] तद्द्रव्यमष्टधा ] ई, ऊ, ऋ, ज; न द्रव्यत्यष्टधा – अ.
[13] भजेत् ] अ, ऊ; भवेत् – ई, ऋ, ज.

एकांशं [१]देशिकस्यैव [२]भूपतेरंशमेव च।
[३]आतिथ्यमंशकं चैव [४]सूरीणामंशकं तथा॥ ३६॥
[५]चक्रपूजोक्तमर्त्यानाम् [६]एकांशं च प्रदापयेत्।
[७]शेषांशं देवभागं स्याद् एवं भागक्रमेण तु॥ ३७॥
एवमेव क्रमेणैव मौक्तिकग्रहणं नयेत्।

[मौक्तिकग्रहणफलम्]

सर्वलोकहितं पुण्यं सर्वदेवप्रियार्थकम्॥ ३८॥
मौक्तिकग्रहणं प्रोक्तम् [८]उत्पातस्य विधिं शृणु॥ ३८ ½॥

॥ [९]इति सूक्ष्मशास्त्रे मौक्तिकग्रहणविधिरेकषष्टितमः पटलः॥

---

[१] देशिकस्यैव ] ई, ऊ, ऋ, ज; ०स्यैवांशं – अ.

[२] भूपतेरंशमेव च ] सं० पाठः; अंशं भूपतेरेव च – अ, ई, ऊ, ऋ, ज.

[३] आतिथ्य० ] अ, ई, ऋ, ज; आदित्य० – ऊ.

[४] सूरी० ] ई, ऋ; सूरि० – अ, ऊ, ज.

[५] चक्रपूजोक्तमर्त्यानाम् ] ऋ; चक्रक्रमोक्तं मर्त्यानाम् – अ; चक्रपूजोक्तमर्त्यांश्च – ई; चक्रपूर्णोक्तमत्स्थानां – ऊ; चक्रे पूजोक्तमर्त्यांश्च – ज.

[६] एकांशं ] अ, ऊ, ऋ; त्वेकांशं – ई, ज.

[७] शेषांशं ] अ, ई, ऊ, ऋ; षोडशं –ज.

[८] उत्पातस्य विधिं ] अ; मृगाणं ग्रहणं – ई, ऊ, ज; उत्पातं च विधिं – ऋ.

[९] इति सूक्ष्मशास्त्रे मौक्तिकग्रहणविधिः एकषष्टितमः पटलः ] सं० पाठः; अः इति सूक्ष्मशास्त्रे मौक्तिकग्रहणविधिषष्टितमः पटलः॥ ईः इति सूक्ष्मशास्त्रे मौक्तिकग्रहणविधिपञ्चपञ्चाशत् पटलः॥ ऊः इति सूक्ष्मागमे मौक्तिकग्रहणविधिपटलो नवपञ्चाशतिमः॥ ऋः इति सूक्ष्मशास्त्रे मौक्तिकग्रहणविधिः षष्टितमः पटलः॥ जः इति सूक्ष्मशास्त्रे मौक्तिकग्रहणं नाम षट्चत्वारिशत् (?) पटलः॥

## [द्विषष्टितमः पटलः[1]]

### [2]उत्पातशान्तिविधिः

[3]उत्पातशान्तिं वक्ष्यामि [4]श्रृणु त्वं तत्प्रभञ्जन।

[उत्पातद्वैविध्यम्]

[5]सर्वसम्पत्समृघ्द्यर्थं [6]राजराष्ट्रहिताय वै॥ १॥
[7]उत्पातं द्विविधं प्रोक्तं सामान्यं च महाद्भुतम्।
सामान्यं दीर्घफलदं सद्य एव महाद्भुतम्॥ २॥
[8]तत्तत्प्रतिक्रिया सम्यक् कर्तव्या [9]दोषनाशिनी।
[10]अकृता चेत्तु [11]सा सद्यः [12]सर्वदोषावहा नृणाम्॥ ३॥
ब्राह्मणानां नृपाणां च विशेषाद्दोषदं [13]भवेत्।
तस्मात् [14]प्रतिक्रिया सद्यो [15]नृपेणैवाविलम्बिनी॥ ४॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ३३४-३४९), ई (टि.३६, पृ० २५१-२६८), ऊ (टि.३८, पृ० ७४०-७७२), ऋ (टि.९७, पृ० २८४-३०१), ज (टि.१००३, पृ० २२१-२३७) इत्येतेषु कोशेषु दृश्यते। अयं पटलः पूर्वकारणागमेऽपि मुद्रितपुस्तके (१४४-तमः पटलः, पृ० ७१४-७२३), 'टि.३१३' (पृ० ८३९-८५१), 'टि.१०३५' (पृ० ३६७-३८१), 'टि.५५६' (पृ० २९१-३०६, पृ० ५४०-५५७) इति कोशेषु च दृश्यते। 'टि.३१३' कोशे 'अद्भुतशान्तिविधिपटलः' 'सामान्याद्भुतशान्तिविधिपटलः' इति द्वौ पटलौ विद्येते। तयोः प्रथमे पटले उत्पातशान्तिविधिपटलस्य '१-१०४'- श्लोकाः, द्वितीये च पटले '१०५-१६९'-श्लोका दृश्यन्ते। 'टि.१०३५' कोशे तु एक एव पटलः 'अद्भुतशान्तिविधिपटलः' इति विद्यते, अस्मिन्नेव पटले सर्वे श्लोकाश्च दृश्यन्ते। 'टि.५५६' कोशे 'सकलागमसंग्रह' इति नाम्ना अयं पटलो द्विवारं दृश्यते।

[2] 'ऊ' मातृकायां पटलेऽस्मिन् सर्वत्र 'उत्पात' इति स्थाने 'उत्पाद' इति विद्यते।

[3] उत्पातशान्तिं वक्ष्यामि] ऋ; उक्त्वा तु शान्तिं० -अ; अथ उत्पातशान्तिस्तु -ई; उत्पादशान्तिं वक्ष्ये-ऊ;अथ वक्ष्येऽद्भुतंशान्तिं-ज.

[4] श्रृणु त्वं ] अ, ऋ; श्रृणुध्वं – ऊ. 'ई, ज' मातृकयोः '१'-श्लोकस्य द्वितीयतृतीयपादौ लुप्तौ।

[5] सर्वसम्पत्समृघ्द्यर्थं ] सं० पाठः; सर्वसम्पत्समृद्धैश्च – अ; सर्वसम्पत्समृद्धिं च – ऊ, ऋ.

[6] राजराष्ट्रहिताय वै ] अ, ऋ; राजराष्ट्रहिताय च – ई; राजराष्ट्राभिवृद्धिदम् – ऊ; राजाराष्ट्रहिताय च – ज.

[7] उत्पातं द्विविधं प्रोक्तं ] ज; पताकाविधिसंप्रोक्तं – अ, ई, ऋ; अश्च द्विविधं प्रोक्तं – ऊ .

[8] तत्तत्प्रतिक्रिया ] अ, ई, ऋ, ज; तत्तत्क्रिया – ऊ.

[9] दोषनाशिनी ] अ, ई, ऋ, ऊ; दोषनाशनी – ज.

[10] अकृता चेत्तु ] सं० पाठः; अकर्तव्ये तु – अ, ई, ऋ, ऊ, ज.

[11] सा सद्यः ] अ, ई, ऋ, ऊ; सासन्या – ज.

[12] सर्वदोषावहा नृणाम् ] ई; सर्वदोषापहं नृणाम् – अ, ऋ; सर्वदोषावहं श्रृणु – ऊ; सर्वदोषावहं नृणाम् – ज.

[13] भवेत् ] अ, ऊ, ऋ; महत् – ई, ज.

[14] प्रतिक्रिया ] ई, ऊ, ज; ०क्रियां – अ, ऋ.

[15] नृपेणैवा० ] अ, ई, ऊ, ऋ; नृपेणैवं –ज.

[महाद्भुताः]

[१,२] [1]भास्करस्योदयं रात्रौ [2]आमायामिन्दुदर्शनम्।
[३,४] भूमिकम्पे नदीक्षोभे कूपक्षोभे तटाकके॥५॥
[५,६] प्रतिमारोदने चैव ततः शोणितवर्षके[3]।
[७,८] पाषाणपांसुवर्षे च तथैव मधुवर्षके[4]॥६॥
[९,१०] वर्षे तु क्षीरासृग्भ्यां च [5]वृक्षाच्छोणितकस्रवे।
[११] शिखादिपादुकान्तं यद् देवालयमकारणात्॥७॥
[१२] पतिते चैव तद्धाम स्थानात्स्थानान्तरेऽपि वा।
[१३,१४] [6]वृक्षे स्थानान्तरं प्राप्ते वृक्षे [7]चान्यफलोद्भवे॥८॥
[१५,१६] तदन्यपुष्पसंभूते [8]गन्धादन्यस्य संभवे।
[१७] [9]लिङ्गे चैवोष्णसंभूते प्रतिमायां तथैव च॥९॥
[१८] [10]अण्डजाः [11]स्वेदजाश्चैव चतुष्पाच्च तथा नराः।
[१८,१९] [12]स्वजात्यन्यप्रसूते च [13]प्रासादभ्रमणे तथा॥१०॥
[२०,२१] श्वेतवायससंभूते पर्वतद्वन्द्वयुद्धके।
[२२,२३] [14]आर्द्रवृक्षे [15]स्वयं दग्धे प्रतिमाकम्पने तथा॥११॥
[२४] [16]भिन्ने तु [17]शिववर्धन्यौ लिङ्गप्रतिमयोस्तथा।

---

[1] भास्करस्योदयं ] अ, ऊ, ऋ, ज; भास्करस्योदये – ई.
[2] आमायामिन्दुदर्शनम् ] सं० पाठः; आमावास्येन्दुदर्शनम् – इति सर्वासु मातृकासु ।
[3] शोणितवर्षके ] अ, ऊ, ऋ, ज; ०वर्षणे – ई.
[4] मधुवर्षके ] अ, ऊ, ऋ, ज; ०वर्षणे – ई.
[5] वृक्षाच्छोणितकस्रवे ] ई; वृक्षाच्छोणितके स्रुवे – अ, ऋ; वृषाच्छोणित वर्षके। स्रवे – ऊ; वृक्षाच्छोणितके स्रवे – ज.
[6] वृक्षे ] अ, ई, ऋ, ज; वृष० – ऊ. वृक्षात् स्थानान्तरप्राप्तौ वृक्षेऽन्यफलसंभवे – कारणे.
[7] चा० ] ऊ, ऋ; वा० – अ, ई, ज.
[8] गन्धादन्यस्य ] अ; गन्धानन्यर्च० – ई; गन्धकन्यश्च – ऊ; गन्धानन्यच्च – ऋ, गन्धानन्य तु – ज.
[9] लिङ्गे चैवोष्ण० ] अ, ई, ऋ, ज; लिङ्गोच्चे वोष्ण० – ऊ.
[10] अण्डजाः ] ई, ऋ, ज; अण्डजा – अ, ऊ.
[11] स्वेदजाश्चैव ] अ, ई, ऋ, ज; रोमजा चैव – ऊ.
[12] स्वजात्यन्य० ] अ, ई, ऋ, ज; स्वजात्यन्ये – ऊ.
[13] प्रासादभ्रमणे ] अ, ई, ऋ, ज; प्रसादप्रणवे – ऊ.
[14] आर्द्रवृक्षे ] अ, ई, ऋ, ज; आम्रवृक्षे – ऊ.
[15] स्वयं दग्धे ] ऊ, ऋ, ज; स्वयं दण्डे – अ; स्वदग्धे च – ई.
[16] भिन्ने तु ] ई, ऋ, ज; भिन्नायां – अ; भिन्ने – ऊ .
[17] शिववर्धन्यौ ] ज; शिववर्धन्यां – अ, ई, ऋ, ऊ;.

[२५,२६] [1]प्रतिमास्फोटने चैव लिङ्गस्फोटनके तथा॥ १२॥
[२७,२८] [2]प्रतिमानीलिदृष्टेन करिणी [3]मदसंयुता।
[२९,३०] [4]अनग्नौ चोत्थिते धूमे [5]लिङ्गे वर्णान्तरेऽपि च॥ १३॥
[३१] [6]अङ्गाधिकसमुत्पन्ने चतुष्पात्सु तथैव च।
[३२] [7]भेरीघोषे स्वयं ह्येवं [8]प्रोक्तास्त्वेते महाद्भुताः॥ १४॥

[सामान्याद्भुताः]

[१,२] दर्शने प्रतिसूर्यस्य प्रतिचन्द्रस्य दर्शने।
[३,४] रात्राविन्द्र[9]धनुर्दृष्टे वह्निनक्षत्रदर्शने॥ १५॥
[५,६] ग्रहनक्षत्र[10]पाते च [11]सप्ताहाशनिसंकुले।
[७,८] नैरन्तर्येण सप्ताहं [12]परिवेषेन्दुसूर्ययोः॥ १६॥
[९,१०] महावातप्रकोपे च [13]दिशां दाहसमुद्भवे।
[११] लिङ्गे तु पूजिते पुष्पे [14] प्राप्ते वर्णान्तरं सति॥ १७॥
[१२,१३] अकस्मात्पतिते पुष्पे [15]सितपुष्पेऽसिते तथा।
[१४,१५] अतीवशलभोत्पन्ने [16]उन्मत्ते वाहने तथा॥ १८॥
[१६-१८] [17]शुकाच्च मूषिकोत्पन्ने विषसर्पादिकोद्भवे।

---

[1] प्रतिमास्फोटने चैव ] अ, ई, ऋ, ज; प्रतिमास्थाने चैव – ऊ.

[2] प्रतिमानीलिदृष्टेन ] ज; प्रतिमानीलिमा दृष्टे –अ,ई,ऋ; प्रतिमानीलमुद्राष्ट्रे–ऊ; प्रतिमोन्मीलने दृष्टे(प्रष्टे)–कारणे ('९२' श्लोकं पश्यत).

[3] मदसंयुता ] ई, ऊ; मदसंयुतम् – अ, ऋ, ज.

[4] अनग्नौ ] अ, ऊ, ऋ; अग्नेग्नि – ई, ज.

[5] लिङ्गे वर्णान्तरेऽपि च ] अ; लिङ्गवर्णान्तरे सति – ई; लिङ्गवर्णान्तरे तथा – ऊ, ऋ; लिङ्गं वणान्तरे सति – ज.

[6] अङ्गाधिकसमुत्पन्ने ] ई, ऊ, ज; अङ्गाधिकसम्पन्ने – अ; अङ्गाधिके समुत्पन्ने – ऋ.

[7] भेरीघोषे ] अ, ऊ, ऋ, ज; भेरीघोषः – ई.

[8] प्रोक्तास्त्वेते ] अ, ई, ऋ, ज; प्रोक्तो श्वेत० – ऊ.

[9] ०धनुर्दृष्टे ] ई, ऊ, ज; ०धनुर्दृष्टौ – ऋ; ०धनुर्दृष्टा – अ.

[10] ०पाते ] ई, ऊ, ऋ, ज; ०वाते – अ.

[11] सप्ताहाशनि० ] ई; सप्ताहेऽशनि० – अ, ऊ, ऋ, ज.

[12] परिवेषेन्दुसूर्ययोः ] अ, ज; परिवेषं तु सूर्ययोः – ई, ऊ; परिवेष्टेन्दुसूर्ययोः – ऋ.

[13] दिशां दाह० ] अ, ज; दिशा दाह० –ई, ऋ; दिशादाहे – ऊ .

[14] प्राप्ते वर्णान्तरं सति ] ई, ज; प्राप्तवर्णान्तरेऽञ्चति – अ; प्राप्तवर्णान्तरे सति - ऊ, ऋ.

[15] सितपुष्पेऽसिते ] अ, ई, ऋ, ज; सितपुष्पे असिते – ऊ.

[16] उन्मत्ते ] ई, ऋ, ज; व (उ)न्मत्ते – अ; उन्मत्त० – ऊ.

[17] शुकाच्च मूषिकोत्पन्ने ] अ, ऊ; शुकाश्च मूषिकोत्पन्ने - ऋ; शुकाश्च मूषिकोत्पन्ना – ई, ज.

[१९] प्रासादे च सभास्थाने गोपुरे मण्डपे तथा॥ १९॥
[१९] परिवारालये चैव [१]मधुनीडसमुद्भवे।
[२०,२१] [२]अतिवृष्टावनावृष्टौ युद्धोद्योगे नृपस्य तु॥ २०॥
[२२] पतिते[३]ऽकारणात्पुण्यवृक्षे चैव विशेषतः।
[२३] राज्ञः प्रधानमहिषी [४]प्रधानाश्वे गजे [५]मृते॥ २१॥
[२४,२५] [६]रक्तस्त्रीवायसोलूक[७]जम्बुगृध्राश्च पिङ्गलाः।
[२४,२५] [८]नृपवेश्मप्रविष्टे च [९]स्पृष्टे चैव सुरालये॥ २२॥
[२६] देवालयोपरिष्टाच्च नृपस्य भवनोपरि।
[२६] [१०]श्वारोहे रुदिते तत्र [११]तत्तज्जातिक्रियास्तथा॥ २३॥
[२७] लिङ्गे च प्रतिमायां वा [१२]खद्योतारोहणे सति।
[२८] [१३]केचिद्व्योमे [१४]तु केतुभ्यो नानारूपेण [१५]दर्शने॥ २४॥
[२९] [१६]लिङ्गमूले च बिम्बे च [१७]जन्त्वारोहणके सति।
[३०] व्यतिरिक्तक्रियाकार्ये सामान्यास्त्वद्भुताः स्मृताः॥ २५॥

---

[१] मधुनीड ] अ, ई, ऊ, ज; वर्धनीड – ऋ.
[२] अतिवृष्टावनावृष्टौ ] अ, ऊ, ऋ; अतिवृष्टिरनावृष्टौ – ई; अतिवृष्टौ प्यनावृष्टौ – ज.
[३] ऽकारणात्पुण्य० ] अ, ई, ऊ, ऋ; करणार्धमे – ज.
[४] प्रधानाश्वे ] अ, ऋ; प्रधानाश्व – ई, ज; प्रधाना च्स् – ऊ.
[५] मृते ] अ, ऊ, ऋ, ज; द्रुतौ – ई.
[६] रक्तस्त्रीवायसोलूक० ] ज; रक्तस्त्रीवरसालू० – अ; रक्तस्त्रीचरसल्लुज्जां – ई; रक्तस्त्रीवरसालूजंक० – ऊ; 'ऋ' मातृकायामक्षरलोपः।
[७] जम्बुगृध्राश्च पिङ्गलाः ] ज; जंगृध्रपिङ्गलाः–अ;श्रद्धाश्चैव तु०–ई; जंबुग्रन्धान्तु०–ऊ; . . . . तु पिङ्गला–ऋ; जम्बू(म्बु)गृध्रं च पिङ्गला(ली) –कारणे.। जम्बुशब्देन जम्बुको निर्दिश्यते।
[८] नृपवेश्मप्रविष्टे ] सं० पाठः; नृपवेश्याप्रविष्टे – अ, ई, ऊ, ज; नृपवेश्याप्रविन्दे – ऋ.
[९] स्पृष्टे ] ई, ऊ, ऋ, ज; सृष्टे – अ.
[१०] श्वारोहे रुदिते ] ज; श्वारोहणे शते – अ, ऋ; श्वारोहरे शते – ई; श्वारोहण भवेत् – ऊ.
[११] तत्तज्जातिक्रियास्तथा ] ज; तनाज्जाति क्रियास्तथा–अ, ऋ; तनार्जाति कयास्तथा –ई; नज्यादि क्रियास्तथा –ऊ.
[१२] खद्योता० ] ई; खद्योतं – अ; रद्योत० – ऊ; वेद्यता – ऋ; सद्योत० – ज.
[१३] केचिद्व्योमे ] अ, ई, ज; केचिद्व्योम – ऊ; के. . . . च ..मे . . . . तु केतुके – ऋ.
[१४] तु केतुभ्यो ] ई, ज; तुभ्यो – अ; तु केतुभ्या – ऊ; तुभ्ये – ऋ.
[१५] दर्शने ] ई, ऊ; दर्शिते – अ, ऋ; देशिकः – ज.
[१६] लिङ्गमूले च विम्वे च ] सं० पाठः; लिङ्गमूले . . . . – अ, ई, ऋ; लिङ्गमाले . . . . – ऊ; लिङ्गं मूले च विम्वे च – ज.
[१७] जत्वारोहणके सति ] ज; . . . . रोहिणके सति – अ, ऋ; सजरोहिणके सति – ई; सजरोहिण सति – ऊ.

[महाद्भुतानां प्रतिक्रियाः]

[1]तेषां दोषनिवृत्त्यर्थं [2]कुर्यादेवं प्रतिक्रियाम्।

[महाद्भुतः - १]

[3]रात्रौ भानुप्रदृष्टे च [4]प्राणिनाशं [5]नृपाद्भयम्॥ २६॥
[6]दिशाहोमं ततः कृत्वा महास्नपनमुत्तमम्।
कृत्वा सम्पूज्य देवेशं प्रभूतहविषं ददेत्॥ २७॥
ब्राह्मणान् भोजयेत्तत्र [7]आशिषश्च प्रयोजयेत्।
एवमेवं तु सप्ताहं दिनं प्रति दिनं प्रति॥ २८॥

[महाद्भुतः - २]

चन्द्रोदये [8]त्वमायां च गोनाशं सस्यनाशनम्।
पूर्ववत्कारयेत्सर्वं तद्दोषशमनाय च॥ २९॥

[महाद्भुतः - ३]

सम्भवे [9]भूमिकम्पे तु राजराष्ट्रस्य दोषकृत्।
क्षीरप्रस्थसहस्रैश्च मधुसर्पिःसहस्रकैः॥ ३०॥
संस्नाप्य तु शिवं सम्यक् महाव्योमेति मन्त्रतः।
पलाशसमिधा चैव शतहोमं तु कारयेत्॥ ३१॥
ब्राह्मणान् भोजयेन्नित्यम् एकविंशद्दिनान्तकम्।

[महाद्भुतः - ४]

नदीक्षोभे तथा [10]कूपतटाकक्षोभयोस्तथा॥ ३२॥
दुर्भिक्षं जायते लोके [11]महामारी भवेत्ततः।

---

[1] तेषां दोष० ] ज (कारणे); तेषामेव – अ, ई, ऊ, ऋ.
[2] कुर्यादेवं ] ऊ; कुर्यादेव – अ, ऋ; प्रवक्ष्यामि – ज; 'ई' मातृकायां लुप्तम्।
[3] रात्रौ भानुप्रदृष्टे च ] सं० पाठः रा . . . . – अ; राष्ट्रौ . . . . – ई; राष्ट्रे . . . . – ऊ, ऋ; रात्रौ भानुप्रवेशे च – ज.
[4] प्राणिनाशं ] ऊ, ज; प्राणनाशं – अ, ई; प्राणिना – ऋ.
[5] नृपाद्भयम् ] सं० पाठः; नृपोद्भवम् – अ, ऋ; नृपोद्भयम् – ई; नृपोद्भवे – ऊ; नृपद्भयम् – ज.
[6] दिशाहोमं ] ज; दशाहोमं – अ, ई, ऊ, ऋ.
[7] आशिषश्च ] अ; प्रीतिं तत्र – ई; प्रति तत्र – ऊ; व्रतिं तत्र – ज; 'ऋ' मातृकायामक्षरलोपः।
[8] त्वमायां च ] सं० पाठः ; त्वमावास्यां - इति सर्वासु मातृकासु ।
[9] भूमिकम्पे तु ] अ, ऊ, ऋ, ज; भूमिकम्पस्य – ई.
[10] कूपतटाकक्षोभयोस्तथा ] ज; ०तटाकक्षोभणे तथा – अ, ऋ; ०तटाकं क्षोभयेत्तदा – ई; ०तटाकक्षोपणं तथा – ऊ .
[11] महामारी ] सं० पाठः; महामारि – अ, ऊ, ऋ, ज; महातीरे – ई.

[1]तत्तीरे मण्डपं कृत्वा नवहस्तप्रमाणतः ॥ ३३ ॥
मण्डपे मण्डलं [2]कुर्यात् तन्मध्ये [3]स्थण्डिलं कुरु।
पञ्चाग्निं कारयेत्तत्र [4]ह्यग्निकार्योक्तमार्गतः ॥ ३४ ॥
[5]व्याघातसमिधः कृत्वा [6]अस्त्रमन्त्रेण देशिकः।
हृदयेन घृतं हुत्वा चरुं पाशुपतेन च ॥ ३५ ॥
शतमर्धं तदर्धं वा प्रत्येकं [7]जुहुयात्ततः।
[8]मिन्दाहुतिं च कुर्वीत व्याहृतिं च [9]हुनेत् क्रमात् ॥ ३६ ॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत्।
शिवं सम्पूज्य विधिवद् ब्राह्मणान् भोजयेत्ततः ॥ ३७ ॥
एवं कुर्यात्तु पञ्चाहम् [10]अन्ते चोत्सवमाचरेत्।

[महाद्भुतः - ५]

प्रतिमारोदने चैव गोनाशं धान्यनाशनम् ॥ ३८ ॥
तन्मण्डलाधिपो राजा [11]ग्रामराष्ट्रं विनश्यति।
कृत्वा तु प्रतिमाशुद्धिं संप्रोक्षणमथाचरेत् ॥ ३९ ॥
पक्षं पक्षद्वयं वाथ समिद्भिः शान्तिहोमकम्।
स्नपनं कारयेन्नित्यं दिशाहोमसमन्वितम् ॥ ४० ॥
ब्राह्मणान् भोजयेन्नित्यं [12]दीनानन्धांश्च भोजयेत्।

[महाद्भुतः - ६]

ततः [13]शोणितवर्षे तु प्राणिनां नाशनं भवेत् ॥ ४१ ॥ ।

---

[1] तत्तीरे मण्डपं ] अ, ई, ज; तद्दिने मण्डपं – ऊ; तत्तीरे . . . . – ऋ.
[2] कुर्यात् ] अ, ऊ, ऋ; स्यात्तु – ई; सम्यक् – ज.
[3] स्थण्डिलं ] अ, ई, ऊ, ज; मण्डलं –ऋ.
[4] ह्यग्नि० ] अ, ऋ; अग्नि० – ई, ऊ, ज.
[5] व्याघात० ] ई, ऋ, ज; व्याघातः० – अ; 'ऊ' मातृकायां 'व्याघातः' इति नास्ति।
[6] अस्त्रमन्त्रेण ] ई, ऊ, ऋ, ज; ०स्त्रमन्त्रेण – अ.
[7] जुहुयात्ततः ] अ, ऊ, ऋ; जुहुयात्क्रमात् – ई, ज.
[8] मिन्दाहुतिं ] अ, ई, ऋ, ज; पूर्णाहुतिं – ऊ.
[9] हुनेत् क्रमात् ] अ, ई, ऋ, ज; हुनेत् ततः – ऊ.
[10] अन्ते ] अ, ऊ, ऋ, ज; मौने – ई.
[11] ग्रामराष्ट्रं ] अ, ई, ऋ; राजराष्ट्रं – ऊ; ग्रामं राष्ट्रं - ज.
[12] दीनानन्धांश्च ] सं० पाठः ('९१', '९८' श्लोकान् पश्येत्); प्रदीनांश्चैव – अ, ऋ, ज; प्रदीनां चैव – ई; . . . . नां चैव – ऊ.
[13] शोणितवर्षे तु ] अ, ऊ, ऋ; शोणितवर्षेऽपि – ई; शोणितवर्षेषु – ज.

प्रासाद[1]मण्डपादीनि तोयेन क्षालयेत्ततः।
[2]आलयस्य समन्ताच्चु गोमयेनानुलेपयेत्॥ ४२॥
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत्।
क्षीरप्रस्थसहस्रैश्च [3]मधुसर्पिःसहस्रकैः॥ ४३॥
संस्नाप्य विधिवन्मन्त्री महाव्योमेति मन्त्रतः।
पलाशसमिधा चैव शान्तिहोमं च कारयेत्॥ ४४॥
एवं कुर्यात्तु सप्ताहमन्ते चोत्सवमाचरेत्।

[महाद्भुतः - ७]

[....]

[महाद्भुतौ - ८-९]

मधुवर्षे क्षीरवर्षे विप्रक्षत्रियदोषकृत्॥ ४५॥
तत्तत्प्रस्थसहस्रैश्च स्नापयेद्देशिकोत्तमः।
पूजयेत्तु विशेषेण प्रभूतहविषं ददेत्॥ ४६॥
[4]अशोकसमिधा चैव शान्तिहोमं [5]तु कारयेत्।
एवं कुर्यात्तु सप्ताहं पश्चाद्ब्राह्मणभोजनम्॥ ४७॥

[महाद्भुतः - १०]

वृक्षाच्छोणितसंभूते परचक्राद्भयं भवेत्।
वृक्षमूले दिशाहोमं कारयेद्देशिकोत्तमः॥ ४८॥
ब्राह्मणान् भोजयेत्तत्र वास्तुदेवान् प्रपूजयेत्।
पूजयेत्तु [6]शिवं पश्चात् कुर्याच्च स्नपनं महत्॥ ४९॥
पूजयेत्तु विशेषेण प्रभूतहविषं ददेत्।

[महाद्भुतः - ११]

पतिते पादुकान्तं यद्देवालयमकारणात्॥ ५०॥
स्त्रीणां चैव तु बालानां क्षेत्रिणां चैव नाशनम्।

---

[1] मण्डपादीनि ] अ, ऊ, ऋ, ज; मण्डपादीनां – ई.
[2] आलयस्य ] ई ; आलयं च - अ, ऊ, ऋ, ज.
[3] मधुसर्पिः० ] ई, ऋ, ज; मधुसर्पि० – अ, ऊ.
[4] अशोकसमिधा ] ज; अमोकद्धमिशा – अ, ई; अमोककमीशा – ऋ. 'ऊ' मातृकायां '४७पू०' श्लोकस्य प्रथमपादो न विद्यते।
[5] तु ] अ, ऊ, ऋ, ज; वा – ई.
[6] शिवं ] ज; दिवं – अ, ई, ऊ, ऋ.

प्रासादं पूर्ववत्कृत्वा जीर्णं चैव [१]समुद्धरेत्॥५१॥
पुनर्बिम्बं [२]समापाद्य पूर्ववत्स्थापयेद् गुरुः।
विशेषपूजनं कृत्वा अन्ते चोत्सवमाचरेत्॥५२॥

[महाद्भुतः - १२]

[३]स्थानान्तरं च [४]प्राप्तश्चेत् [५]स्थानभ्रंशो नृपस्य तु।
[६]तत्स्थानं पूर्ववत्कृत्वा निर्माणं सम्यगाचरेत्॥५३॥
देवस्य [७]स्थापनं प्राग्वत् पूजयेत्तु विशेषतः।
गव्याभिषेचनं कृत्वा ब्राह्मणान् भोजयेत्ततः॥५४॥
[८]वर्धनीशिवकुम्भौ च छिन्ने भिन्ने तदन्तके।
तद्राष्ट्रदेवतानां च स्नपनं चाभिषेचनम्॥५५॥
कारयेद्विधिवद् [९]राजा भक्त्या तद्दोषशान्तये।

[महाद्भुताः -१३-१६]

[१०]वृक्षे स्थानान्तरे प्राप्ते वृक्षे [११]चान्यफलोद्भवे॥५६॥
[१२]तदन्यकुसुमोत्पन्ने रसगन्धान्यसंभवे।
मर्त्यानां चैव सर्वेषां दुःखं [१३]तद्राष्ट्रवासिनाम्॥५७॥
[१४]तज्जातिवृक्षं संस्थाप्य [१५]पूर्वस्थाने विशेषतः।

---

[१] समुद्धरेत् ] अ, ई, ऋ, ज; सबुधिमान् – ऊ.
[२] समापाद्य ] अ, ई, ऊ, ज; समासाद्य – ऋ.
[३] स्थानान्तरं च ] ई, ज; स्थानान्तराच्च – अ, ऊ, ऋ.
[४] प्राप्तश्चेत् ] सं० पाठः ; प्राप्तिश्चेत् ] अ, ऊ, ऋ, ज; प्राप्तिश्च – ई.
[५] स्थानभ्रंशो ] अ, ऋ; स्थानभ्रंशं – ई, ज; स्थानश्रंगो – ऊ.
[६] 'ऊ' मातृकायां श्लो० '५३' उत्तरार्धं '५४' पूर्वार्धं च न विद्यते।
[७] स्थापनं ] अ, ज; स्थानं – ई; 'ऋ' मातृकायाम् अक्षरलोपः।
[८] वर्धनीशिवकुम्भौ च छिन्ने भिन्ने तदन्तके – अ, ई, ऋ, ज.
[९] राजा ] ई, ऊ, ऋ, ज; राज्यं – अ.
[१०] वृक्षे ] अ, ऊ, ऋ ; ब्रह्म० – ई, ज.
[११] चा० ] अ, ऊ, ऋ ; वा० – ई, ज.
[१२] तदन्य० ] अ, ई, ज; तदन्ये – ऊ, ऋ.
[१३] तद्राष्ट्रवासिनाम् ] अ, ई, ज; तद्देशवासिनाम् – ऊ ; तद्राष्ट्रनाशनम् – ऋ .
[१४] तज्जातिवृक्षं संस्थाप्य ] सं० पाठः; तज्जातीयवृक्षं संस्थाप्य – अ, ऋ (छन्दोभंगः !); तत्तज्जातिवृक्षं संस्थाप्य – ई; तत्तज्जातीयवृक्षस्य स्थाप्य – ऊ; तज्जातीयवृक्ष संसर्वं – ज.
[१५] पूर्वस्थाने ] ई, ज; स्थाने – अ, ऋ.

शान्तिहोमं ततः कुर्यान्मयूरसमिधा ततः ॥ ५८ ॥
शिवं संपूज्य विधिवत् सप्ताहं स्नपनं कुरु ।
[1]क्षीराभिषेचनं कृत्वा [2]वास्तुदेवं प्रपूजयेत् ॥ ५९ ॥
तत्तत्फलानि [3]सर्वाणि पुष्पैःसर्वैर्यजेच्छिवम् ।
सर्वगन्धसमायुक्तं पूजयेत्तु विशेषतः ॥ ६० ॥

[महाद्भुतः - १७]

उष्णे तु प्रतिपन्ने च [4]लिङ्गे च प्रतिमासु वा ।
मर्त्यानां चैव सर्वेषां [5]नानारोगः प्रजायते ॥ ६१ ॥
गोनाशं चैव दुर्भिक्षं तद्राष्ट्रे जायते ध्रुवम् ।
क्षीरप्रस्थसहस्रैश्च मधुसर्पिःसहस्रकैः ॥ ६२ ॥
नालिकेरोदकेनापि स्नापयेत्तु शिवं बुधः ।
स्नपनं तत्र कर्तव्यं महाव्योमेति मन्त्रतः ॥ ६३ ॥
पूजयेत्तु विशेषेण कुङ्कुमोशीरचन्दनैः ।
कुष्ठेनागरुकर्पूरैरालोड्यालेपयेच्छिवम् ॥ ६४ ॥
महाहविः प्रदातव्यं दिशाहोमं तु कारयेत् ।
एवं कुर्यात्तु सप्ताहं शीतकुम्भं [6]तदन्तके ॥ ६५ ॥

[महाद्भुतः - १८]

अण्डजाः स्वेदजाश्चैव [7]चतुष्पाच्च नरास्तथा ।
स्वजात्यन्यप्रसूतिश्चेत् भूपतेर्मरणं ध्रुवम् ॥ ६६ ॥
गोभूमि[8]काञ्चनादीनां दानं कुर्यात्प्रयत्नतः ।
स्नपनं [9]कारयेदर्कसमिधा शान्तिहोमकम् ॥ ६७ ॥

---

[1] क्षीराभिषेचनम् ] ई, ज; करोर्विषेचनं – अ, ऊ, ऋ.
[2] वास्तुदेवं ] ई, ज; वा . . . . – ऊ; पा . . . . – अ, ऋ.
[3] सर्वाणि ] अ, ई, ऋ, ज; पुष्पाणि – ऊ.
[4] लिङ्गे च ] ई; लिङ्गेषु – अ, ऊ, ऋ, ज.
[5] नानारोगः ] ऊ, ज; हनौ रोग – अ; महान्रोगः – ई; हनो रोग – ऋ.
[6] तदन्तके ] ई, ज; तदन्तिके – अ, ऊ, ऋ.
[7] चतुष्पाच्च नराः ] ई, ज; चतुष्पाचान्तराः – अ; चतुष्पाच्चेते – ऊ; चतुष्पाचान्तरा – ऋ.
[8] ०काञ्चनादीनां ] अ, ऊ, ऋ; ०काञ्चनादीनि – ई, ज.
[9] कारयेदर्क० ] ई, ऋ; कारयेदेक० – अ, ज; कारयेत्तत्र – ऊ.

एवं कुर्यात्तु सप्ताहम् अन्ते चोत्सवमाचरेत्।

[महाद्भुतः - १९]

[1]प्रासादभ्रमणोत्पन्ने [2]राष्ट्रस्योपद्रवो भवेत्॥ ६८॥
प्रत्येकं प्रस्थसाहस्रैः गव्यैः प्रासादमेव च।
पञ्चब्रह्मषडङ्गैश्च स्नापयेत्परमेश्वरम्॥ ६९॥
प्रासादं प्रोक्षयेद्धीमान् पूर्वोक्तविधिना सह।
स्नपनं तत्र कुर्वीत ब्राह्मणान् [3]भोजयेत्सुधीः॥ ७०॥

[महाद्भुतः - २०]

[4]सितकाकसमुद्भूते राष्ट्रक्षोभो भवेत् सदा।
स्नपनं तत्र कुर्वीत पूजयेत्तु विशेषतः॥ ७१॥
वैकङ्कतेन समिधा शान्तिहोमं [5]समाचरेत्।
[6]विशेषपूजनं कुर्यात् [7]प्रभूतहविषं ददेत्॥ ७२॥
वास्तुदेवान् समभ्यर्च्य एवं पञ्चाहमाचरेत्।

[महाद्भुतः - २१]

पर्वतद्वन्द्वयुद्धे तु [8]नृपस्यापजयं भवेत्॥ ७३॥
पर्वताग्रे विशेषेण दिशाहोमं तु कारयेत्।
प्रोक्षयेत्पञ्चगव्येन प्रासादेन तु [9]पर्वतम्॥ ७४॥
तत्पर्वतसमीपे तु लिङ्गं संस्थाप्य पूजयेत्।
तद्राष्ट्रदेवतानां च [10]स्नपनं हविषं ददेत्॥ ७५॥
विशेषपूजनं कुर्यात् तदन्ते चोत्सवं कुरु।

---

[1] प्रासादभ्रमणोत्पन्ने ] अ, ई, ऋ, ज; प्रासादे मण्डपोत्पन्ने – ऊ.

[2] राष्ट्रस्योपद्रवो ] अ, ऋ; राष्ट्रस्योपद्रवं – ई, ऊ; राष्ट्रस्यापद्रवो – ज.

[3] भोजयेत्सुधीः ] अ, ई; ऊ, ज; भोजयेततः – ऋ.

[4] सिताकाकसमुद्भूते ] सं० पाठः ; सिक्ते कुसुम उत्पन्ने – अ, ऋ; सिक्तो कुसुमुत्पन्ने – ई; चित्रसिक्तोत्पन्ने कुसुमे – ऊ; सिक्तोत्र समुत्पन्ने – ज. 'ऋ' मातृकायां '७० उ०-७१ पू०' मध्ये मौक्तिकग्रहणविधिपटलस्य '२४ पू०-३९ पू०' भागो दृश्यते।

[5] समाचरेत् ] अ, ऊ, ऋ; तु कारयेत् – ई, ज.

[6] 'ज' मातृकायां श्लो० '७३-७४' भागो न विद्यते।

[7] प्रभूतहविषं ददेत् ] अ, ई, ऋ; शान्तिहोमं समाचरेत् – ऊ.

[8] नृपस्या० ] अ, ई, ऋ; क्रूपस्या० – ऊ.

[9] पर्वतम् ] ई, ऊ, ऋ, ज; पर्वतः (मन्त्रतः) – अ.

[10] स्नपनं हविषं ददेत् ] ज; स्नपनं स्तु देशिकः – अ; स्नपनम्. . . . दके – ई, ऊ, ऋ.

[महाद्भुतः - २२]

[1]आर्द्रवृक्षे स्वयं दग्धे बालानां नाशनं भवेत्॥ ७६॥
[2]अग्निक्षोभश्च [3]तद्राज्ये सद्य एव [4]भविष्यति।
ग्रामस्यैव चतुर्दिक्षु होमं कुर्याद्विशेषतः॥ ७७॥
समिदाज्यचरूंल्लाजान् सर्षपान् होममाचरेत्।
तद्वृक्षसमिधा चैव पञ्चब्रह्मैः क्रमाद्धुनेत्॥ ७८॥
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात्।
पञ्चब्रह्मषडङ्गैश्च प्रासादेन तु मन्त्रतः॥ ७९॥
प्रत्येकं तु सहस्रं वा तदर्धं जुहुयात्क्रमात्।
[5]मिन्दाहुतिं [6]ततः कृत्वा जयाद्या जुहुयात्ततः॥ ८०॥
कृत्वा तु स्नपनं पश्चाद् विशेषेणैव पूजयेत्।
औदुम्बरेण समिधा शान्तिहोमं [7]समाचरेत्॥ ८१॥

[महाद्भुतः - २३]

प्रतिमाकम्पनोत्पन्ने राजा मरणमाप्नुयात्।
[8]कृत्वा तु प्रतिमाशुद्धिं गव्येनैवाभिषेचयेत्॥ ८२॥
दिशाहोमं ततः कृत्वा पुण्याहं वाचयेत्ततः।
एवं कुर्यात्तु सप्ताहं तदन्ते चोत्सवं कुरु॥ ८३॥

[महाद्भुतः - २४]

भिन्ने च [9]शिववर्धन्यौ [10]लिङ्गप्रतिमयोस्तथा।
परचक्राद् भयं भूमौ महामारी [11]प्रजायते॥ ८४॥

---

[1] आर्द्रवृक्षे ] ई, ऊ, ऋ, ज; आद्यवृक्षे – अ.
[2] अग्निक्षोभश्च ] सं० पाठः ; अग्निक्षोभं - ई, ज; अन्नक्षोभं – अ, ऊ, ऋ.
[3] तद्राज्ये ] अ, ऊ, ऋ; तद्राष्ट्रे – ई, ज.
[4] भविष्यति ] अ, ऋ; भवेद्ध्रुवम् – ई, ज; न विद्यते – ऊ.
[5] मिन्दाहुतिं ] अ, ई, ऋ, ज; पूर्णाहुतिं –ऊ.
[6] ततः कृत्वा ] अ, ऋ; ततो हुत्वा – ई, ऊ, ज.
[7] समाचरेत् ] अ, ऊ, ऋ; तु कारयेत् – ई, ज.
[8] कृत्वा तु प्रतिमाशुद्धिं ] ई, ऊ, ज; कृत्वा प्रतिमां शुद्धां – अ, ऋ.
[9] शिववर्धन्यौ ] ई, ज; शिववर्धन्योः – अ, ऊ, ऋ.
[10] लिङ्गप्रतिमयोस्तथा ] अ, ई, ऊ, ऋ; लिङ्गं प्रतिमयं तथा – ज.
[11] प्रजायते ] अ, ऋ; प्रवर्तते – ई, ऊ, ज,

बालस्थानं ततः कृत्वा प्रासादं पूर्ववत्कुरु।
प्रासादप्रोक्षणं कृत्वा पूर्वोक्तविधिना सह॥ ८५॥
[...?]

[महाद्भुताः - २५,२६?]

[...]
तेनैव [१]भिन्नं लिङ्गं चेद् उद्धृत्य स्थापयेन्नवम्।
अन्येनापि [२]प्रमाणेन कारयेद् देशिकोत्तमः॥ ८६॥
प्रतिष्ठां कारयेद्धीमान् पूर्वोक्तविधिना सह।
प्रत्यङ्गोपाङ्गहीने [३]च वस्त्राभरणहीनके॥ ८७॥
पुनः [४]सन्धानकं कृत्वा संप्रोक्षणमथाचरेत्।
दिशाहोमं ततः कृत्वा महास्नपनमाचरेत्॥ ८८॥
पञ्चगव्यामृतैश्चैव अभिषेकं च कारयेत्।
क्षीरप्रस्थसहस्रैश्च [५]मधुसर्पिःसहस्रकैः॥ ८९॥
स्नापयेत्परमेशानं महाव्योमेति मन्त्रतः।
स्नपनं कारयित्वा तु ब्राह्मणान् भोजयेत्ततः॥ ९०॥
समिधा खादिरेणैव शान्तिहोमं तु कारयेत्।
एवं कृत्वा तु सप्ताहम् अन्ते चोत्सवमाचरेत्॥ ९१॥

[महाद्भुतः – २७]

[...]
[६]प्रतिमोन्मीलनं कृत्वा[७] ................।
[८]पक्षं पक्षद्वयं वार्कसमिधा शान्तिहोमकम्॥ ९२॥

---

[१] भिन्नं ] अ, ऋ; भिन्न० – ई, ऊ, ज.

[२] प्रमाणेन कारयेद् – अ, ई, ज; प्रकारेण स्थापयेद् – ऊ; . . . . कारयेद् – ऋ.

[३] च वस्त्राभरण० ] ई, ऊ, ज; चाऽस्त्राभरण० – अ; च अस्त्राभरण० – ऋ.

[४] सन्धानकं ] अ, ऊ, ऋ, ज; सन्धापनं – ई.

[५] मधुसर्पिः० ] अ, ई, ऊ, ऋ; मधुप्रस्थ० – ज.

[६] 'अ, ऊ, ऋ 'मातृकासु श्लो० '९२ पू० - ९२ उ०' भागस्थाने'प्रतिमो...पक्षद्वयं वा...शान्तिहोमकम्॥ 'इति दृश्यते। प्रतिमोन्मिलनं कृत्वा(यत्र)..नाशनम् - ज;

[७] . . . . (यत्र) . . . . राष्ट्रग्रामस्य नाशनम् – ज; . . . . ई.

[८] पक्षं पक्षद्वयं ] ज; ....पक्षद्वयं – ई.

[1]स्नपनं कारयेत्तत्र दिशाहोमं च कारयेत्।
ब्राह्मणान् [2]भोजयेन्नित्यं [3]दीनानन्धांश्च भोजयेत्॥ ९३॥

[महाद्भुतः - २८]

करिणीमदसंयुक्ते [4]महावातप्रकोपने।
वाहनानां भयं चैव स्त्रीजनानां [5]भयं भवेत्॥ ९४॥
[6]शिवं संपूज्य विधिवत् स्नपनं कुरु नित्यशः।
शिवाङ्गैश्चैव विद्याङ्गैः शिवमन्त्रैश्च होमयेत्॥ ९५॥
एवं सप्तदिनं नीत्वा [7]महाहविर्निवेदयेत्।

[महाद्भुतः - २९]

अनग्नौ चोत्थिते धूमे वाहनानां क्षयो भवेत्॥ ९६॥
परचक्राद्भयं तत्र भूमौ संभवति ध्रुवम्।
तत्प्रदेशं च खात्वा तु पञ्चमृद्भिश्च पूरयेत्॥ ९७॥
व्याघातसमिधा चैव शान्तिहोमं तु कारयेत्।
ब्राह्मणान् भोजयेत्तत्र [8]दीनानन्धांश्च भोजयेत्॥ ९८॥
क्षीरप्रस्थसहस्रैश्च स्नापयेत्परमेश्वरम्।
तदन्ते स्नपनं कुर्यात् शीतकुम्भं तदन्तके॥ ९९॥

[महाद्भुतः - ३०]

[9]लिङ्गे वर्णान्तरप्राप्ते [10]जातिदूषणमावहेत्।
एलालवङ्ग[11]तक्कोल[12]जातीजम्बूमुरैः सह॥ १००॥

---

[1] स्नपनं कारयेत्तत्र ] अ, ऋ; स्नपनं . . . . – ई, ऊ; स्नपनं कारयेन्नित्यं – ज .

[2] भोजयेन्नित्यं ] ज; पूजयेन्नित्यं – ई; नित्यपूजां च – अ, ऊ, ऋ.

[3] दीनानन्धांश्च ] सं० पाठ; दिनं तत्रैव – अ, ऋ; दिनान्तत्रैव – ई, ऊ; दीनान्धानां च – ज.

[4] महावात० ] अ, ऊ, ऋ, ज; महोत्पात० – ई.

[5] भयं ] अ, ई, ऊ, ऋ; क्षयं – ज,

[6] शिवं ] अ, ऊ, ऋ, ज; एवं – ई.

[7] महाहविर्निवेदयेत् ] ई, ऊ, ऋ; महाहविं निवेदयेत् – अ, ज.

[8] दीनानन्धांश्च ] सं० पाठः; दिनं नाथांश्च – अ; दिनानां चैव – ई, ज; दीनानाथांश्च – ऊ, ऋ .

[9] लिङ्गे वर्णान्तर० ] अ; लिङ्गे वर्णान्तरं – ई; लिङ्गवर्णान्तर० – ऊ; लिङ्गे वर्णान्तरे – ऋ, ज.

[10] जाति० ] ई, ऊ, ज; जाती० – अ, ऋ.

[11] तक्कोल० ] अ, ऊ, ऋ; कर्पूर० – ई, ज .

[12] ०जातीजम्बुमुरैः सह ] अ; ०जातितम्बुमुरैः सह – ई; ०जातितिम्बुमुरैः सह – ऊ; ०जातीकम्बुमुरैः सह – ऋ; ०जातिजम्बुफलं मुरै – ज.

पेषयित्वा यथा मन्त्री लिङ्गमालेपयेत्ततः।
स्नपनं कारयेदन्ते सप्ताहं शान्तिहोमकम्॥ १०१॥
[1]अशोकसमिधा हुत्वा त्र्यम्बकेनैव देशिकः।
विशेषपूजनं कृत्वा तदन्ते विप्रभोजनम्॥ १०२॥

[महाद्भुतः – ३१]

[...]

[महाद्भुतः – ३२]

[2]भेरीघोषे स्वयं जाते महामारी प्रवर्तते।
स्नपनं कारयेद्बिल्वसमिधा शान्तिहोमकम्॥ १०३॥
पक्षं पक्षद्वयं वापि एवमेव समाचरेत्।

[सामान्याद्भुतानां प्रतिक्रियाः]

एवं महाद्भुतं प्रोक्तं शृणु सामान्यमद्भुतम्॥ १०४॥

[सामान्याद्भुतः - १]

आदित्योदयकाले तु प्रतिसूर्यस्य दर्शने।
परचक्राद्भयं भूमौ ज्वरग्रस्ता [3]नरास्तदा॥ १०५॥
अश्वत्थसमिधा चैव शान्तिहोमं तु कारयेत्।
तदन्ते स्नपनं कुर्यात्पूजयेत्तु विशेषतः॥ १०६॥
प्रभूतहविषं [4]दद्याद् एवं सप्ताहमाचरेत्।

[सामान्याद्भुतः - २]

[5]यदा चन्द्रोदये काले प्रतिचन्द्रस्य दर्शने॥ १०७॥
[6]दुर्भिक्षं जायते लोके महामारी प्रवर्तते।
प्रत्यर्क[7]दर्शनस्योक्तमार्गेणैव समाचरेत्॥ १०८॥

---

[1] 'अ, ऊ, ऋ' मातृकासु '१०२' श्लोको नास्ति।

[2] भेरीघोषे ] ई; 'अ, ऊ, ऋ' मातृकासु श्लो०'१०३' नास्ति। भेरीघोष – ज.

[3] नरास्तदा ] अ, ऊ, ऋ, ज; नरास्तथा – ई.

[4] दद्याद् ] अ, ई, ऊ, ऋ; दत्त्वा – ज.

[5] 'अ, ऊ, ऋ' मातृकासु श्लो० १०७ उ० - श्लो० १०८ उ० भागो नास्ति।

[6] 'ई' मातृकायां श्लो०'१०८ पू०' नास्ति।

[7] दर्शनस्योक्त०] ज; ०दर्शनव्योम० –ई.

[सामान्याद्भुताः – ३-५]

[1]रात्राविन्द्रधनुर्दृष्टे वह्निनक्षत्रदर्शने।
[2]ग्रहनक्षत्रपाते च [3]त्वनावृष्टिर्न संशयः॥ १०९॥
ज्वरग्रस्ता नराः सर्वे वाहनानां [4]क्षयो भवेत्।
पूजयित्वा शिवं [5]तत्र महास्नपनमाचरेत्॥ ११०॥
शान्तिहोमं ततः [6]कुर्याद् अश्वत्थसमिधा ततः।
एवं कृत्वा तु सप्ताहं तदन्ते चोत्सवं कुरु॥ १११॥

[सामान्याद्भुतः - ६]

नैरन्तर्येण सप्ताहम् अशनौ पतिते सति।
[7]अतिवृष्टिर्नराणां च रोगः संभवति ध्रुवम्॥ ११२॥
अवसाने घृतक्षीर[8]प्रस्थानां तु सहस्रकैः।
स्नापयेत्परमेशानं पूजयेत्तु विशेषतः॥ ११३॥
तदन्ते स्नपनं कुर्यात् प्रभूतहविषं ददेत्।

[सामान्याद्भुतः – ७, ८]

[9]भास्करश्च तथा सोमः सप्ताहं [10]परिवेष्टितौ॥ ११४॥
[11]भूमण्डलाधिपो राजा युद्धे मरणमाप्नुयात्।
भूदानं तिलगोदानं [12]महादानं तथैव च॥ ११५॥
कृत्वा प्रस्थसहस्रैश्च क्षीरेणैव महेश्वरम्।
स्नापयेत्तु विशेषेण तदन्ते स्नपनं कुरु॥ ११६॥

---

[1] रात्राविन्द्रधनुर्दृष्टे ] ई, ऊ; ०धनुर्दृष्ट्वा – अ, ऋ; ०धनुर्दृष्टौ – ज.
[2] ग्रहनक्षत्रपाते च ] ई, ऊ, ऋ, ज; ०पादे च – अ.
[3] त्वनावृष्टिर्न ] अ, ऋ; अनावृष्टिर्न – ई, ऊ, ज.
[4] क्षयो ] अ, ऊ, ऋ; क्षयं – ई, ज.
[5] तत्र ] ई, ऊ, ज; तन्त्रं – अ, ऋ.
[6] कुर्याद् ] अ, ऋ; कृत्वा – ई, ज.
[7] अतिवृष्टिर्नराणां ] ई, ऊ, ऋ; अतिवृष्टिं नराणां – अ, ज.
[8] ०प्रस्थानां ] ई, ऋ, ज; ०प्रस्थानं – अ, ऊ.
[9] भास्करश्च तथा सोमः ] सं० पाठः; भास्करो वा तथा सोमः – इति सर्वासु मातृकासु।
[10] परिवेष्टितौ ] अ; परिवेष्टितम् – ई, ऊ, ज; परिवेषयेत् – ऋ.
[11] भूमण्डलाधिपो ] अ, ऋ; तन्मण्डलाधिपो – ई, ऊ, ज.
[12] महादानं ] ई; हेमदानं – ऊ, ज; होमदानं – अ, ऋ.

[....]

[सामान्याद्भुतः – ९, १०]

[....]

दिशाहोमं ततः कृत्वा एवं सप्ताहमाचरेत्।

[सामान्याद्भुतः - ११]

लिङ्गे तु पूजिते पुष्पे [१]प्राप्ते वर्णान्तरे सति॥ ११७॥
वस्त्रानुलेपने तद्वद् [२]ग्रामदूषणमादिशेत्।
शिवं संपूज्य विधिवत् [३]प्रभूतहविषं ददेत्॥ ११८॥

[....]

[सामान्याद्भुतः – १२]

[....]

[सामान्याद्भुतः – १३]

[....]

[सामान्याद्भुतः – १४-१८]

अतीवशलभोत्पन्ने उन्मत्ते [४]वाहने तथा।
[५]शुकानां मूषिकाणां च [६]विषसर्पादिकोद्भवे॥ ११९॥
प्राणिनां नाशनं चैव अनावृष्टिर्न संशयः।
प्रासादस्याग्रतः कुर्यान् मण्डपं चतुरश्रकम्॥ १२०॥
दशद्वादशहस्तं वा दर्पणोदरसन्निभम्।
स्तम्भैः षोडशभिर्युक्तं सर्वालङ्कारसंयुतम्॥ १२१॥
हस्तद्वयप्रमाणेन वृत्तकुण्डं तु मध्यमे।
मेखलात्रयसंयुक्तम् एकैकं तु षडङ्गुलम् ॥ १२२॥
नाभियोनिसमायुक्तं कारयेद्देशिकोत्तमः।
दिशासु चतुरश्राणि कोणेषु च कुशेशयम् ॥ १२३॥

---

[१] प्राप्ते वर्णान्तरे ] ई, ज; प्रावर्णान्तरे – अ; प्राप्तवर्णान्तरे – ऊ; . . . . वर्णान्तरे – ऋ.

[२] ग्रामदूषणमादिशेत् ] ज; ग्रामं भूषणमादिशेत् – अ, ई, ऊ, ऋ .

[३] 'अ, ऊ, ऋ' मातृकासु इतः परं '११०' श्लोकस्य चतुर्थपाद एव दृश्यते । मध्ये विद्यमानो भागो लुप्तः ।

[४] वाहने ] ज; वान्तरे – ई.

[५] शुकानां ] ई; शुकाश्च – ज.

[६] विषसर्पादिकोद्भवे ] सं० पाठः; पिष्टसर्पानितो बवे – ई; विषसर्पाधिको बवेत् – ज.

शिवाग्निं [1]कल्पयित्वाग्निकार्योक्तविधिना ततः ।
[2]समिधश्च चरुं लाजान् सर्षपं लवणं तथा ॥१२४॥
कार्पासस्य तु बीजं च होमयेद्देशिकोत्तमः ।
पालाशखादिराश्वत्थवटाः [3]पूर्वादिषु क्रमात् ॥१२५॥
[4]शमीबिल्वमशोकं च मयूरञ्च विदिक्षु च ।
पालाशं तु प्रधानं स्यात् सद्यमन्त्रेण होमयेत् ॥१२६॥
पञ्चब्रह्मषडङ्गैश्च विद्याङ्गैर्मूलमन्त्रतः ।
[5]पाशुपतेन चास्त्रेण अघोरास्त्रेण बुद्धिमान् ॥१२७॥
सहस्रं वा तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ।
जयादिरभ्याधानञ्च राष्ट्रभृच्च क्रमाद्धुनेत् ॥१२८॥
तदन्ते स्नपनं कुर्याद्विशेषेणैव पूजयेत् ।
महाहविः प्रदातव्यं ब्राह्मणान् भोजयेत्ततः ॥१२९॥
एवमेव तु मध्याह्ने [6]जस्वेत्थं कारयेद्बुधः ।

[सामान्याद्भुतः – १९]

प्रासादे च सभास्थाने गोपुरे मण्डपे तथा ॥१३०॥
परिवारालये चैव मधुनीडसमुद्भवे ।
ग्रामस्य नाशनं चैव नृपतेर्मरणं ध्रुवम् ॥१३१॥
[7]व्यपोह्य मधुनीडं तत् प्रोक्षयेच्छुद्धवारिणा ।
शिवं संपूज्य विधिवद् दिशाहोमं तु कारयेत् ॥१३२॥
मध्वाज्यपयसा धीमान् स्नापयेत्परमेश्वरम् ।
[8]समिद्भिर्नवसंभूतैः शान्तिहोमं [9]समाचरेत् ॥१३३॥

---

[1] कल्पयित्वाग्निकार्योक्तविधिना ततः ] अ; कल्पयित्वाथ अग्निकार्योक्तमार्गतः – ई; कल्पयित्वा तु अग्निकार्योक्तमार्गतः – ऊ; कल्पयित्वाग्निकार्योक्त .... – ऋ; कल्पयित्वा तु अग्निकार्योक्तवन्मना – ज

[2] समिधश्च चरुं लाजान् ] ज; .... बलरुं राजं – अ; चरुं लाजं – ई; .... लाज० – ऊ; 'ऋ' मातृकायाम् अक्षरलोपः।

[3] पूर्वादिषु ] अ, ऊ, ऋ, ज; पूर्वादितः – ई.

[4] शमीबिल्वमशोकं च ] ज; .... कं च – अ, ई, ऊ, ऋ.

[5] पाशुपतेन चास्त्रेण ] ज; पाशुपतेनास्त्रमन्त्रेण – अ, ई, ऊ, ऋ.

[6] जस्वेत्थं ] ई, ऊ; जस्वेर्थं – अ; .... त्थं – ऋ; जस्वेवं – ज.

[7] व्यपोह्य ] अ, ई, ऊ, ऋ; प्रपोह्य – ज.

[8] समिद्भिर्नवसंभूतैः] ई, ऊ, ऋ; समित् भिन्नयसंभूतैः – अ, ज.

[9] समाचरेत् ] अ, ऊ, ऋ, ज; तु कारयेत् – ई.

तदन्ते स्नपनं कुर्याद् एवं सप्ताहमाचरेत् ।
उत्सवं कारयेदन्ते सप्ताहं च त्र्यहन्तु वा ॥१३४॥

[सामान्याद्भुतः – २१]

[1]अनावृष्टौ समुत्पन्ने गोनाशं सस्यनाशनम् ।
समिधा खादिरेणैव शान्तिहोमं तु कारयेत् ॥१३५॥
क्षीराभिषेचनं कृत्वा तदन्ते स्नपनं कुरु ।
कुर्यादेवं तु सप्ताहं शीतकुम्भं ततः कुरु ॥१३६॥

[सामान्याद्भुतः – २०!]

अतिवृष्टिसमुद्भूते दुर्भिक्षं भवति ध्रुवम् ।
मधुप्रस्थसहस्रैश्च घृतप्रस्थसहस्रकैः ॥१३७॥
स्नापयेत्परमेशानं तदन्ते स्नपनं कुरु ।
आलोड्य रजनीं पश्चात् कर्पूरेण विमिश्रितम् ॥१३८॥
षडङ्गुलप्रमाणेन वेष्टयेल्लिङ्गपिण्डिकाम् ।
[2]कनिष्ठाङ्गुलपरीणाहं कर्पूरेण [3]विवर्जितम् ॥१३९॥
गोघृतेन समायुक्तं वेदतालप्रमाणतः ।
सहस्रं वा तदर्धं वा दीपानारोपयेत्क्रमात् ॥१४०॥
मुद्गभिन्नसमायुक्तं प्रभूतहविषं ददेत् ।
शान्तिहोमं ततःकृत्वा [4]पलाशसमिधं तथा ॥१४१॥
विशेषपूजनं कुर्यात् [5]त्रियहं च समाचरेत् ।

[सामान्याद्भुतः – २२-२३]

युद्धोद्योगे [6]नृपस्यैव कारणं तु विना ततः ॥१४२॥
[7]द्रुमे तु पतिते राज्ञि भूमौ प्रधानमहिषी ।

---

[1] अनावृष्टौ ] अ, ऊ, ऋ; अनावृष्टि० – ई, ज.
[2] कनिष्ठा० ] ई, उ, ऋ, ज; कणिष्टा० – अ.
[3] विवर्जितम् ] ऋ; च वर्जितम् – अ, ई, ऊ; तु वर्जितम् – ज.
[4] पलाशसमिधं तथा ] अ, ऊ, ऋ, ज; पालाशसमिधा सहा – ई.
[5] त्रियहं च ] ई, ऊ; त्रयतश्च – अ, ऋ; त्रियां तु – ज.
[6] नृपस्यैव कारणं तु विना ततः] स०पाठः; सहस्रं वा नृपस्यैव विना ततः – आ, ई, ऊ, ऋ, ज.
[7] द्रुमे तु पतिते राज्ञि भूमौ प्रधानमहिषी ] सं० पाठः; द्रुमस्तु पतितो राजा भौमौ सा महिषी -अ; द्रुमे तु पतितो भूमौ प्रधानमहिषी – ई; ओमुस्तु पतितो राजा भौमौ सा .... -ऊ; द्रमुस्तु पतितो राजा भूमौ सा महिषी – ऋ; द्रमुस्तु पतिते करणाद् भूमौ प्रधानमहिषी -ज.

[1]प्रधानाश्वो गजो वापि मरणं तु [2]व्रजेद्यदि ॥ १४३॥
भूपतेर्मरणं चात्र सद्य एव भवेद्ध्रुवम् ।
[3]महादानं प्रकुर्वीत ब्राह्मणानां विशेषतः ॥ १४४॥
पूजयित्वा महेशानं [4]महास्नपनमाचरेत् ।
महाहविस्ततो दत्वा वास्तुदेवान् प्रपूजयेत् ॥ १४५॥

[सामान्याद्भुतः – २४]

देवानामालये वाथ नृपस्यैव गृहेऽथवा ।
[5]विद्याग्नियागशालायां सभास्थानेऽथ चत्वरे ॥ १४६॥
मठे [6]तटाकतीरे वा तथा कूपस्य तीरके ।
प्रतिक्रिया च [7]कर्तव्या [8]रक्ताश्री जायते यदि ॥ १४७॥
[....?]
तदा मुञ्चति तद्ग्रामम् आलये च तथा भवेत् ।
सभास्थाने समुत्पन्ने ग्रामनाशो भवेत्तदा ॥ १४८॥
चत्वरे च समुत्पन्ने प्राणिनाशश्च जायते ।
मठे चैव समुत्पन्ने ग्रामदूषणम् [9]आदिशेत् ॥ १४९॥
तटाकतीरे संजाते तदा मुञ्चति पद्मजा ।
[10]रथ्यां समुत्थिते [11]तत्र बालानां नाशनं भवेत् ॥ १५०॥
[12]कूपतीरे तु संजाते दुःखं तद्ग्रामवासिनाम् ।

---

[1] प्रधानाश्वो गजो ] अ, ऊ, ऋ; प्रधानाश्वं गणं – ई; प्रधानाश्व गजं – ज.
[2] व्रजेद्यदि ] अ, ऊ, ऋ; भवेद्यदि – ई, ज.
[3] महादानं ] ई, ऊ, मददानं – अ; ऋ; महाद्दानं – ज.
[4] महास्नपनमाचरेत् ] अ, ऊ; महत्स्नपनमाचरेत् – ई, ऋ; महास्नपनमारभेत् – ज.
[5] विद्याग्नि० ] ई; विसादि० – अ; विद्याभि० – ऊ, ऋ; विद्यादि० – ज.
[6] तटाक० ] ई, ऊ, ऋ, ज; तटाके – अ.
[7] कर्तव्या ] ई, ऊ; कर्तव्यं – अ, ऋ, ज.
[8] रक्ताश्री ] सं० पाठः ; रक्तश्री - अ, ऊ, ऋ, ज; रजश्री – ई.
[9] आदिशेत् ] अ, ऊ, ऋ, ज; आविशेत् – ई.
[10] 'ई' मातृकायां श्लो० १४९ उ० -१५० पू० भागस्थाने 'रथ्यां समुत्थिते संजाते दुःखं तद्ग्रामवासिनाम्' इति दृश्यते।
[11] तत्र ] अ, ई, ऊ, ऋ; स्त्रीणां – ज .
[12] कूपतीरे तु संजाते ] ज; सेतौ संजाते – अ, ई, ऊ, ऋ.

तत्प्रदेशं [1]तथा खात्वा पूरयेद्वालूकादिभिः ॥ १५१ ॥
पुण्याहं वाचयित्वा तु ब्राह्मणान् भोजयेत्ततः ।
पञ्चगव्येन संप्रोक्ष्य पवमानमुदीरयन् ॥ १५२ ॥
शान्तिहोमं ततः कृत्वा पलाशसमिधा तथा ।
तदन्ते [2]स्नपनं कृत्वा शान्तिहोमं समाचरेत् ॥ १५३ ॥

[सामान्याद्भुतः – २५]

[3]गोमायुः पिङ्गलो गृध्रः उलूकश्चैव वायसः ।
आलयान्तः [4]प्रविष्टाश्चेत् नृपवेश्मान्तरे [5]तथा ॥ १५४ ॥
बालानां स्त्रीगणानां च [6]नाशमेव समादिशेत् ।
शीतकुम्भं ततः कृत्वा शान्तिहोमं समाचरेत् ॥ १५५ ॥
ब्राह्मणान् भोजयित्वा तु तदन्ते स्नपनं कुरु ।

[सामान्याद्भुतः – २६]

देवालयोपरिष्टात्तु नृपस्य भवनोपरि ॥ १५६ ॥
[7]श्वारोहे रुदिते तत्र राजा मरणमाप्नुयात् ।
[8]तं हत्वात्र विसृज्याथ पुण्याहं वाचयेत्ततः ॥ १५७ ॥
[9]अश्वत्थसमिधाद्यैश्च शान्तिहोमं तु कारयेत् ।
ब्राह्मणान् [10]भोजयेत्तत्र कुर्याच्च स्नपनं [11]महत् ॥ १५८ ॥
तदन्ते चोत्सवं कुर्याद्वास्तुदेवान् समर्चयेत् ।

---

[1] तथा ] अ, ऊ, ऋ, ज; तदा – ई.
[2] स्नपनं कृत्वा शान्तिहोमं समाचरेत् ] ज; स्नपनमेवं सप्ताहमाचरेत् – अ; स्नपनं कृत्वा एवं सप्ताहमाचरेत् – ई, ऊ, ऋ.
[3] गोमायुः पिङ्गलो गृध्रः उलूकश्चैव ] अ, ऋ; गोमायुपिङ्गलीगृध्रोलूकश्चैव – ई; गोमयि पिङ्गलि गृध्रलूकं चैव – ज.
[4] प्रविष्टाश्चेत् ] अ, ऊ; प्रविष्टे च – ई, ज; प्रविष्टश्चेत् – ऋ.
[5] तथा ] अ, ऊ, ऋ; ऽपि वा – ई; ऽथवा – ज.
[6] नाशमेव समादिशेत् ] अ, ऊ, ऋ; नाशरास्तु विनिर्दिशेत् – ई; नाशानां च समादिशेत् – ज.
[7] श्वारोहे रुदिते तत्र राजा मरणमाप्नुयात् ] ज; श्वाऽह्यते यदि भयं राजराष्ट्रस्य जायते – अ; श्वाते यदि भयं राज्ञो राष्ट्रस्य रणमाप्नुयात् – ई; श्वा रुह्यते यदि भयं राजराष्ट्रस्य जायते – ऊ, ऋ.
[8] तं हत्वात्र विसृज्याथ ] सं० पाठः; तदङ्गत्वात्रिजं – अ, ऊ, ऋ; तदा गत्वात्रजं – ई; तदं हत्वा त्र्यहं – ज.
[9] अश्वत्थसमिधाद्यैश्च ] अ, ऊ, ऋ, ज; अश्वत्थसमिधाज्यैश्च – ई.
[10] भोजयेत्तत्र ] अ, ई, ऊ, ऋ; भोजयेत् पश्चात् – ज.
[11] महत् ] अ, ऊ, ऋ, ज; भवेत् – ई.

[सामान्याद्भुतः – २७]

[1]लिङ्गे च प्रतिमायां च [2]गृध्रस्यारोहणे सति ॥ १५९ ॥
[3]नराणां चैव सर्वेषां रोग[4]वृद्धिं समावहेत् ।
तं हत्वा चाथ सद्योऽत्र [5]तद्देवं स्नापयेत्ततः ॥ १६० ॥
दूर्वया समिधा चैव शान्तिहोमं तु कारयेत् ।
स्नपनं तु ततः कृत्वा महाहविर्निवेदयेत् ॥ १६१ ॥

[सामान्याद्भुतः – २८]

आकाशे धूमकेतुः स्यान्नानारूपसमन्वितः ।
[6]दृश्यते तत्र निश्चित्य प्रायश्चित्तं समाचरेत् ॥ १६२ ॥

[सामान्याद्भुतः – २९]

लिङ्गमूले [7]तु निश्चित्य जन्त्वारोहणके सति ।
राष्ट्रक्षोभं च दुर्भिक्षं जायते नात्र संशयः ॥ १६३ ॥
पूजयेद्देवदेवेशम् अष्टबन्धं तु कारयेत् ।
शान्तिहोमं ततः कृत्वा समिधा खादिरेण तु ॥ १६४ ॥
शीतकुम्भं ततः कृत्वा महाहविर्निवेदयेत् ।

[सामान्याद्भुतः – ३०]

व्यतिरिक्तक्रिया[8]कार्ये शान्तिहोमेन [9]शाम्यति ॥ १६५ ॥
कुर्यात्प्रतिक्रियां तत्र [10]गुरुणा दृष्टकर्मणा ।
[11]मासमानं च यत्कृत्वा निष्फलत्वं प्रजायते ॥ १६६ ॥

---

[1] लिङ्गे च प्रतिमायां च ] सं० पाठः; लिङ्गे च प्रतिमे – अ, ई, ऊ, ऋ, लिङ्गं च प्रतिमां - ज.
[2] गृध्रस्यारोहणे ] सं० पाठः; . . . . रोहणे – अ, ऊ, ऋ; गृध्रमारोहणे ] ई; जन्त्वारोहणके – ज.
[3] नराणां चैव ] ई, ऊ, ऋ; नराणां च – अ; नृपाणां चैव – ज.
[4] ०वृद्धिं समावहेत् ] अ, ऊ, ऋ; ०वृद्धित्वमावहेत् – ई, ज.
[5] तद्देवं ] ई; तदैव – अ, ऊ, ऋ; तद्देवान् – ज.
[6] 'ऊ' मातृकायां श्लो० १६२ उ० न विद्यते।
[7] तु निश्चित्य जन्त्वारोहणके – ज; बीज . . . . त्वारि रोहणके – अ, ऊ; तु निर्बीजान् वारुरोहणके – ई; तु बीज . . . . श्रके – ऋ.
[8] ०कार्ये ] ई, ऊ; ०कार्यो – अ, ऋ, ज.
[9] शाम्यति ] अ, ई, ऋ, ज; नश्यति –ऊ.
[10] गुरुणा दृष्ट० ] ज; गुणदृष्टेन – अ, ऊ, ऋ; गुणदृष्टस्य – ई.
[11] मासमानं च यत्कृत्वा – अ, ऊ, ऋ; सम . . . . नयत्कृत्वा – ई; मासं मासे नयेत् कृत्वा – ज.

[दक्षिणा]

आचार्यं पूजयेत्तत्र प्रतिक्रिया[1]विधेःकृते ।
[2]वस्त्राङ्गुलीयकैश्चैव गोभूमिधनधान्यकैः ॥ १६७ ॥
[3]अधमं दशनिष्कं स्याद् द्विगुणं मध्यमं स्मृतम् ।
त्रिगुणं चोत्तमं विद्याद्देशिकस्य तु दक्षिणा ॥ १६८ ॥
[4]यागोपयोगद्रव्याणि देशिकाय प्रदापयेत् ॥ १६९ १/२ ॥

॥ [5]इति सूक्ष्मशास्त्रे उत्पातशान्तिविधिः द्विषष्टितमः पटलः ॥

---

[1] प्रतिक्रिया विधेःकृते – अ; सम . . . . ०विधेस्तुतः – ई, ज; ०विशेषतः – ऊ, ऋ.

[2] वस्त्राङ्गुलीयकैश्चैव ] अ, ई, ऋ, ज; वस्त्राङ्गुलीयकटक० – ऊ.

[3] अधमं दशनिष्कं ] ऊ, ऋ; अथ मन्दशनिष्कं – अ; अधमं निष्कं – ई; अधमन्दनिष्कं – ज.

[4] यागोपयोग० ] ई, ऊ, ज; यागोपयोगि० – अ, ऋ.

[5] इति सूक्ष्मशास्त्रे उत्पातशान्तिविधिः द्विषष्टितमः पटलः ॥ ] सं पाठः ; अ, ऋ: इति सूक्ष्मशास्त्रे उत्पातशान्तिविधिरेकषष्टितमः पटलः ॥ ; ई: इति सूक्ष्मशास्त्रे उत्पातशान्तिविधिः षट्पंचाशत्पटलः ॥ ; ऊ: इति सूक्ष्मागमे उत्पादशान्तिपटलो षष्टितमः ॥ ; ज: इति सूक्ष्मशास्त्रे उत्पातशान्तिं नाम चत्वारिंशत्पटलः ॥

## [त्रिषष्टितमः पटलः[1]]

## [ग्रामशान्तिविधिः]

ग्रामशान्तिविधिं वक्ष्ये [2]शृणु त्वं तत्प्रभञ्जन।

[ग्रामशान्तिस्थानादि]

ग्रामे वा नगरे वापि पत्तने राजधानिके॥ १॥
[3]कुब्जके खेटके [4]वापि बहुरूपे च वासिनाम्।
[5]एवं स्थानविधिः शून्ये पूर्वे वा दक्षिणेऽपि वा॥ २॥
पश्चिमे [6]चोत्तरे वापि [7]विदिशास्वन्तरालके।
ग्राममानं चतुर्भागं वसुभागमथापि वा॥ ३॥
[8]कलांशं द्वादशांशं तु तेष्वेकं कल्प्य [9]वास्तुकम्।
एवं निश्चित्य [10]वीथी स्याद् बाह्ये वाऽभ्यन्तरेऽपि वा॥ ४॥
प्रासादपरितो वापि [11]वास्तुवीथीं प्रकल्पयेत्।

[ग्रामदोषशमनबलिः]

[12]ब्रह्मादीशानपर्यन्तम् इन्द्रादीशान्तकं [13]तु वा॥ ५॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ३५०-३५५), ई (टि.३६, पृ० २६८-२७४, २८५-२८६), ऊ (टि.३८, पृ० ७७३-७८६), ऋ (टि.९७, पृ० ३०१-३०६), ज (टि.१००३, पृ० २३८-२४४)।'ई मातृकायां अस्य पटलस्य श्लो'५८-६६' भागो 'जीर्णोद्धारपटलस्य' अन्ते दृश्यते। 'अ, ऋ' मातृकयोः तस्य अ पटलस्य श्लो० '५८-६६' भागः पुनः 'जीर्णोद्धारपटलस्य ' अन्ते दृश्यते। अत्र तौ कोशौ 'अ[२]' (टि.१९१, पृ० ३७६-३७७), ऋ[२] (टि.९७, पृ० ३२७-३२८) इति लिखितौ।

[2] शृणु त्वं ] अ, ई, ऋ; शृणुध्वं – ऊ; शृणु तत० – ज.

[3] कुब्जके खेटके ] अ, ई, ज; कुब्जकेटगके – ऊ; 'ऋ' मातृकायामक्षराणि लूप्तानि.

[4] वापि बहुरूपे ] ऊ ; चापि बहुरूपे - अ, ऋ; चैव बहुरूपं – ई, ज;.

[5] एवं स्थानविधिः शून्ये ] सं० पाठः; एवं स्थानविधिं शून्यं – अ, ई, ऋ; एवं स्थानविधिं शून्ये चेत् – ऊ; एवं स्थानविशुन्यचेत् – ज.

[6] चोत्तरे ] ऊ; वोत्तरे – अ, ई, ऋ.

[7] 'ई', 'ज' मातृकयोः श्लो० ३ द्वितीयपादस्य स्थाने 'वास्तुवीथ्यां प्रकल्पयेत्' इति' दृश्यते।

[8] कलांशं ] ई, ज; कलाश्चा० – अ , ऋ; कलाश्च – ऊ.

[9] वास्तुकम् ] सं० पाठः; वास्तुना – अ, ई, ऊ, ऋ, ज.

[10] वीथी ] ई; वीथ्या – अ; विधि – ऊ, ज; वीथ्यां – ऋ.

[11] वास्तुवीथीं ] सं० पाठः; वास्तुवीथ्यां – अ,ई, ऊ, ऋ, ज.

[12] ब्रह्मादीशान० ] अ, ऊ, ऋ, ज; ब्रह्म ईशान० – ई.

[13] तु वा ] सं० पाठः; क्रमात् – अ, ई, ऊ, ऋ, ज.

[1]ग्राममाश्रितदेवानां ग्राममध्ये बलिं क्षिपेत्।
[2]आद्यन्तं बलियुक्तं तु [3]अयुक्तं तु दिनं प्रति॥ ६॥
[4]ब्रह्मराक्षसपैशाचभूताश्चैव [5]निशाचराः।
एताश्च देवताः [6]सर्वाः [7]शून्यग्रामनिवासिनः॥ ७॥
गतागतं च कृत्वा तु [8]पूर्वापरेषु वास्तुषु।
[9]तद्ग्रामवासिनां तेषां रोगशोकभयं भवेत्॥ ८॥
तद्ग्रामे चोत्सवं कुर्यात् [10]तद्राष्ट्रं च विनश्यति।
तद्दोषशमनार्थाय [11]राक्षसादिबलिं ददेत्॥ ९॥

[बलिदानम्]

[12]ग्रामाभिमुखसंस्थानं निर्गत्वा [13]द्वारदेशके।
[14]राक्षसाद्याश्च [15]ये देवा [16]द्वारदेशं [17]समाश्रिताः॥ १०॥
[18]एतत्स्थानस्थदेवानां प्रीत्यर्थं बलिमाचरेत्।
[19]बलिद्रव्यं तु सम्पाद्य देशिकः स्नानमाचरेत्॥ ११॥

---

[1] ग्राममाश्रितदेवानां ] सं॰ पाठः; ग्राममाश्रित्य देवानां – अ, ई, ऊ, ज. 'ऋ' मातृकायां अक्षराणि लुप्तानि।
[2] आद्यन्तं बलियुक्तं तु ] ई, ज; आद्यन्तबलियुक्तस्तु – अ, ऋ; आदित्य बलिं युक्तं तु – ऊ.
[3] अयुक्तं तु ] अ, ई, ऋ, ज; आयत्तन्तु – ऊ.
[4] ब्रह्मराक्षसपैशाच॰ ] ई, ऊ, ज; ब्रह्मराक्षस . . . . – अ, ऋ.
[5] निशाचराः ] अ, ई, ऋ, ज; निशाकराः – ऊ.
[6] सर्वाः ] अ;सर्वे – ई, ऊ, ऋ, ज.
[7] शून्यग्रामनि॰ ] अ, ऊ, ऋ; शून्यग्रामं तु – ई, ज.
[8] पूर्वापरेषु ] अ; पूर्वापरसु॰ – ई, ऊ, ऋ, ज.
[9] तद्ग्रामवासिनां तेषां ] सं॰ पाठः ; तद्ग्रामवासिनः सर्वे – अ, ई, ऊ, ऋ , ज.
[10] तद्राष्ट्रं च ] अ, ई, ऊ, ऋ; तद्राष्ट्रस्य – ज.
[11] राक्षसादि॰ ] ई, ज; तद्राक्षस॰ – अ, ऊ, ऋ.
[12] ग्रामाभिमुखसंस्थानं ] अ, ई, ऋ, ज; ग्रामाभिमुखं स्थानं – ऊ.
[13] द्वारदेशके ] अ, ई, ज; द्वारदेशतः – ऊ; द्वारदेश.. – ऋ.
[14] राक्षसाद्याश्च ] ई, ऊ, ज; राक्षसाश्चाद्य – अ, ऋ.
[15] ये देवा ] अ, ई, ऋ; ये देवानां – ऊ; ये दीवाः – ज.
[16] 'ऊ' मातृकायां श्लो॰ ११ पू॰ द्वितीयपादः श्लो॰ १० उ॰ द्वितीयपादस्य स्थाने दृश्यते। अन्यच्च श्लो॰ ११ पू॰ द्वितीयपादस्य स्थाने श्लो॰ १० उ॰ द्वितीयपादो दृश्यते।
[17] समाश्रिताः ] ऊ, ऋ; समाश्रिताम् – अ; समाश्रयेत् – ई, ज.
[18] एतत्स्थानस्थदेवानां ] सं॰ पाठः; एतत्स्थानस्य देवानां – अ, ऋ; एतत्स्थानश्रिता देवाः – ई, ज; एतत्स्थास्थानदेवानां – ऊ.
[19] बलिद्रव्यं ] ई, ज; पञ्चगव्यं – अ; 'ऊ' मातृकायां ११ उ॰ न दृश्यते । 'ऋ' मातृकायां 'पञ्चगव्यं' पदं न दृश्यते।

सकलीकरणं कृत्वा सामान्यार्घ्यं प्रकल्पयेत्॥ १२॥

[विघ्नेशपूजादि]

पञ्चगव्यं तु [1]संसाध्य विघ्नेशं पूजयेत् पुरा।
नालिकेरफलं दत्वा [2]द्विखण्डं सर्वसिद्धिदम्॥ १३॥
शैथिल्यं कर्मशैथिल्यं तस्माद्दोषं परित्यजेत्।
[3]विघ्नराज नमस्तुभ्यं विज्ञाप्य परमेश्वरम्॥ १४॥
देवदेव जगन्नाथ जगतामार्तिनाशन।
[4]शिवाध्वरप्रवृत्तोऽहं तवाज्ञां [5]कुरु मे सदा॥ १५॥
यत्कृतं तेन [6]भगवन् मया च मखमन्दिरे।
[7]भूतेभ्यो बलिकर्माणि त्वत्प्रसादात्करोम्यहम्॥ १६॥

[बलिद्रव्यसाधनम्]

क्रमुकं [8]नालिकेरस्य पुष्पं प्रत्येकमेव हि।
नालिकेरफलं मांसं [9]संख्यया प्रतिगृह्यताम्॥ १७॥
तदर्धं तण्डुलद्रोणं पुष्पं तस्य चतुर्गुणम्।
पीतरक्तनिभं पुष्पं [10]पुष्पोद्यानसमुद्भूतम्॥ १८॥
देवस्य [11]मुक्तपुष्पं तु [12]जातिकल्हारकं तथा।
अन्यत्सुगन्धपुष्पं च [13]पुष्पपात्रे निधापयेत्॥ १९॥
[14]कार्पासवर्तिरिका च महावर्तैस्तु पञ्चकम्।

---

[1] संसाध्य ] ई; संसाद्य – अ, ऊ, ज; संपाद्य – ऋ.
[2] द्विखण्डं ] अ, ई, ऋ, ज; तद्विखण्डं – ऊ.
[3] 'ऋ' मातृकायां 'विघ्न' पदं न दृश्यते।
[4] शिवाध्वरप्रवृत्तोऽहं ] सं० पाठः; ०प्रकर्तव्या – अ; ०प्रवृत्तोऽयं – ई; ०प्रवर्तेऽहं – ऊ; ०प्र . . . . – ऋ; ०प्रवर्त्तेयं – ज.
[5] कुरु मे सदा ] ऊ, ऋ, ज; कुरुते स – अ, ई.
[6] भगवन् ] अ, ई, ऋ, ज; भगवान् – ऊ.
[7] भूतेभ्यो ] अ, ऊ, ऋ; भूताश्च – ई, ज.
[8] नालिकेरस्य ] ई, ज; नालिकेरं च - अ, ऊ; नालि . . . . – ऋ.
[9] संख्यया ] ई, ऊ; संख्याया – अ, ऋ, ज.
[10] पुष्पोद्यानसमुद्भूतम् ] अ, ऋ; पुष्पं च सुसमुद्भूतम् – ई; पुष्पोदनसमृद्धिदम् – ऊ; पद्मपुष्पसमृद्धिदम् – ज.
[11] मुक्तपुष्पं ] सं० पाठः; मुक्तापुष्पं - अ, ऊ, ऋ, ज; उक्तापुष्पं – ई.
[12] जातिकह्लारकं तथा ] सं० पाठः; जातिकह्लारकेतुषु – अ, ई, ऊ, ऋ, ज.
[13] पुष्पपात्रे ] ई, ज; पुष्पदर्भे – अ; पुष्पदस्य – ऊ; पुष्प . . . . – ऋ.
[14] कार्पासवर्तिरिका च महावर्तैस्तु पञ्चकम् ] सं० पाठः ; कार्पासवर्तिमेकेन महावर्तिस्तु पञ्चकम् - अ, ई, ऊ, ऋ, ज.

[1]गजमृगमदं [2]कृष्णगन्धं कर्पूरसंयुतम्॥ २०॥
कुन्दुरुष्कागरुं धूपं रक्तवस्त्रं च [3]कम्बलम्।
पञ्चकं दारुपीठं तु चतुर्थं वा [4]समन्वितम्॥ २१॥
खड्गशूलधनुर्बाणक्षुरिकाभिण्डिपालकम्।
नालिकेरं च [5]तैलं च समृद्धकदलीफलम्॥ २२॥
पञ्चचूर्णं गुलं क्षीरं कदलीदलसंयुतम्।
क्रमुकं [6]चैलासंयुक्तं ताम्बूलं च समृद्धिदम्॥ २३॥
[7]शुद्धोदनं पचेद्धीमान् आढकद्वयतण्डुलैः।
[8]पायसं [9]चाढकेनैव [10]तत्संख्यैश्च सिताक्षतैः॥ २४॥
[11]आर्द्रैः [12]क्षीरविमिश्रैश्च शुद्धपात्रे निधापयेत्।

[बल्युत्सवः]

एवं द्रव्यं तु संपाद्य [13]अस्त्रेश्वरमथार्चयेत्॥ २५॥
[14]शिवखड्गं तु संगृह्य विन्यसेच्छिवसन्निधौ।
विज्ञाप्य परमेशानं बलिद्रव्यं [15]च संग्रहेत्॥ २६॥

[पूर्वे बलिदानम्]

अस्त्रेशं शिवखड्गं तु शिष्यः [16]संगृह्य पाणिना।

---

[1] गजमृग० ] ज; भजन्मृग० – अ, ऊ, ऋ; भजन्मुग – ई.
[2] कृष्णगन्धं ] ई; कृष्णं गन्धं – अ, ऊ, ऋ, ज.
[3] कम्बलम् ] अ, ई, ऊ, ऋ; पञ्चकम् – ज.
[4] 'अ' मातृकायां लुप्तम्।
[5] तैलं च ] ई, ऊ, ज; कचैनं च – अ; क्लैशं – ऋ.
[6] चैलासंयुतं] सं० पाठः; तैलसंयुक्तं – अ, ई, ऊ, ऋ, ज.
[7] शुद्धोदनं ] ई, ऊ, ज; शु... – अ, ऋ.
[8] पायसं ] अ, ऊ, ऋ, ज; पायं – ई.
[9] चाढकेनैव ] सं० पाठः; चासकेनैव – अ, ई, ऋ, ज; स्विकेनैव – ऊ.
[10] तत्संख्यैश्च ] ई, ऊ, ऋ, ज: तत्सीस्यैश्च – अ;.
[11] आर्द्रैः ] अ; आद्ये – ई, अर्द्रे – ऊ, ऋ, ज.
[12] क्षीरविमिश्रैश्च ] सं० पाठः; क्षीरविमिश्रेण – अ, ई, ऊ, ऋ, ज.
[13] अस्त्रेश्वरमथार्चयेत् ] ई, ज; अ . . . . र . . . . मथाचरेत् – अ; अ . . . . थार्चयेत् – ऋ.
[14] शिवखड्गं ] ई, ऊ, ऋ, ज; शिवघटं – अ.
[15] च संग्रहेत् ] अ, ऊ; तु संग्रहेत् – ई, ज; च . . . . ग्रहेत् – ऋ.
[16] संगृह्य ] अ, ऊ, ऋ; संग्राह्य – ई, ज.

[1]शङ्खभेर्यादिघोषैश्च [2]डमरुपटहमर्दलैः॥२७॥
एतैरन्यैश्च घोषैश्च स्त्रीणां [3]कुरवसंयुतम्।
सदा घण्टारवोपेतं[4] दीपज्वालासमन्वितम्॥२८॥
[5]छत्रचामरसंयुक्तं द्वारदेशं [6] समाश्रयेत्।

[द्वारपालादिबलिः]

द्वारपालान् [7]समभ्यर्च्य आसनादिनिवेद्यकम्॥२९॥
बाह्ये [8]वाभ्यन्तरे वापि [9]वटुकं संप्रपूजयेत्।
[10]द्वारं प्रक्षाल्य तोयेन [11]नन्दिकालबलिं ददेत्॥३०॥
वृषभं पूजयेन्मध्ये महाघण्टां तु ताडयेत्।
[12]पश्चाद्द्वारबहिर्गत्वा पञ्चहस्तप्रमाणतः॥३१॥
[13] तृणमूलादीन् संत्याज्य तत्समं चतुरश्रकम्।
तन्मध्ये वेदिकां कुर्याद् गोमयालेपनं कुरु॥३२॥
प्रोक्षयेत् पञ्चगव्येन बलिद्रव्यं तु संग्रहेत्।
[14]अस्त्रेशं वेदिकोर्ध्वे तु शिवखड्गं [15]च विन्यसेत्॥३३॥
मध्ये पूर्वे च [16]याम्ये च पश्चिमे चोत्तरे दिशि।

---

[1] शङ्खभेर्यादि० ] सं० पाठः; शङ्खभेर्याश्च – अ, ई, ऊ, ऋ, ज.
[2] डमरुपटहमर्दलैः ] ई, ज; कंपट मद्दलैः – अ; डमरुपटमष्टदलैः – ऊ; .... पटमर्दलैः – ऋ.
[3] कुरव० ] अ, ऊ, ऋ; सुरव०- ई; कुरूप० – ज.
[4] घण्टारवोपेतं ] ई, ऊ, ऋ, ज; ०पेता – अ.
[5] छत्रचामर० ] ई, ऊ, ज; छत्रच्छामर० – अ; चित्रचामर० – ऋ.
[6] समाश्रयेत् ] ई, ज; समाश्रय .... – अ; समर्चयेत् – ऊ; सक्रमाग्र .... – ऋ.
[7] समभ्यर्च्य आसनादिनिवेद्यकम् – अ, ऋ; समभ्यर्च्य स्नानानैवेयद्यकान्तकम् – ई, ज; समभ्यर्च्य स्नानादिनिवेयद्यकम् – ऊ.
[8] वाभ्यन्तरे ] ई, ऊ; बाह्यान्तरे – अ, ऋ, ज.
[9] वटुकं ] ऊ; वरकं – अ, ई, ऋ, ज.
[10] 'अ', 'ऋ' मातृकयोः श्लो० ३० उ०-३३ पू० भागो न दृश्यते।
[11] नन्दिकाल० ] ई; नन्दिकालं – ऊ; नदिकालौ – ज.
[12] पश्चाद्द्वारबहिर्गत्वा ] ऊ; ०कृत्वा – ई, ज.
[13] तृणमूलादीन् संत्याज्य ] सं० पाठः तृणशल्यादिभिः त्याज्य - अ, ई, ऊ, ऋ, ज.
[14] अस्त्रेशं ] अ, ई, ज; अस्त्रेण - ऊ; अ .... शं – ऋ. 'अ' मातृकायां श्लोकक्रमः ३३उ०, ३४उ०, ३५पू०, ३४पू०, ३५उ०, ३६पू०, ३६उ० इति वर्तते।
[15] च ] सं० पाठः; तु – अ, ई, ऊ, ऋ, ज.
[16] याम्ये च ] सं० पाठः; याम्ये तु - अ, ई, ऊ, ऋ, ज.

मध्ये [1]पत्रेऽष्टपद्मं च ऐन्द्रे तु वसुकोणकम्॥ ३४॥
याम्ये तु नवयोनिः स्यात् षड्कोणं पश्चिमे दिशि।
उत्तरे चाष्टशूलं च रक्तवर्णेन संलिखेत्॥ ३५॥

[मण्डलकल्पनादि]

तद्बाह्ये सितवर्णेन चतुरश्रं प्रकल्पयेत्।
[2]अश्रस्याभ्यन्तरे कोणं पञ्चवर्णैरलंकृतम्॥ ३६॥
[3]मण्डलस्य पदाद्बाह्ये न्यसेत्पीठचतुष्टयम्।
पीठं विन्यस्य मध्ये तु मध्ये मण्डलपश्चिमे॥ ३७॥
पीठोर्ध्वे वस्त्रमास्तीर्य रक्तपद्मेन [4]संवृतम्।
[5]प्रस्थं कुडुपमाधिक्यं तण्डुलं [6]पीठिकोपरि॥ ३८॥
तस्योर्ध्वे नालिकेरं तु स्थापयेत् तु चतुर्दिशि।
खड्गं पूर्वे तु विन्यस्य धनुर्बाणं च दक्षिणे॥ ३९॥
[7]क्षुरिकां पश्चिमे स्थाप्य [8]भिण्डिपालमथोत्तरे।
शूलं च मध्यमे [9]स्थाप्य ओदनं पञ्चचूर्णकम्॥ ४०॥
प्रस्थं कुडुबसंयुक्तं [10]तण्डुलं तु निधापयेत्।
[11]तण्डुलं कांस्यपात्रे तु कारयेत् तस्य मूर्धनि॥ ४१॥
[12]नालिकेरोदकेनैव [13]घृतेन परिपूरितम्।

---

[1] पत्रेऽष्टपद्मं ] सं० पाठः; पत्राष्टपद्मं - अ, ई, ऊ, ऋ, ज.
[2] अश्रस्याभ्यन्तरे ] अ, ई, ऋ, ज; अश्रस्यान्तरे – ऊ.
[3] मण्डलस्य ] अ, ऊ, ऋ; मण्डलं स्यात् – ई, ज.
[4] संवृतम् ] ज; सुव्रत – ई; सुव्रतम् – अ, ऊ, ऋ.
[5] प्रस्थं कुडुपमाधिक्यं ] ई, ऊ, ऋ, ज; प्रस्थं कुण्डं बमाथिल्यं – अ.
[6] पीठिकोपरि ] अ, ई, ज; पीठिकेश्वरी – अ; पीठकोपरि – ऋ.
[7] क्षुरिकां ] ऊ, ऋ, ज; क्षुरिका – अ; क्षुरिकं – ई.
[8] भिण्डिपालमथो० ] अ, ऊ, ऋ, ज; भिण्डिपालं तथो० – ई.
[9] स्थाप्य ओदनं पञ्चचूर्णकम्] सं० पाठः; स्थाप्योदने पञ्चभिश्शरम् -अ;०ओदने पञ्चभिश्शरम्- ई, ऊ; . . . . ने पञ्चभिश्शरम्-ऋ;०जोदने पञ्चभिश्शरम् - ज.
[10] तण्डुलं तु ] अ, ई, ज; तण्डुलं च – ऊ.
[11] तण्डुलं कांस्यपात्रे तु ] ई; कांस्यपात्रे तु तण्डुलं - अ, ऊ; कांस्यपात्रे तु तण्डुल्यं – ऋ, ज.
[12] नालिकेरोदकेनैव ] ई; नारिकेलस्योदकं च – अ, ऋ, ज; नालिकेरस्योदकं चैव – ऊ.
[13] घृतेन परि० ] अ, ई, ऋ; घृतोपरि – ऊ.

तन्मध्ये तु महावर्तिं [१]विधियुक्तं च विन्यसेत्॥ ४२॥
स्वस्तिकं वायुदेशे तु पञ्चचूर्णैरलंकृतम्।
[२]तस्योर्ध्वे वाथ शुद्धं च नालिकेरसमाश्रितम्॥ ४३॥
तस्याग्रे कदलीपत्रम् [३]आमूलाग्रसमन्वितम्।
[४]सिताक्षतान् न्यसेदूर्ध्वे कदलीफलसंयुतम्॥ ४४॥
[५] शास्तारं चण्डिकां चैव अघोरं भैरवं तथा।
[६]तन्मध्ये भूतनाथेशं [७]पूर्वादिषु समर्चयेत्॥ ४५॥

[अग्निदेशे बलिदानम्]

आग्नेये [८]मण्डले पश्चात् पञ्चचूर्णैरलङ्कृतम्।
मूर्तिमानब्जपूर्वे तु विन्यस्याष्टदिशासु वा॥ ४६॥
विन्यसेत्कदलीपत्रे[९] कपित्थफलमाकृतिम्[१०]।
[११]पिण्डमेकं प्रदातव्यं वर्तिदीपसमन्वितम्॥ ४७॥
[१२]नन्यादीनां बलिं दद्यात् जलेन परिषेचनम्।

[निर्ऋतिदेशे बलिदानम्]

नैर्ऋते चैव षट्कोणं पञ्चचूर्णैर्विलिख्य च॥ ४८॥
महाभूतेन षट्कं च [१३]बलिं दद्याद्यथाक्रमम्।

---

[१] विधियुक्तं ] अ, ऊ, ऋ; बधियुक्तं – ई.
[२] तस्योर्ध्वे वाथ ] ज; तस्योवा यं – ई; तस्योनराय – ऊ. 'अ', 'ऋ', मातृकयोः श्लो० ४३ उ०-४६ पू० भागो न दृश्यते।
[३] आमूलाग्र० ] ई, ज; आमूलाग्रे – ऊ.
[४] सिताक्षतान् ] ई, ऊ; सिताक्षते – ज.
[५] शास्तारंचण्डिकां चैव ] सं० पाठः; शास्तुश्च चण्डिकायाश्च – ई, ज; शास्तुं च चण्डिकायाश्च – ऊ.
[६] तन्मध्ये ] ई, ज; तदग्रे – ऊ.
[७] पूर्वादिषु ] ई, ज; पूर्वादिक्षु – ऊ.
[८] मण्डलं] सं० पाठः; मण्डपे – ई, ऊ, ज.
[९] विन्यसेत्कदलीपत्रे ] अ, ई, ऋ, ज; ०पत्रं – ऊ.
[१०] ०कृतिम् ] सं० पाठः; ०कृतिः – अ, ऊ, ऋ; ०कृते – ई; ०धृते – ज.
[११] पिण्ड० ] अ, ई, ऊ, ऋ; पिण्डि० – ज.
[१२] नन्यादीनां ] सं० पाठः; नन्दादि च – अ, ऊ, ऋ; नन्तादीनां – ई; अनन्तादि – ज.
[१३] बलिं दद्याद् ] अ, ऋ; बल्यन्नं च – ई; बलिं न – ऊ; बमिं . . . . – ज.

[ईशदेशे बलिदानम्]

[१]ऐशान्यां [२]मण्डलं कल्प्य चतुष्कोणसमन्वितम्॥ ४९॥
सूत्रषट्कसमायुक्तं पञ्चचूर्णैरलंकृतम्।
नालिकेरदलेनैव लम्बयेत्तु [३]पदार्थकम्॥ ५०॥
क्रमुकं नालिकेरस्य पुष्पैश्चैव प्रलम्बयेत्।
[४]चतुष्पथे [५]पिशाचानां [६]त्रिपथे रक्षसां बलिम्॥ ५१॥
कूष्माण्डांस्त्रिपथे[७] पूज्य नागांश्च [८]त्रिपथे यजेत्।
[९]त्रिपथे भैरवं पूज्य द्विपथे असुरार्चनम्॥ ५२॥
[१०]एतदन्नं बलिं दत्वा वर्तिदीपं समाचरेत्।
एवं क्रमेण संपूज्य पुष्पं [११]गृह्य विकीर्य च॥ ५३॥
सिताक्षतं विकीर्याथ

[देवोद्वासनकम्]

[१२]दिष्टोद्वासनकं कुरु।
[१३]शिवखड्गेन संशोध्य रक्ततोयं विसृज्य च॥ ५४॥
ऐशान्यां [१४]मध्ये वाग्रे तु [१५]अजं शस्त्रेण संहरेत्।

---

[१] ऐशान्यां ] ई, ज; ऐशानं – अ, ऋ.
[२] मण्डलं ] अ, ई, ऊ, ज; मण्डपं – ऋ.
[३] पदार्थकम् ] अ, ई, ऋ, ज; पवित्रकम् – ऊ.
[४] चतुष्पथे ] अ, ई, ऋ, ज; चतुष्पदे – ऊ.
[५] पिशाचानां ] ई; पिशाचाश्च – अ, ऋ, ज; पिशाशश्च – ऊ.
[६] त्रिपथे ] अ, ई, ऋ, ज; त्रिपदो – ऊ.
[७] कूष्माण्डांस्त्रिपथे ] अ, ई, ऋ, ज; ०पदे – ऊ.
[८] त्रिपथे ] अ, ई, ऋ, ज; त्रिपदा – ऊ.
[९] त्रिपथे ] अ, ई, ऋ, ज; त्रिपदे – ऊ.
[१०] एतदन्नं वलिं ] ई; एतं नन्दिवलिं – अ; एतने – ऊ; एतन्नन्दवलिं – ऋ, ज.
[११] गृह्य ] अ, ऊ, ऋ; ग्राह्य – ई, ज.
[१२] दिष्टोद्वासनकं ] अ, ई, ऋ, ज; दित्वोद्वसनं – ऊ.
[१३] शिवखड्गेन ] अ, ई, ऋ, ज; शिवघटेन – ऊ.
[१४] मध्ये वाग्रे ] सं० पाठः; मद्य वाग्रे – अ, ऋ; मद्य माने – ई; मन्यलाग्रे – ज.
[१५] अजं शस्त्रेण ] अ, ऋ ; अजशस्त्रेण – ई, ऊ, ज.

नमस्ते भूतनाथेश प्रीत्यर्थं [1]गृह्यतां बलिः ॥५५॥
मया प्रवर्तितो यागः [2]सर्वाभीष्टप्रदायकः।
ततः प्रीतमना भूत्वा [3]गच्छ त्वं हि यथासुखम्॥५६॥

[शून्यवास्तुषु ग्रामे च बलिदानम्]

[4]शून्यवास्तुषु मध्ये तु पश्चाच्छान्तिबलिं क्षिपेत्।
तद्ग्रामे [5]भद्रकाल्याश्च तृप्त्यर्थं बलिमाचरेत्॥५७॥
[6]अन्येषां [7]सर्वदेवानां तृप्तिमाप्नोति दापयेत्।
पादप्रक्षालनं कृत्वा पश्चाद्वास्तु प्रवेशयेत्॥५८॥
[8]ब्रह्मस्थाने तु संकल्प्य देवाग्रे [9]वीथिमध्यमे।
भूतपीठेन्द्रमध्ये वा वास्तुमध्ये प्रकल्पयेत्॥५९॥
[10]पूर्वश्चाग्निर्यमश्चैव [11]निर्ऋतिर्वरुणस्तथा।
[12]वायुःसोमस्तथैशानः [13]तथा देवबलिं क्षिपेत्॥६०॥
[14]बलिस्थानात् [15]मयोक्तात्तु अन्यस्थानेषु वर्जयेत्।

[वास्तुबाह्येषु बलिदानम्]

[16]मृगयात्रादितीर्थान्तं [17]वास्तुबाह्येषु [18]यानकम्॥६१॥

---

[1] गृह्यतां बलिः ] सं० पाठः; बलिं गृह्यताम् – अ, ऊ; प्रति गृह्यताम् – ई; बलि गृह्यताम् – ऋ, ज.
[2] सर्वाभिष्टप्रदायकः ] ई, ऊ, ऋ, ज; ०दायकम् – अ.
[3] गच्छ त्वं हि यथासुखम् ] ई, ऊ; गच्छर्ध्वं हि भयासुखम् – अ; गच्छध्वं हि भयासुखम् – ऋ; गच्छध्वं हि यथासुखम् - ज;.
[4] शून्य० ] ई, ज; शून्यं – अ, ऊ, ऋ.
[5] भद्रकाल्याश्च ] ई, ऊ, ऋ, ज; भद्रकाल्यं च – अ.
[6] अन्येषां ] सं० पाठः; अनेन – अ, ऋ; अन्यैश्च – ई, ऊ, ऋ[२]; अन्यश्च – अ[२]; अन्नैश्च – ज.
[7] सर्वदेवानां ] सं० पाठः; सर्वदेवाश्च ] अ, ई, ऋ, ज, ऋ[२]; देवसर्वाश्च –ऊ; सर्वो देवश्चेत् – अ[२].
[8] ब्रह्मस्थाने ] अ, ऊ, ज, अ[२], ऋ[२]; ब्रह्मस्थानं – ई; ब्रह्मस्था.. – ऋ.
[9] वीथिमध्यमे ] ई, ऊ, ऋ, ज; विधिमध्यमे – अ; रथमध्यमे – अ[२]; रथिमध्यमे – ऋ[२].
[10] पूर्वश्चाग्निर्यमश्चैव ] अ, ऊ, ऋ; पूर्वाग्निश्च यमश्चैव – ई, ज, अ[२], ऋ[२].
[11] ०र्वरुणस्तथा ] अ, ऊ, ऋ; ०वरुणवायुषु – ई, अ[२], ऋ[२]; ०निरुणवायुषु – ज.
[12] वायुः सोमस्तथैशानः ] सं० पाठः ; वायुस्सोमस्तथैशान्यो - अ, ऊ, ऋ; कुबेरमीशसंयुक्ता – ई, ज, अ[२], ऋ[२].
[13] 'ऋ' मातृकायां श्लो० '६०' चतुर्थपादो न दृश्यते।
[14] बलिस्थानात् ] सं० पाठः; बलिस्थाने – अ, ई, ऊ, ऋ, ज.
[15] मयोक्तात्तु ] सं० पाठः; मथा तस्य – अ; मया तस्य – ई, ऊ, ऋ, ज; मया तस्माद् – अ[२], ऋ[२].
[16] मृगयात्रादि तीर्थान्तं ] सं० पाठः; ०तीर्थं च – अ, ऋ, ज, अ[२]; ०तिसश्च – ई; ०तीर्थाश्च – ऊ; ०तीशाश्च – ऋ[२].
[17] 'ऊ' मातृकायां श्लो० ६१ चतुर्थपादः ६२पू० च न दृश्येते।
[18] यानकम् ] ई, ज, अ[२], ऋ[२]; नायकम् – अ; नायकः – ऋ.

मध्याह्ने वाथ सायाह्ने अर्धरात्रे बलिं ददेत्।

[ग्रामशान्तिबलिफलम्]

ग्रामशान्तिबलिं कुर्यात् सर्वाभीष्टफलप्रदम्॥ ६२॥
[१]तद्ग्रामवासिनां [२]सर्वक्षेमार्थं बलिरुच्यते।
[३]ग्रामशान्तिबलिहीने [४]तद्राष्ट्रे वास्तुनाशनम्॥ ६३॥
परचक्राद्भयं [५]राज्ये [६]राजा [७]दुर्जयमाप्नुयात्।
तद्राष्ट्रवासिनः सर्वे ज्वरमार्यादिपीडिताः[८]॥ ६४॥
तस्मात्सर्वप्रयत्नेन ग्रामशान्तिबलिं ददेत्।
[९]तदन्ते चोत्सवं कुर्यात् सर्वकामफलप्रदम्॥ ६५॥
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्॥ ६६॥

॥ [१०]इति सूक्ष्मशास्त्रे ग्रामशान्तिविधिस्त्रिषष्टितमः पटलः॥

---

[१] तद्ग्रामवासिनां सर्वक्षेमार्थं वलिरुच्यते ] सं० पाठः ; तद्ग्रामवासिनः सर्वे इति सर्वासु मातृकासु ।
[२] सर्वक्षेमार्थं ] अ, ऊ, ऋ; ०बलदं – ई, ज; ०बलिदं – अ[२], ऋ[२].
[३] ग्रामशान्ति वलिहीने ] अ, ऊ, ऋ; ०बले हीने – ई, ज; ०बलौ हीने – अ[२], ऋ[२].
[४] तद्राष्ट्रे ] अ, ऋ, ज, अ[२], ऋ[२]; तद्ग्रामे – ई; तद्राष्त्र० – ऊ .
[५] राज्ये ] ई, अ[२], ऋ[२]; राष्त्रं – ऊ; राज्यं – अ, ऋ, ज.
[६] राजा ] ऊ, ऋ, ज, अ[२], ऋ[२]; राज – अ, ई.
[७] दुर्जय० ] अ, ऊ,ऋ; निर्जय० – ई, ज, अ[२], ऋ[२].
[८] ज्वरमार्यादि पीडिताः ] ई, ऊ, ऋ, ज, अ[२], ऋ[२]; ०पीठिताः – अ.
[९] तदन्ते ] ई, ज, अ[२], ऋ[२]; तद्दिने – अ, ऊ.
[१०] इति सूक्ष्मशास्त्रे ग्रामशान्तिविधिस्त्रिषष्टितमः पटलः] सं० पाठः ; अ:'इति सूक्ष्मशास्त्रे ग्रामशान्तिविधिर्द्विषष्टितमः पटलः'; ई: 'इति सूक्ष्मशास्त्रे जीर्णोद्धारविधिः सप्तपंचाशत्पटलः';ऊ:'इति सूक्ष्मागमे ग्रामशान्तिविधिपटलो एकषष्टितमः'; ऋ: 'इति सूक्ष्मशास्त्रे ग्रामशान्तिविधिः .द्विषष्टितमः पटलः'; ज: 'इति सूक्ष्मशास्त्रे ग्रामप्रायश्चित्तविधिं नाम चतुश्चत्वारिंशत्पटलः'। 'अ[२], ऋ[२]' मातृकयोः तत्पटलपुष्पिका न दृश्यते॥

## [चतुष्षष्टितमः पटलः[१]]

## [नित्यप्रायश्चित्तविधिः]

वक्ष्ये [२]नित्यार्चनाहीने प्रायश्चित्तं [३]प्रभञ्जन।

[प्रायश्चित्तपदार्थः]

प्रायो विनाशमित्युक्तं चित्तं सन्धानमुच्यते॥ १॥
[४]विनाशस्य तु सन्धानं [५]प्रायश्चित्तमिति स्मृतम्।

[द्रव्यहीने प्रायश्चित्तम्]

आदौ [६]तु [७]निश्चितद्रव्यहीनं वै दोषकारणम्[८]॥ २॥
तद्दोषशमनार्थाय प्रायश्चित्तं तु कारयेत्।
[९]अकल्पितं तु यद्द्रव्यं हीने [१०]दोषो न विद्यते॥ ३॥

[अन्यप्रायश्चित्तकारणानि]

[११]मार्जनप्रोक्षणे हीने [१२]स्नानं [१३]कर्मकरस्य तु। [१,२]

---

[१] अयं पटलः अ (टि.१९१, पृ० ३५५-३६०), ई (टि.३६, पृ० २९३, २७४-२७६), उ (टि.३७, पृ० ४४-४९), ऊ (टि.३८, पृ० ७८७-७९७), ऋ (टि.९७, पृ० ३०७-३११); ज (टि.१००३, पृ० २७७-२८२) इत्येतेषु कोशेषु दृश्यते। 'झ' (टि.१०१६, पृ० १४९-१५१) मातृकायां 'प्रायश्चित्तविधिपटलः' इत्यत्र श्लोकाः निरूप्यमाणविषयाश्च भिन्नक्रमा दृश्यन्ते। 'अ, ई, ऋ' मातृकासु तस्य पटलस्य श्लो० २ द्वितीयपादमारभ्य श्लो० २८ चतुर्थपादान्तो भागो जीर्णोद्धारपटलस्य मध्ये दृश्यते। 'ऊ' मातृकायामपि श्लो० २ द्वितीयपादमारभ्य श्लो० ११ प्रथमपादान्त एव भागो जीर्णोद्धारपटलस्य मध्ये दृश्यते। अत्र ते कोशाः अ[२] (टि.१९१, पृ० ३७४-३७६), ई[२] (टि.३६, पृ० २८२-२८५), ऊ[२] (टि.३८, पृ० ८२९-८३१), ऋ[२] (टि.९७, पृ०३२५-३२७) इति लिखिताः।

[२] नित्यार्चना० ] अ, उ, ऋ; नित्यार्चने – ऊ, ई, ज.

[३] प्रभञ्जन ] अ, ऊ, ऋ; विधिक्रमम् – ई, उ, ज.

[४] विनाशस्य ] अ, ई, उ, ऊ, ऋ; विरशस्य – ज.

[५] 'ई' मातृकायां श्लो० २ द्वितीयपादमारभ्य २८ द्वितीयपादान्तो भागो न दृश्यते।

[६] 'अ' मातृकायां 'तु' न दृश्यते।

[७] निश्चितद्रव्यहीनं वै ] सं०पाठः; निश्चितद्रव्यं हीने वा- उ, ऊ[२]; निश्चयद्रव्यं हीने वा- अ, ऋ, ज, अ[२], ई[२], ऋ[२]; निश्चयद्रस्य हीने वा - ऊ.

[८] ०कारणम् ] अ, उ, ऊ, ऋ, ज; ०कारकम् – अ[२], ई[२], ऊ[२], ऋ[२].

[९] अकल्पितं तु यद्द्रव्यं ] उ, ज, अ[२], ई[२], ऊ[२], ऋ[२]; कल्पितं तु च यद्द्रव्यं – अ; कल्पितं तयुतं द्रव्यं – ऊ; तु यतद्द्रव्यं – ऋ.

[१०] दोषो ] उ, अ[२], ऊ[२], ऋ[२]; दोषं – अ, ऋ, ज, ई[२].

[११] मार्जन० ] अ, उ, अ[२], ई[२], ऊ[२], ऋ[२]; मार्जनं – ऊ, ऋ.

[१२] स्नानं ] अ, उ, ऊ, ऋ, ई[२]; नारं – ज; हीन० – अ[२], ऊ[२], ऋ[२].

[१३] कर्मकरस्य तु ] सं० पाठः; कर्मकरस्तथा - अ, उ, ऊ, ऋ, ज, ई[२], ऊ[२], ऋ[२]; कर्मकलास्तथा – उ.

सौरपूजाविहीने च [1]पुण्याहगव्यहीनके॥ ४॥ [३,४,५]
[2]लम्बोदरार्चनाहीने रन्ध्रार्चनविहीनके। [६,७]
पाद्यमाचमनं [3]चार्घ्यहीने स्नानविहीनके॥ ५॥ [८,९,१०,११]
[4]वस्त्राभरणहीने च [5]गन्धपुष्पविहीनके। [१२,१३,१४,१५]
[6]नैवेद्यं चोपदंशं च [7]हीने पानीयहीनके॥ ६॥ [१६,१७,१८]
[8]मुखवासविहीने च [9]हुतबल्युत्सवेऽपि च। [१९,२०,२१,२२]
धूपदीपविहीने च [10]आरात्रिकविहीनके॥ ७॥ [२३,२४]
भस्मताम्बूलहीने च [11]दर्पणच्छत्रहीनके। [२५,२६]
[12]चामरं खड्गहीने च वेदस्तोत्रविहीनके॥ ८॥ [२६,२७,२८]
पुराणश्रवणे हीने पञ्चाङ्गश्रवणेऽपि च। [२९,३०]
नृत्तगानं च वाद्यं च चण्डार्चनविहीनके॥ ९॥ [३१,३२]
एवमादिसमुत्पन्ने निष्कृतिं च वदाम्यहम्।

[मार्जनादिहीने प्रायश्चित्तम्] [१,२]

[13]मार्जनप्रोक्षणे हीने [14]गोगणानां विनाशनम्॥ १०॥
मार्जनप्रोक्षणं कुर्याद् गव्येन प्रोक्ष्य [15]भूतले।
कालातिक्रमणार्थाय [16]शान्तिकुम्भाभिषेचनम्॥ ११॥

---

[1] पुण्याहगव्यहीनके] ऊ; पुण्याहं गव्यहीनके–अ, उ, ज, ई[२]; पुण्या+गविहीनके–ऋ; पुण्याहं ग . . . .न के-अ[२], पुण्याहविहीनके–ऊ[२]; पुण्याहं ....के– ऋ[२].
[2] लम्बोदरार्चना० ] अ, उ, ऋ, ई[२], ऊ[२], ऋ[२]; लम्बोदरार्चने – ऊ, ज, अ[२].
[3] चार्घ्य० ] अ, उ, ई[२], ऊ[२]; चार्घ्यं – ऊ, ऋ, अ[२], ऋ[२]; ०माघ्र्यं हि – ज.
[4] वस्त्राभरणहीने च ] अ, ऊ, ऋ, ऊ[२], ऋ[२]; वस्त्रमाभरणहीनं – उ, ज, ई[२].
[5] 'ऋ[२] मातृकायां श्लो० ६ द्वितीयपादमारभ्य - ८ तृतीयपादान्तो भागो न दृश्यते।
[6] 'अ[२]' मातृकायां श्लो० ८ पू०-९ उ० भागो न दृश्यते।
[7] हीने ] अ, ऋ, ज, ई[२], ऊ[२]; हीन० – ऊ.
[8] ०वासविहीने च ] अ, उ, ऊ, ऋ, ई[२], ऊ[२]; ०वासं च हीनके – ज.
[9] हुतबल्यु० ] अ, ऊ, ऋ; हुं तत्वल्य० – ई[२]; भूतवल्यु० – उ, ज;हुतत्त्वालो० – ऊ[२].
[10] आरात्रिक० ] उ, ऊ, ऋ, ज, ई[२], ऊ[२]; रात्रिचूर्ण० – अ.
[11] दर्पणच्छत्रहीनके ] अ, उ, ज, ई[२]; दर्पं छत्रविहीनके – ऊ, ऋ, ऊ[२].
[12] 'अ, ऊ, ऋ' मातृकासु श्लो० '८ पू०-९ उ०' भागो न दृश्यते।
[13] मार्जन० ] अ, उ, ऋ, अ[२]; मार्जनं – ऊ, ऊ[२].
[14] गोगणानां ] उ, ऊ, अ[२], ई[२], ऊ[२]; गोमृगाणां – अ; गोणानां विना . . . . नम् – ऋ; गोगानान् वि० – ज.
[15] भूतले ] अ, उ, ऊ, ऋ, ज, ई[२]; भूतलम् – अ[२], ऋ[२].
[16] शान्तिकुम्भाभिषेचनम् ] उ, अ[२], ऋ[२]; ०षेचयेत् – अ, ऊ, ऋ, ज, ई[२].

तद्दोषशमनार्थाय [1]व्योमव्यापिशतं जपेत्।
[2]हीने कर्मकरस्नाने दुर्भिक्षं जायते भुवि॥ १२॥
[3]एवं संस्पृशितं द्रव्यं वर्जयेत् [4]तत्प्रयत्नतः।
अथवा लिङ्गबिम्बस्य [5]स्पर्शनं चेद्विशेषतः॥ १३॥
मृद्भाण्डानि विसृज्याथ स्नपनैरभिषेचयेत्।

[सौरपूजादिहीने प्रायश्चित्तम्] [३,४,५]

[6]सौरपूजाविहीने [7]च भूपते रोगसंभवः॥ १४॥
शान्तिहोमं ततः कृत्वा स्नपनैरभिषेचयेत्।
जप्त्वा दिनकरं मन्त्रं सहस्रं वा तदर्धकम्॥ १५॥
[8]नित्यपुण्याहहीने च [9]तद्राष्ट्रे [10]नश्यते श्रियम्।
तद्दोषशमनार्थाय पञ्चगव्याभिषेचयेत्॥ १६॥
[11]पञ्चगव्यविहीने च महामारी प्रवर्तते।
घृतेन स्नापयेच्छम्भोः [12]ब्रह्ममन्त्रमनुस्मरन्॥ १७॥

[विघ्नेश्वरार्चनादिहीने प्रायश्चित्तम्] [६,७]

[13]विघ्नेश्वरार्चनाहीने [14]वाजिवारणनाशनम्।
स्नपनं शान्तिहोमं च कारयेत्तु गणेश्वरम्॥ १८॥

---

[1] व्योमव्यापि० ] उ, ऊ, ऋ, ज, अ[२], ई[२], ऋ[२]; सोमव्यापि० – अ.
[2] हीने कर्मकरस्नाने ] अ, ऋ; हीने कर्मकलास्नानं – उ, ऊ; . . . . ने कर्मकरस्थानं – ज; हीने कर्मकलास्थानं – अ[२], ई[२], ऋ[२].
[3] एवं संस्पृशितं ] अ, ऊ, ऋ; स एव स्पर्शित० – उ, अ[२], ई[२], ऋ[२]; सयेव स्पृशित० – ज.
[4] तत्प्रयत्नतः ] अ, उ, ज, ई[२]; तु प्रयत्नतः – ऊ, अ[२]; चेद्विशेषतः – ऋ; . . . . यत्नतः – ऋ[२].
[5] स्पर्शनं ] ऊ; स्पर्शितं – अ, उ, ऋ, अ[२], ई[२], ऋ[२]; स्पर्शतं – ज.
[6] 'अ, ऋ' मातृकायोः श्लो० '१४ उ०-१५ उ०' भागो न दृश्यते।
[7] च भूपते रोग० ] उ, ज, अ[२], ई[२], ऋ[२]; तु ...पन्दुरोग – ऊ.
[8] नित्यपुण्याहहीने च ] उ, ई[२]; नित्यपुण्याहविहीने – ऊ, ज; पुण्याहगव्यहीने – अ, ऋ; नित्यपुण्यादिहीने च – ऋ[२].
[9] 'अ, ऊ, ऋ' मातृकासु श्लो० १६ द्वितीयतृतीयचतुर्थपादा न दृश्यन्ते।
[10] नश्यते श्रियम् ] ज; नश्यति श्रियम् – उ, ई[२]; नश्यन्ति श्रियाः – अ[२]; . . . ति श्रियः – ऋ[२]. 'तद्राष्ट्रे श्रीर्विनश्यति।' इति चेत् साधु।
[11] पञ्चगव्यविहीने ] उ, ज, अ[२], ई[२], ऋ[२]; . . . . गव्यहीने – अ, ऊ, ऋ.
[12] ब्रह्ममन्त्रमनुस्मरन् ] अ, ऋ; ब्रह्ममन्त्रं शतं जपेत् – उ, ज, अ[२], ई[२], ऋ[२]; ब्रह्ममन्त्रशतस्मरन् – ऊ.
[13] विघ्नेश्वरार्चना० ] अ, उ, ऋ, अ[२], ई[२], ऋ[२]; विघ्नेश्वरार्चने – ऊ, ज.
[14] वाजि० ] अ, उ, ऊ, ऋ, अ[२], ई[२]; जिवा० –ज; वाजी० – ऋ[२].

[1]भक्ष्यापूपादिकं दत्वा विघ्नमन्त्रं शतं जपेत्।
[2]द्वारार्चनविहीने च दुर्भिक्षं जायते भुवि॥ १९॥
[3]शान्तिकुम्भस्थ तोयेन देवेशमभिषेचयेत्।
[4]द्वारस्य देवतानां च तत्तन्मन्त्रं शतं जपेत्॥ २०॥

[पाद्यसादनादिहीने प्रायश्चित्तम्] [८, ९-११,१२]

[5]पाद्यद्रव्यं सादनं च हीने [6]राज्ञां च नाशनम्।
तद्द्रव्यं द्विगुणं दद्याद् अन्यसन्ध्यासु दापयेत्॥ २१॥ [7]
[8]मूर्तिकुम्भस्थतोयेन स्नापयेत्परमेश्वरम्।
[9]आचमनार्घ्यहीने च पाद्यद्रव्यविहीनवत्[10] ॥ २२॥
स्नानद्रव्यविहीने च [11]तद्राज्यं जलवर्जितम्।
तद्द्रव्यं द्विगुणं दद्यात् पञ्चाशत्कलशोदकैः ॥ २३॥
स्नापयेत्परमेशानं व्योमव्यापिसमुच्चरन्।

[वस्त्रदानादिहीने प्रायश्चित्तम्] [१२,१३,१४,१५]

[12]वस्त्रदानविहीने तु महाव्याधिसमुद्भवः ॥ २४॥
[13]त्वक्कषायोदकेनैव स्नापयेत् परमेश्वरम्।
वस्त्रयुग्मं ददेच्छम्भोः [14]अस्त्रमन्त्रं शतं जपेत्॥ २५॥

---

[1] भक्ष्यापूपादिकं ] उ, ऊ, ऋ, ज, ई[२], ऋ[२]; भक्ष्यापूजादिकं – अ; भक्ष्यापूष्पादिकं – अ[२].

[2] द्वारा० ] अ, ऊ, ऋ; रन्ध्र० – उ, ज, अ[२], ई[२], ऋ[२].

[3] शान्ति कुम्भस्थ तोयेन ] उ; शान्ति कुम्भस्य तोयेन - अ, ऊ, ऋ, अ[२], ई[२], ऋ[२]; ०कुम्भस्थिते येन – ज.

[4] द्वारस्य ] अ, अ[२], ऋ[२]; द्वारस्थ० – उ, ऋ, ई[२]; द्वारस्त० – ऊ.

[5] पाद्यद्रव्यं सादनं च ] सं० पाठः; पाद्यद्रव्यं सदानं च –अ, ऊ, ऋ; पाद्यद्रव्यं स्पृदानां च –उ; पाद्यद्रव्यसदा चैव – ज; पाद्यं तु हंसदानं च –अ[२], ई[२], ऋ[२].

[6] राज्ञां च ] अ; राज्ञां वि० – उ; राज्यासु – ऊ, ऋ; राष्ट्रस्य – ज; राज्ञा सु० – ई[२], ऋ[२].

[7] 'अ, ऋ,' मातृकयोः श्लो० २४ उ० श्लो० २१ पू०-२२ उ० मध्ये दृश्यते।

[8] मूर्तिकुम्भस्थ० ] उ, ऊ, ई[२], ऋ[२]; मूर्तिकुम्भस्य - अ, ऋ, ज; मुक्तिकुम्भस्य – अ[२].

[9] आचमनार्घ्यहीने च ] सं० पाठः ; आचम्यार्घ्यविहीने च] ऊ, ज, अ[२], ई[२], ऋ[२]; आचामद्रव्यहीने च – उ. 'अ, ऋ' मातृकयोः श्लो० २२ उ०-२४ पू० भागो न दृश्यते।

[10] पाद्यद्रव्य विहीनवत् ] ऊ; ०विहीनके – उ; ०विधा नयेत् – ज; ०विधानवित् – अ[२]; ०विधानवत् – ई[२], ऋ[२].

[11] तद्राज्यं ] ऊ, अ[२], ऋ[२]; तद्राष्ट्रं – उ, ज; तद्द्रव्यं – ई[२].

[12] वस्त्रदान० ] उ, ज, अ[२], ई[२] ऋ[२]; वस्त्रयुग्म० – अ, ऊ, ऋ.

[13] 'अ, ऊ, ऋ' मातृकासु श्लो० २५ पू० न दृश्यते। 'ऊ' मातृकायामेव तत्स्थाने १८ उ० पुनर्दृश्यते।

[14] 'उ, ज, अ[२], ई[२], ऋ[२]' मातृकासु श्लो० २५ तृतीयपादमारभ्य श्लो० २६ प्रथमपादान्तभागस्य स्थाने 'युवं वस्त्रेति मन्त्रतः अष्टोत्तरशतं जप्त्वा' इति दृश्यते।

तद्दोषशमनार्थाय अन्यसन्ध्यासु दापयेत्।
भूषणं चोपवीतं च हीने [1]दारिद्र्यसम्भवः॥२६॥
[2]शान्तिकुम्भोदकैः स्नाप्य अस्त्रेणैव[3] शतं जपेत्।
गन्धद्रव्यविहीने च तद्राष्ट्रं भयमावहेत्॥२७॥
[4]अस्त्रोदकेन संस्नाप्य तद्द्रव्यं द्विगुणं [5]ददेत्।
पुष्पपत्रविहीने च अनावृष्टिर्भविष्यति॥२८॥
[6]दिशाकुम्भोदकैः स्नाप्य सद्यमन्त्रं शतं जपेत्।

[नैवेद्यादिहीने प्रायश्चित्तम्] [१६-१७, १८-१९]

नैवेद्यं चोपदंशं च हीने दुर्भिक्षसंभवः॥२९॥
तद्दोषशमनार्थाय स्नापयेत्कलशोदकैः।
[7]ईशमन्त्रं शतं जप्त्वा तद्द्रव्यं द्विगुणं ददेत्॥३०॥
पानीयं मुखवासं च हीने तु जलवर्जितम्।
स्नापयेत्परमेशानं पञ्चाशत्कलशोदकैः॥३१॥
तद्द्रव्यं द्विगुणं दद्यान् [8]मूलमन्त्रं शतं जपेत्।

[नित्यहोमहीने प्रायश्चित्तम्] [२०]

नित्यहोमविहीने च [9]भूपतेस्तु विनाशनम्॥३२॥
शान्तिहोमं ततः कृत्वा षोडशस्नपनं कुरु।
पश्चान्नित्याग्निकं कुर्यादघोरेण शतं [10]हुनेत्॥३३॥

---

[1] दारिद्र्यसम्भवः ] ई, उ, अ[२], ई[२], ऋ[२]; दारिद्र्यसम्भवम् – अ, ऊ; दारिद्रसम्भवम् – ऋ, ज.
[2] शान्तिकुम्भोदकैः ] अ, उ, ऋ, अ[२], ई[२], ऋ[२]; ०कुम्भोदकेन – ऊ; ०कुम्भोदके – ज.
[3] अस्त्रेणैव ] अ, ऊ, ऋ; अघोरेणैव – उ, ज, अ[२], ई[२], ऋ[२].
[4] अस्त्रोदकेन ] अ, ऋ, ज, अ[२], ई[२], ऋ[२]; अस्त्रोदकैश्च – उ; अस्त्रमन्त्रण – ऊ.
[5] ददेत् ] अ, उ, ऊ, ऋ; भवेत् – ज, अ[२], ई[२].
[6] दिशा० ] ई, उ, ऊ, ज; दिक्षु – अ, ऋ.
[7] ईशमन्त्रं] अ, ऊ, ऋ; अंगमन्त्रं – ई, ज; कवचमन्त्रं – उ.
[8] मूलमन्त्रं ] अ, ई, ऊ, ऋ, ज; मालामन्त्रं – उ.
[9] भूपतेस्तु ] अ, ई, उ, ऋ, ज; भूपस्ते – ऊ.
[10] हुनेत् ] अ, ई, उ, ऋ, ज; जपेत् – ऊ.

[बलिदानादिहीने प्रायश्चित्तम्] [२१, २२]

[१]प्राकारबलिहीने च तद्राष्ट्रं [२]बलवर्जितम्।
शान्तिहोमं ततः कृत्वा स्नापयेन्मार्जनोदकैः ॥ ३४ ॥
दशबीजं शतं जप्त्वा पश्चाद्बलिं समाचरेत्।
नित्योत्सवविहीने च परचक्राद् भयं भवेत् ॥ ३५ ॥
शान्तिहोमं ततः कृत्वा स्नपनैरभिषेचयेत्।
त्रियम्बकमनुं जप्त्वा [३]पश्चान्मन्त्रं शतं जपेत् ॥ ३६ ॥
नित्यात्सवं ततःकृत्वा [४]पुनः किंचिद्वदाम्यहम्।
[५]शुनकाकादिसंस्पृष्टे प्रतिलोमादिभिस्तथा ॥ ३७ ॥
यत्र [६]देशे तु संस्थाप्य पूर्ववच्छान्तिमाचरेत्।
तत्स्थानादिबलिं [७]दद्याद् अस्त्रमन्त्रं शतं जपेत् ॥ ३८ ॥
बलिदीपविहीने च [८]यत्र देशे तु संस्थितम्।
पुनर्दीपं समारोप्य बलिशेषं समापयेत् ॥ ३९ ॥

[धूपदीपादिहीने प्रायश्चित्तम्] [२३, २४]

[९]धूपदीपविहीने च महामारी प्रवर्तते।
शान्तिहोमं ततः कृत्वा स्नापयेत् [१०]सूर्यतोयकैः ॥ ४० ॥
आरात्रिकविहीने च नृत्तविच्छेदनेऽपि च।
शान्तिकुम्भोदकैः स्नाप्य बहुरूपं शतं जपेत् ॥ ४१ ॥

---

[१] प्राकारबलिहीने ] ई, उ, ज; प्राक . . . . – अ; प्राकारबलहीने – ऊ; प्रा . . . . – ॠ.

[२] बल० ] अ, ई, उ, ॠ, ज; बलि० – ऊ.

[३] पश्चान्मन्त्रं शतं जपेत् ] अ, ई, ऊ, ॠ, ज; पश्चादष्टोत्तरं शतम् – उ.

[४] पुनः किंचिद्० ] ज; . . . . किं च वदाम्यहम् - अ; . . . . किंचित् पदाम्यहेत् – ई; पुत्र किंचिद्० – उ; . . . . किंचिद्वदाम्यहेत् – ऊ, ॠ.

[५] शुनकाकादिसंस्पृष्टे ] उ; बाणकर्पादिसंस्पृष्टे – अ; बाणकत्वादिसंस्पृष्टे – ई; पाणकर्पाससंस्पृष्टे – ऊ; पाणकारादिसंस्पृष्टे – ॠ; श्वानकाकादिसंस्पृष्ट्वा – ज.

[६] देशे ] ई, उ, ऊ, ज; देवं – अ; 'ॠ' मातृकायामक्षरलोपः।

[७] दद्यात् ] अ, ई, उ, ऊ, ॠ; दत्त्वा – ज.

[८] 'उ' मातृकायां श्लो० ३९ द्वितीयपादमारभ्य श्लो० ४० प्रथमपादान्तो भागो न दृश्यते।

[९] धूपदीपविहीने ] अ, ई, ऊ; भस्मताम्बूलहीने – ज; 'ॠ' मातृकायामक्षरलोपः।

[१०] सूर्यतोयकैः ] अ, ई, ऊ, ज; आस्य तोयकैः – उ.

[भस्मताम्बूलादिहीने प्रायश्चित्तम्] [२५,२६]

भस्मताम्बूलहीने च राजा दुर्जयमाप्नुयात्।
अस्त्रमन्त्रं शतं जप्त्वा परिमार्जनतोयकैः॥ ४२॥
स्नापयेत्परमेशानं तद्द्रव्यं द्विगुणं ददेत्।
दर्पणच्छत्रहीने च [1]खड्गचामरहीनके॥ ४३॥
परचक्राद्भयं [2]भूमौ राजा दुर्जयमाप्नुयात्।
शान्तिहोमं ततः कृत्वा स्नपनैरभिषेचयेत्॥ ४४॥
जप्त्वा तु क्षुरिकामन्त्रं सहस्रं वा तदर्धकम्।

[वेदाध्ययनादिहीने प्रायश्चित्तम्] [२७-२८,३१,२९]

ऋगाद्यध्ययने हीने भक्तादिस्तोत्रहीनके॥ ४५॥
शान्तिकुम्भोदकैः स्नाप्य बीजमुख्यं शतं जपेत्।
पञ्चाङ्गश्रवणे[3] हीने पुराणश्रवणे तथा॥ ४६॥
जायानां नाशनं चैव बालानां नाशनं भवेत्।
मान्योदकेन संस्नाप्य दशबीजं शतं जपेत्॥ ४७॥

[नृत्तादिहीने प्रायश्चित्तम्] [३१]

नृत्तं [4]गानं च वाद्यं च हीने तद्राष्ट्रनाशनम्।
[5]शान्तिहोमं ततः कृत्वा [6]मूलकुम्भाभिषेचयेत्॥ ४८॥
नन्दिमन्त्रं शतं जप्त्वा पश्चान्नृत्तादिकं कुरु।

[चण्डार्चनादिहीने प्रायश्चित्तम्] [३२]

चण्डार्चनविहीने च [7]राजसेनाविनाशनम्॥ ४९॥
मूर्तिहोमं ततः कृत्वा गन्धोदैरभिषेचयेत्।
चण्डमन्त्रं शतं जप्त्वा पश्चाच्चण्डं समर्चयेत्॥ ५०॥

---

[1] खड्गचामरहीनके ] ई; चामरं खड्गहीनके - अ, उ, ऋ, ज; 'ऊ' मातृकायामक्षरलोपः।
[2] भूमौ ] ई, उ, ऊ, ज; भूयात् – अ; 'ऋ' मातृकायामक्षरलोपः।
[3] पञ्चाङ्गश्रवणे ] सं० पाठः; वेदाङ्गश्रवणे – अ, ई, उ, ऊ, ऋ, ज.
[4] गानं ] अ, ई, ज; गीतं – उ, ऊ; 'ऋ' मातृकायामक्षरलोपः।
[5] शान्ति० ] अ, ई, उ, ऊ, ज; मूर्ति० – ऋ.
[6] मूल० ] अ; मूर्ति० – ई, उ, ऊ, ऋ, ज.
[7] 'ऋ' मातृकायां श्लो० ४९ चतुर्थपादमारभ्य श्लो० ५१ प्रथमपादान्तो भागो न दृश्यते।

[सन्ध्याविहीने प्रायश्चित्तम्] [३३?]

[1]सायं सन्ध्याविहीने च द्विगुणं [2]चान्यसन्धिके।
[3]यत्र देवाय तृत्यर्थं कुर्यान्निष्कृतिं [4]पूर्ववत्॥५१॥
सन्धिद्वयविहीने च संप्रोक्षणमथाचरेत्।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्॥५२॥

॥ [5]इति सूक्ष्मशास्त्रे नित्यप्रायश्चित्तविधिः चतुष्षष्टितमः पटलः॥

---

[1] सायं सन्ध्या० ] ज; साधसाध्ये – ई; सा सन्ध्यैकं – उ; सायसाध्य० – ऊ सधसाध्य० – ऋ.

[2] चान्यसन्धिके ] उ, ज; चाध्यसाधकैः – अ; चान्यसाध्यके – ई; चाद्यसायके – ऊ; चार्धसायकैः – ऋ.

[3] यत्र देवाय तृत्यर्थं ] उ, ऊ, ऋ, ज; यत्र देवाःपत्र पत्यर्थं – अ.

[4] पूर्ववत् ] अ, उ, ऋ, ज; पूर्वके – ऊ.

[5] इति सूक्ष्मशास्त्रे नित्यप्रायश्चित्तविधिः चतुष्षष्टितमः पटलः] सं० पाठः ; अः इति सूक्ष्मशास्त्रे नित्यप्रायश्चित्तविधिः त्रिषष्टितमः पटलः॥; ईः इति सूक्ष्मशास्त्रे सप्तमतन्त्रे नित्यपूजाप्रायश्चित्तविधिः षट्पञ्चाशत्पटलः॥; उः इति सूक्ष्मशास्त्रे नित्यार्चनहीनप्रायश्चित्तविधिपटलः॥; ऊः इति सूक्ष्मागमे नित्यप्रायश्चित्तविधिपटलो द्विषष्टितमः॥; ऋः इति सूक्ष्मशास्त्रे नित्यप्र .... विधिः .. षष्टितमः पटलः॥; जः इति सूक्ष्मशास्त्रे नित्यविधिप्रायश्चित्तं नाम पञ्चाशत्पटलः॥

## [पञ्चषष्टितमः पटलः[1]]

## [प्रायश्चित्तविधिः]

प्रायश्चित्तं प्रवक्ष्यामि देशिकस्य प्रभञ्जन ।

[प्रायश्चित्तशब्दार्थः]

[2]प्रायः प्रवीणमित्युक्तं [3]चित्तमुत्सवमुच्यते ॥ १ ॥
प्रवीणस्य तु संधानं प्रायश्चित्तमिति स्मृतम् ।
[4]पापशुद्धिर्न चेत्पुंसः क्रिया सर्वा च निष्फला ॥ २ ॥
तस्मात्सर्वप्रयत्नेन कर्तव्यं पापशोधनम् ।

[आत्मार्थयजनहीने प्रायश्चित्तम् ]

आत्मार्थयजने हीने द्विगुणं चान्यसन्धिके ॥ ३ ॥
प्रासादेनैव मन्त्रेण द्विगुणं तु [5]यजेद्बुधः ।
[6]रोगे पुष्पाञ्जलिं कुर्यात् प्रासादेन तु मन्त्रतः ॥ ४ ॥
[7]अवगाहनहीने तु घटस्नानं [8]तु कारयेत् ।
[9]आर्द्रवस्त्रेण [10]हृदिना मार्जनं तदभावतः ॥ ५ ॥
तेषामभावतो मन्त्री भस्मस्नानं तु कारयेत् ।
[11]तेष्वशक्तश्च रोगेऽपि तूर्ष्णीं पुष्पाञ्जलिं ददेत् ॥ ६ ॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ३६०-३६९), ऊ (टि.३८, पृ० ७९८-८१७), ऋ (टि.९७, पृ० ३११-३२०) इत्येतेषु कोशेषु दृश्यते।

[2] प्रायः० ] अ; प्राय० – ऊ, ऋ.

[3] चित्तमुत्सव० ] ऊ; ...सर्व० – अ; . . . . त्सव० – ऋ.

[4] पापशुद्धिर्न ] अ, ऋ; पापशुद्धिं न – ऊ.

[5] यजेद्बुधः ] अ, ऋ; जपेद्बुधः – ऊ.

[6] रोगे पुष्पाञ्जलिं ] अ, ऋ; योगपुष्पाञ्जलिं – ऊ.

[7] अवगाहनहीने ] अ ; अवगाहणहीने - ऊ; . . . . हविहीने – ऋ.

[8] तु कारयेत् ] अ, ऋ; प्रकल्पयेत् – ऊ.

[9] "घटस्नानेऽशक्तश्चेत् भस्मस्नानं तु कारयेत्।" इत्येकोऽर्धश्लोकः 'ऊ' मातृकायां श्लो० ५ पूर्वार्धोत्तरार्ध्योर्मध्ये विद्यते । 'ऋ' मातृकायां "पश्चाचेन्मूलमन्त्रेण पश्चाच्छक्तं जपेच्छु . . . .।" इति दृश्यते ।

[10] हृदिना मार्जनं तदभावतः ] ऋ; हृदि तन्मार्जनं तदभावतः – अ; हृदिना मार्जनं ततः भवेत् – ऊ.

[11] तेष्वशक्तश्च रोगेऽपि ] ऋ; तेष्वशान्तश्च रोगोऽपि - अ; तेष्वरक्ताश्च रोगापि – ऊ.

[1]तस्याभावे तु तं दृष्ट्वा अथवा गुरुदर्शनम् ।
रोगमुक्तस्य काले तु स्नपनं कारयेन्महत् ॥७॥
अयुतं [2]तु भवेन्मूलं होमं च तद्वदाहुतिः ।
एवमेव विधानेन कारयेद्देशिकोत्तमः ॥८॥

[चतुर्वर्णानां प्रायश्चित्तक्रियाः]

[3]शिवदीक्षानियुक्ता ये ते सर्वे [4]तेन मार्गतः ।
कारयेत्तु [5]चतुर्वर्णः प्रतिलोमस्तथाचरेत् ॥९॥

[अदीक्षितस्पर्शने प्रायश्चित्तम्]

स्वजात्यदीक्षितं [6]स्पृष्ट्वा भस्मस्नानं तु कारयेत् ।
[7]पश्चाच्च मूलमन्त्रेण [8]पञ्चशतं जपेच्छुचिः ॥१०॥

[अशुद्धान्नभोजने प्रायश्चित्तम्]

[9]शूद्रान्नं भुञ्जतेऽकामात् [10]कृच्छ्रं चान्द्रायणं चरेत् ।
तेषां कामे [11]विशुद्ध्यर्थं पूर्वोक्तस्य विधानतः ॥११॥
[12]प्रतिलोमान्नकं भुक्त्वा कामाद्वाकामतोऽपि वा ।
[13]उपवासं चरेद्विद्वान् महाव्योम जपेच्छतम् ॥१२॥
पञ्चाङ्गैश्च षडङ्गैश्च सहस्रं कामतो जपेत् ।
[14]निर्माल्यं लशुनं [15]मत्स्यं मांसं चैव विवर्जयेत् ॥१३॥

---

[1] तस्याभावे ] अ, ऊ; तस्य भावे – ऋ.
[2] तु ] अ, ऋ; च – ऊ.
[3] शिवदीक्षानियुक्ता ] अ, ऋ; शिवदीक्षानियुता – ऊ.
[4] तेन मार्गतः ] ऊ, ऋ; शंभुमागताः – अ;
[5] चतुर्वर्णः ] सं० पाठः; चतुर्वर्ण० – अ, ऊ; चतुर्वर्णा – ऋ.
[6] स्पृष्ट्वा ] अ, ऋ; दृष्ट्वा – ऊ.
[7] पश्चाच्च मूलमन्त्रेण ] सं० पाठः; पश्चाच्चेन्मूल० – अ, ऊ, ऋ.
[8] पञ्चशतं ] सं०पाठः; पश्चाच्छतं ; ऋ; पश्चाच्छक्तं – अ; पश्चात् . . . . – ऊ.
[9] शूद्रान्नं भुञ्जते ] अ; शूद्रान्नभजित्ते – ऊ; शूद्रान्नं भजिते – ऋ.
[10] कृच्छ्रं चान्द्रायणं ] ऊ, ऋ; कृच्छ्रं चान्द्राणं – अ.
[11] विशुद्ध्यर्थं ] अ, ऋ; विशद्धिं तु – ऊ.
[12] प्रतिलोमान्नकं ] अ; प्रतिलोमानुकं – ऋ, ऊ.
[13] उपवासं चरेद्विद्वान् ] अ, ऊ; . . . . चरेद्विद्वान् – ऋ.
[14] निर्माल्यं ] ऊ; निर्मल्य – अ, ऋ.
[15] मत्स्यं ] अ, ऋ; भक्ष्यं – ऊ.

[1]अकामाद् भक्षयित्वा तु ईशानेन शतं जपेत् ।
स्नेहेन यदि भुञ्जीत कृच्छ्रं [2]सांतपनं चरेत् ॥ १४॥
[3]निर्माल्यलंघने दाने [4]स्नानद्वयं तु कारयेत् ।

[चण्डालस्पर्शने प्रायश्चित्तम्]

चण्डालस्पर्शने काले [5]शिवमन्त्रं शतं जपेत् ॥ १५॥
प्रमादात्स्पर्शने काले सचेलस्नानमाचरेत् ।
महाव्योमेन मन्त्रेण पञ्चगव्यं पिबेच्छुचिः ॥ १६॥

[शिवादिनिन्दायां प्रायश्चित्तम्]

[6]शिवाग्निगुरुनिन्दां च [7]यदि निन्दां श्रृणोति यः ।
[8]हृदा च कर्णौ संबध्वा सचेलस्नानमाचरेत् ॥ १७॥
उपवासं चरेत्तत्र प्रासादेन शतं जपेत् ।
कृच्छ्रं सान्तपनं कुर्याद्विगुणं पूजयेत्तदा ॥ १८॥

[शवस्पर्शनादौ प्रायश्चित्तम्]

[अदीक्षितशवस्पर्शे]

[9]स्वजात्यदीक्षितशवं स्पृष्ट्वा [10]कामादकामतः ।
सचेलस्नानकं कुर्याद् घृतं [11]प्राश्य हृदा ततः ॥ १९॥
अघोरेण [12]शिखां चैव सहस्रं तु जपेच्छुचिः ।
स्नानद्वयं [1]प्रकुर्यात्तु शिवमन्त्रं शतं जपेत् ॥ २०॥

---

[1] अकामाद् ] ऊ, ऋ; अकस्माद् – अ.
[2] सांतपनं ] सं० पाठः; सान्तापनं – अ; चान्द्रायणं – ऊ; सन्तापनं – ऋ.
[3] निर्माल्य० ] ऋ; निर्माल्यं – अ, ऊ.
[4] स्नानद्वयं ] ऊ, ऋ; स्नानचर्यां – अ.
[5] शिवमन्त्रं ] अ, ऊ; दिव्यमन्त्रं – ऋ.
[6] शिवाग्निगुरुनिन्दां च ] अ; शिवाग्निगुरुनिन्यां – ऊ (छन्दोभङ्गः); शिवाग्निगुरुनिन्यानां – ऋ.
[7] यदि निन्दां श्रृणोति यः] अ; यति निन्द्राश्रृणवार्तयः – ऊ; यति निन्द्या श्रृणौति यः – ऋ.
[8] हृदा च कर्णौ संबध्वा ] अ; हृदिना कर्णतः सन्ध्या – ऊ; हृदिना कर्णता बन्ध्या – ऋ.
[9] स्वजात्यदीक्षितशवं ] अ; सजात्यदीक्षितानां च – ऊ; स्वजात्यदीक्षितशव० – ऋ.
[10] कामादकामतः ] ऊ; कामात्तद्धतः – अ; कामदर्थमतम् – ऋ.
[11] प्राश्यहृदा ] अ; प्राश्यच्छृदा – ऊ, ऋ.
[12] शिखां ] सं० पाठः; शिखा – अ, ऊ, ऋ.

अकामादेव शुद्धिः स्यात् त्रिंशदस्त्रं हृदा जपेत् ।

[विप्रशवस्पर्शनादौ प्रायश्चित्तम्]

अदीक्षितस्य विप्रस्य [२]शवं [३]स्पृष्ट्वा प्रमादतः ॥२१॥
स्नानं वै तत्र कुर्यात्तु प्रासादेन शतं जपेत् ।
स्नानं तु पूर्ववत्कृत्वा कामात्सहस्रकं जपेत् ॥२२॥
दर्शनाद्भस्मना [४]शुद्धिः कामात्सद्यशतं जपेत् ।
दीक्षितस्य [५]शवं स्पृष्ट्वा [६]भस्मस्नानेन शुध्यति ॥२३॥
दीक्षितस्य [७]वयस्यस्य [८]शवं स्पृष्ट्वा प्रमादतः ।
समुद्रस्नानकं कुर्यादेकरात्रोपवासयेत् ॥२४॥
[९]अदीक्षितशवस्याऽतोऽनुगमनं यदा भवेत् ।
स्नानं पूर्वोक्तवत्कृत्वा व्योमव्यापिशतं जपेत् ॥२५॥
अकामाच्छिवमन्त्रेण सहस्रं तु जपेच्छुचिः ।
तयोरङ्गविधानेन दीक्षितस्य शवं प्रति ॥२६॥
अदीक्षितशवं स्पृष्ट्वा [१०]भस्मस्नानेन शुध्यति ।

[नृपस्य शवस्पर्शनादौ प्रायश्चित्तम्]

[११]दीक्षितस्य नृपस्यैव शवं स्पृष्ट्वा [१२]प्रमादतः ॥२७॥
समुद्रस्नानकं कुर्यादेकरात्रोपवासयेत् ।
[१३]प्रातर्गव्यं पिबेन्मन्त्री प्रासादेन सहस्रकम् ॥२८॥

---

[१] प्रकुर्यात्तु ] अ, ऋ; प्रकुर्वित – ऊ.
[२] शवं ] अ, ऋ; शिवं – ऊ.
[३] स्पृष्ट्वा ] अ, ऊ; दृष्ट्वा – ऋ.
[४] शुद्धिः ] सं० पाठः; शुद्धिं – अ, ऊ, ऋ.
[५] शवं ] अ; शिवं – ऊ, ऋ.
[६] भस्मस्नानेन ] ऊ; भस्मना तेन – अ, ऋ.
[७] वयस्यस्य ] अ; वयस्यैव – ऊ, ऋ
[८] शवं ] अ, ऊ; शिवं –ऋ.
[९] अदीक्षितशवस्याऽतो ] सं० पाठः; अदीक्षितशवं तस्याऽतो - अ; अदीक्षितशवासोतोतो – ऊ; अदीक्षितशवासेनो – ऋ.
[१०] भस्मस्नानेन ] ऊ; भस्मनाऽनेन – अ; भस्मना तेन –ऋ.
[११] दीक्षितस्य नृपस्यैव ] सं० पाठः; दीक्षितस्यानपस्यैव – अ, ऋ; दीक्षितस्नाननपस्यैव – ऊ.
[१२] प्रमादतः ] ऊ; प्रकामतः – अ, ऋ.
[१३] प्रातर्गव्यं पिबेन्मन्त्री ] सं० पाठः; प्रातर्हव्यं पिबेन्मन्त्री – अ, ऋ; . . . . मन्त्री – ऊ.

अघोरास्त्रेण मन्त्रेण त्रिसहस्त्रं जपेच्छुचिः ।
कामात् स्नानद्वयं कुर्याद् अघोरास्त्रसहस्त्रकम् ॥ २९ ॥
[१]गोग्रासं तु ददेन्मन्त्री [२]सामान्यद्विगुणं चरेत् ।
[३]अनुगमनं तयोर्यद्यत् सचेलस्नानमाचरेत् ॥ ३० ॥
गोमयालेपनं कृत्वा जपं पूर्वोक्तमार्गतः ।
कामात् [४]स्नानं चरित्वा तु त्रिरात्रमुपवासयेत् ॥ ३१ ॥
प्रासादेनैव मन्त्रेण शतं चैव जपेच्छुचिः ।
[५]तयोर्दर्शनमपि स्यात् स्नानं पूर्ववदाचरेत् ॥ ३२ ॥
हृदयेन तु मन्त्रेण द्विगुणं त्रिगुणं चरेत् ।
अदीक्षितनृपस्याथ शवं स्पृष्ट्वा प्रमादतः ॥ ३३ ॥
स्नानं च पूर्ववत्कृत्वा त्रिरात्रं चोपवासयेत् ।
पञ्चगव्यं पिबेन्मन्त्री प्रासादेन शतं जपेत् ॥ ३४ ॥
अकामाद्द्विगुणं कृत्वा [६]गोग्रासं तद्ददेच्छुचिः
[७]अकामात्कामतो वापि अनुगमनं तु संभवेत् ॥ ३५ ॥
[८]स्नानद्वयं प्रकुर्वीत घृतं प्राश्य त्रिधा बुधः ।
[९]अघोरास्त्रेण मन्त्रेण अयुतं तु जपेच्छुचिः ॥ ३६ ॥
स्नानं तु पूर्ववत्कृत्वा पुनर्गोमयं लिप्य च ।
पुनः स्नानं तु कुर्यात्तु [१०]जपेन्मूलसहस्त्रकम् ॥ ३७ ॥
समुद्रस्नानं कुर्यात्तु गोमयालेपनं पुनः ।
अघोरास्त्रेण सहस्त्रं जपेत्पञ्चाक्षरं सुधीः ॥ ३८ ॥

---

[१] गोग्रासं तु ददेन् ] अ; गोग्रास्तुमदा – ऊ, . . . . स्तु ददेत् – ऋ.
[२] सामान्यद्विगुणं ] सं० पाठः ; सामान्यादिगुणं – अ, ऊ, ऋ.
[३] अनुगमनं ] ऊ, ऋ; अनुगमनीन् – अ.
[४] स्नानं चरित्वा ] अ; स्नानं च नीत्वा – ऊ; स्ना . . . . – ऋ.
[५] तयोर्दर्शनमपि] सं० पाठः ; तयोर्दर्शनमादिः – अ; तयोर्दर्शनमादि – ऊ, ; तयोर्द . . . . दिः - ऋ.
[६] गोग्रासं तद्ददेच्छुचिः ] अ, ऋ; . . . . सं तु ददेच्छुचिः – ऊ.
[७] अकामात्कामतो ] अ, ऊ; अकामात्कात्रैव – ऋ.
[८] स्नानद्वयं ] ऊ, ऋ; स्नानद्वयं तु – अ.
[९] अघोरास्त्रेण मन्त्रेण ] अ, ऋ; अघोरास्त्रमन्त्रेण – ऊ.
[१०] 'ऊ' मातृकायां श्लो० ३७ चतुर्थपादप्रभृति श्लो० ३८ तृतीयपादपर्यन्तं न विद्यते ।

[अदीक्षितवैश्यस्य शवस्पर्शे प्रायश्चित्तम्]

अदीक्षितस्य [1]वैश्यस्य शवं स्पृष्ट्वा तु कामतः ।
स्नानं कुर्याद्विशेषेण घृतं वै प्राशयेत्ततः ॥३९॥
[2]एकरात्रोपवासः स्याद्गव्यं वै प्राशयेद्धृदा ।
तप्तकृच्छ्रं चरित्वा तु सावित्रीं तु जपेत्सदा ॥४०॥
अघोरास्त्रेण मन्त्रेण त्रिसहस्रं जपेच्छुचिः ।
ब्राह्मणान् भोजयेत्तत्र स्नपनं [3]कारयेच्छिवम् ॥४१॥
पश्चाद्वै देहशुद्धिः स्यान्नियमं कारयेत्तदा ।

[अवान्तरवैश्यस्य शवस्पर्शनादौ प्रायश्चित्तम्]

[4]अवान्तराणां [5]शैवानां शवं स्पृष्ट्वा तु कामतः ॥४२॥
समुद्रस्नानकं कुर्याद् घृतं प्राश्य हृदा बुधः । ॥
गोमयेनानुसर्वाङ्गं मूलमन्त्रेण लेपयेत् ॥४३
पश्चात्स्नानं [6]प्रकुर्यात्तु घृतं प्राश्य हृदा बुधः ।
एकाहमुपवासः स्याद्गव्यं वै प्राशयेद्धृदा ॥४४॥
सद्योजातेन मन्त्रेण सहस्रं तु जपेच्छुचिः ।
अदीक्षितशवं स्पृष्ट्वा प्रमादात् स्नानकं द्वयम् ॥४५॥
गोग्रासं तु ददेत् पश्चाद्ग्रामान्तरे वसेच्छुचिः ।
अनुगमनं तयोः स्याच्चेद् [7]एकाद्वै देशिकोत्तमः ॥४६॥
स्नानं तु पूर्ववत्कृत्वा कृच्छ्रं सान्तपनं चरेत् ।
ब्राह्मणान् भोजयेत् तत्र यथाविभवविस्तरैः ॥४७॥
अघोरेण शिवास्त्रेण प्रत्येकं तु जपेच्छतम् ।
कामादेवं समाख्यातं कामात् कृच्छ्रं तु कामिना ॥४८॥

---

[1] वैश्यस्य] अ, ऊ; मन्त्रस्य – ऋ.
[2] एकरात्रोपवासः ] अ, ऋ; एकरात्रोपवासं – ऊ.
[3] कारयेच्छिवम् ] ऊ, ऋ; कारयेच्छवम् – अ.
[4] अवान्तराणां] अ, ऋ; अवारणं तु –ऊ.
[5] शैवानां ] सं० पाठः; वैश्यानां – अ, ऊ, ऋ.
[6] प्रकुर्यात्तु] अ, ऋ; प्रकुर्वित –ऊ.
[7] एकाद्वै ] अ, ऋ; एकत्वा – ऊ.

अदीक्षितप्रकारोऽयं [१]तयोरथ प्रकारतः ।
अकामात् [२]कामतो दृष्ट्वा अदीक्षितशवं यदि ॥४९॥
स्नानं तत्र [३]प्रकुर्यात्तु मूलमन्त्रं जपेच्छुचिः ।
कामात् स्नानद्वयं कुर्यात् [४]प्रासादशतमन्त्रतः ॥५०॥
अदीक्षितशवं स्पृष्ट्वा तयोर्द्विगुणमाचरेत्।

[शूद्रस्य शवस्पर्शनादौ प्रायश्चित्तम्]

शिवदीक्षाभियुक्तस्तु शूद्रः शूद्रशवं स्पृशेत् ॥५१॥
सचेलस्नानकं कुर्यात्प्रासादेन शतं जपेत् ।
अनुगमनं तथा कुर्याद्द्विगुणं तु जपेच्छुचिः ॥५२॥
अनुगमनं तथा तेषाम् [५]अकामे स्नपनं शिवे ।
कामादेवं समाख्यातं क्रमात्सांतपनं चरेत् ॥५३॥
वामदेवेन मन्त्रेण त्रिसहस्रं जपेच्छुचिः ।
तेषां तु दीक्षितानां तु शवं स्पृष्ट्वा तु कामतः ॥५४॥
स्नानं तु पूर्ववत्कृत्वा [६]गव्यं वै प्राशयेद्धृदा ।
एकरात्रमुपोषित्वा प्रभाते स्नानमाचरेत् ॥५५॥
अघोरास्त्रेण मन्त्रेण त्रिसहस्रं जपेच्छुचिः ।
अनुगमनं तदेवं स्याद् अधिकं जपमाचरेत् ॥५६॥
प्रमादात्स्नपनं [७]यस्मात् स्नानं पूर्वोक्तमाचरेत् ।
प्रासादेन तु मन्त्रेण विंशत्सहस्रकं जपेत् ॥५७॥

[प्रतिलोमस्य शवस्पर्शनादौ प्रायश्चित्तम्]

[८]प्रतिलोमनराणां च शवं स्पृष्ट्वा प्रमादतः ।
पूर्वोक्तेन विधानेन द्विगुणं कारयेच्छुचिः ॥५८॥

---

[१] तयोरधप्रकारतः ] अ, ऋ; तयोरर्द्धे प्रकाशतः – ऊ.

[२] कामतो] अ, ऊ; सुकामतो –ऋ.

[३] प्रकुर्यात्तु ] अ, ऋ; प्रकुर्वीत – ऊ.

[४] प्रासादशतमन्त्रतः ] सं०पाठः; प्रासादे शतमन्त्रतः - अ; प्रासादेन तु मन्त्रतः – ऊ; प्रासादे . . . . – ऋ.

[५] अकामे स्नपनं शिवे ] अ, ऋ; कामात् स्नापनकं शिवम् – ऊ.

[६] गव्यं ] अ, ऋ; द्रव्यं – ऊ.

[७] यस्मात् ] अ, ऋ; कुर्यात् –ऊ.

[८] प्रतिलोम० ] ऊ; प्रतिलोमे – अ, ऋ.

कामात्तु [1]पूर्ववत् ख्यातम् [2]अकामाच्च तयोर्यदा ।
स्नानं तु पूर्ववत्कृत्वा तत्कृच्छ्रं त्रिगुणं चरेत् ॥५९॥

[पुत्रकस्य शवस्पर्शनादौ प्रायश्चित्तम् ]

पुत्रस्य च शवं स्पृष्ट्वा शिवमन्त्रं शतं जपेत् ।
पश्चात्स्नानं प्रकुर्यात्तु घृतं प्राश्य च शुध्यति ॥६०॥
दीक्षापुत्रशवं स्पृष्ट्वा सचेलस्नानमाचरेत् ।
प्राणायामशतं [3]जप्त्वा प्रासादेन शतं जपेत् ॥६१॥
[4]शिवसंबन्धिनः पश्चाद्ये पुत्राः संभवन्ति हि ।
तेषां शवादिकं सर्वं पितृवत् संस्थितं भवेत् ॥६२॥
स्नानं तु पूर्ववत्कृत्वा प्रासादेन शतं जपेत् ।

[प्रेतकाशौचस्य प्रायश्चित्तम् ]

[5]आदिशैवमहाशैवः [6]त्र्याहाशौचमाचरेत् ॥६३॥
[7]अनुशैवस्तथा षट् च अपरे [8]चैव रन्ध्रकः ।
[9]भानवोऽवान्तरं शैवं [10]हीतरे पञ्चदशाह्निकम् ॥६४॥
एवमेव क्रमेणैव कारयेद् आदिशैवकः ।
[11]सूतकेषु तथा कुर्याद् गृहस्थ एव कारयेत् । ॥६५॥ ।
[12]तेषां काले शिवं दृष्ट्वा गुरूणां पूजयेच्छिवम्
अन्यथा यदि भुञ्जीत महादोषमवाप्नुयात् ॥६६॥

---

[1] पूर्ववत् ख्यातं] अ, ऊ; पूर्वतः ख्यातः– ऋ.
[2] अकामच्च तयोर्यदा] अ; अनुगच्चन्तियोर्यदा– ऊ; . . . . योर्यदा – ऋ.
[3] जप्त्वा ] अ, ऋ; कृत्वा – ऊ.
[4] शिवसम्बन्धिनः ] सं०पाठः ; शिवं साम्बन्धिनं अ, ऋ; शिवसाम्बन्धिनं – ऊ.
[5] आदिशैवमहाशैवः ] अ; आदिशैवा महाशैव – ऊ; आदित्यो . . . . शैव – ऋ.
[6] त्र्याह० ] ऊ; त्रया हि – अ; त्रयाहा – ऋ.
[7] अनुशैवस्तथा ] ऊ, ऋ; शैवस्तथा – अ.
[8] चैव रन्ध्रकः ] सं० पाठः; शैवरन्ध्रकः – अ, ऋ; शैवरञ्रकः – ऊ.
[9] भानवोऽवान्तरं ] अ; भानवोचन्तरे – ऊ; भानवोचान्तरः – ऋ.
[10] हीतरे] सं०पाठः; भीतरे – अ; हितारे – ऊ; हितरे – ऋ.
[11] सूतकेषु ] ऊ; सु . . . . केषु – अ, . . . . तेषु – ऋ.
[12] तेषां ] ऊ; तेषु – अ, ऋ.

तस्मात् सर्वप्रयत्नेन शिवं दृष्ट्वा तु [1]भोजयेत् ।

[सूतके प्रेतके च प्रायश्चित्तादि]

[2]देशिकाचारयुक्तस्तु [3]नित्यपूजासमन्वितः ॥ ६७॥
सोऽपि पूर्वोक्तनक्षत्रे सूतकं प्रेतकं चरेत् ।
अनाचार्यकुले जातः शिवशास्त्रनिबोधकः ॥ ६८॥
नित्यपूजाविहीनश्चेतद्दशाहं सम्यगाचरेत् ।
शैवसम्बन्ध[4]हीना ये ते सर्वे चोत्तराह्निके ॥ ६९॥
[5]दशाहे [6]पञ्चदशाहे विंशत्त्रिंशद्दिनेऽपि वा ।
एतेषु दिवसेष्वेवं [7]ब्राह्मणाद्यः क्रमात् चरेत् ॥ ७०॥
प्रेतयुक्तगृहे वापि सप्तस्नानं समाचरेत् ।
पञ्चगव्यं पिबेन्मन्त्री प्रासादेन तु मन्त्रतः ॥ ७१॥
[8]क्षत्रो वैश्यश्च शूद्रश्च प्रेतयुक्ते गृहे वसेत् ।
स्नानं तु पूर्ववत् कृत्वा व्योमव्यापिशतं जपेत् ॥ ७२॥
द्वयोर्वै तेन मन्त्रेण द्विगुणं त्रिगुणं जपेत् ।
सूतकं च यदा स्पृष्ट्वा [9]विप्रस्तु स्नानमाचरेत् ॥ ७३॥
नृपस्य सूतकं स्पृष्ट्वा [10]स्नानद्वयं समाचरेत् ।
महाव्योमेति मन्त्रेण वैश्यस्य सूतकं स्पृशेत् ॥ ७४॥
शूद्रस्य सूतकं स्पृष्ट्वा द्विगुणं तेन मन्त्रतः ।
शूद्रे नराणामाशौचं स्पृष्ट्वा स्नानं तु पूर्ववत् ॥ ७५॥
[11]कुर्याद्वै तेन मन्त्रेण द्विगुणं तु जपेच्छुचिः ।

---

[1] भोजयेत् –ऊ, ऋ ]; पूजयेत् - अ .

[2] देशिकाचारयुक्तस्तु ] ऊ; देशिकाचारयुक्तंस्तु – अ; देशिकाचारयुक्ता . . . . – ऋ.

[3] नित्यपूजासमन्वितः ] ऊ; निधमेन समन्वितम् – अ; . . . . मन्वितः – ऋ.

[4] ०हीना ये ते सर्वे ] अ; ०हीनाया ते सर्वे – ऊ; ०हीनाया . . . . – ऋ.

[5] दशाहे ] अ, ऋ; पञ्चाहे – ऊ.

[6] पञ्चदशाहे ] ऊ; पञ्चदशाहे च – आ, ऋ.

[7] ब्राह्मणाद्यः ] अ; ब्राह्मणाद्या – ऊ, ऋ.

[8] क्षत्रो वैश्यश्च शूद्रश्च ] अ; नृपवैश्य च शूद्रे च – ऊ; . . . . वैश्ये च शूद्रे च – ऋ.

[9] "ऋ" मातृकायामक्षरलोपः।

[10] स्नानद्वयं समाचरेत् ] अ, ऋ; नृपस्य स्नानमाचरेत् – ऊ.

[11] कुर्याद्वै ] सं० पाठः; कु . . . . द्वे तेन – अ; कुर्यात्वे तेन – ऊ; . . . . द्वै तेन – ऋ.

[रजस्वलास्पर्शे प्रायश्चित्तम्]

[1]रजस्वलां च यां नारीं [2]देशिकः संस्पृशेद्यदि ॥७६॥
सद्यःस्नानं प्रकुर्यात्तु अघोरास्त्रं शतं जपेत् ।
रजस्वला द्वितीया च तृतीया च [3]चतुर्थका ॥७७॥
स्पृशेद्वै देशिको धीमान् स्नानं गव्यं च कारयेत् ।
कामात्तद्द्विगुणं जप्त्वा अघोरास्त्रेण मन्त्रतः ॥७८॥

[भोजनकाले दोषाणां प्रायश्चित्तम्]

देशिको भोजने काले [4]आर्तवसम्भवे यजेत् ।
भुक्तशेषं [5]तु संत्यज्य स्नानं पूर्वोक्तवच्चरेत् ॥७९॥
उपवासं चरेदेकं प्रातर्गव्यं पिबेद्बुधा ।
[6]अघोरास्त्रेण मन्त्रेण सहस्रं तु जपेच्छुचिः ॥८०॥
तस्य भोजनकाले तु सहवासं श्रृणोति चेत् ।
अन्नशेषं त्यजेन्मन्त्री भस्मस्नानं समाचरेत् ॥८१॥
प्रासादेनैव मन्त्रेण शतं चैव जपेच्छुचिः ।
[7]द्विगुणस्थतुलाजेस्तु प्रासादेन जपेद्बुधः ॥८२॥
द्वेष्टद्रो सम्भवे ह्यने (?) भुक्तशेषं त्यजेद्बुधः ।
पश्चात्तु भोजनं कुर्यात् दिग्शिवे देशिकोत्तमः ॥८३॥
अन्नशेषं त्यजित्वा तु स्नानं कुर्यात्तु देशिकः ।
प्रासादेनैव मन्त्रेण शतं चैव जपेच्छुचिः ॥८४॥
[8]प्रातःकाले तथा कुर्यात् तयोर्वाक्यं श्रृणोति यः ।
स्नानं तु पूर्ववत्कृत्वा गव्यं वै प्राशयेच्छुचिः ॥८५॥
चण्डालभेरिकाशब्दं यःश्रुत्वा तु च भोजयेत् ।

---

[1] रजस्वलां च यां नारीं ] सं० पाठः; रजस्वलां च या नारीं – अ; रजस्वला च या नारी – ऊ, ऋ.
[2] देशिकः ] ऊ, ऋ; देशिकं – अ.
[3] चतुर्थका ] सं० पाठः; चतुर्थकम् – अ, ऊ, ऋ.
[4] आर्तवसम्भवे ] सं० पाठः; आर्थवान्० - ऊ; आर्तवत्० – अ; आर्तवान्० – ऋ.
[5] तु संत्यज्य ] सं० पाठः; त्यजित्वा - अ, ऋ; तस्त जिह्वा तु – ऊ.
[6] अघोरास्त्रेण ] अ, ऋ; अघोरास्त्र० – ऊ.
[7] श्लो० ८२उ०-८४ भागो 'अ', 'ऋ' मातृकायोः न विद्यते। ८२उ०-८३ पर्यन्तसार्धैकश्लोकस्यार्थोऽपि न स्पष्टः।
[8] श्लो० ८५पू० 'ऊ' मातृकायां न विद्यते।

[१]अन्नशेषं त्यजित्वा तु भस्मस्नानं तु कारयेत् ॥८६॥
[२]अवाक्कर्णमवाबध्य शब्दान्ते भोजयेद्बुधः ।
प्रमादाद्भोजनं स्याच्छेद् अघोरास्त्रं शतं जपेत् ॥८७॥
आशौचद्रव्यसंबन्धो[३] यो [४]देवानर्चयेत्ततः ।
[५]भक्त्या तु पूजयेत् [६]सोददसनात्य विनादिभिः ॥८८॥
पूजान्ते [७]बुद्धिमाप्नोति न [८]संपदे यदा शुचिः ।
द्रव्यसारेण भोक्तव्यं तस्मिन् काले विशेषतः ॥८९॥
अन्यथा कारयेद्दोषं न दैवस्तत्र तिष्ठति ।
प्रमादात् कुर्यात्पूजां चेत् स्नपनं कारयेन्महत् ॥९०॥ ।
ये शैवादितिबन्धान्ते तत्पृथग्भोजनाच्छुचिः ॥९०॥
मन्त्रसामर्थ्यरूपेण [९]हरः सम्यग्विनाशयेत् ॥९१॥
[१०]जन्तूनां दोषदं तस्मिन् महादेवार्चनाय वा ।
तस्मात् सर्वप्रयत्नेन नित्यहानिं न कारयेत् ॥९२॥
[११]नित्यार्चनाग्नियुक्तानाम् एवमेव हि कारयेत् ।
[१२]खद्योतस्तु यदा भावो तदा [१३]चाल्पस्य दोषहा ॥९३॥
[१४]शिवयुक्तस्य पुत्रस्य द्रव्याणि न च सेचयेत् ।
प्रमादात् सेवनं यद्वत् स्नानद्वयं समाचरेत् ॥९४॥

---

[१] अन्नशेषं] ऊ; मूलशेषं – अ; . . . . शेषं – ऋ.
[२] अवाक्कर्ण० ] अ; अर्वाक्कर्ण० – ऊ; अवाकर्ण० – ऋ.
[३] ०संबन्धो ] अ; ०संबन्धे - ऋ; ०संबद्धौ – ऊ.
[४] देवानर्चयेत्ततः ] देवादर्चयेत्ततः - ऋ; देशेदर्चयेततः – ऊ.
[५] भक्त्या ] ऊ, ऋ; भक्त्यां – अ; श्लो० ६३ पूर्वार्धप्रभृति आपटलान्तं श्लोकाः एतासु मातृकासु अपशब्दभूयिष्ठा दृश्यन्ते।
[६] सोददसनात्य विनादिभिः – अ; सेददहेनाप्यावनादिभिः – ऊ; सेददहनाप्लवनादिभिः – ऋ.
[७] बुद्धिमाप्नोति ] अ; सिद्धिमाप्नोति – ऊ, ऋ.
[८] संपदे ] अ, ऋ; संपते – ऊ.
[९] हरः ] अ; हर – ऊ; हरं – ऋ.
[१०] जन्तूनां दोषदं ] अ, ऋ; अज्ञानाद्दोषदं – ऊ.
[११] नित्यार्चनाग्नियुक्तानां ] अ, ऋ; नित्यार्चनाशनीयुक्तानां – ऊ.
[१२] खद्योतस्तु ] अ; खद्योर्घ्यस्तु – ऊ; खद्योद्यस्तु – ऋ.
[१३] चाल्पस्य दोषहा ] अ; खल्पस्य दोषहरम् – ऊ; वल्पस्य दोषहा – ऋ.
[१४] शिवयुक्तस्य ] अ, ऋ; . . . . युक्तस्य – ऊ.

प्राणायामसहस्रं तु [१]अघोरास्त्रमनुं जपेत् ।
एवमेव विधानेन कारयेद्देशिकोत्तमः ॥९५॥
आत्मार्थयजने काले भृत्यर्थं देशिकस्य तु ।
[२]शयान्यासं भवेत्काले [३]उत्तक्षं वर्जयेत् क्रमात् ॥९६॥
देशिकान्तरमार्गेण नित्यपूजां करोति हि ।
प्रायश्चित्तविधिः प्रोक्तः स्नपनस्य विधिं शृणु ॥ ९७॥

॥ [४]इति सूक्ष्मशास्त्रे शवस्पर्शनप्रायश्चित्तविधिः [पञ्चषष्टितमः] पटलः ॥

[१] अघोरास्त्रमनुं जपेत् ] अ; अघोरास्त्रं तदेव तु – ऊ, अघोरास्त्रं च देव तु – ऋ.
[२] शयन्यासं ] अ, ऋ; शयान्यासु – ऊ.
[३] उत्तक्षं ] अ; उत्कर्षं – ऊ; उत्तक्षं – ऋ.
[४] अः इति सूक्ष्मशास्त्रे शवस्पर्शनप्रायश्चित्तविधिश्चतुष्षष्टितमः पटलः ॥; ऊः इति सूक्ष्मागमे प्रायश्चित्तविधिपटलो त्रिषष्टितमः ॥; ऋः इति सूक्ष्मशास्त्रे शवस्पर्शनप्रायश्चित्तपटलविधिः चतुष्षष्टितमः ॥

## [षट्षष्टितमः पटलः[१]]

## [जीर्णोद्धारविधिः]

अथातः संप्रवक्ष्यामि जीर्णोद्धारविधिक्रमम्।
भवने मण्डपे चैव लिङ्गे बेरे च [२]पिण्डिके॥ १॥
प्राकारे गोपुरे चैव अन्यजीर्णेषु तेषु च।

[स्वायम्भुवादिलिङ्गानां जीर्णोद्धारविधिः]

स्वायम्भुवादिलिङ्गेषु जीर्णोद्धारं न कारयेत्॥ २॥
मोहाद्वा यदि वाज्ञानाच्चालनं सर्वनाशनम्।
तस्मात् सर्वप्रयत्नेन मूललिङ्गं न शोधयेत्॥ ३॥
प्रमादाज्जीर्णितं लिङ्गं तमेव पूजयेत् सदा।
[३]प्रतिष्ठाक्रममार्गेण प्रतिष्ठां कारयेद्बुधः॥ ४॥

[स्वायम्भुवधाम्नां जीर्णोद्धारविधिः]

अलक्षणं [४]च यद्धाम बहुवर्णं [५]सशैवलम्।
एकद्रव्येण निर्माणाद् [६]धाम स्वायम्भुवं स्मृतम्॥ ५॥
[७]तच्चेज्जीर्णितं कालेन तमेव बन्धयेद्दृढम्।
अन्यद्रव्यकृतं चेत्तु राजराष्ट्रं विनश्यति॥ ६॥
जलसंप्रोक्षणं [८]कुर्यात् [९]शास्त्रोक्तविधिमार्गतः।

---

[१] अयं पटलः अ (टि.१९१, पृ० ३६९-३७४ [श्लो० १-५९ तृतीयपादः], ३८३-३८४ [श्लो० ५९ च्तुर्थपादः-६८]) ३८६-३८७ [श्लो० ६९-७६पू०] ; ई (टि.३६, पृ० २७७-२८२, २९३-२९४, २९७-२९८), ऊ (टि.३८, पृ० ८१८-८२९, ८४६-८४८, ८५३-८५५), ऋ (टि.९७, पृ० ३२०-३२५ ,४४१-४४२ ,४४४-४४५( इत्येतेषु कोशेषु दृश्यते। 'च' मातृकायां (टि.९५५, पृ० ६५-६८) जीर्णोद्धारविधिपटलो दृश्यते यस्यान्ते 'सूक्ष्मागमे जीर्णोद्धरविधिपटलः' इति पुष्पिकाऽस्ति।

[२] पिण्डिके ] अ, ऋ; पैण्डिके - ई, ऊ.

[३] प्रतिष्ठाक्रम०] ई, ऋ; प्रतिष्ठाकाम० – अ, ऊ.

[४] च यद्धाम ] सं० पाठः; चाधमं – अ, ऊ ; चेधामं – ई ; चाधामं – ऋ.

[५] सशैवलम् ] ई, ऋ; शैवलम् – अ ; च शैवलम् – ऊ.

[६] धाम ] अ, ई, ऋ; पाम – ऊ.

[७] तच्चेज्जीर्णितं कालेन ] ऋ; तच्चेज्जीर्णितकालेन – अ; तथैव जीर्णितैः काले – ई; तच्चेज्जीर्णतं काले – ऊ.

[८] कुर्यात् ] सं० पाठः; कृत्वा – अ, ई, ऊ, ऋ.

[९] ०विधिमार्गतः ] अ, ई, ऋ; ०विधिनतः – ऊ.

[पौरुषाणां धाम्नां जीर्णोद्धारविधिः]

[1]पौरुषेषु च धामसु [2]एकाङ्गं हीनकं यदि ॥ ७ ॥
तद्द्रव्येण समं कृत्वा संप्रोक्षणमथाचरेत्।
सर्वाङ्गानां क्षयं दृष्ट्वा प्रासादस्य विशेषतः ॥ ८ ॥
तद्द्रव्येणैव कुर्यात्तु पूर्वोक्तविधिना सह।
वरद्रव्येण कर्तव्यं यथावित्तानुसारतः ॥ ९ ॥
सलक्षणस्य धाम्नस्तु वरद्रव्येण तत्कृतम्।
[3]तस्मात् सर्वप्रयत्नेन हीनं चैव न कारयेत् ॥ १० ॥

[मृण्मयादिबेराणां जीर्णोद्धारविधिः]

मृण्मयं दारुजं वापि लोहजं वा शिलामयम्।
स्थापितं पूजितं बेरं जीर्णं वा भिन्नमेव वा ॥ ११ ॥
[4]छिन्नं वाप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत्।
पूजयेद्यदि मोहेन [5]राजराष्ट्रं विनश्यति ॥ १२ ॥
तस्माद्बेरं समुद्धृत्य जले [6]वापि स्थलेऽपि वा।
प्रक्षिप्य मृद्भिराच्छाद्य [7]प्रतिमां कारयेन्नवम् ॥ १३ ॥
मृण्मयं चेन्मृदा कुर्याद् [8]दारुजं दारुणा कुरु।
लोहजं यदि लोहेन [9]शिला चेच्छैलजं [10]वरम् ॥ १४ ॥
मृण्मयाद्दारुजं श्रेष्ठं [11]दारुजाच्छैलजं वरम्।
[12]शैलजाल् लोहजं श्रेष्ठं [13]लोहजाद्रत्नजं [1]शुभम् ॥ १५ ॥

---

[1] पौरुषेषु ] अ, ऊ; पौष्टिकेषु – ई.
[2] एकाङ्गं] अ, ऊ; एकाह० – ई; एकाङ्ग० – ऋ.
[3] तस्मात् सर्व० ] ई, ऊ, ऋ; तस्माद्द्रव्य० – अ.
[4] छिन्नं ] अ, ई, ऋ; चिह्नं – ऊ.
[5] राजराष्ट्रं ] ई, ऊ, ऋ; राजाराष्ट्रं – अ.
[6] वापि स्थले ] ई, ऋ; वा स्थण्डिले – अ; वापि स्थण्डिले– ऊ.
[7] प्रतिमां ] अ, ई, ऊ; प्रतिमं –ऋ.
[8] दारुजं ] ऊ; दारु चेद् – अ, ई, ऋ.
[9] शिला चेत् ] ई, ऋ; शिलाजं – अ; शिलाजे – ऊ.
[10] वरम् ] अ, ऊ, ऋ; स्वयम् – ई.
[11] दारुजाच्छैलजं ] अ, ई, ऋ ; दारुजाल्लोहजं - ऊ.
[12] शैलजाल् ] अ, ई, ऋ; शैलजं – ऊ.
[13] लोहजाद् ] अ, ई, ऋ; लोहजं – ऊ.

सर्वेषामपि वस्तूनां हेमजं बेरमुत्तमम्।
[२]उक्ततालप्रमाणेन कारयेद् बेरमुत्तमम् ॥ १६ ॥
[३]समबेरप्रमाणेन कुर्याद्धीनं न कारयेत्।
[४]मानोत्कृष्टं प्रकर्तव्यम् [५]अपकृष्टं न कारयेत्॥ १७॥
[६]कृत्वैवं विधिवद्बेरं पुनस्स्थापनमाचरेत्[७]।

[स्वायम्भुवलिङ्गपीठस्य जीर्णोद्धारविधिः]

स्वायम्भुवस्य लिङ्गस्य [८]पिण्डिकस्य च जीर्णिते॥ १८॥
इष्टकायां [९]सुजीर्णे तु पुनः सन्धानमाचरेत्।
पञ्चाङ्गानां क्षयं दृष्ट्वा [१०]शिलया बन्धयेद् दृढम्॥ १९॥
[११]शैलजेषु च हीनेषु [१२]एकत्रैव [१३]विहीनकम्।
एकाङ्गुलप्रमाणेन हीनाधिक्यं न दोषभाक्॥ २०॥
तमेवाङ्गं [१४]समं कुर्यात् सकलाङ्गं [१५]तदुद्धरेत्।
तत्तल्लक्षणमार्गेण कुर्यात् स्वायम्भुवादिके॥ २१ ॥

[पौरुषलिङ्गपीठस्य जीर्णोद्धारविधिः]

पौरुषेषु च लिङ्गेषु शैलजे शैलजं भवेत्।
अन्यथा तु न कर्तव्यं कृतं चेत्सर्वदोषकम्॥ २२॥

---

[१] शुभम्] अ, ई, ऋ; श्रृणु – ऊ.
[२] 'अ' मातृकायां श्लो० १६उ० न दृश्यते।
[३] समबेरप्रमाणेन कुर्याद्धीनं न ] सं०पाठः; सर्वबेरप्रमाणेन कुर्याद्धीनं न -ई, ऊ; सर्वं बेर . . . . नन्न – अ; सर्व . . . . नः . . . . - ऋ.
[४] मानोत्कृष्टं ] ई, ऊ; मनोत्कृष्टं – अ; 'ऋ' मातृकायामक्षरलोपः।
[५] अपकृष्टं ] ई, ऊ; अप्रकृष्टं – अ, ऋ.
[६] कृत्वैवं ] अ, ई, ऋ; कृतेनेव – ऊ.
[७] ०चरेत् ] अ, ई, ऊ; ०रभेत् – ऋ.
[८] पिण्डिकस्य ] ऊ; पैण्डिकस्य – अ, ई, ऋ.
[९] सुजीर्णे तु ] अ; सुजीर्णायां – ई; तु जीर्णं तु – ऊ; सजीर्णे तु – ऋ.
[१०] शिलया बन्धयेद् ] अ, ऋ; शिलायां बन्धयेद् – ई ; शिलां वर्धयेद् – ऊ.
[११] शैलजेषु च हीनेषु] अ, ई; शैलजे तु च विहीने च – ऊ; शैलजेषु च हीने च - ऋ.
[१२] एकात्रैव ] सं० पाठः; एकदैव – अ, ई, ऊ, ऋ.
[१३] विहीनकम्] अ, ई, ऋ; विहीनके – ऊ.
[१४] समं] अ, ई; तु समं – ऊ; 'ऋ' मातृकायामक्षरलोपः।
[१५] तदुद्धरेत्] ई, ऊ; ततोद्धरेत् – अ, ऋ.

पौरुषस्य तु लिङ्गस्य [१]पिण्डिकस्य च जीर्णिते।
तत्काले चोद्धृतं पीठं समुद्रे [२]तु विनिक्षिपेत्॥ २३॥
[३]तत्तदुक्तप्रमाणेन [४]तत्प्रमाणाधिकं तु वा।
कुर्याल्लिङ्गानुरूपं च पीठं सम्यक् सलक्षणम्॥ २४॥
[५]पीठबन्धं विना कुर्यात् [६]पीठबन्धविचक्षणः।
[७]अष्टबन्धविधिं कुर्याच्छास्त्रदृष्टेन कर्मणा॥ २५॥
स्वायम्भुवादिलिङ्गेषु [८]अग्निदाहो न दोषभाक्।
[९]योगक्रमविधानेन [१०]पीठं संस्थापयेद्बुधः॥ २६॥
पुनः स्थापनमार्गेण कुर्याद्वै देशिकोत्तमः।

[मण्डपादीनां जीर्णोद्धारविधिः]

मण्डपे जीर्णिते काले पूर्वोक्तविधिना कुरु॥ २७॥
प्राकारे जीर्णिते तत्र सन्धानं पूर्ववत्क्रमात्।
[११]कर्णकूटादिहीनं चेदखिलं च तदुद्धरेत्॥ २८॥
प्रथमेष्टकां न्यसेत्तत्र शैलजे शैलजं न्यसेत्।
पुरातनकृतात्सालात्[१२] प्राकारं [१३]न समं यदि॥ २९॥
[१४]मुखादन्येषु सर्वेषु समं कुर्याद् [१५]विधानतः।

---

[१] पिण्डिकस्य ] ऊ; पैण्डिकस्य – अ, ई, ऋ.
[२] तु विनिक्षिपेत्] अ, ऊ, ऋ; निक्षिपेद्बुधः – ई.
[३] तत्तदुक्त०] अ,ऊ, ऋ; तत्तदात्त० – ई.
[४] तत्प्रमाणाधिकं ] अ,ऊ, ऋ; तत्प्रमाणानुकं – ई.
[५] पीठबन्धम् ] ई, ऊ, ऋ; पीठं बन्धम् – अ.
[६] पीठबन्ध० ] ई, ऊ; पीठबन्धं – अ, ऋ.
[७] अष्टबन्ध० ] ई, ऋ; अष्टबन्धि० – अ; पीठबन्ध० – ऋ.
[८] अग्निदाहो न ] ई, ऋ ; अग्निनाहानि० – अ; अग्निदाहे न – ऊ.
[९] योगक्रम०] अ; यागक्रम० – ई; योगकर्म० – ऊ, ऋ.
[१०] पीठं संस्था०] अ, ऊ, ऋ; पीठं तु स्था० – ई.
[११] कर्णकूटादिहीनं] अ, ई, ऋ; कर्णकूटादिकर्णं – ऊ.
[१२] पुरातनकृतात्सालात् ] सं० पाठः; ०क्रमात्सालात् - ऊ; ०कृतात्कालात् – अ, ई; . . . . तात्कालात् - ऋ.
[१३] न समं] अ, ई, ऋ; समयं – ऊ.
[१४] मुखादन्येषु ] सं० पाठः; मुखादन्यत्सु - अ, ई, ऊ, ऋ.
[१५] विधानतः] अ, ई, ऊ; विजानतः – ऋ.

पुरातनकृतात्सालात्[1] सलक्षणयुतं यदि॥ ३०॥
तेन मानेन कर्तव्यं सालानामपि सर्वशः।
इष्टकाजीर्णदेशेषु पुनः सन्धानमाचरेत्॥ ३१॥
[2]शुद्धया [3]शैलजातिश्चेत् [4]मानाधिकं [5]ततो भवेत्।
एवमेव प्रकारेण गोपुरादीनि कारयेत्॥ ३२॥
[6]भारयोगादिजीर्णेषु [7]तान्नव संग्रहेद् [8]वनात्।
[9]स्थपतिश्च विशेषेण शास्त्रमार्गेण कारयेत्॥ ३३॥
पश्चान्मार्गेण [10]तान्येव [11]संग्राह्य तरुभिः क्रमात्।
[12]पश्चात्तत्तत्प्रदेशेषु योजयेत् [13]स्थपतिस्तथा॥ ३४॥
[14]एवं विधिप्रकारेण ह्यशक्तश्चेन्न कारयेत्।
[15]कूटे वा मालिकायां तु जीर्णकाले तदुद्धरेत्॥ ३५॥
नवकर्म प्रकुर्याच्च [16]यथालाभं च [17]संग्रहेत्।

[बाणलिङ्गस्य जीर्णोद्धारविधिः]

बाणलिङ्गस्य जीर्णे तु त्र्यङ्गुलादधिकं यथा॥ ३६॥
उद्धारक्रममार्गेण समुद्रे निक्षिपेद्बुधः।

---

[1] ०कृतात्सालात्] अ, ऊ, ऋ; ०कृतात्कालात् – ई.
[2] शुद्धया] सं० पाठः; श्राद्धया – अ, ई, ऊ, ऋ.
[3] शैलजातिश्चेत्] अ, ऊ, ऋ; शैलजाभिश्चेत् – ई.
[4] मानाधिकं] अ; मानाधिक्यं – ई, ऊ, ऋ.
[5] ततो] अ, ऊ, ऋ; तथा– ई.
[6] भार०] अ, ऊ, ऋ; चार० - ई.
[7] तान्नव] अ; तानेव – ई; तनेव – ऊ, ऋ.
[8] वनात्] ई; थनात्] अ; सनात् – ऊ; घनात् - ऋ.
[9] स्थपतिश्च विशेषेण] ई, ऊ, ऋ; थापितश्चेद्विशेषेण – अ.
[10] तान्येव ] अ, ई, ऊ; तानेव –ऋ.
[11] संग्राह्य ] अ; संगृह्य – ई, ऊ, ऋ.
[12] पश्चात्तत्तत्प्रदेशेषु ] अ, ई, ऋ; पश्चात्तत्प्रदेशेषु – ऊ.
[13] स्थपतिस्तथा] अ, ई, ऋ; स्थपतिस्सदा – ऊ.
[14] एवं विधि० ] अ, ऊ, ऋ; एवं तु षट्० – ई.
[15] कूटे वा मालिकायां तु ] ई; घटे वा मालिका . . . . द्वा – अ; खटे च मालिकायां च – ऊ; घटे च मालिकायां च - ऋ.
[16] यथालाभं च ] ई; यथा शालं तु – अ, ऊ, ऋ.
[17] संग्रहेत् ] अ, ऋ; संगृहेत् – ई, ऊ.

अन्यद्वा बाणलिङ्गं वा स्थापयेद् [१]विधिना बुधः ॥ ३७ ॥

[पौराणिकलिङ्गस्य जीर्णोद्धारविधिः]

पौराणिकस्य लिङ्गस्य यवमानक्षयं यदि।
संप्रोक्षणं तथा कुर्याच्छास्त्रदृष्टेन कर्मणा ॥ ३८ ॥
येन [२]केन प्रकारेण [३]न निर्दिष्टं न निश्चयम्।
एतत्पौराणिकं लिङ्गं पारम्पर्येण [४]मानकृत् ॥ ३९ ॥
तस्य लिङ्गस्य जीर्णे तु [५]खण्डस्फोटादिके सति।
तस्यैव पुरतः सम्यग् [६]मूर्तिलिङ्गं प्रतिष्ठयेत् ॥ ४० ॥
यवान्तरप्रमाणेन हीनं चापि न दोषभाक्।
[७]तस्मादधिकहीनं चेत् स्वर्णेन रजतेन वा ॥ ४१ ॥
ताम्रपट्टेन वा कुर्यादथ संपूरणं बुधः।
पुनः स्थापनमार्गेण कारयेल्लिङ्गवद्भवेत् ॥ ४२ ॥
एकद्रव्यकृतं लिङ्गं तत्पुराणं न विद्यते।
अष्टादशपुराणेषु लिङ्गं [८]पौराणमार्गतः ॥ ४३ ॥
मूलशास्त्रविधानेन कुर्यात्पौराणिके विधौ।

[लोहजमहाबेराणां जीर्णोद्धारविधिः]

महाबेरेषु [९]यदङ्गं जीर्णितं यदि संभवेत् ॥ ४४ ॥
[१०]तत्तदङ्गं पुनः कुर्यात् सन्धानं तस्य वस्तुना।
उत्तमाङ्गविहीने तु [११]तद्रूपं चाग्निना द्रवम् ॥ ४५ ॥

---

[१] विधिना] ई, ऊ, ऋ; विना – अ.
[२] केन ] अ, ई, ऋ; तेन – ऊ.
[३] न निर्दिष्टं ] ऋ; निर्दिष्टं – अ. 'ऊ' मातृकायामक्षरलोपः।
[४] मानकृत् ] सं० पाठः; नामकृत् – ई, ऊ, ऋ; नाम नामकृतम् – अ.
[५] खण्ड० ] अ, ई, ऋ; खट्० – ऊ.
[६] मूर्तिलिङ्गं ] ऊ; मिश्रलिङ्गं – अ, ई, ऋ.
[७] 'अ, ऊ, ऋ' मातृकासु श्लो० ४१ उ०- ४३ उ० भागो न दृश्यते।
[८] पौरणमार्गतः] ई; पौरणमागतम् – अ, ऋ; पौरणमानकम् – ऊ.
[९] यदङ्गं] सं० पाठः; यद्यङ्गं – अ, ई, ऋ; यङ्गं – ऊ.
[१०] तत्तदङ्गं] ई; तद्वदङ्गं] – अ, ऊ, ऋ.
[११] तद्रूपं चाग्निना] अ, ऊ, ऋ; तत्र पंचाग्निना – ऊ.

पुनः सलक्षणं कुर्यात् [1]तद्रूपं च विशेषतः।
संप्रोक्षणं ततः कुर्यात् पूर्वोक्तविधिना बुधः॥ ४६॥

[जीर्णप्रासादे विशेषविधिः]

एतत्सामान्यमित्युक्तं विशेषं त्वधुनोच्यते।
प्रासादे जीर्णिते काले सद्यः सन्धानमाचरेत्॥ ४७॥
[2]न [3]तिथिर्न च नक्षत्रं [4]न वारा ह्यंशकास्ततः।
[5]तस्मात् सर्वप्रयत्नेन शीघ्रं कृत्वा प्रदक्षिणम्॥ ४८॥
[6]प्रमादाज्जीर्णिते काले पूजानैवेद्यकादिभिः।
उत्सवादीनि सर्वाणि कृतं चेद्राक्षसास्पदम्॥ ४९॥
भूतगन्धर्वयक्षादिपिशाचा ब्रह्मराक्षसाः।
[7]प्रेताश्चैवाल्पशून्यत्वादाश्रयन्ति न संशयः॥ ५०॥
कुर्वन्ति ते भयं [8]व्यग्रदुर्भिक्षं [9]मरणं नृणाम्।
तस्मात् सर्वप्रयत्नेन [10]कालापेक्षां विना कुरु॥ ५१॥

[प्रासादलिङ्गसम्बन्धः]

[11]देहं प्रासादमित्युक्तं [12]देही लिङ्गमिति स्मृतम्।
उभयोरन्तरं नास्ति [13]तस्मादित्थं प्रभावयेत्॥ ५२॥
स्थूललिङ्गं विमानं च सूक्ष्मलिङ्गं [14]सदाशिवम्।

---

[1] 'ऊ' मातृकायां श्लो० ४६ द्वितीयतृतीयपादौ न स्तः।
[2] 'ऋ' मातृकायां श्लो० ५१पू० श्लो० ४८पू० स्थाने दृश्यते। इदानीं श्लो० ४८पू० श्लो० ५१उ० अन्ते दृश्यते।
[3] तिथिर्न ] ई, ऋ; तिथिं न – अ; तिथ्यन्य – ऊ.
[4] न वारा ह्यंशकास्ततः ] सं० पाठः; न वा राह्वंशकास्ततः - ई; न वानांशाह्वकास्तथा – अ; न वारं शाह्वकास्तथा – ऊ; न वारांशाह्वक . . . . – ऋ.
[5] तस्मात्सर्व० ] ऋ; वर्जयेत् तु – अ, ऊ.
[6] श्लो० ५१पू० श्लो० ४९ च शैवागमपरिभाषामञ्जर्यां (४.९६) दृश्येते।
[7] प्रेताश्चैवाल्प० ] ई ; प्रेता . . . . ल्प - अ, ऊ, ऋ.
[8] व्यग्र० ]अ; व्यग्रं – ई, ऋ; व्याघ्रं – ऊ;.
[9] मरणं ] ई, ऊ, ऋ; जयते – अ.
[10] कालापेक्षां ] ई, ऊ, ऋ; पूजापेक्षां – अ;.
[11] अस्य पटलस्य श्लो० ५२-५८ पू० भागः शैवागमपरिभाषामञ्जर्यां ३.१२०-१२४ श्लोकेषु भिन्नक्रमेण दृश्यते।
[12] देही ] ई, ऋ; देहि – अ, ऊ.
[13] तस्मादित्थं ] ई, ऊ, ऋ; तस्मातिर्थं - अ.
[14] सदाशिवम् ] ई, ऊ; समं भवेत् – अ; 'ऋ' मातृकायामक्षरलोपः।

सदाशिवस्य तन्मध्ये शिवमेवं विचिन्तयेत्॥ ५३॥
अथवान्यप्रकारेण स्थूललिङ्गे सदाशिवम्।
अन्तर्लिङ्गे शिवं ज्ञेयं भावयेद्देशिकोत्तमः॥ ५४॥
व्यापकव्याप्तिरूपेण लिङ्गमेवं विमानकम्।
तत्तद्व्याप्तिमिदं ज्ञेयं [1]पूजयेत्तत् क्रमात्ततः॥ ५५॥
लिङ्गाभावे तु पीठं स्याद्विमानं लिङ्गवद्विदुः।
आवाहनादिपूजां च बलिं सर्वं समाचरेत्॥ ५६॥
विषयादि यजेत्कर्म [2]विमाने सर्वमाचरेत्।
विमानहीने यत्कर्म तत्कर्म [3]विफलं भवेत्॥ ५७॥
भौमादिस्थूपिपर्यन्तं शिवरूपमिति स्मृतम्।
देहपूर्णं यदा [4]काले देही देहं न मुञ्चति॥ ५८॥
साङ्गोपाङ्गं च प्रत्यङ्गं शरीराङ्गं तदुच्यते।
[5]शिरःस्थूपिगलं चैव पदाधिष्ठानमञ्चकम्[6] ॥ ५९॥
उपाङ्गं [7]कूटशाला च [8]प्रत्यङ्गं नासिपञ्जरम् ।
अमन्त्रमर्चने काले [9]च सावादीं स्पृशेत्ततः ॥ ६०॥
[10]अङ्गहीनादिना [11]यष्वा प्रासादाङ्गविहीनके ।

[शक्तेरादित्यमण्डलगमनम् ]

बेरालयाद्गता शक्तिर्वसेदादित्यमण्डले ॥ ६१॥
द्वादशाब्दावसाने तु [12]शिवे [13]शक्तिर्निलीयते ।

---

[1] 'ई, ऊ, ऋ' मातृकासु 'पूजयेत्' इति पदं नास्ति।
[2] विमाने ] ई, ऊ; विधिना - अ;'ऋ' मातृकायामक्षरलोपः।
[3] विफलं ] अ, ऊ, ऋ; निष्फलं – ई.
[4] यदा काले] अ; यथा काल० – ई; यदा कालं – ऊ, ऋ.
[5] शिरःस्थूपिगलं चैव ] सं० पाठः ; शिरःस्थूपिगलहीनं
[6] पदाधिष्ठानमञ्चकम् ] सं० पाठः ; व्रताधिष्ठानमङ्गलम् – अ, ऊ, ऋ; प्रदाधिष्ठानमङ्गलम् – ई.
[7] कूटशाला ] ई, ऊ, ऋ; कूटशालां – अ.
[8] प्रत्यङ्गं ] अ, ऊ, ऋ; पङ्क्यङ्गं – ई.
[9] च सावादीं स्पृशेत्ततः ] ई, ऋ; च संवादिं स्पृशेत्ततः – अ; च सायोदीं स्पृशेत्ततः – ऊ; अर्थो न व्यक्तः।
[10] अङ्गहीनादिना ] अ, ई, ऋ ; अङ्गहीनादि वा – ऊ.
[11] यष्वा ] सं० पाठः; स्पृष्वा - अ, ई, ऊ, ऋ.
[12] शिवे ] अ, ई, ऋ; शिव० – ऊ.
[13] शक्तिर्निलीयते ] ई, ऊ, ऋ; शक्तिन्निलीयते – अ.

[1]तदूर्ध्वे स्थानशक्तिश्च गम्यते परमे पदे ॥६२॥
शून्यालयमिति प्रोक्तं सर्वदोषसमुद्भवम् ।
तस्मादुद्धरणं चाशु शास्त्रदृष्टेन कर्मणा ॥६३॥
कर्षणादिप्रतिष्ठान्तं यन्नवीकरणं कुरु ।

[जीर्णस्य विमाने योजनम्]

[2]प्रासादजीर्णिते काले योजयेल्लिङ्गमध्यमे ॥६४॥
[3]लीयन्ते सर्वतत्त्वानि तस्माल्लिङ्गं [4] समर्चयेत् ।
[5]पूर्वलिङ्गविहीने चेत् शिवे शैवं [6]निवर्तयेत् ॥६५॥
[7]जीर्णम् उद्वासयित्वा च विमाने पूजयेच्छिवम् ।
एवमन्योन्यभावेन शिवयोगं विचिन्तयेत् ॥६६॥
पञ्चावरणदेवांश्च धामपालांस्तथैव च ।
[8]अन्यांश्च सर्वदेवांश्च मूले चैव [9]समर्चयेत् ॥६७॥
एवं ज्ञात्वा विशेषेण स्थपतिः [10]स्थापकाज्ञया ।
[11]जीर्णोद्धृतिं ततः कृत्वा विमानं लक्षणान्वितम् ॥६८॥

[विमानोद्धृतिप्रतिज्ञा]

पुनः स्थपतिमाहूय स्थापक . . . . ति श्रयेत् ।
संवत्सरं समावाह्य [12]यावदाद्वादशाब्दकम् ॥६९॥
तेष्वन्तरे गृहं [13]कृत्वा त्वां पुनः स्थापयाम्यहम् ।

---

[1] तदूर्ध्वे ] अ, ई, ऋ; तदूर्ध्व० – ऊ.
[2] प्रासादजीर्णिते ] अ, ई, ऋ; प्रासादे जीर्णते – ऊ.
[3] लीयन्ते ] अ, ई, ऋ; लीयते – ऊ.
[4] समर्चयेत् ] अ; ई; समर्पयेत् – ऊ, ऋ;.
[5] पूर्वलिङ्गविहीने ] अ; पूर्वलिङ्गे विहीनं – ई; पूर्वलिङ्गविहीनं – ऊ, ऋ.
[6] निवर्तयेत् ] सं० पाठः; नियन्तयेत् - अ; नियन्त्रयेत् – ई, ऊ, ऋ.
[7] जीर्णम् उद्वासयित्वा च ] सं० पाठः; यज्जीर्णोद्वासनं कृत्वा – अ, ई, ऊ, ऋ.
[8] अन्यांश्च सर्वदेवांश्च ] अ, ई, ऋ; अन्यां च सर्वदेवां च – ऊ.
[9] समर्चयेत् ] अ, ऊ, ऋ; समर्पयेत् – ई.
[10] स्थापकाज्ञया ] अ, ई, ऋ; स्थापकाश्च यः – ऊ.
[11] जीर्णोद्धृतिं ] अ, ई, ऊ; जीर्णोच्छितिं – ऋ.
[12] यावदाद्वादशाब्दकम् ] ई, ऋ; यावद्वादशाब्दकम् – अ, ऊ (छन्दोभङ्गः).
[13] कृत्वा ] अ, ई, ऋ; त्यक्त्वा – ऊ.

[1]स्थपतिप्रतिज्ञया कर्तुः ज्ञापयेद्देशिकोत्तमः ॥७०॥
विज्ञापयेत्तु देवेशं प्रणम्याञ्जलिमुद्रया ।

[उद्धृतविमाने प्रथमपूजा]

जीर्णोद्धारोक्तमार्गेण स्थपतिः [2]सम्यगाचरेत् ॥७१॥
[3]शिल्पिकर्मणि संजाते [4]संधाने [5]तु विशेषतः ।
[6]शिल्पिस्पर्शनमात्रेण [7]नित्यपूजाविरोधकृत् ॥७२॥
पुण्याहं वाचयेत्तत्र पञ्चगव्याभिषेचनम् ।
गन्धोदकेन संस्नाप्य पवमानमुदीरयन् ॥७३॥
शान्तिहोमं ततः कृत्वा ब्राह्मणान् भोजयेत्ततः ।
अर्चनोक्तं [8]समभ्यर्च्य दिनं प्रति दिनं प्रति ॥७४॥
जीर्णदोषो न दोषः स्यात् शिवयागं समाचरेत् ।
पूजान्ते शिल्पिभिः स्पृष्ट्वा [9]विमानोत्पवनं चरेत् ॥७५॥
[10]कर्मपूर्णान्तमेवोक्तं [11]पुनः संस्थापनं कुरु ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥७६॥

---

[1] स्थपतिप्रतिज्ञया कर्तुः ] सं० पाठः; स्थपतिः प्रतिज्ञया कर्तुः - ई (छन्दोभङ्गः); स्थपतिः प्रतिज्ञया कन्तु – अ (छन्दोभङ्गः); स्थपतिश्च प्रतिज्ञेया – ऊ ;
कर्तुः - ऋ (छन्दोभङ्गः).
[2] सम्यगाचरेत् ] अ, ई, ऊ; सम्यगाज्ञया – ऋ.
[3] शिल्पिकर्मणि ] ऊ, ऋ; शिल्पिकर्माणि – अ; शिल्पकर्मणि – ई.
[4] संधाने ] अ, ई, ऋ; संध्याने – ऊ.
[5] तु ] अ, ई, ऊ; तद्० – ऋ.
[6] शिल्पिस्पर्शन० ] अ, ऊ, ऋ; शिल्पिसंस्पर्श० – अ.
[7] नित्यपूजाविरोधकृत् ] अ, ई, ऊ; नित्यपूजां विशोधकृत् – ऋ.
[8] समभ्यर्च्य ] अ, ई, ऋ; समारभ्य – ऊ.
[9] विमानोत्पवनं चरेत् ] सं० पाठः ; विमानात्पावमानकम् – अ ; विमानात्पावमानकम् ] ई, ऊ, ऋ.
[10] कर्मपूर्णान्तमेवोक्तं ] सं०पाठः; कर्णपूर्णान्तमेवोक्ता – अ; कमपूर्णान्तिमेवोक्तं – ई; कर्णपूर्णान्तमेवोक्तं ] ऊ, ऋ.
[11] पुनः संस्थापनं ] अ, ऊ, ऋ; पुनश्च स्थापनं – ई.

[1]भक्तांश्च परिवारांश्च यथाशक्त्या तु भोजयेत् ॥७६[1]/२॥

॥ [2]इति सूक्ष्मशास्त्रे क्रियाक्रमाद् जीर्णोद्धारणविधिःषद्वष्टितमः पटलः ॥

---

[1] भक्तांश्च ] अ, ई, ऋ; भक्तान् – ऊ (छन्दोभङ्गः).

[2] इति सूक्ष्मशास्त्रे क्रियाक्रमाद् जीर्णोद्धारणविधिः षद्वष्टितमः पटलः] सं० पाठः ; ई: इति सूक्ष्मशास्त्रे जीर्णोद्धारणविध्येकोनषष्टिपटलः ।

अ: इति सूक्ष्मशास्त्रे क्रियाक्रमात् बाललिङ्गस्थापनविधिरेकोनसप्ततितमः पटलः । ऊ: इति सूक्ष्मे जीर्णधामान्... इति सूक्ष्मागमे द्वितीयसंपुटे बाललिङ्गस्थापनविधिपटलो षष्टितमः । ऋ: इति सूक्ष्मशास्त्रे ...माद्बाललिङ्गस्थापन-विधिरेकोनसप्ततितमः पटलः ।

## [सप्तषष्टितमः पटलः]

### महाशान्तिविधिः[1]

महाशान्तिमहं वक्ष्ये श्रृणु त्वं तत्प्रभञ्जन।

[महाशान्तिव्रतफलम्]

शिवलोकप्रदं नित्यं [2]शिवप्रीतिकरं शुभम्॥ १॥
सर्वशत्रुक्षयकरं सर्वपातकनाशनम्।
प्रजावृद्धिकरं पुण्यं भोगमोक्षप्रदायकम्॥ २॥

[महाशान्तिव्रतकालः]

श्रावणे [3]श्रोणानक्षत्रे [4]प्रोष्ठे वै भाद्रमासके
आश्विने मासि [5]चाश्वर्क्षे [6]कार्त्तिके मासि कार्त्तिके॥ ३॥
आर्द्रर्क्षे चार्द्रमासे तु पुष्ये पुष्यं प्रशस्यते।
माघमासे मघर्क्षे तु फाल्गुने मासि चोत्तरे॥ ४॥
[7]चैत्रमासे तु चित्रर्क्षे वैशाखे मासि [8]शूर्पके।
मूलर्क्षे ज्येष्ठमासे त्वाषाढे [9]चोत्तराषाढके॥ ५॥
अथवा [10]पूर्वपञ्चम्यां मासे मासे व्रतं चरेत्।

[महाशान्तिव्रतस्थानम्]

[1]नद्यब्धिवापीकूले वा नगाग्रे वा महावने॥ ६॥।

---

[1] अयं पटलः अ (ट.३६, पृ० ३७७-३८३), ई (टि.१९१, पृ०२८६-२९३), ऊ (टि. ३८, पृ० ८३२-८४५), ऋ (टि.९७, पृ० ३२८-३२९, ४३५-४४० ), ज (टि. १००३, पृ० २०८-२१५) इत्येतेषु कोशेषु दृश्यते। परं अ (पृ० ४३६-४३९) ऋ (पृ० ३४१-३४३) मातृकयोः श्लो० १२ उ०-४० भागो पुनरेकवारं लिखितः। अत्र 'अ[२]', 'ऋ [२]' कोशौ समानौ लक्ष्येते।

[2] शिवप्रीति० ] अ, ऊ; ज; शिवप्रप्ति० – ई; ' ऋ' मातृकायामक्षरलोपः।

[3] श्रोणा० ] अ; श्रोण० – ई, ऋ, ज; श्रवण्० – ऊ .

[4] प्रोष्ठे वै ] ऋ; प्रोष्ठपात् – अ; प्रोष्टे तु – ई, ज; प्रोष्ठे वा – ऊ .

[5] चाश्वक्षे ] ई, ऋ, ज; चाग्वक्षे – अ; चाश्व्यर्क्षे – ऊ .

[6] श्लो० ३ उ० (द्वितीयः पादः)-५ पू० (प्रथमपादः) भागो 'ई, ज' मातृकयोः न विद्यते।

[7] चैत्रमासे ] ई; चित्तमासे – ज .

[8] शूर्पके ] ई, ऊ, ऋ, ज; श्मपहे – अ.

[9] चोत्तराषाढके ] अ, ऊ, ऋ, ज; चोत्तराढके – ई.

[10] पूर्वपञ्चम्यां ] अ, ई, ऊ, ज ; पूर्ववन्नित्यं – ऊ.

ग्राममध्ये सभास्थाने [२]देवागारसमीपके।
भूमिं संशोध्य [३]विधिवत् प्रपां [४]कृत्वातिसुन्दराम्॥ ७॥

[महाशान्तिव्रतार्थलिङ्गभेदः]

शिवलिङ्गं समापाद्य सहस्रं वा तदर्धकम्।
तदर्धं वा शतं वापि तदर्धार्धमथापि वा॥ ८॥
मृद्दारुशैललोहैर्वा [५]धातुजैः क्षणिकैस्तु वा।
[६]रत्नजैर्वा विशेषेण पूजार्थं संप्रकल्पयेत्॥ ९॥

[लिङ्गमानम्]

[७]यवत्रयं समारभ्य [८]यवैकैकविवर्धनात्।
यावद् [९]द्विशतसंख्यान्तं मृल्लिङ्गस्योदयं भवेत्॥ १०॥
[१०]एकाङ्गुलं [११]समारभ्य अर्धार्धाङ्गुलवर्धनात्।
चतुर्विंशाङ्गुलं यावत् [१२]दारुलिङ्गं प्रकल्पयेत्॥ ११॥
यथालाभप्रमाणेन [१३]रत्नलिङ्गं प्रकीर्तितम्।
माषत्रयं समारभ्य [१४]माषैकैकविवर्धनात्॥ १२॥
[१५]यावद् द्वादशमाषान्तं लोहजं संप्रकल्पयेत्।
[१]अङ्गुलत्रयमारभ्य चाङ्गुलाङ्गुलवर्धनात्॥ १३॥

---

[१] 'ऋ' मातृकायामक्षरलोपः।

[२] देवागार० ] अ, ऋ, ज; देवराग० – ई; देवागारे – ऊ.

[३] 'विधिवत्' इत्ययं भागो 'अ' मातृकायां नास्ति।

[४] कृत्वातिसुन्दराम् ] अ, ऊ, ऋ; कृत्वातिसुन्दरम् – ई, ज.

[५] धातुजैः ] ई, ऊ, ऋ, ज; वायुधातुजैः – अ.

[६] रत्नजैर्वा ] ई, ऊ, ऋ, ज; रक्तजैर्वा – अ.

[७] यवत्रयं ] ई, ऊ, ज; प्रमाणं यवत्रयं – अ, ऋ.

[८] यवैकैकविवर्धनात् ] अ, ऊ, ऋ; यवैरेको विवर्धनात् – ई; यवैकेन विवर्धनात् – ज.

[९] द्विशतसंख्यान्तं ] अ, ई, ऋ, ज; द्विशतसंख्या तु – ऊ.

[१०] श्लो० १० उ०-११ पू० मध्ये 'अ, ई, ऋ' मातृकासु "कल्पयेत् क्षणिकं लिङ्गम्" इत्येकं पादं विद्यते। 'ज' मातृकायां "क्षणिकलिङ्गम्" इति विद्यते। 'ऊ' मातृकायां "कल्पयेत् क्षणिकं लिङ्गम् अर्धार्धाङ्गुलवर्धनात्।" इति विद्यते।

[११] समारभ्य ह्यर्धार्धाङ्गुलवर्धनात् ] सं० पाठः; समारभ्यार्धार्धाङ्गुलवर्धनात् - अ,ई,ऋ,ज; ०कुर्यादर्धार्धाङ्गुलवर्धनात्-ऊ.

[१२] दारुलिङ्गं ] ई, ज; दारुशैलं – अ, ऊ, ऋ.

[१३] रत्नलिङ्गं ] ई, ऊ, ऋ, ज; रक्तलिङ्गं – अ.

[१४] माषैकैक० ] अ, ऊ, ऋ; माषैकैन० – ई, ज, अ[२], ऋ[२].

[१५] श्लो० १३ 'अ[२], ऋ[२]' मातृकयोः न विद्यते।

[२]यावदष्टसहस्रान्तं [३]शैललिङ्गोदयं भवेत्।
कल्पयेत्क्षणिकं लिङ्गं यथाकामप्रमाणकम्॥ १४॥

[मृदादिलिङ्गानां विशेषाकारः]

मृद्दारुशैललोहानां विशेषः कश्चिदस्ति हि।
लिङ्गायामे तु वेदांशे [४]त्वेकांशं लिङ्गविस्तृतम्॥ १५॥।
अथवा गुणभागैकं पञ्चांशे द्व्यंशविस्तृतम्।
लिङ्गायामे [५]गुणांशेंऽशं तन्मूले चतुरश्रकम्॥ १६॥
शेषं सुवृत्तरूपं वा सर्वं सुवृत्तमेव वा।
[६]सूत्रोपेतं विहीनं वा [७]छत्राकारशिरोन्वितम्॥ १७॥
एवंलक्षणसंयुक्तं प्रत्येकं [८]लिङ्गमाचरेत्।
[९]एवं लिङ्गेऽथवा कुर्यात् सर्वलिङ्गं विशेषतः॥ १८॥

[ लिङ्गं पीठं च]

लिङ्गायामं त्रिधा कृत्वा व्योमांशं भूगतं भवेत्।
एकांशं पीठबन्धं स्याद् एकांशमर्चनार्हकम्॥ १९॥
अथवा पञ्चभागे तु [१०]द्व्यंशं पीठनिवेशनम्।
पूजाभागं त्रिभागं स्यात् सप्तभागे [११]द्विकोलकम्॥ २०॥
अर्चाभागमिदं [१२]विद्धि शेषं पिण्डिप्रवेशनम्।

---

[१] 'ऋ[२]' मातृकायामक्षरलोपः।

[२] यावदष्ट० ] अ, ई, ऊ, ऋ, ज; यावद्दश० - अ[२], ऋ[२].

[३] शैललिङ्गोदयं ] ई, ऊ, ऋ, ज, अ[२], ऋ[२]; शैललिङ्गोदया – अ.

[४] त्वेकांशं ] अ, ई, ऋ; एकांश० – ऊ; आकशे - अ[२], ऋ[२]; एकाङ्गं – ज.

[५] गुणांशेंऽशं तन्मूले ] अ, ई, ऊ, ज,अ[२], ऋ[२]; . . . . णांशे शतं मूले – ऋ.

[६] सूत्रोपेतं विहीनं वा ] ज, अ[२], ऋ[२]; सूत्रोपवीतविहीनं वा – अ; सूत्रोपि तद्विहीनं वा – ऋ; श्लो०'१७ उ०-१८' भागः 'ई' मातृकायां नास्ति।

[७] छत्रा० ] अ, ऋ, ज; चित्रा० - अ[२], ऋ[२]; चक्रा० – ऊ.

[८] लिङ्ग० ] अ, ऊ, ऋ, ज ; होम० - अ[२], ऋ[२].

[९] एवं लिङ्गे ] अ, अ[२], ऋ[२]; एकलिङ्गे – ऊ, ज ; एकं लिङ्गे – ऋ.

[१०] द्व्यंशं ] अ, ऊ, ऋ, ज, अ[२], ऋ[२]; त्र्यंश० – ई.

[११] द्विकोलकम् ] ई, अ[२], ऋ[२]; त्रिकोलकम् – अ, ऊ, ऋ, ज.

[१२] विद्धि शेषं ] ई, ऋ, अ[२], ऋ[२]; वृद्धिशेषं – अ, ऊ, ज.

[सहस्रलिङ्गलक्षणम्]

पूजांशोदयतुङ्गं तु पञ्चविंशतिभाजिते॥ २१॥
एकैकं विभजेद्धीमान् [1]चत्वारिंशच्च संख्यकम्।
सहस्रलिङ्गमेवं हि

[अयुतलिङ्गलक्षणम्]

[2]अयुतस्य विधिं श्रृणु॥ २२॥
लिङ्गोदये तु पञ्चाशद् [3]भागं कृत्वा विचक्षणः।
चत्वारिंशेंऽशपञ्चांशं कृत्वा [4]लिङ्गायुतं भवेत्॥ २३॥

[पञ्चशतलिङ्गलक्षणम्]

पूजांशोदयतुङ्गे तु दशभागविभाजिते।
एकं पञ्चाशदंशेन लिङ्गं पञ्चशतं भवेत्॥ २४॥

[अष्टोत्तरशतलिङ्गलक्षणम्]

शिवोदये तु वेदांशे [5]त्वेकेन ऋक्षभाजिते।
अष्टोत्तरशतं लिङ्गं [6]परितः संप्रकल्पयेत्॥ २५॥

[पञ्चविंशतिलिङ्गलक्षणम्]

शिवोदये तु पूजांशे [7]त्वेकं पञ्चविभाजिते।
पञ्चविंशतिलिङ्गं स्यात्

[द्विशतपञ्चाशल्लिङ्गलक्षणम्]

[8]पञ्चाशद्भाजिते सति॥ २६॥
[9]लिङ्गद्विशतपञ्चाशल् लिङ्गस्य परिकल्पितम्।

---

[1] चत्वारिंशच्च ] सं० पाठः; चत्वारिंशति – अ, ई, ऊ, ऋ, ज.
[2] अयुतस्य ] ज, अ[२], ऋ[२]; अधमस्य – अ, ई, ऋ; अयुधस्य – ऊ.
[3] 'अ[२], ऋ[२]' मातृकयोः श्लो० २३ पू० (द्वितीयपादः)- २४ उ० (प्रथमपादः) भागो न विद्यते।
[4] लिङ्गायुतं ] ऊ, अ[२], ऋ[२]; लिङ्गं युतं – अ; लिङ्गयुतं – ई, ऋ, ज.
[5] त्वेकेन ऋक्षभाजिते ] सं० पाठः; त्वेकेन क्षेत्र भागधे – अ, ऋ; त्वेकेन क्षेत्र भागयेत् – ई; त्वेके नक्षत्रभाजिते - ऊ, ज; त्वेकेन क्षेत्र भागया - अ[२], ऋ[२].
[6] परितः संप्र० ] अ, ई, ऊ, ज, अ[२], ऋ[२]; परितस्य० – ऋ.
[7] त्वेकं पञ्चविभाजिते ] सं० पाठः; त्वेकपञ्चविभाजिते- अ, ई, ऊ, ऋ, ज, अ[२], ऋ[२].
[8] पञ्चाशद्भाजिते] सं० पाठः; पञ्चविंशद्विभजे – अ, ऊ, ऋ, ज; पञ्चशद्विभजे – ई, अ[२], ऋ[२].
[9] लिङ्गद्विशतपञ्चाशल् ] ऊ, अ[२], ऋ[२]; लिङ्गं द्विशतपञ्चांशं – अ, ऋ, ज; लिङ्गद्विशतपञ्चांशं – ई.

[अल्पलिङ्गलक्षणम् ]

[1]अल्पलिङ्गस्य तारार्धं [2]पादं वाष्टांशमेव वा॥ २७॥
महालिङ्गस्य [3] विस्ताराद् ऊर्ध्वे संयोज्य पार्श्वयोः।
[4]तन्मानमल्पलिङ्गस्य [5]महालिङ्गाद्विनिर्गतः॥ २८॥
लिङ्गोपरि भवेल्लिङ्गं न कर्तव्यं कदाचन।
[6]अन्तराले भवेल्लिङ्गं मध्ये संकल्पयेत्क्रमात्॥ २९॥
शिरोवर्तनयुक्तं वा हीनं वा कल्पयेद्बुधः।
[7]महालिङ्गशिरोमानमधः संकल्पयेत्क्रमात्॥ ३०॥
[8]लिङ्गानामपि सर्वेषां सूत्रहीनं प्रकल्पयेत्।
नन्द्यावर्तशिलापीठं शिवलिङ्गविधानवत्॥ ३१॥

[लिङ्गस्थापनम्]

एवं लक्षणसंयुक्तं लिङ्गं संग्राहयेद्बुधः।
[9]रत्नलिङ्गविधानोक्तमार्गेण स्थापयेद्बुधः॥ ३२॥

[पूर्वदिवसक्रियाः]

एवं संस्थाप्य पूर्वेद्युः नवमे सप्तमेऽपि वा।
निश्चितदिवसात्पूर्वे सायाह्नसमये बुधः॥ ३३॥
स्नानं कृत्वा विधानेन यजमानसमन्वितः।
[10]प्रपामण्डपमाविश्य [11]भूतशुद्धिं समाचरेत् ॥ ३४॥

---

[1] अल्प० ] अ, ई, ऋ, ज, अ[२], ऋ[२]; कल्प० – ऊ.
[2] पादं वाष्टांशमेव वा ] अ, ई, ऊ, ऋ, ज; पादाङ्गुष्ठांशमेव वा - अ[२], ऋ[२].
[3] विस्ताराद् ] ई, ऊ, ऋ; विस्ताराम् – अ; विस्तारम् – ज, अ[२], ऋ[२].
[4] तन्मानमल्प० ] ज, अ[२]; तन्मानं कल्प० – अ, ई, ऊ, ऋ ; तन्मानं जाप० - ऋ[२].
[5] महालिङ्गाद्विनिर्गतः ] ज; ०निर्णिका – अ, ई, अ[२], ऋ[२]; ०निर्गताः – ऊ; ०निष्टिका – ऋ;
[6] 'अ, ऋ' मातृकयोः श्लो० २९ उ० अक्षरलोपः।
[7] श्लो० ३० उ०-३२ पू० भागः 'ऊ, ज, अ[२], ऋ[२]' मातृकासु न विद्यते।
[8] 'रत्नलिङ्गशिरोमानमधः संकल्पयेत्क्रमात्।' अयमर्धश्लोकः श्लो० ३० उ०-३१ पू० मध्ये 'ज' मातृकायां विद्यते।
[9] रत्न० ] ई, ऊ, ऋ, अ[२], ऋ[२]; रक्त० – अ; 'ज' मातृकायां श्लो०'३२ उ०' अर्धश्लोको न दृश्यते।
[10] प्रपा० ] अ, ई, ऋ, ज; प्रभा० – ऊ, अ[२], ऋ[२].
[11] भूतशुद्धिं समाचरेत् ] ऊ; भूतशुद्धिवदाचरेत् – अ, ई, ऋ, ज, अ[२], ऋ[२].

सकलीकरणं कृत्वा प्रदक्षिणमथाचरेत्।
[१]लिङ्गसंख्यां जपेन् मूलं यजमानसमन्वितः ॥ ३५ ॥
जपान्ते पराङ्मुखो भूत्वा [२]देशिको विजितेन्द्रियः।
मण्डपस्योत्तरे पार्श्वे शाययेत्सैकतोपरि ॥ ३६ ॥

[अनन्तरदिवसक्रियाः]

ब्राह्मे मुहूर्ते [३]उत्थाय पादप्रक्षालनं कुरु।
मुखशुद्धिं ततः कृत्वा [४]आचम्य देशिकोत्तमः ॥ ३७ ॥
भस्मना तिलकं दत्वा मूलमन्त्रं जपेत्ततः।
यजमानसमोपेतः [५]स्नानं कृत्वा यथाविधि ॥ ३८ ॥
सन्ध्यादिवन्दनं कृत्वा नित्यकर्म समाप्य च।
[६]प्रपामण्डपमाविश्य सकलीकृतविग्रहः ॥ ३९ ॥
मण्डपं पूजयेद्विद्वान् [७]मण्डपं कल्पयेत्तु वा।
चतुर्द्वारं समभ्यर्च्य [८]पूर्वोक्तविधिना सह ॥ ४० ॥
पूजयेदथ रक्षार्थम् अस्त्रराजं सशक्तिकम्।
प्रपामण्डपमध्ये वा पश्चिमे वा विचक्षणः ॥ ४१ ॥
विन्यसेत्तु [९]महापीठं मन्त्रदारुमयैस्तु वा।
उपर्यास्तरणं कल्प्य शुद्धवस्त्रादिकैर्यथा ॥ ४२ ॥
[१०]शिवासनं च तस्योर्ध्वे [११]लिङ्गसंख्यां प्रकल्पयेत्।

[लिङ्गपूजा]

पुण्याहं वाचयेत्तत्र पञ्चगव्यामृतं तथा ॥ ४३ ॥

---

[१] लिङ्गसंख्यां जपेन् ] ऊ, ज, अ[२], ऋ[२]; लिङ्गं संख्यापयेन् – अ, ऋ; लिङ्गं संस्थापयेन्- ई.
[२] देशिको विजितेन्द्रियः ] अ, ई; क्षीरं भुक्त्वा जितेन्द्रियः – ज, अ[२], ऋ[२]; 'ऊ, ऋ' मातृकायामक्षरलोपः।
[३] उत्थाय ] अ, ई, ऊ, ऋ, ज; उत्थाप्य - अ[२], ऋ[२].
[४] अचम्य देशिकोत्तमः ] अ, ई, ऊ, ऋ, ज, ऋ[२]; मूलमन्त्रं जपेत् ततः - अ[२].
[५] स्नानं कृत्वा यथाविधि ] अ, ई, ऊ, ऋ, ज; स्नानत्रयमथाचरेत् - अ[२], ऋ[२].
[६] श्लो०'३९ उ०' 'अ[२], ऋ[२]' मातृकयोः न विद्यते।
[७] मण्डपं कल्पयेत्तु वा ] अ, ई, ऋ; मण्डपं कल्पये पि वा -ऊ; मण्डपे कल्पयेत् तु वा - ज; मण्डपे कलशेऽपि वा - अ[२], ऋ[२].
[८] पूर्वोक्तविधिना ] अ, ई, ऊ, ऋ; अ[२], ऋ[२]; पूर्वेण विधिना – ज.
[९] महापीठं मन्त्र० ] अ, ई; महापीठमग्रे तु – ऊ; महापीठमन्त्रे – ऋ; महापीठं मन्त्रैर् –ज.
[१०] शिवासनं च तस्योर्ध्वे ] ई, ऊ, ज; शिवतस्योर्ध्वे – अ, ऋ.
[११] लिङ्गसंख्यां ] अ, ई, ऋ, ज; लिङ्गं शम्भो – ऊ.

संकल्प्य लिङ्गान् संगृह्य स्नानवेद्युपरि न्यसेत्।
प्रक्षाल्य चास्त्रमन्त्रेण पञ्चगव्यामृतादिकैः॥ ४४॥
लिङ्गमन्त्रेण संस्थाप्य [१]स्थापयेत्तान् शिवासने।
तत्तन्मन्त्रेण चाभ्यर्च्य गन्धपुष्पं सधूपकम्॥ ४५॥
दीपं नैवेद्यताम्बूलं दापयेत्तदनन्तरम्।
नीलोत्पलैर्वा [२]कल्हारैः पद्मैर्वा [३]श्वेतपंकजैः॥ ४६॥
[४]अर्कैरारग्वधैर्वापि चम्पकैर्वा विचक्षणः।
[५]रत्नैर्वा [६]कनकैर्वाथ कर्पूरशकलेन वा॥ ४७॥
अथवा बिल्वपत्रेण पूजयेल्लिङ्गमन्त्रतः।

[पुष्पदानम्]

पूजार्थमागतं पुष्पं संगृह्य शुद्धपात्रके॥ ४८॥
निरीक्षणादिभिः शोध्य धूपं दीपं प्रदापयेत्।
यजमानमथाहूय संप्रोक्ष्यार्घ्यजलेन च॥ ४९॥
[७]भस्मना तिलकं कल्प्य शिवमन्त्रेण देशिकः।
शिवहस्तं च संकल्प्य यजमानस्य मूर्धनि॥ ५०॥
[८]तं संस्थाप्य [९]जपेन्मन्त्री मूलमष्टोत्तरं [१०]शतम्।
पूजार्थमाहृतं पुष्पं शङ्खध्वनिसमन्वितम्॥ ५१॥
यजमानकरे दद्यादर्चयित्वा विचक्षणः।
[११]लिङ्गं प्रति ददेत्पुष्पं तत्तन्मन्त्रं समुच्चरेत्॥ ५२॥

---

[१] स्थापयेत्तान् ] ई, स्थापयेत्ता – अ; स्थापयेत्तु – ऊ; स्थापयेत्तत् – ऋ; स्थापयेच्च - ज.
[२] कल्हारैः ] ई, ऊ, ज; कर(वी)रैः – अ; 'ऋ' मातृकायामक्षरलोपः।
[३] श्वेतपंकजैः ] अ, ई, ऋ; पर्श्वपंकजैः –ऊ.
[४] 'ऊ' मातृकायां प्रथमः पदो नास्ति।
[५] रत्नैर्वा ] ई, ऊ, ऋ, ज; रक्तैर्वा – अ.
[६] कनकैर्वाथ ] अ, ऊ, ऋ, ज; कनकेनाथ – ई.
[७] 'ऋ' मातृकायां प्रथमः पादो नास्ति।
[८] 'ऊ' मातृकायां "तं" इति पदं नास्ति। 'ज' मातृकायां श्लो० ५१ पू० "तं संस्थाप्य जले पद्ममूलमष्टोत्तरं शतम्।" इति दृश्यते।
[९] जपेन्मन्त्री ] सं० पाठः; यजेन्मन्त्री – अ, ई, ऊ, ऋ.
[१०] शतम् ] ई, ऋ, ज; शतं युतम् – अ, ऊ .
[११] लिङ्गं] सं० पाठः; अंशं – अ, ई, ऋ; अङ्गे - ऊ; अङ्गं – ज.

[एकलिङ्गविशेषविधिः]

[-वारिमण्डलकल्पनम्]

एकलिङ्गे विशेषोऽस्ति परितः [१]पीठबाह्यतः।
त्रिहस्तं वा तदर्धं वा स्थलमानं [२]व्यपोह्य च॥५३॥
पूजांशोदय[३]द्वारान्तं तन्मानं [४]व्याप्य मण्डलम्।
तद्बाह्ये वेदिकामानं सप्ततालसमुन्नतम्॥५४॥
उत्सेधसमविस्तारं [५]तदर्धार्धमथापि वा।
त्रिमेखलायुतं वापि द्विमेखलायुतं तु वा॥५५॥
चतुरश्रं सुवृत्तं वा परितः कल्पयेत्क्रमात्।
सुधया सैकतैस्तत्र पूरयेच्छुद्धवारिणा॥५६॥

[-वारिमण्डले पूजा तत्र स्नानं च]

तद्वारिमण्डले दृष्ट्वा लिङ्गसाहस्रकं बुधः।
पूर्ववत्पूजयेद्विद्वान् लिङ्गस्य परितः क्रमात्॥५७॥
अग्रादिमूलपर्यन्तं भुक्तिमुक्तिप्रदायकम्।
मूलादि चाग्रपर्यन्तं पूजा मुक्तिफलप्रदा॥५८॥
लिङ्गे चावरणं यत्तत् क्रमेण वारिमण्डले।
यजमानेन चाभ्यर्च्य पूर्ववद्देशिकोत्तमः॥५९॥
लिङ्गं प्रत्याढकार्धेन नैवेद्यं परिकल्पयेत्।
धूपं दीपं ततो दत्वा लिङ्गावरणमार्गतः॥६०॥
नृत्तान्तं पूजयेद्विद्वान् लिङ्गस्यावरणं यजेत्।
गीतनृत्तादिकं सर्वं लिङ्गस्य परितः क्रमात्॥६१॥
संकल्प्य लिङ्गपूजान्ते शिवमन्त्रशतं जपेत्।
इष्टबन्धुजनैस्सार्धं यजमानसमन्वितम्॥६२॥
तद्वारिमण्डले स्नात्वा यद्देवा इति मन्त्रतः।

---

[१] पीठबाह्यतः ] अ, ऋ; पीठबाह्यके – ई, ऊ, ज.

[२] व्यपोह्य ] अ, ई, ज; प्रवोह्य– ऊ; 'ऋ' मातृकायां अक्षरलोपः।

[३] ०द्वारान्तं तन्मानं ] ई; ०द्वारा तान्तन्मानं-अ; ०दतारत्तोत्मानं -ऊ; ०द्वारान्तात्त्मानं -ऋ; ०मानं तत्तन्मानं-ज.

[४] व्याप्य ] अ, ई, ऋ, ज; कल्प्य – ऊ .

[५] तदर्धार्धमथापि वा ] ई; तदर्धं वामथापि वा – अ, ऊ, , ज, ऋ.

सोऽपि [1]पापैर्विनिर्मुक्तः शिवसायुज्यमाप्नुयात्॥ ६३॥

[दक्षिणा महाशान्तिव्रतफलं च]

महाशान्तिव्रतं दृष्ट्वा नत्वा लिङ्गसहस्रकम्।
यः कुर्वन् शिवलोकेऽपि शिवेन सह मोदते॥ ६४॥
आचार्यं पूजयेत्तत्र गोभूमिकाञ्चनादिकैः।
अस्य व्रतोपकरणान् नववस्त्रं प्रदापयेत्॥ ६५॥
महाशान्तिव्रतं प्रोक्तं गौरीव्रतमथ श्रृणु॥ ६५[1]/[2]॥

॥ [2]इति सूक्ष्मशास्त्रे महाशान्तिविधिः सप्तषष्टितमः पटलः॥

---

[1] पापैर्विनिर्मुक्तः ] अ, ई, ऋ, ज; वाग्वर्षैनिर्मुक्तः – ऊ.

[2] इति सूक्ष्मशास्त्रे महाशान्तिविधिः सप्तषष्टितमः पटलः] सं० पाठः; अ: इति सूक्ष्मशास्त्रे महाशान्तिविधिरष्टषष्टितमः पटलः॥; ई : इति सूक्ष्मशास्त्रे क्रियापादे महाशक्तिव्रतविध्यष्टपञ्चाशत् पटलः॥; ऊः इति सूक्ष्मशास्त्रे महाशान्तिव्रतविधिपटलो पञ्चषष्टितमः॥; ऋः इति सूक्ष्मशास्त्रे महाशान्तिविधिः अष्टषष्टितमः पटलः॥; ज : इति सूक्ष्मशास्त्रे क्रियापादे महाशान्तिव्रतं नाम एकचत्वरिशत् पटलः॥

## [अष्टषष्टितमः पटलः[१]]

## [नित्यार्चनहीने प्रायश्चित्तविधिक्रमः]

वक्ष्ये नित्यार्चनाहीने प्रायश्चित्तविधिक्रमम्।

[आत्मशुद्धिः अङ्कुरार्पणं च]

देशिकः सुप्रसन्नात्मा शिवद्विजकुलोद्भवः ॥१॥
स्नानोक्तविधिना स्नात्वा शुक्लवस्त्रोत्तरीयकः ।
[२]शुक्लयज्ञोपवीती च पञ्चाङ्गभूषणैर्युतः ॥२॥
प्रासादं [३]तु प्रविश्याथ पादप्रक्षालनं कुरु ।
देवदेवं [४]नमस्कृत्य [५]त्रिपुण्ड्रं विधिना नयेत् ॥३॥
सकलीकरणं कृत्वा सद्योऽङ्कुराणि वापयेत् ।

[स्थण्डिलकल्पनम्]

प्रासादाग्रे विशेषेण गोमयालेपनं कुरु ॥४॥
पिष्टचूर्णैरलङ्कृत्य शालिभिः स्थण्डिलं कुरु ।
तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् ॥५॥
तण्डुलैश्च तिलैर्दर्भैः पुष्पैश्चैव परिस्तरेत् ।

[कलशस्थापनम् ]

सौवर्णं [६]राजतं ताम्रम् अथवा मृण्मयं भवेत् ॥६॥
पक्वबिल्वफलाकारान् कलशान् [७]गृह्य देशिकः ।
तन्तुना वेष्टयित्वा तु एकद्वित्रियवान्तरम् ॥७॥
प्रक्षाल्य [८]धूपितान् सर्वान् स्थापयेद्वामपार्श्वके ।

---

[१] अयं पटलः अ (टि.१९१, पृ० ३८३-३८४), ई (टि.३६, पृ० २९३, २९४-२९७), ऊ (टि.३८, पृ० ८४६, ८४८-८५३), ऋ (टि.९७, पृ० ४४१,४४२-४४४) इत्येतेषु कोशेषु दृश्यते।

[२] शुक्लयज्ञोपवीती च ] अ, ई, ऋ; शुक्लयज्ञोपवीतश्च – ऊ.

[३] तु ] अ, ऊ, ऋ; च – ई.

[४] नमस्कृत्य ] ई; नमस्कृत्वा – अ, ऊ, ऋ.

[५] त्रिपुण्ड्रं ] ई, ऊ, ऋ; त्रिपुण्ड्र – अ.

[६] राजतं ] ई, ऋ; रजतं – अ, ऊ;.

[७] गृह्य ] अ, ई, ऋ; ग्राह्य – ऊ.

[८] धूपितान् ] ई, ऊ, ऋ; धूपदीपादीन् – अ (छन्दोभङ्गः).

[1]पुण्याहं वाचयेत्तत्र प्रोक्षयेत्तु शिवास्त्रकैः ॥८॥
कुम्भानुद्धृत्य संप्रोक्ष्य स्थापयेत्स्थण्डिलोपरि ।
सकूर्चान् सापिधानांश्च [2]सवस्त्रान् हेमसंयुतान् ॥९॥
गन्धोदकेन संयुक्तान् साधयेत्साधकोत्तमः ।

[देवतावाहनं कुम्भस्थापनं च]

[3]व्याप्यव्यापकभावेन ज्ञात्वा सर्वं विशेषतः ॥१०॥
सर्वव्यापिगतं देवं [4]निष्कलं सकलाकलम् ।
कुम्भमध्ये समावाह्य पञ्चावरणसंयुतम् ॥११॥
अष्टादशगणांश्चैव लोकपालान् [5]वसून् क्रमात् ।
[6]त्रयस्त्रिंशतिदेवांश्च ध्वजादिपरिवारकान् ॥१२॥
पञ्चावरणदेवांश्च स्थापयेत् कुम्भमध्यमे ।
[7]आवाहनोक्तमार्गेण [8]ध्यात्वा देवं सदाशिवम् ॥१३॥
शक्तिबीजं [9]तु वर्धन्यां विन्यसेत्तु विधानतः ।
अभितः कलशानष्टौ [10]अष्टविद्येश्वरात्मकान् ॥१४॥
स्वस्वबीजैः समभ्यर्च्य गन्धपुष्पादिना सह ।

[अग्निकार्यम्]

अग्न्याधानादिकं सर्वं प्रागुक्तविधिना कुरु ॥१५॥
तत्त्वव्याप्तिक्रमेणैव हुत्वा पूर्वोक्तसंख्यया ।
समिदाज्यचरूंश्चैव तिलसर्षपमुद्गकान् ॥१६॥
गुलं च [11]सक्तुलाजं च कदलीफलसंयुतम् ।

---

[1] 'ऊ' मातृकायां श्लो० १८पू०-२०पू० भागः ८पू०-८उ० मध्ये दृश्यते ।
[2] सवस्त्रान् हेमसंयुतान् ] अ, ऊ, ऋ; वस्त्रहेमसमन्वितान् – ई.
[3] व्याप्य० ] अ, ऊ, ऋ; व्याप्ति० – ई.
[4] निष्कलं सकलाकलम् ] अ, ई, ऋ; निष्कलसकलालकम् – ऊ.
[5] वसून् ] अ, ऊ, ऋ; न्यसेत् – ई.
[6] त्रयस्त्रिंशति० ] अ, ऊ, ऋ; त्रयस्त्रिंशादि० – ई.
[7] आवाहनोक्त० ] अ, ई, ऋ; तत्रोवाहनोक्त० – ऊ. (छन्दोभङ्गः)
[8] ध्यात्वा ] अ, ई, ऋ; धृत्वा – ऊ.
[9] तु ] अ, ऊ, ऋ; च – ई.
[10] अष्टविद्येश्वरात्मकान् ] ई, ऋ; अष्टौ विद्येश्वरात्मकान् – अ; अष्टविद्येश्वरं क्रमात् – ऊ.
[11] सक्तु० ] ऊ, ऋ; सर्क्तू – अ; सक्थु० – ई.

सद्यादिकास्त्रपर्यन्तं हुत्वा पूर्वोक्तवद्बुधः ॥१७॥
सहस्रं वा तदर्धं वा मूलेन जुहुयाद् घृतम् ।
तद्दशांशं [1] हुनेच्चाङ्गमन्त्रैश्चैव पृथक् पृथक् ॥१८॥
[2]एवं जागरणं रात्रौ

[अपरेद्युः कार्याणि]

प्रातः [3]यथोचितं कुरु ।
देशिकः सुप्रसन्नात्मा स्नानं कृत्वा विधानतः ॥१९॥
सकलीकरणं कृत्वा हुनेद्देवान् पृथक् पृथक् ।
जयादिरभ्याधानं च राष्ट्रभृच्च [4]हुनेत्ततः ॥२०॥
अघोरास्त्रं शिवास्त्रं च तथा पाशुपतास्त्रकम् ।
प्रत्येकं [5]शतकं हुत्वा मृत्युञ्जयसमन्वितम् ॥२१॥
पूर्णां हुत्वा च शिरसा घटमुद्धारयेत्ततः ।
हर्म्यप्रदक्षिणं [6]कृत्वा [7]स्वस्तिसूक्तसमन्वितम् ॥२२॥
प्रविश्य गर्भगेहं तु स्थापयेत् स्थण्डिलोपरि ।

[चरराशिषु योजनम्]

अत्र किञ्चिद्विशेषोऽस्ति [8]स्थिरराश्युभयं विना ॥२३॥
[9]चरराशिषु सर्वेषु योजयेल्लिङ्गमध्यमे ।

[कार्यसमाप्तिः]

[10]प्राणप्रवाहमार्गेण ध्यात्वा देवं सदाशिवम् ॥२४॥

---

[1] हुनेच्चाङ्ग० ] ई; हुनेचाङ्गं – अ, ऊ, ऋ;.
[2] 'अ' मातृकायां श्लो० १९पू०-२०पू० भागो न दृश्यते ।
[3] यथोचितं ] सं० पाठः ; संकोचितं - ई , ऊ, ऋ; च.
[4] हुनेत्ततः ] अ, ई; क्रमाद्धुनेत् – ऊ; हुनेत्क्रमात् – ऋ.
[5] शतकं ] अ, ई, ऋ; शतं – ऊ (छन्दोभङ्गः).
[6] कृत्वा ] ऊ; कुर्यात् - अ, ई, ऋ.
[7] स्वस्तिसूक्त० ] अ, ई, ऋ; स्वस्तिसूक्तै – ऊ.
[8] स्थिरराश्युभयं ] अ, ई, ऋ; स्थिररास्योभयं – ऊ.
[9] चरराशिषु ] अ, ई, ऋ; चररासिषु – ऊ.
[10] प्राणप्रवाह० ] अ, ई, ऋ; प्राणवप्रभाव० – ऊ (छन्दोभङ्गः).

[1]वर्धन्या बीजमादाय [2]तच्छक्तिं भावयेद् बुधः ।
कुम्भोदैः स्नापयेद्देवं [3]वर्धन्यद्भिस्तु पिण्डिकाम् ॥ २५॥
[4]अभितोऽष्टघटोदैश्च स्नापयेत् [5]स्वस्वकुम्भकैः ।
अर्चनोक्तं समभ्यर्च्य प्रभूतहविषं ददेत् ॥ २६ ॥
मण्डपाभ्यन्तरे पूर्वे [6]पीठे चैव बलिं ददेत् ।
[7]ध्वजादिबलिपीठान्तं देवानभ्यर्च्य [8]चैकशः ॥ २७॥
[9]नित्यं नैमित्तिकं चैव नित्योत्सवमहोत्सवम् ।
अन्यानि [10]सर्वकर्माणि [11]योग्यलिङ्गे समाचरेत् ॥ २८॥

[12][ ॥ इति सूक्ष्मशास्त्रे क्रियाक्रमात् नित्यार्चनहीने प्रायश्चित्तविधिक्रमोऽष्टषष्टितमः पटलः ॥ ]

---

[1] वर्धन्या ] सं० पाठः; वर्धन्यां-अ, ई, ऊ, ऋ.
[2] तच्चक्तिं भावयेद् ] ऊ; सशक्तिं भावयेद् – अ; शक्तिभागे न्यसेद् – ई; शक्तिं भावयेद् – ऋ.
[3] वर्धन्यद्भिस्तु ] अ, ई; वर्धन्यातिभ सु० – ऊ; वर्धन्याद्भिस्तु – ऋ.
[4] अभितोऽष्टघटोदैश्च ] ई, ऊ; अभितोऽष्टघटाद्यैश्च – अ; अभितोऽष्टघटो च – ऋ.
[5] स्वस्वकुम्भकैः ] ई; सवसंबकैः – अ, ऋ; सर्वबिम्बकैः – ऊ.
[6] पीठे चैव ] अ, ऊ, ऋ; पीठोपरि – ई.
[7] ध्वजादिवलिपीठान्तं ] ऊ; ध्वजादिवलिपीठान्ते – अ, ई, ऋ.
[8] चैकशः ] अ; एकशः – ई; चैत्यशः – ऊ; चैकतः – ऋ.
[9] नित्यं ] अ, ऊ, ऋ; नित्य० – ई.
[10] सर्वकर्माणि ] ई; चैव सर्वाणि – अ, ऊ, ऋ.
[11] योग्य० ] ई; योग० – अ, ऊ, ऋ.
[12] सर्वेषु कोशेषु पुष्पिका नास्ति ।

## [[1]एकोनसप्ततितमः पटलः]

## [मकुटनिर्माणविधिः]

[2]मकुटस्य विधिं वक्ष्ये शृणु त्वं [3]तत् प्रभञ्जन ।
[4]तल्लक्षणं त्रिधा प्रोक्तं किरीटं च करण्डकम् ॥ १ ॥
जटामकुटमेतेषु जटामकुटलक्षणम् ।
वक्ष्यते निष्कलस्यापि सकलस्य च [5]साम्प्रतम् ॥ २ ॥

### [सुवर्णपरिमाणम्]

स्वर्णसंख्याविधानं च [6]श्रेष्ठमध्याधमक्रमात् ।
त्रिसहस्रं सत्रिशतं [7]सत्रिंशतिनिष्ककम् ॥ ३ ॥
त्रिगुञ्जैस्त्रिंशतं [8]सत्रित्रिंशन्निष्कं [9]त्रिगुञ्जयुक् ।
[10]सत्रिंशच्छतनिष्कं तु [11]त्रिगुञ्जैः शिवमौलिषु ॥ ४ ॥
शतं विना तु तन्मानं सोमास्कन्देषु [12]मौलिषु ।
तन्मानं द्विगुणं वाथ त्रिगुणं वा विधीयते ॥ ५ ॥
तत्तत्संख्याविधानेन शुद्धजाम्बूनदं [13]गृहेत् ।

### [ग्रामप्रदक्षिणम्]

हैमे वा ताम्रपात्रे वा [14]क्षिस्त्वा तन्मूलमन्त्रतः ॥ ६ ॥

---

[1] अयं पटलः अ (टि. १९१, पृ० ३८७-३८९), ई (टि. ३६, पृ० २९८-३०१), ऋ (टि. ९७, पृ० ४४५-४४७), झ (टि. १०१६, पृ० ७१-७४) इत्येतेषु कोशेषु वर्तते ।
[2] मकुटस्य विधिं ] अ, ई; मकुटारोपणं - झ.
[3] तत् प्रभञ्जन ] अ, ई; तत्सदागेते - झ .
[4] तल्लक्षणं त्रिधा ] अ, ई; त . . . . – झ .
[5] साम्प्रतम् ] अ, ई; संवृतम् - झ.
[6] श्रेष्ठमध्याधमक्रमात् ] ई; श्रेष्ठं मध्याधमक्रमात् – अ ; मध्य . . . .- झ.
[7] सत्रिंशतिनिष्ककम् ] अ, झ; सत्रित्रिंशतिनिष्ककम् - ई.
[8] सत्रित्रिंशन्निष्कं ] ई, झ; स्त्रित्रिंशन्निष्कं - अ .
[9] त्रिगुञ्जयुक् ] अ, झ ; तु गुञ्जकम् - ई.
[10] सत्रिंशच्छतनिष्कं तु ] ई; . . . . शतनिष्कं - अ; सत्रित्रिंशच्छतं निष्कं - झ.
[11] त्रिगुञ्जैः ] ई; त्रिगुञ्जैश्च - अ; . . . . ञ्जे - झ .
[12] मौलिषु ] ई, झ; मौक्तिषु - अ.
[13] गृहेत् ] ई,झ;क्षितौ - अ.
[14] क्षिस्त्वा तन्मूलमन्त्रतः ] ई; क्षिप्ता तन्मूलमन्त्रतः - अ; . . . . लमन्त्रतः - झ.

सर्वालङ्कारसंयुक्तमारोप्य [१]गजमस्तके।
अथवा [२]गब्लिकोर्ध्वे वा नयेद् ग्रामप्रदक्षिणम् ॥७॥
शिवस्य पुरतो वापि देवालयसमीपतः ।
स्नानं कृत्वा [३]गुरुश्रेष्ठः [४]कर्तृदैवज्ञसंयुतः ॥८॥
स्वर्णकारेण [५]संयुक्तः कर्मारम्भं समाचरेत् ।
तदर्च्य ब्रह्ममन्त्रेण होमं कुर्याद्यथाविधि ॥९॥

[हेमसज्जीकरणम्]

पीठे हैममये तत्र [६]निधायास्त्रेण हाटकम् ।
[७]अयसा [८]कल्पिते वापि तन्मन्त्रेण [९]प्रहारकम् ॥१०॥
गन्धपुष्पादिनाभ्यर्च्य त्रिधा तेनैव देशिकः ।
[१०]संताडयेदतः पश्चात् [११]स्वर्णकारः क्रियां चरेत् ॥११॥

[मकुटमानम्]

[१२]देहबन्धाङ्गुलं गृह्य सकले तत्प्रमाणतः ।
चतुर्विंशाङ्गुलं वापि त्रिसप्ताङ्गुलमेव वा ॥१२॥
अष्टादशाङ्गुलं वाथ [१३]मकुटोत्सेधकं कुरु ।
सकलेऽप्येवमेवं स्यान्निष्कले तु विधीयते ॥१३॥

[निष्कलस्य मकुटमानम्]

शिरोवर्तनतस्तारं नाहं तत्सममुच्यते ।

---

[१] गजमस्तके ] सं० पाठः; गजकर्णतः - अ; . . . . ई; . . . . कर्णतः - झ.
[२] गब्लिकोर्ध्वे वा ] ई; भल्लिकोर्ध्वेन - अ; गल्लिकोध्वे - झ.
[३] गुरुश्रेष्ठः ] ई ; . . . . श्रेष्ठः - अ ; . . . . झ.
[४] कर्तृदैवज्ञसंयुतः ] ई; कर्ता दैवज्ञसंयुतः- अ; क . . . . देवज्ञसंयुतः- झ.
[५] संयुक्तः ] झ; संयुक्तं-अ, ई.
[६] निधायास्त्रेण हाटकम् ] अ, ई ; निथाय . . . . –झ.
[७] अयसा ] सं० पाठः; अवसा - अ, ई, झ .
[८] कल्पिते - अ, झ ; कल्पते - ई.
[९] प्रहारकम् ] अ, झ; प्रभाकरम् - ई.
[१०] संताडयेदतः ] सं० पाठः; सन्नाययेदतः – अ ; संताययेत्ततः- ई ; संताडयेदथा- झ.
[११] स्वर्णकारः क्रियां चरेत् ] ई;स्वर्णकारक्रियां चरेत् - अ; स्वर्णकार . . . . – झ.
[१२] देहबन्धाङ्गुलं गृह्य ] ई ; देवि बन्धाङ्गुलं गृह्य - अ; . . . . बन्धाङ्गुले ग्राह्य - झ.
[१३] मकुटोत्सेधकं कुरु ] अ, ई; मकुटो . . . . – झ.

[१]विस्तारसमतुङ्गं स्यात् सप्ताष्टनवकांशके ॥१४॥
एकांशोनाधिकं वापि कुर्यादायादिसंयुतम् ।
तुङ्गतारवशेनैव आयादीनपि कारयेत् ॥१५॥
ललाटमुकुलान्तं च मानयेन्मानसूत्रकम् ।

[मकुटे जटालक्षणम्]

युग्मसंख्याजटायुक्तं तज्जटापरितो वृतम् ॥१६॥
अथवा तिर्यगूर्ध्वस्थजटाभिः [२]परिमण्डितम् ।
अर्कांशे तु तदुत्सेधे एकांशेन जटोदयम् ॥।१७॥
[३]कनिष्ठानामिकामध्याङ्गुलीनाहमथापि वा ।
ललाटपट्टसंयुक्तं शिरसो वर्तनोर्ध्वतः ॥१८॥
चतुष्पूरितसंयुक्तं [४]तदुत्सेधवशेन च ।
अथवा [५]पूरितोत्सेधं तदर्धेन विराजितम् ॥१९॥
[६]मौलिमूले विशालं च [७]तत्त्रिभागैकमेव वा ।
तदग्रविस्तरं [८]चैव क्रमेण [९]कृशतां नयेत् ॥२०॥
[१०]तज्जटोदयमानेन द्विगुणं मुकुलोदयम् ।

[मकुटालंकारः]

तद्रूपं मुकुलं [११]वापि [१२]यथोक्तं च समाचरेत् ॥२१॥
[१३]वामे तु शिवगङ्गां च [१४]तदर्धोदयमानतः ।

---

[१] 'विस्तारसमतुङ्गं इत्यारभ्य 'आयादीनपि कारयेत्' इति पर्यन्तं 'ई' 'झ' मातृकयोः पुनरेकवारं लिखितं वर्तते ।
[२] परिमण्डितम् ] झ; परिसंयुतम् - अ, ई.
[३] कनिष्ठानामिकामध्याङ्गुली ] ई; कनिष्ठिकानामिकामध्याङ्गुली - अ (छन्दोभङ्गः); कनिष्ठिका . . . . गुलिनामथापि वा - झ.
[४] तदुत्सेधवशेन च ] ई; तदुत्सेधवरो न वा - अ; तदुत्सेथं वशेन वा - झ.
[५] पूरितोत्सेधं ] अ, ई; परिमुत्सेथं - झ.
[६] मौलिमूले विशालं ] सं० पाठः मौलिमूलविशालं -अ, ई; म . . . . लार्धं-झ.
[७] तत्त्रिभागैकमेव ] ई, झ; तन्त्रीभागेकमव-अ.
[८] चैव ] ई;त्वेवं - अ, झ.
[९] कृशतां नयेत् ] सं० पाठः; तु शर्तं नयेत् - अ, ई, झ.
[१०] तज्जटोदयमानेन ] अ; तज्जटोदरमानेन - ई; तज्जोदयमानेन - झ.
[११] वापि ] अ; वाथ - ई; . . . .-झ.
[१२] यथोक्तं च समाचरेत् ] सं० पाठः यथा वक्तुं - अ; . . . . तद्वत् - ई; . . . . झ.
[१३] वामे तु शिवगङ्गां च ] अ; वाचामेन्दुसुगङ्गाश्च - ई; वामे वामे तु गङ्गां च - झ.
[१४] तदर्धोदयमानतः ] सं० पाठः ; तदर्धं द्वयमानतः - अ, ई, झ.

वामेऽर्धशशिसंयुक्तं सव्ये नागार्कपुष्पकैः ॥२२॥
[1]नानापुष्पसमायुक्तं नानारत्नोपशोभितम् ।
[2]नानाचित्रक्रियोपेतं मकुटं कारयेद्बुधः ॥२३॥
अत्रानुक्तं तु यत्सर्वं युक्त्यालङ्कारमाचरेत् ।
मकुटस्य विधिः प्रोक्तो मकुटारोपणं शृणु ॥२४॥

[3]इति सूक्ष्मशास्त्रे मकुटनिर्माणविधिः एकोनसप्ततितमः पटलः ॥

---

[1] नानापुष्पसमायुक्तं ] सं० पाठः ; नागार्कपुष्पसंयुक्तं - अ, ई, झ.

[2] नानाचित्रक्रियोपेतं ] अ, ई; नानाछत्रक्रियोपेतं - झ.

[3] इति सूक्ष्मशास्त्रे मकुटनिर्माणविधिः एकोनसप्ततितमः पटलः ] सं० पाठः; इति सूक्ष्मशास्त्रे मकुटनिर्माणविधिः सप्ततितमः पटलः -अ; इति सूक्ष्मशास्त्रे मकुटविधिपटलः –ई; इति सूक्ष्मतन्त्रे मकुटविधिं नाम सप्ततिपटलः- झ ।

## [[1]सप्ततितमः पटलः]

## [मकुटारोपविधिः]

मकुटारोपणं वक्ष्ये [2]शृणु त्वं तत्प्रभञ्जन ।

[मकुटारोपणफलम्]

आयुरारोग्यफलदं पुत्रपौत्रविवर्धनम् ॥ १ ॥
[3]सर्वसिद्धिकरं पुण्यं शत्रुनाशकरं परम् ।

[मकुटारोपणकालः]

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ॥ २ ॥
राजग्रामानुकूलर्क्षे देवनक्षत्रकेऽपि वा ।
[4]युद्धारम्भावसाने वा यजमानदिनेऽपि[5] वा ॥ ३ ॥
मकुटारोपणं कुर्याद् [6]विधिनानेन बुद्धिमान् ।

[यागमण्डपस्थानम्]

प्रासादपूर्वदिग्भागे दक्षिणे [7]चोत्तरेऽपि वा ॥ ४ ॥
[8]पश्चिमे काम्यदेशे वा [9]नैर्ऋते वायुगोचरे ।
ईशाने पावके वाथ गोपुरद्वारपार्श्वके ॥ ५ ॥
पञ्चप्राकारबाह्ये वाभ्यन्तरे [10]वास्तुमध्यमे ।
मण्टपं कारयेद्विद्वान् [11]मकुटारोपणार्थकम् ॥ ६ ॥

---

[1] अयं पटलः अ (टि.१९१, पृ०३८९-३९९), ई (टि. ३६, पृ०३०१-३११), ऋ (टि ९७, पृ० ४४७-४५६), झ (टि. १०१६, पृ०७४-८४) इत्येतेषु कोशेषु दृश्यते ।
[2] शृणु त्वं ] अ,ई; शृणुध्वं - झ.
[3] सर्वसिद्धिकरं ] अ, ई; स . . . . सिद्धिकरं-झ.
[4] युद्धारम्भावसाने वा ] अ,ई; युद्धारम्भवस . . . . – झ.
[5] यजमानदिनेऽपि ] अ, ई; जयमानदिनेऽपि - झ.
[6] विधिनानेन ] ई; विधानेन च - अ; विधानेन - झ.
[7] चोत्तरेऽपि ] अ, ई; चोत्त. . . . –झ.
[8] पश्चिमे काम्यदेशे ] ई; पश्चिमैकांशदेशे - अ; पश्चिमे त्विशदेशे – झ.
[9] नैर्ऋते ]अ, ई; . . . . रुते - झ.
[10] वास्तुमध्यमे ] अ ,ई; वास्तु . . . . – झ.
[11] मकुटारोपणार्थकम् ] अ, ई; . . . . रोपणार्थकम् - झ .

[आसनकल्पनम्]

[1]मकुटारोपणात् पूर्वे [2]चासनादीनि कारयेत् ।
[3]रत्नलोहशिलामृद्भिः कर्तव्यं [4]सैंहमासनम् ॥७॥
अथ वा [5]याज्ञिकैर्वृक्षैः सिंहासनं [6]प्रकल्पयेत् ।
आसनं शैलदार्वं चेत् [7]रत्नग्रहविधानतः ॥८॥
[8]संगृह्यासनम् आपाद्य [9]पूर्वोक्तलक्षणैः सह ।
स्थापनात् [10]पूर्वरात्रौ तु अधिवासनमाचरेत् ॥९॥

[रङ्गमण्डपकल्पनम्]

मकुटमण्टपात् पूर्वे सौम्ये वा [11]दक्षिणेऽथवा ।
[12]नैर्ऋतेशानदेशे वा [13]कल्पयेद्रङ्गमण्टपम् ॥१०॥
[14]गुणवेदकरारभ्य [15]द्विद्विहस्तविवर्धनात् ।
नवमानं प्रकर्तव्यं [16]विंशदेकोनविंशकम् ॥११॥
मण्टपं वा [17]प्रपां वापि कूटाकारमथापि वा ।
विमानाकृतिकं वापि [18]कल्पयेद्रङ्गमण्टपम् ॥१२॥

---

[1] मकुटारोपणात् पूर्वे ] अ, ई; मकुटारोपणं पूर्वे – झ .
[2] चासनादीनि ] झ; स्नानादीन्यपि - अ; स्नानादीनि - ई .
[3] रत्नलोहशिलामृद्भिः ] ई, झ ; रक्तलोहशिलामृद्भिः – अ .
[4] सैंहमासनम् ] अ, ई; सिंहमासनम् – झ.
[5] याज्ञिकैर्वृक्षैः ] अ; यज्ञवृक्षैर्वा - ई, झ .
[6] प्रकल्पयेत् ] अ, ई; प्रक . . . . येत् - झ .
[7] रत्नग्रहविधानतः ] सं० पाठः; नक्ते संगृहविधानतः - अ; रत्नसंग्रहविधानतः - ई; नक्तौ संग्रहविधानतः - झ.
[8] संगृह्यासनम् ] ई, झ ; संग्रहासनम् -अ.
[9] पूर्वोक्तलक्षणैः ] ई, झ; पूर्वोक्तैर्लक्षणैः- अ.
[10] पूर्वरात्रौ ] ई, झ ; पूर्वरात्रे - अ .
[11] दक्षिणेऽथ वा ]अ, झ; दक्षिणेऽपि वा - ई .
[12] नैर्ऋतेशानदेशे ] अ; नैर्ऋते दिशि देशे - ई ; नैर्ऋते त्विशदेशे - झ .
[13] कलयेद्रङ्गमण्टपम् ] ई; कल्पयेद्रङ्गमण्टपे - अ; कल्पयेद्यागमण्डपम् – झ .
[14] गुणवेदकरारभ्य ] अ, झ; गुणवेदकराभ्यां वा – ई .
[15] द्विद्विहस्तविवर्धनात् ] ई, झ; द्विद्विस्तारवर्धनात् – अ.
[16] विंशदेकोनविंशकम् ] अ, झ; विंशमेकोनविंशकम् – ई .
[17] प्रपां वापि ] सं० पाठः; प्रपाहं वा-अ;प्रवाहं वा-ई;प्रभां वापि – झ .
[18] कल्पयेद्रङ्गमण्टपम् ] अ, ई; कल्पये . . . . पम् –झ .

चतुर्द्वारसमायुक्तं [१]विदिक्कुड्यसमन्वितम् ।
[२]परितोऽलिन्दमेकांशं द्विभागं वा प्रकल्पयेत् ॥ १३ ॥
तत्समं द्विगुणं वापि बाह्ये [३]संचारपङ्क्तिका ।
[४]अक्ष्यग्निवेदभूतांशैः [५]चतुर्दिङ्मुखभद्रकम् ॥ १४ ॥
विस्तारसदृशायामं [६]तलोत्सेधांशमानकम् ।
[७]अष्टाष्टस्तम्भसंयुक्तं [८]दर्भमालासमावृतम् ॥ १५ ॥

[मण्डपालंकारः]

द्वारतोरणसंयुक्तं गात्रवेष्टनसंयुतम् ।
वितानध्वजसंयुक्तं मुक्तादामैर्विभूषितम् ॥ १६ ॥
[९]कुड्यचित्रसमोपेतं [१०]तरङ्गवेष्टनान्वितम् ।
नानाश्चर्यसमोपेतं मण्टपं परिभूषयेत् ॥ १७ ॥

[मण्डपशुद्धिः]

[११]मार्जनप्रोक्षणं कृत्वा गोमयेनानुलेपयेत् ।
स्नानं कृत्वा विशेषेण आचार्यः सकलीकृतः ॥ १८ ॥
सामान्यार्घ्यकरो भूत्वा मकुटमण्टपं विशेत् ।
वास्तुहोमं ततः कृत्वा बलिदानपुरःसरम् ॥ १९ ॥
पर्यग्निकरणं कृत्वा गोमयेनानुलेपयेत् ।
[१२]आचार्यः शिष्यसंयुक्तः स्नानं कृत्वास्त्रमन्त्रतः ॥ २० ॥

---

[१] विदिक्कुड्यसमन्वितम् ] सं० पाठः; विदिग्दिशासमन्वितम् -अ; वेदिकस्य समन्वितम् - ई .
[२] परितोऽलिन्दमेकांशं ] ई; परितोऽलिद्रुमेकांशं -अ; परितो लीद्रमेकांशं –झ .
[३] संचारपङ्क्तिका ] ई; सञ्चारवर्दगिका -अ; . . . .का – झ .
[४] अक्ष्यग्निवेदभूतांशैः ] ई, झ; अक्ष्यग्निभूतवेदांशैः – अ .
[५] चतुर्दिङ्मुखभद्रकम् ] सं० पाठः; चतुर्दिर्भमुखभद्रकम् - अ; चतुर्दिशि मुखभद्रकम्; चतुदिमुखभद्रकम् – झ .
[६] तलोत्सेधांशमानकम् ] ई, झ; नीलोत्सेधांशमानकम् – अ .
[७] अष्टाष्टस्तम्भसंयुक्तं ] ई, झ; अष्टाष्टं स्तम्भसंयुक्तं- अ .
[८] दर्भमालासमावृतम् ] अ, ई; दर्भमाल . . . .- झ .
[९] कुड्यचित्रसमोपेतं ] अ, झ; आढ्यचित्रसमोपेतं – ई .
[१०] तरङ्गवेष्टनान्वितम् ] ई, झ; रङ्गवेष्टनान्वितम् – अ .
[११] मार्जनप्रोक्षणं कृत्वा ] ई; मार्जयेत् प्रोक्षयेत्पश्चात् - अ; मार्जनं प्रोक्षणं कृत्वा – झ .
[१२] आचार्यः शिष्यसंयुक्तः ] अ, ई; आचार्यशिष्यसंयुक्तं - झ .

अन्तर्यागं ततः कृत्वा [१]प्रविशेद्रङ्गमण्टपम् ।

[कुम्भस्थापनम्]

स्थण्डिलं कारयेत्तत्र चाष्टद्रोणेन शालिना ॥ २१ ॥
[२]शाल्यर्धतण्डुलैः पुष्पैः तिलैर्लाजैः [३]परिस्तरेत् ।
कुम्भानस्त्रेण संक्षाल्य तन्तुना परिवेष्टयेत् ॥ २२ ॥
पूरयेद्गन्धतोयेन कूर्चपल्लवसंयुतम् ।
[४]सवस्त्रं सहिरण्यं च नालिकेरफलैर्युतम् ॥ २३ ॥
[५]शिवासनघटं मध्ये विन्यसेत् स्थण्डिलोपरि ।

[कुम्भपूजा]

पूर्वादीशानपर्यन्तं [६]लोकपालघटान् न्यसेत् ॥ २४ ॥
[७]आसनाधिपतीनिष्ट्वा [८]मध्यकुम्भे तु देशिकः ।
लोकपालान् समभ्यर्च्य [९]तत्तद्दिग्घटमध्यमे ॥ २५ ॥
नैर्ऋते [१०]पीठमध्ये तु ध्यात्वा [११]मण्डपरूपिणीम् ।
संपूज्य गन्धपुष्पाद्यैः [१२]नैवेद्यं दापयेत्ततः ॥ २६ ॥

[अग्निकार्यम्]

कुम्भाग्रे स्थण्डिलं कृत्वा शिवाग्निं विधिना न्यसेत् ।
समिदाज्यचरून् लाजान् माषशालियवांस्तिलान् ॥ २७ ॥
[१३]सद्यादीशानपर्यन्तं प्रत्येकं षोडशं हुनेत् ।

---

[१] प्रविशेद्रङ्गमण्टपम् ] अ, ई; प्रविशेदङ्गमण्टपम् –झ .
[२] शाल्यर्धतण्डुलैः ] ई; शाल्यर्धं तण्डुलैः - अ, झ .
[३] परिस्तरेत् ] अ, ई; परिस्तरैः – झ .
[४] सवस्त्रं सहिरण्यं ] अ, ई; स . . . . स्त्रं स . . . . रण्यं – झ .
[५] शिवासनघटं ] झ; शिवासनपटं -अ; शिवासनपदं – ई .
[६] लोकपालघटान् ] ई, झ; लोकपालघटं –अ .
[७] आसनाधिपतीनिष्ट्वा ] सं० पाठः; आसनादिपतीनिष्ट्वा - अ, ई; सनादि तु निष्प – झ .
[८] मध्यकुम्भे ] अ, ई; मध्ये कुम्भे – झ .
[९] तत्तद्दिग्घटमध्यमे ] झ; तदीयघटमध्यमे - अ ; तत्तद्धि घटमध्यमे – ई .
[१०] पीठमध्ये ] अ, ई; घटमध्ये – झ .
[११] मण्डपरूपिणीम् ] ई, झ; मण्टपरूपिणि –अ .
[१२] नैवेद्यं ] अ, ई; नैवेद्यं तं – झ .
[१३] सद्यादीशानपर्यन्तं ] ई; सद्यादिशिर(दीशान)पर्यन्तं -अ; स दीशानपर्यन्तं – झ .

[1]द्रव्यान्ते व्याहृतिं हुत्वा स्पर्शाहुतिमथाचरेत् ॥२८॥
हैमेन कूर्मं संस्थाप्य पात्रे संस्थाप्य देशिकः ।
कूर्मं स्पृष्ट्वाहुतिं कुर्यात् पूर्वमन्त्रैर्यथाक्रमम् ॥२९॥
एवं रात्रौ प्रकर्तव्यं प्रभाते स्नानमाचरेत् ।

[अनन्तरदिनकृत्यम्]

देशिकः सकलीकृत्य सोष्णीषः सोत्तरीयकः ॥३०॥
[2]मण्टपस्थघटान् [3]इष्ट्वा हुत्वा पूर्णाहुतिं नयेत् ।
मुहूर्ते समनुप्राप्ते कृत्वाभिषेकमण्टपे ॥३१॥
मध्यसूत्रं समास्तीर्य [4]पूर्वदक्षिणमार्गतः ।
[5]तत्सूत्राद्वामभागे तु नीत्वा [6]देवाङ्गुलत्रयम् ॥३२॥
[7]प्रसार्य च शिवसूत्रं [8]तत्सूत्रासनमध्यमे ।
[9]स्थानकस्यासनं चेत्तु दैविके पदमध्यमे ॥३३॥
आसीनासनकं [10]यत्तत् [11]मानुषे स्थापयेद्बुधः ।

[पुण्याहादि]

पुण्याहं वाचयेत्तत्र प्रोक्षयेदस्त्रमन्त्रतः ॥३४॥
पञ्चगव्येन [12]संसिच्य पवमानमुदीरयन् ।
शिलागर्ते न्यसेत् कूर्मं पारदेन समन्वितम् ॥३५॥
आधारशक्तिमन्त्रेण पूजयेद्देशिकोत्तमः ।

---

[1] द्रव्यान्ते ] ई, झ; दर्शान्ते - अ .
[2] मण्टपस्थघटान् ] सं० पाठः ; मण्टपस्थं ० - अ, ई, झ .
[3] इष्ट्वा ] झ; यष्ट्वा - अ ; दृष्ट्वा – ई .
[4] पूर्वदक्षिणमार्गतः ] ई; पूर्वदक्षिणभागतः - अ, झ .
[5] तत्सूत्राद्वामभागे ] अ; तत्सूत्रवामभागे - ई; तत्सूत्रद्वारभगे – झ.
[6] देवाङ्गुलत्रयम् ] ई, झ; वेदाङ्गुलत्रयम् - अ.
[7] प्रसार्य च शिवसूत्रं ] सं० पाठः; झ; प्रासादस्य शिवं सूत्रं - अ,ई; प्रसार्य शिवसूत्रं - झ.
[8] तत्सूत्रासनमध्यमे ] अ; तत्सूत्रं मध्यमासने - ई; तत्सूत्रमासनमध्यमे - झ.
[9] स्थानकस्यासनं चेत्तु ] ई, झ; स्थानकस्यासनस्यैव -अ.
[10] यत्तत् ] अ, झ; यत्तु - ई.
[11] मानुषे स्थापयेद्बुधः ] झ; मानुषे स्नापयेद्बुधः - अ ; आत्मार्थं स्थापयेद्बुधः - ई.
[12] संसिच्य ] अ; संसिध्य - ई; संहच्य - झ.

[वेदिकाकल्पनम्]

तस्योर्ध्वे वेदिकां कुर्याद् [१]दिग्देहाङ्गुलम् उन्नतम् ॥ ३६ ॥
उत्सेधाष्टगुणायामं [२]चतुरश्रसमन्वितम् ।
[३]सुधयेष्टकया वापि [४]शिलाभिर्वापि कारयेत् ॥ ३७ ॥
सिंहासनं तदूर्ध्वे तु [५]स्थापयेच्छिल्पिभिः सह ।
तस्य कर्मावसाने तु शिल्पिनं परिवर्जयेत् ॥ ३८ ॥

[कलशग्रहणं प्रदक्षिणं च]

आचार्यः शिष्यसंयुक्तः तदन्ते स्नानमाचरेत् ।
सकलीकरणं कुर्यात् सर्वालङ्कारसंयुतम् ॥ ३९ ॥
संगृह्य सर्वकलशान् स्वस्तिसूक्तसमन्वितम् ।
ततः प्रदक्षिणं कुर्यादभिषेकार्हमण्टपम् ॥ ४० ॥
[६]आसनस्यैव परितः स्थापयेत् कलशान् क्रमात् ।
शक्रशांकरयोर्मध्ये तदासनघटान् न्यसेत् ॥ ४१ ॥

[मण्डपपूजा]

पुण्याहं वाचयेत्तत्र [७]प्रोक्षयेत् सिंहमासनम् ।
मण्डपं चैव संप्रोक्ष्य [८]नैर्ऋते स्तम्भमूलके ॥ ४२ ॥
कुम्भान्मन्त्रं समादाय [९]चासनोपरि विन्यसेत् ।
[१०]अन्यकुम्भोदकैः स्नाप्य तत्तदुक्तेन मन्त्रतः ॥ ४३ ॥
मण्डपाधिपतीन् [११]इष्ट्वा नैर्ऋते स्तम्भमूलके ।
सिंहासनं समभ्यर्च्य पूर्वमन्त्रैर्यथाक्रमम् ॥ ४४ ॥

---

[१] दिग्देहाङ्गुलम् ] सं० पाठः; दिग्दिशाङ्गुलम् -अ; दिग्दशाङ्गुलम् - ई, झ.
[२] चतुरश्रसमन्वितम् ] झ ; चाधताग्रसमन्वितम् – अ; चायताश्रसमन्वितम् - ई.
[३] सुधयेष्टकया ] अ, ई; संययेष्टकयां - झ.
[४] शिलाभिर्वापि ] सं० पाठः; ईशानैर्वापि - अ; शालिनैर्वापि - ई; शानै वापि - झ.
[५] स्थापयेच्छिल्पिभिः ] अ, ई; .... चिलिभिः - झ.
[६] आसनस्यैव परितः ] ई, झ; आसनस्योपरि ततः - अ.
[७] प्रोक्षयेत् सिंहमासनम् ] ई, झ; प्रोक्षयेद्वै हेमासनम् - अ.
[८] नैर्ऋते स्तम्भमूलके ] अ, झ; नैर्ऋतस्तम्भमूलके - ई.
[९] चासनोपरि विन्यसेत् ] अ, झ; चासने परिविन्यसेत् - ई.
[१०] अन्यकुम्भोदकैः ] ई , झ ; शिवकुम्भोदकैः - अ.
[११] इष्ट्वा ] अ, झ; यष्ट्वा - ई.

धूपदीपं ततो दत्वा पुष्पाञ्जलिमथाचरेत् ।
एवं कृत्वा [1]दिवाकाले सायाह्नसमये बुधः ॥४५॥

[मृत्संग्रहणादि]

गणेशमपि संपूज्य पायसान्नं निवेदयेत् ।
विज्ञाप्य देवदेवस्य [2]मकुटारोपणक्रमम् ॥४६॥
आचार्यः शिष्यसंयुक्तः सोष्णीषः सोत्तरीयकः ।
अस्त्रराजं समादाय चण्डेश्वरसमन्वितम् ॥४७॥
छत्रचामरसंयुक्तं वाद्यघोषसमन्वितम् ।
धूपदीपसमोपेतं सर्वालङ्कारशोभितम् ॥४८॥
पर्वताग्रे नदीतीरे क्षेत्रे वा सिन्धुतीरके ।
क्षीरवृक्षसमीपे वा मृत्तिकां ग्राहयेद् [3]बुधः ॥४९॥
पुण्याहं वाचयेत्तत्र बलिं दत्वा विचक्षणः ।
पञ्चगव्येन संसिच्य [4]वाममन्त्रेण संग्रहेत् ॥५०॥
पात्रे संस्थाप्य संपूज्य वस्त्रेणाच्छादयेद्धृदा ।
[5]देवाग्रमण्डपे वापि अभिषेकार्हमण्टपे ॥५१॥
रङ्गमण्टपके वापि परिवारालयेऽपि वा ।
प्रविशेत् पूर्वमार्गेण कारयेदङ्कुरार्पणम् ॥५२॥
कौतुकं बन्धयेद्धीमान् देवदेवस्य [6]देशिकः ।
[7]सिंहासनोपमा चेत्तु क्रियाभेदो न विद्यते ॥५३॥

[रङ्गमण्डपे कुम्भस्थापनादि]

आचार्यः शिष्यसंयुक्तः प्रविशेद्रङ्गमण्टपम् ।
तोरणादीन् समभ्यर्च्य द्वारकुम्भपुरःसरम् ॥५४॥
नवकुम्भान् समादाय तन्तुना परिवेष्टयेत् ।

---

[1] दिवाकाले ] ई, झ; ततः काले - अ.
[2] मकुटारोपणक्रमम् ] ई, झ; मकुटारोपणं क्रमात् - अ.
[3] बुधः ] ई; यथा -अ, झ.
[4] वाममन्त्रेण ] ई; पांसुमन्त्रेण - अ; वशासु मन्त्रेण - झ.
[5] देवाग्रमण्डपे वापि ] ई; दोग्रमण्डलेयापि - अ; तोग्रमण्डलके वापि - झ.
[6] देशिकः] ई, झ; देवितः - अ.
[7] सिंहासनोपमा चेत्तु ]अ; सहासनेपमाचेत्तु - ई, झ.

सकूर्चान् वारिसंपूर्णान् सहेमान् वस्त्रसंयुतान् ॥५५॥
नालिकेरफलोपेतान् चूतपल्लवसंयुतान् ।
कुम्भान् संगृह्य वामेन स्थण्डिलोपरि विन्यसेत् ॥५६॥

[मकुटशुद्धिः मकुटपूजा च]

कुम्भमध्ये समभ्यर्च्य [1]मकुटेन सहेश्वरम् ।
[2]अभिषेकार्थमादाय शुद्धपात्रे तु विन्यसेत् ॥५७॥
[3]गजकण्ठे समारोप्य सर्वालङ्कारसंयुतम् ।
ग्रामप्रदक्षिणं कृत्वा संगृहेद्देशिकोत्तमः ॥५८॥
पञ्चगव्येन संस्नाप्य क्षालयेच्छुद्धवारिणा ।
श्वेतवस्त्रेण संमार्ज्य शिवं [4]प्रति समाचरेत् ॥५९॥
मञ्जूषे शुद्धपात्रे वा हृदयेन तु विन्यसेत् ।
कौतुकं [5]स्वर्णसूत्रे वा [6]बध्वा तेनैव मन्त्रतः ॥६०॥
क्षौमवस्त्रेण संछाद्य विन्यसेद्वेदिकोपरि ।
गन्धपुष्पैः समभ्यर्च्य [7]धूपदीपं हृदा ददेत् ॥६१॥

[रङ्गमण्डपेऽग्निकार्यम्]

ततः शिवाग्निं संकल्प्य पूर्वमार्गेण देशिकः ।
समिदाज्येन चरुणा प्रत्येकं होममाचरेत् ॥६२॥
शतमर्धं तदर्धं वा सद्यास्त्रहृदयेन तु ।
[8]द्रव्यं प्रति विशेषेण [9]स्पृष्ट्वा मकुटभूषणम् ॥६३॥
[10]षड्रसैर्मिश्रचरुणा मूलेन जुहुयाच्छतम् ।

---

[1] मकुटेन सहेश्वरम् ] झ; मकुटस्यार्हमीश्वरम् - अ; मकुटा सहमीश्वरम् – ई.
[2] अभिषेकार्थमादाय ] ई; अभिषेकं समादाय -अ, झ.
[3] गजकण्ठे ] ई; गजकर्णे - अ, झ.
[4] प्रति समाचरेत् ] ई; . . . . समाचरेत् - अ; शिवसंस्मरते गुरुः – झ.
[5] स्वर्णसूत्रे वा ] सं० पाठः; स्वर्णपात्रेण - अ, ई ; स्वर्णसूत्रे व - झ.
[6] वध्वा ] ई, झ; ध्वा - अ.
[7] धूपदीपं ] ई, झ; धूपं दीपं - अ.
[8] द्रव्यं ] ई; गुह्यं - अ, झ.
[9] स्पृष्ट्वा मकुटभूषणम् ] झ; स्पृष्ट्वाङ्गं कूटवृषणम् -अ; स्पृष्ट्वा मुकुटवीक्षणात् – ई.
[10] षड्रसैर्मिश्रचरुणा ] अ, ई; षड्रसै . . . . श्रचरुणा - झ.

सर्वद्रव्यं समादाय हव्यवाहेति मन्त्रतः ॥६४॥
जयादिरभ्याधानं च [१]राष्ट्रभृच्च क्रमाद्धुनेत् ।
पूर्णाहुतिं ततो [२]हुत्वा [३]संपूज्य शिवपावकम् ॥६५॥
संकल्प्य वायुदिग्भागे स्नपनं पञ्चविंशतिः ।

[देवचिह्नाधिवासनम्]

ततो [४]नैर्ऋतदिग्भागे देवचिह्नाधिवासयेत् ॥६६॥
शक्त्यग्निनागखट्वाङ्गपट्टसं पत्रदण्डकम् ।
क्षुरिका [५]पद्मकासी च खड्गं वज्राङ्कुशं गदा ॥६७॥
धनुःपरशुशूलास्त्रमित्यष्टादशकं भवेत् ।
सर्वास्त्रं नैऋते स्थाप्य समभ्यर्च्यास्त्रनामतः ॥६८॥
काहलं मुरजं शङ्खं दर्पणं छत्रचामरम् ।
मधूपूरितकुम्भं च दधिपूरितकुम्भकम् ॥६९॥
घृतपूरितकुम्भं च [६]क्षुरिकानखशोधनम् ।
[७]केशशोधनकं चैव दन्तशोधनमञ्जनम् ॥७०॥
ओड्याणं योगपट्टं च मात्रादण्डं सवेत्रकम् ।
धर्मबुद्धोपकरणं भस्मकुम्भं [८]मृगाजिनम् ॥७१॥
[९]कलाची जलभाण्डं च पादुके चाग्निकोणके ।
प्रणवेनैव चाभ्यर्च्य मध्ये शय्यागृहे बुधः ॥७२॥
तद्वारोचितवस्त्रं च भूषणं चैव विन्यसेत् ।

---

[१] राष्ट्रभृच्च क्रमाद्धुनेत् ] अ; क्रमाद्राष्ट्रभृतं हुनेत् - ई, झ.
[२] हुत्वा ] अ; दत्वा - ई, झ.
[३] संपूज्य ] अ, ई; . . . . ज्य – झ .
[४] नैर्ऋतदिग्भागे ] ई; नैर्ऋतिभागे तु - अ; नैऋतभागे तु - झ.
[५] पद्मकासी ] अ; पद्मचासी - ई; पद्मद्वावासि - झ.
[६] क्षुरिकानखशोधनम् ] अ; दूर्वाग्रकदलीत्रयम् - ई; दूर्वाग्रकलकत्रयम् - झ.
[७] अत्र 'नालिकेरफलं चैव कर्त्रिकानखशोधनम्' इत्येकं श्लोकार्धं 'ई' कोशे अधिकतया दृश्यते ।
'नालिकेरफलं चैव दुकेलचाग्निकोणके' इत्येकं श्लोकार्धं 'झ' कोशे अधिकतया दृश्यते ।
'केशशोधनकं चैव' इत्यारभ्य 'पादुके चाग्निकोणके' पर्यन्तं श्लोकद्वयं 'झ' कोशे न दृश्यते ।
[८] मृगाजिनम् ] ई; मृगाञ्जनम् - अ.
[९] कलाची ] अ; कालाची – ई.

[1]कपिलां च गजं चैव बन्धयेद् [2]अल्पदूरतः ॥७३॥
एवं जागरणं रात्रौ प्रभाते स्नानमाचरेत् ।

[तृतीयदिनक्रियाः]

[-आचार्यकृत्यम्]

आचार्यः सकलीकृत्य सोष्णीषः सोत्तरीयकः ॥७४॥
हेमाङ्गुलीयकटकहारकुण्डलमण्डितः ।
सितचन्दनलिप्ताङ्गो हेमयज्ञोपवीतकः ॥७५॥
प्रातः सन्ध्यावसाने तु देवदेवं प्रणम्य च ।
शिबिकादौ समारोप्य नयेत्तद्रङ्गमण्टपे ॥७६॥
[3]द्रव्याणि दर्शयित्वा च पूर्णाहुतिमथाचरेत् ।
शिवाग्निं च विसृज्याथ कुम्भे संयोज्य देशिकः ॥७७॥
पुण्याहं वाचयेत्तत्र स्नानकर्म समाचरेत् ।

[-स्नपनादि]

पञ्चगव्यामृतैः स्नाप्य स्नपनार्हैश्च कुम्भकैः ॥७८॥
ब्रह्मकुम्भोदकैश्चापि [4]सौरादिकलशोदकैः ।
संस्नाप्य च महादेवं मन्त्रपुष्पं प्रदापयेत् ॥७९॥
मन्त्रान्नं दापयेत् पश्चात् [5]देवं शय्यागृहं नयेत् ।
गन्धपुष्पैः समभ्यर्च्य नैवेद्यं दापयेद्गुरुः ॥८०॥
[6]धूपदीपं ततो दत्वा ताम्बूलं दापयेत्ततः ।
अस्त्रेशान् पूजयेत्तत्र [7]स्तोत्रनृत्तादि कारयेत् ॥८१॥

[-परिवेषक्रमः]

तद्वारोचितवस्त्राद्यैरलंकृत्य महेश्वरम् ।

---

[1] कपिलां च गजं ] अ; कपिलाश्वगजं - ई; कपिलाश्च गजाश्चैव – झ.
[2] अल्पदूरतः ] अ; अल्पदूरके - ई; अल्पद्रके - झ.
[3] द्रव्याणि दर्शयित्वा च ] ई; द्रव्यान् संदर्शयित्वाथ - अ; द्रव्यान् सद्दशूत्वात्थ - झ.
[4] सौरादिकलशोदकैः ] ई, झ; सौराधिकवशोदकैः - अ.
[5] देवं शय्यागृहं ] ई; एवं शय्यागृहे - अ; देवं शायगृहे – झ.
[6] धूपदीपं ] ई, झ; धूपं दीपं - अ.
[7] स्तोत्रनृत्तादि कारयेत् ] ई; स्तोत्रनृत्तादिकं नयेत् - अ, झ.

[1]सर्ववाद्यसमोपेतं [2]स्तोत्रशब्दसमन्वितम् ॥८२॥
जयशब्दसमोपेतं विशेन्मकुटमण्टपम् ।
सिंहासने समारोप्य [3]व्याघ्रचर्माम्बरान्विते ॥८३॥
भूषणैर्गन्धमाल्याद्यैरलंकृत्यातिसुन्दरम् ।
आचार्यः शिष्यमाहूय वस्त्रबन्धं समाचरेत् ॥८४॥
[4]पञ्चाङ्गभूषणं दत्वा परिवेषसमन्वितम् ।
[5]गीतमङ्गलवाद्यैश्च स्तोत्रशब्दसमन्वितम् ॥८५॥
अभिषेकं समादाय मन्त्रेणैव तु भूषयेत् ।
गन्धपुष्पैः समभ्यर्च्य धूपदीपादिकं ददेत् ॥८६॥
परिवेषक्रमं कल्प्य पूर्वोक्तविधिना ततः ।

[-ग्रामप्रदक्षिणम्]

रथे वा [6]गजकण्ठे वा समारोप्य वृषध्वजम् ॥८७॥
नानाच्छत्रसमायुक्तं नानाध्वजसमन्वितम् ।
नानावाद्यसमोपेतं नानाकाहलसंयुतम् ॥८८॥
नानावस्त्रसमोपेतं नानाभक्तजनैर्युतम् ।
[7]अनुपूजासमोपेतं [8]गजवाजिसमन्वितम् ॥८९॥
देवचिह्नसमोपेतं कृत्वा ग्रामप्रदक्षिणम् ।

---

[1] सर्ववाद्यसमोपेतं ] ई, झ; गीतमङ्गलवाद्यैश्च - अ.
[2] स्तोत्रशब्दसमन्वितम् ] अ; सर्वालंकारसंयुतम् - ई,झ.
[3] व्याघ्रचर्माम्बरान्विते ] अ, ई; व्याघ्रचर्माम्बरान्वितम् - झ.
[4] पञ्चाङ्गभूषणं ] ई, झ; पञ्चाङ्गं भूषणं - अ.
[5] इतः पूर्वं "शङ्खदुन्दुभिघोषैश्च गीतनृत्तसमाकुलम् ।
सर्वभक्तजनैः सार्धं यजमानसमन्वितम् ।
ग्रामप्रदक्षिणं कृत्वा देवाग्रे विन्यसेद्बुधः ।
पुण्याहं वाचयेत् तत्र मकुटारोपणासनम् [ मकुटारोपणार्थकम् – झ ] ।
मुहूर्ते समनुप्राप्ते शङ्खघोषसमन्वितम् ॥" इति सार्धश्लोकद्वयं 'ई' 'झ'कोशयोर्दृश्यते ।
[6] गजकण्ठे ] ई; गजकर्णे - झ; गजगण्डे - अ.
[7] अनुपूजासमोपेतं ] अ; अणुपूजासमोपेतं - ई,झ.
[8] गजवाजिसमन्वितम् ] ई; गजध्वजसमन्वितम् - अ; गजपूजासमन्वितम् - झ.

[-रङ्गमण्डपप्रवेशः, परिवेषक्रमश्च]

[1]शनैर्देवालयं गच्छेन् [2]नीराजनम् अथाचरेत् ॥९०॥
[3]यात्रार्थस्नपनं कृत्वा सन्ध्याशेषं समाचरेत् ।
सन्ध्यन्ते देवदेवेशमारोप्य [4]शिबिकामथ ॥९१॥
देवचिह्नसमोपेतं नयेत्तद्रङ्गमण्टपे ।
सिंहासने समारोप्य [5]परिवेषक्रमं नयेत् ॥९२॥
पाद्यमाचमनं दत्वा महाहविर्निवेदयेत् ।
नानादेशकथावाक्यैः [6]धर्मयुद्धादिदर्शनैः ॥९३॥
विनोदवाक्यैरन्यैश्च महाजालादिदर्शनैः ।
वीणावेणुमृदङ्गादिवाद्यैर्गानैश्च तोषयेत् ॥९४॥
ततोऽस्तमयवेलायामभिषेकार्हमण्टपे ।
सिंहासने समारोप्य [7]परिवेषक्रमं नयेत् ॥९५॥

[-शय्यागृहे पूजा]

परिवेषक्रमान्ते तु संगृह्य परमेश्वरम् ।
देवालयं प्रविश्याथ नित्यकर्म समाचरेत् ॥९६॥
भोगपूजावसाने तु पूर्ववत् परमेश्वरम् ।
शिबिकादौ समारोप्य [8]शय्यागृहं प्रवेशयेत् ॥९७॥
मृदुतल्पसमायुक्ते [9]सुगन्धिकुसुमान्विते ।
शयने देवमारोप्य तन्मूलेनैव देशिकः ॥९८॥
संपूज्य गन्धपुष्पाद्यैः भक्ष्यादींश्च निवेदयेत् ।

---

[1] शनैर्देवालयं ] अ, झ; शुभैर्देवालयं - ई.
[2] नीराजनम् ] ई, झ; नीराञ्जनम् - अ.
[3] यात्रार्थस्नपनं ] ई; यात्रासंस्नापनं - अ; घात्रार्थस्नपनं - झ.
[4] शिबिकामथ ] अ, ई; शिबिकामधः - झ.
[5] परिवेषक्रमं नयेत् ] अ, झ; परिवेषक्रमान्नयेत् - ई.
[6] धर्मयुद्धादिदर्शनैः ] झ; धामयुद्धादिदर्शनैः - अ; धामं युद्धादिदर्शनैः - ई.
[7] परिवेषक्रमं ] ई, झ; परिवेष्टिक्रमं – अ.
[8] शय्यागृहं ] ई, झ; शय्यागारं - अ.
[9] सुगन्धिकुसुमान्विते ] अ; सुगन्धकुसुमान्विते - ई; सुगन्धकुसुमान्वितम् - झ.

मकुटारोपणं प्रोक्तं दिनचर्याक्रमं शृणु ॥९९॥

॥ [1]इति सूक्ष्मशास्त्रे मकुटारोपविधिः सप्ततितमः पटलः ॥

[1] इति सूक्ष्मशास्त्रे मकुटारोपविधिः सप्ततितमः पटलः ] सं० पाठः; इति सूक्ष्मशास्त्रे मकुटारोपविधिरेकसप्ततितमः पटलः-अ; इति सूक्ष्मशास्त्रे मकुटारोपणपटलः - ई. झ।

## [एकसप्ततितमः पटलः]

## [[1]मकुटारोपणे दिनचर्याविधिः]

[प्रातः शयनगृहे उपचाराः]

दिवाकरोदयात् पूर्वे [2]वेदयामार्धकालके ।
श्रुत्वा पञ्चमहाशब्दं स्नानं कृत्वा गुरूत्तमः ॥ १ ॥
पञ्चाङ्गभूषणोपेतः शिष्यवर्गैस्समन्वितः ।
मूललिङ्गं समभ्यर्च्य धूपं दीपं प्रदापयेत् ॥ २ ॥
भस्म दत्वाथ मूलेन ताम्बूलं दापयेत्ततः ।
तत्कालोचितगानैश्च वीणावेणुरवादिभिः ॥ ३ ॥
अन्यैर्विविधवाद्यैश्च तोषयेद्वृषभध्वजम् ।

[दर्पणादिमङ्गलद्रव्यदर्शनम्]

दर्पणं शिवमन्त्रेण दर्शयेद्देशिकोत्तमः ॥ ४ ॥
ततो दैवज्ञमाहूय पञ्चाङ्गं श्रावयेद्गुरुः ।
[3] पुरन्दरेऽस्त्रनाथश्चेत् दक्षिणद्वारमर्चयेत् ॥ ५ ॥
शिवास्त्रं दक्षिणे चेत्तु पश्चिमाभिमुखं [4]शिवम् ।
पश्चिमे शस्त्रनाथश्चेद्देवमुत्तरदिङ्मुखम् ॥ ६ ॥
[5]उत्तरस्थो भवेदस्त्रं पूर्वाभिमुखमीश्वरम् ।
[6]सम्पूज्य घृतकुम्भं च दर्शयेदस्त्रमन्त्रतः ॥ ७ ॥
[7]शिरसा मधुकुम्भं च नेत्रेण दधिकुम्भकम् ।
[8]भस्म कवचमन्त्रेण शिखया बृहतीफलम् ॥ ८ ॥

---

[1] अयं पटलः अ (टि १९१, पृ० ३९९-४०१), ई (टि ३६, पृ० ३१२-३१४), ऋ (टि ९७, पृ० ४५७-४५९), कोशेषु पृथक्पटलतया वर्तते । 'झ' कोशे (टि १०१६) परं पूर्वतनमकुटारोपणपटले एव तदनुस्यूततया (पृ० ८४-८७) वर्तते ।

[2] वेदयामार्धकालके ] झ; देवं यामार्धकेऽपि वा - अ; देवयामार्धकालके – ई.

[3] पुरन्दरेऽस्त्रनाथश्चेत् ] सं० पाठः; पुरन्दरैश्च नाथैश्च - अ,ई; पुरन्दरेस्त्रनाथेश्च – झ.

[4] शिवम् ] अ; भुविम् - ई,झ.

[5] उत्तरस्थो भवेदस्त्रं ] ई, झ; उत्तरस्तम्भवेदास्त्रं – अ.

[6] सम्पूज्य ] ई, झ; सुपूज्य – अ.

[7] शिरसा मधुकुम्भं च नेत्रेण दधिकुम्भकम् ] अ; कुम्भं च नेत्र . . . . – ई; शिरसामभिकुम्भं च नेत्रे त . . . . – झ.

[8] भस्म ] ई; भस्मं - अ; भस्तु - झ.

दर्शयेत् [१]साधनद्रव्यान् [२]अन्यानस्त्रेण देशिकः ।

[गोगजादिपूजा]

[३]नन्दां यष्ट्वा सगायत्र्या [४]दूर्वाग्रकबलं ददेत् ॥९॥
ततो [५]मातङ्गम् आहूय सर्वशिक्षासमन्वितम् ।
शिवमन्त्रेण संदृश्य नालिकेरफलं ददेत् ॥१०॥
तदन्ते पञ्चकल्याणम् अश्वशिक्षासमन्वितम् ।
[६]सर्वालंकारसंयुक्तम् आहूयाग्रे विचक्षणः ॥११॥
गन्धमाल्यैः समभ्यर्च्य सैन्धवं दापयेद्बुधा ।

[शिवस्य स्नानमण्डपेऽभिषेकः]

ततो देवं समारोप्य खेटके शिबिके तथा ॥१२॥
प्रदक्षिणक्रमेणैव स्नानमण्टपमाविशेत् ।
स्नानवेद्युपरि न्यस्त्वा सम्पूज्य परमेश्वरम् ॥१३॥
गन्धतैलेन संस्नाप्य तदन्ते चन्दनेन तु ।
लवङ्गामलकेनैव फलसारेण भस्मना ॥१४॥
[७]कर्पूरधूलिभिः स्नाप्य पञ्चगव्यामृतैस्तथा ।
[८]फलपुष्पास्त्रतोयैश्च मृत्कषायोदमार्जनैः ॥१५॥
[९]कान्त्या कान्त्युदकैः स्नाप्य [१०]नमकेनाभिषेचयेत् ।

[अलंकारादिविनोदालोकनान्तोपचाराः]

पुष्पमारोप्य [११]माल्येन मन्त्रान्नं च निवेदयेत् ॥१६॥

---

[१] साधनद्रव्यान् ] ई, झ; साधनद्रव्यम् - अ.
[२] अन्यानस्त्रेण ] ई; अन्यदस्त्रेण - अ; नान्यानस्त्रेण - झ.
[३] नन्दां यष्ट्वा ] झ; नाथं दृष्ट्वा - अ; नादा यष्ट्वा - ई.
[४] दूर्वाग्रकबलं ] झ; पूर्वाग्रकं दलं - अ; दूर्वाग्रकदली - ई.
[५] मातङ्गम् ] ई, झ; मतङ्गम् - अ.
[६] सर्वालंकारसंयुक्तम् ] ई; तमलंकारसंयुक्तम् - अ; तस्मालङ्कारसंयुक्तम् - झ.
[७] कर्पूरधूलिभिः ] अ; कर्पूरधूलिना - ई, झ.
[८] फलपुष्पास्त्रतोयैश्च ] अ, ई; ततो पुष्पाश्च तोयैश्च – झ.
[९] कान्त्या कान्त्युदकैः ] अ; कान्ते कान्त्युदकैः – ई; कान्तकन्युदकैः - झ.
[१०] नमकेनाभिषेचयेत् ] अ; नवकेनाभिषेचयेत् - ई, झ.
[११] माल्येन ] झ; मालैश्च -अ, ई.

शुद्धवस्त्रेण [1]संमार्ज्य [2]तद्रङ्गमण्टपेष्टदिक् ।
[3]दार्वासने समारोप्य [4]चार्चयेत् परमेश्वरम् ॥ १७ ॥
[5]महाहविर्विधानेन नैवेद्यं दापयेद्गुरुः ।
ताम्बूलं दापयेद्विद्वान् मुखवाससमन्वितम् ॥ १८ ॥
[6]धूपदीपं ततो दत्वा नीराजनमथाचरेत् ।
परिवेषक्रमं कल्प्य विनोदालोकनं नयेत् ॥ १९ ॥

[ग्रामप्रदक्षिणम्]

ततः सायाह्नसमये [7]मन्दीभूते दिवाकरे ।
तद्वारोचितवस्त्राद्यैरलंकृत्य महेश्वरम् ॥ २० ॥
[8]पूर्वयानक्रमेणैव कृत्वा ग्रामप्रदक्षिणम् ।
सिंहासने समारोप्य परिवेषं समाचरेत् ॥ २१ ॥
[9]नीराजनं ततः कृत्वा [10]गीतनृत्तादिभिः सह ।
ततो मूलगृहं प्राप्य देवेन सह देशिकः ॥ २२ ॥
[11]हविर्निवेदयेत् पश्चात् [12]षडाशेषं समाचरेत् ।

[पुनः शय्यागृहे प्रवेशः, उपचाराश्च]

[13]ततः [14]शय्यागृहे देवमानीय पूर्ववद्गुरुः ॥ २३ ॥
खट्वोपरि समारोप्य भक्ष्यपानादिकं ददेत् ।

---

[1] संमार्ज्य ] अ, झ; संमृज्य - ई.
[2] तद्रङ्गमण्टपेष्टदिक् ] ई; तद्रङ्गं मण्टपेष्टदिक् - अ;तदग्रं मण्टपेष्टदिक् - झ.
[3] दार्वासने ] सं० पाठः; दूर्वार्चने - अ; दूर्वार्धेन - ई; दार्वासंन - झ.
[4] चार्चयेत् ] झ; पाश्वयेत् - अ; पार्श्वयोः - ई.
[5] महाहविर्विधानेन ] ई; महाहविर्निधानेन - अ; महाहव्यविधानेन - झ.
[6] धूपदीपं ] ई, झ; धूपं दीपं - अ.
[7] मन्दीभूते ] अ, ई; मम्यभूते - झ.
[8] पूर्वयानक्रमेणैव ] अ, ई; पूर्वयामक्रमेणैव - झ.
[9] नीराजनं ] झ; नीराज्ञनं - अ, ई.
[10] गीतनृत्तादिभिः ] ई, झ; नृत्तगीतादिभिः - अ.
[11] हविर्निवेदयेत् पश्चात् ] ई; हविर्निवेद्य तत्पश्चात् - अ; हविन्नवैद्य तत्पश्चात् - झ.
[12] षडाशेषं ] अ, ई; षडांशेषं - झ.
[13] "ततः शय्यागेहे . . . भूकाभिषेकमाचरेत्" पर्यन्तं ग्रन्थभागः 'झ' कोशे न वर्तते ।
[14] शय्यागृहे ] ई; शय्यागेहे - अ.

अष्टमेऽहनि संप्राप्ते भूकाभिषेकमाचरेत् ॥ २४ ॥
[१]भूकाभिषेकदिवसात् [२]पूर्वद्वित्रिदिनेऽपि वा ।
[३]मृगयात्रां प्रकुर्वीत [४]वनदेवादितृप्तये ॥ २५ ॥
मकुटारोपणं [५]त्वेवं प्रत्यब्दं परिकल्पयेत् ।
[६]अत्रानुक्तं तु यत्किञ्चित् सर्वं राजोपचारवत् ॥ २६ ॥
मकुटारोपणं प्रोक्तं रथारोहविधिं शृणु ॥ २६[१]/२ ॥

॥ [७]इति सूक्ष्मशास्त्रे मकुटारोपणे दिनचर्याविधिः एकसप्ततितमः पटलः ॥

---

[१] भूकाभिषेकदिवसात् ] ई, झ; भूकाभिषेकसमयात् - अ.

[२] पूर्वद्वित्रिदिनेऽपि वा ] ई; पूर्वे द्वित्रिदिनेऽपि वा - अ; पूवेत्र द्वित्रिदिनेऽपि वा - झ.

[३] मृगयात्रां प्रकुर्वीत ] ई, झ; देवस्य मृगयां कुर्याद्वु -अ.

[४] वनदेवादितृप्तये ] अ, ई;नवदेवादितृप्तये – झ.

[५] त्वेवं ] ई; चैव - अ, झ.

[६] अत्रानुक्तं तु यत्किञ्चित् ] ई, झ; अत्रानुक्तं यत्किञ्चित् – अ.

[७] इति सूक्ष्मशास्त्रे मकुटारोपणे दिनचर्याविधिः एकसप्ततितमः पटलः ] सं० पाठः; मकुटारोपविधिर्द्विसप्ततितमः पटलः - अ; मकुटारोपण-विधिपटलः - ई; इति सूक्ष्मशास्त्रे दिनचर्याविधिः द्विसप्ततितमः पटलः- ऋ; मकुटारोपनविधिं नाम एकसप्ततिपटलः - झ

## [द्विसप्ततितमः पटलः[१]]

### रथारोहणविधिः

[२]रथारोहविधिं वक्ष्ये शृणु त्वं तत् प्रभञ्जन ।

[पूर्वेद्युःकरणीयाः क्रियाः]

शान्तिहोमं ततः कुर्याद्रथाग्रे तु विशेषतः ॥१॥
क्षालयेच्छुद्धतोयेन प्रोक्षयेत्पञ्चगव्यकैः ।
ततो विघ्नेशमभ्यर्च्य सर्वविघ्नप्रशान्तये ॥२॥
[३]तत्तत्स्थाने विशेषेण सर्वदेवान् [४]समर्चयेत् ।
[५]दिक्पालकान् प्रपूज्याथ [६]स्वनाम्नैव तु मन्त्रतः ॥३॥
चक्रेषु [७]चन्द्रसूर्यौ चाप्यक्षे [८]चाधाररूपिणीम् ।
[९]अष्टनागांश्च पाशेषु चार्चयेत्साधको वरः ॥४॥
मेघनादं सुराष्ट्रं च रथपूर्वापरेषु च ।
[१०]तेभ्यो रक्तबलिं दद्याद् यथाविधिपुरःसरम् ॥५॥
एवमेव प्रकर्तव्यं रात्रिमध्ये विशेषतः ।

[रथकर्षणम्]

नित्यार्चनादिकं सर्वं [११]प्रातर्निर्वर्त्य देशिकः ॥६॥
सुमुहूर्ते सुलग्ने तु देवदेवं रथे नयेत् ।

---

[१] अयं पटलः अ (टि.१९१, पृ० ४०१-४०२), ई (टि.३६, पृ० ३१५-३१६), च (टि.९५५, पृ० २०), झ (टि.१०१६, पृ० ८७-८८) इत्येतेषु कोशेषु दृश्यते।
[२] रथारोह०] ई, च; रथारोहण० – अ, झ.
[३] तत्तत्स्थाने ] ई, च; तत्तत्देशे – अ.
[४] समर्चयेत् ] च; समाचरेत् – अ, ई.
[५] दिक्पालकान् ] ई, च, झ; दिक्पालान् – अ.
[६] स्वनाम्नैव तु ] सं० पाठः ; स्वनामेनैव – अ, ई, च, झ.
[७] चन्द्रसूर्यौ चाप्यक्षे ] सं० पाठः; ०चात्यक्षे - अ; चन्द्रसूर्यं च क्षये – ई, च; चन्द्रसूर्येश्च क्षये – झ.
[८] चाधाररूपिणीम् ] अ; वाधारशक्तिनम् – ई; वाधारशक्तिनीम् – च, झ.
[९] अष्टनागांश्च पाशेषु ] सं० पाठः ; अष्टनागांश्च पार्श्वेषु – अ; अष्टनागाग्निपाशेषु – ई, च, झ.
[१०] तेभ्यो रक्तबलिं ] च, झ; रस्मोरक्तबलिं – अ; तस्माद्रक्तबलिं – ई.
[११] प्रातर्निर्वर्त्य ] ई, च ; प्रातः निर्वृत्य –अ; प्रातन्निर्वर्त्य – झ.

[१]पुरुषाकारधारिण्यो [२]मत्कन्याश्च सहैव तु ॥७॥
सर्ववाद्यसमायुक्तं रथाकर्षणमारभेत् ।
[३]सर्वस्थाने रथं नीत्वा जनान् सर्वान् [४]प्रतोषयेत् ॥८॥

[रथनयनम् पूजा च]

[५]विघ्नाद्यैर्यानविच्छेदे [६]क्षिप्रं सन्धानमाचरेत् ।
कालातिक्रमणे प्राप्ते [७]यां पूजां कारयेद्यदि ॥९॥
[८]सा पूजा निष्फला ज्ञेया परचक्राद्भयं भवेत् ।
मध्याह्नसमयं यावद् यानं चैव न योग्यकम् ॥१०॥
रथे दीपान्तमभ्यर्च्य [९]मूललिङ्गे निवेद्यकम् ।
[१०]भानोरस्तमनाद् ऊर्ध्वे अशक्तं चेत्तु यानकम् ॥११॥
शिबिकादिषु चारोप्य यानशेषं समाप्य च ।
कालातिक्रमणार्थाय [११]शान्तिहोमपुरस्सरम् ॥१२॥
[१२]राजराष्ट्रहितार्थाय [१३]भीमरुद्रं जपेच्छतम् ।
[१४]तत्संख्यया च होतव्यं कारयेत्साधकोत्तमः ॥१३॥
नित्यं निर्वर्तयेद्धीमान् [१५]यथावदनुपूर्वशः ।

---

[१] उरूषाकारधारिण्यो ] अ; पुरुषाकारधारिण्या – ई, झ; पुरुषाकारथारण्या – च.
[२] मत्कन्याश्च सहैव तु ] अ ; मत्कन्यौ च सहैव तु – ई ; मत्कन्यो च सहैवत् – च ; मत्कन्या च महेव तु – झ.
[३] सर्वस्थाने ] झ; पूर्वस्थाने - अ, ई, च.
[४] प्रतोषयेत् ] अ, ई, झ ; सन्तोषयेत् बुधः – च.
[५] विघ्नाद्यैर्यानविच्छेदे ] अ ; विघ्नाद्यैर्यानविच्छिन्ने – ई, झ ; विघ्नाद्यैरयनविश्विन्ने – च.
[६] क्षिप्रं सन्धानमाचरेत् ] अ; संधानं शीघ्रमाचरेत् – ई, च, झ.
[७] यां पूजां कारयेद्यदि ] सं० पाठः ; पूजां राजाकरोद्यदि – अ; थापुराजाकरोद्यदि – ई; या पूजा कारयेद्यदि – च ; या पूजाकारयेद्यति – झ.
[८] सा पूजा निष्फला ] अ, च, झ; संपूजानिषुकालादि – ई.
[९] मूललिङ्गे ] अ; आलये तु – ई, झ; आवाहयेत्तु – च.
[१०] भानोरस्तमनाद् ] ई, च, झ; भानोरस्तमयात् -अ; 'अ' मातृकायां '११-१४' श्लोका न विद्यन्ते ('ई' मातृकातः ते प्रतिलिपीकृताः )।
[११] शान्तिहोमपुरःसरम् ] ई, झ; शान्तिहोमं समाचरेत् – च.
[१२] राजराष्ट्रहितार्थाय ] ई, झ; राजराष्ट्रविवर्द्धाय – च.
[१३] भीमरुद्रं ] सं० पाठः; भीमरूपं - ई, च; भूमरूपं – झ.
[१४] तत्संख्यया च होतव्यं ] ई ; तत्संख्यया च भेतव्यं – च ; तत्संख्याया च होतव्यं – झ.
[१५] यथावदनुपूर्वशः ] च; अन्यदावानुपूर्वशः - ई; यथा पूदनुपूर्वः – झ.

[1]रथारोहविधिः प्रोक्तः प्रभामण्डलकं [2]श‍ृणु ॥ १४ ॥

॥ [3]इति सूक्ष्मतन्त्रे रथारोहणविधिर्नाम द्विसप्ततितमः पटलः ॥

---

[1] रथारोहविधिः प्रोक्तः ] ई; रथारोहविधिं प्रोक्तं – च; रघरोहविधिः प्रप्रोक्तं – झ.

[2] श‍ृणु ] ई ; लक्षणम् – च ; कुरु – झ.

[3] इति सूक्ष्मतन्त्रे रथारोहणविधिर्नाम द्विसप्ततितमः पटलः] सं० पाठः; झ : इति सूक्ष्मतन्त्रे रथारोहणविधिर्नाम द्विसप्तति पटलः ; ई, च : इति सूक्ष्मतन्त्रे रथारोहणविधिपटलः

## [त्रिसप्ततितमः पटलः]
## सकलस्थापनविधिः[1]

[स्थापनफलम्]

[2]सकलस्थापनं वक्ष्ये [3]शृणु त्वं तत्प्रभञ्जन ।
आयुरारोग्यजयदं पुत्रश्रीकीर्तिवर्धनम् ॥ १ ॥

[त्रिविधस्थापनम्]

केवलं सहजं चैव पौनःपुन्यं [4]त्रिधा स्मृतम् ।
केवलं [5]चैकबेरस्य स्थापनं [6]त्विति विद्यते ॥ २ ॥
महेश्वरादिबिम्बानां [7]तच्छक्तिप्रतिमादीनाम् ।
परिवारामरादीनां [8]वाहनायुधविग्रहान् ॥ ३ ॥
भक्तादि[9]प्रतिमानां च एकस्मिन्नेककालके ।
[10]एकाचार्येण कर्तव्यं स्थापनं सहजं स्मृतम् ॥ ४ ॥
[11]वर्णादिस्फोटने चैव [12]अङ्गोपाङ्गविहीनके ।
त्याज्यं बिम्बं तु संस्थाप्य [13]पौनःपुन्यमिति स्मृतम् ॥ ५ ॥

[स्थापनकालः]

[14]उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।

---

[1] अयं पटलः अ (टि.१९१, पृ० ४०२-४०७), ई (टि.३६, पृ० ३१९-३२५), उ (टि.३७, पृ० ५९-६६), ऋ (टि.९७, पृ० ४६२-४६८), च (टि.९५५, पृ० १३१-१३७), झ (टि. १०१६, पृ० ९१-९७), इत्येतेषु कोशेषु दृश्यते।

[2] 'अ' मातृकायां '१-१०' श्लोका न विद्यन्ते ('ई' मातृकातः ते प्रतिलिपीकृताः)।

[3] शृणु त्वं ] ई, उ, ऋ, च ; शृणुध्वं – झ.

[4] त्रिधा स्मृतम् ] ई, उ, ऋ, च ; त्रय स्मृतम् – झ.

[5] चैकबेरस्य ] सं० पाठः; चैकबेरं स्यात् - ई, उ, ऋ, च, झ.

[6] त्विति ] ई, उ, ऋ, झ ; न – च.

[7] तच्छक्तिप्रतिमादीनाम् ] सं० पाठः; तच्छक्तिप्रतिमादिनाम् उ ; तच्छक्तिप्रतिमादिकम् – ई, ऋ, झ; तच्छक्तिप्रतिपादिकम् – च.

[8] वाहनायुधविग्रहान् – ई, ऋ, च, झ (वाहनायुधविग्रहणाम् इत्येव साधु); वाहनानां पृथग्गृहान् - उ.

[9] ०प्रतिमानां च ] उ, च; ०प्रतिमां चैव – ई, ऋ, झ.

[10] एकाचार्येण ] उ, च, झ; एकभार्येण – ई, ऋ.

[11] वर्णादिस्फोटने ] सं० पाठः; वर्णादिस्फोटनं - उ, च; वर्णानि स्फोटनं – ई, झ ; वर्णानि स्फोटनीं – ऋ.

[12] अङ्गोपाङ्गविहीनके ] उ, च; अङ्गोपाङ्गनि हानके – ई, ऋ, झ.

[13] 'अ' मातृकायां अक्षरलोपः। पौनःपुन्यमिति स्मृतम् ] उ, ऋ, च, झ; पौनःपुन्यं च संस्मृतम् – ई.

[14] उत्तरायणकाले ] ई ; उत्तरायणमस्ते – ऋ; उत्तरायणमसे – उ; च, झ.

सुवारे सुमुहूर्ते च स्थापनं सम्यगाचरेत् ॥ ६ ॥

[बेरद्रव्यादि]

[१]शैलरत्नजलोहैश्च सुधामृद्दारुबिम्बयोः ।
भित्तिचित्रे [२]प्रयोक्तव्यो विशेषः किंचिदुच्यते ॥ ७ ॥
चलं चैवाचलं चैव [३]प्रासादे [४]प्रतिमां ततः ।
अचलं गर्भसंयुक्तं [५]तत्स्थाने सुदृढीकृतम् ॥ ८ ॥
गर्भहीनं तु यद्वस्तु [६]चलमेवं प्रकीर्तितम् ।
अचलं स्वस्वदेशे तु [७]चलं सर्वत्र देशके ॥ ९ ॥
रत्नजैश्चित्रबिम्बैश्च रत्नन्यासादिकं विना ।

[स्थापनस्य विंशत्यङ्गानि]

प्रथमं बेरनिर्माणं द्वितीयं [८]द्रव्यसंग्रहम् ॥ १० ॥
पश्चान्मण्टप[९]निर्माणं चतुर्थं दृष्टिमोचनम् ।
पञ्चमं प्रतिमाशुद्धिः षष्ठं ग्रामप्रदक्षिणम् ॥ ११ ॥
सप्तमं तु जले [१०]वासमष्टमं मण्टपार्चनम् ।
रक्षाबन्धं च नवमं [११]द्रव्याधिवासनं परम् ॥ १२ ॥
[१२]एकादशाधिवासं च द्वादशं [१३]होमकर्म च ।
[१४]त्रयोदशं प्रतिमोद्धारं दक्षिणादानं तत्परम् ॥ १३ ॥

---

[१] शैलरत्नज० ] उ, ऋ, च, झ; शैलरत्नं च – ई.
[२] प्रयोक्तव्यो ] सं० पाठः; प्रयोक्तव्यं – ई, उ, ऋ, च, झ.
[३] प्रासादे ] सं० पाठः; प्रासादं ई, उ, च, झ; प्रपादं – ऋ.
[४] "प्रतिमा भवेत्" इत्येव साधु ।
[५] तत्स्थाने सुदृढीकृतम् ] सं० पाठः; तत्स्थानेषु दृढीकृतम् – ई, उ, ऋ, च, झ.
[६] 'ऋ' मातृकायां 'चलमेवं' भागो न वियते।
[७] 'चलं ] ई, ऋ, च, झ; पलं – उ.
[८] द्रव्यसंग्रहम् ] ई, उ, ऋ, च; द्रव्यसंगृतम् - झ.
[९] ०निर्माणं ] अ, उ; ऋ, च, झ; ०निर्वाणं - ई.
[१०] "वासश्चाष्टमं" इत्येव साधु.
[११] द्रव्याधिवासनं परं ] झ; दशमं द्रव्याधिवासनम् – अ, ऋ; व्याधिवासनम् दश – ई; पर्यादिवासनं परम् – उ; दशमं वसनं परं – च.
[१२] एकादशाधिवासं ] अ, ई, उ, ऋ, च; एकाष्टदशाधिवासं – झ.
[१३] होमकर्म च ] अ, ई, उ, ऋ, च ; होमकर्मणि – झ.
[१४] 'अ, ई,ऋ, झ' मातृकासु श्लो० १३ उ०-१५ पू० भागो न विद्यते।

तत्परं कलशोद्धारम् अभिषेकं तु षोडशम्।
सप्तदशं नैवेद्यं स्यात् कलशस्नपनं परम्॥ १४॥
[1]प्रभूतहविषं पश्चाद् धूपदीपादिकं ततः।
एवं विंशतिरङ्गानि प्रतिष्ठाविधिरुच्यते ॥ १५॥

[मण्डपनिर्माणादि]

[2]यागार्थमण्टपादींश्च पूर्वोक्तविधिना कुरु ।
[3]अङ्कुरं [4]चाग्निकार्यं च परिवारघटादिकम्॥ १६॥
मण्डपस्यार्चनादींश्च [5]एवमेव प्रकल्पयेत्।
[6]तत्तद्बिम्बघटादींश्च पृथक् [7]चैतान् प्रकल्पयेत्॥ १७॥
[8]प्रतिष्ठार्क्षपूर्वे तु त्रिदिने तद्दिनेऽपि वा।
अङ्कुरार्पणकार्यं च पूर्वोक्तविधिना कुरु॥ १८॥

[अक्षिमोक्षणम्]

नेत्रद्वययुते ऋक्षे [9]त्वक्षिमोक्षणमाचरेत् ।
ततः [10]तक्षकमाहूय देशिकानुज्ञया ततः ॥ १९॥
[11]भ्रूरेखामक्षिरेखां च शिल्पी कुर्याद् [12]विचक्षणः ।
[13]गोभूतिलहिरण्यादि दत्वा [14]शिल्पिं विसर्जयेत् ॥ २०॥
स्थण्डिलं शालिभिः कृत्वा पद्ममष्टदलं लिखेत् ।

---

[1] प्रभूतहविषं ] च; – प्रभूतहविं च – उ.
[2] यागार्थ० ] ई; यागार्ध० – अ, ऋ; ग्रागार्थं – उ, च, झ.
[3] 'अ, ऋ' मातृकायोः १६उत्त०-१८ भागो न दृश्यते।
[4] चाग्निकार्यं च ] उ; चाग्निकार्यस्य – ई, च, झ.
[5] एवमेव ] ई, झ; एक एव – उ, च.
[6] तत्तद्बिम्ब० ] सं० पाठः; तत्तद्ब्रह्म० - ई, उ, झ; तत्तत्पूर्व० – च.
[7] चैतान् ] ई, झ; वै तान् – उ, च.
[8] प्रतिष्ठार्क्षपूर्वे ] उ, च, झ; प्रतिष्ठार्क्षपूर्वं – ई, च.
[9] त्वक्षिमोक्षणमाचरेत् ] अ, ई, उ, च, झ; त्वक्षिमोक्षणमारभेत् - ऋ.
[10] तक्षकः = शिल्पी इत्यर्थः ।
[11] भ्रूरेखामक्षि० ] अ, ई, ऋ; भ्रूरेखां पक्ष्म० – उ, च; भ्रूरेखाचक्षु० - झ.
[12] विचक्षणः ] अ, ई, ऋ, झ; सलक्षणम् – उ, च.
[13] गोभूतिलहिरण्यादि } अ, ई, ऋ; गोभूहिरण्यवस्त्रादिन् – उ, च, झ.
[14] "शिल्पिनं" इत्येव साधु ।

तण्डुलैश्च तिलैर्लाजैर्दर्भैः पुष्पैः परिस्तरेत् ॥२१॥
तस्य मध्ये तु संस्थाप्य महेशप्रतिमादिकम् ।
पुण्याहं वाचयित्वा तु [१]रक्तपुष्पैरलङ्कृतम् ॥२२॥
[२]कलशानष्टसंख्याकान् ससूत्रान् सापिधानकान् ।
सवस्त्रान् पल्लवोपेतान् [३]नारिकेलफलान्वितान् ॥२३॥
[४]गन्धपुष्पैः समभ्यर्च्य [५]विद्येशानभितो यजेत् ।
[६]गन्धपुष्पादिनाभ्यर्च्य प्रच्छन्नपटम् [७]आस्तरेत् ॥२४॥
ईशानेन तु मन्त्रेण पक्ष्मरेखां समालिखेत् ।
कृष्णमण्डलमालिख्य सद्योजातेन मन्त्रतः ॥२५॥
ज्योतिर्मण्डलमालिख्य नेत्रमन्त्रमनुस्मरन् ।
मधु वाता ऋतायेति मधुपात्रं सुदर्शयेत् ॥२६॥
घृतं [८]मिमिक्षमन्त्रेण [९]घृतपात्रं प्रदर्शयेत् ।
आप्यायस्वेति मन्त्रेण क्षीरपात्रं प्रदर्शयेत् ॥२७॥
[१०]दधिक्राव्णेतिमन्त्रेण दधिपात्रं प्रदर्शयेत्।
शिवगायत्रिमन्त्रेण [११]पञ्चरत्नं प्रदर्शयेत् ॥२८॥
गौर्धेनुभव्यमन्त्रेण [१२]गां सवत्सां प्रदर्शयेत् ।
ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान् दर्शयेत्ततः ॥२९॥
सुमङ्गलीति मन्त्रेण [१]दर्शयेच्च सुमङ्गलीम् ।

---

[१] रक्त० ] उ, झ; रत्न० – अ, ई, ऋ, च.
[२] कलशानष्टसंख्याकान् ] ई; कलशानष्टसंख्यातान् – अ, ऋ, उ, च, झ.
[३] नारिकेलफलान्वितान् ] अ, ई, ऋ, च, झ; नारिकेलफलैर्युतान् – उ.
[४] गन्धपुष्पैः ] अ, ई, ऋ; गन्धैः पुष्पैः – उ, च, झ.
[५] विद्येशा० ] ई, ऋ, उ, च, झ; विद्याशा० – अ.
[६] गन्धपुष्पादिनाभ्यर्च्य ] अ, ऋ, उ, च, झ; गन्धपुष्पैः समभ्यर्च्य - ई.
[७] आस्तरेत् ] सं० पा०; आलिखेत् – अ, ऋ, ई, झ; आविशेत् – उ, च.
[८] मिमिक्ष० ] अ, ऋ, झ; मिक्षेति० – ई, उ, च.
[९] घृतपात्रं ] झ; धान्यराशिं - अ, ई, ऋ, च, झ; धान्यराशीन् – उ.
[१०] 'ई, उ, च'.मातृकासु श्लो० '२८ पू०' न विद्यते।
[११] पञ्चरत्नं ] उ, च; घृतपात्रं – अ, ऋ, ई, झ.
[१२] गां सवत्सां ] अ, ऋ; सवत्सां गं – उ, च, झ. 'ई' मातृकायां श्लो० २९ पू० 'गांसवत्साम्' इत्यारभ्य श्लो० ३० 'येषामीशेति-मन्त्रेण ' इत्यन्तं न दृश्यते ।

[2]येषामीशेति मन्त्रेण धान्यराशिं प्रदर्शयेत् ॥३०॥
प्रच्छन्नपटमावर्ज्य जनान् सर्वान् प्रदर्शयेत् ।

[बेरशुद्धिर्ग्रामप्रदक्षिणं च]

बेरशुद्धिं ततः कृत्वा पञ्चमृत्पञ्चगव्यकैः ॥३१॥
रत्नोदैः शुद्धतोयैश्च स्नापयेद्देशिकोत्तमः ।
वस्त्रैराभरणैर्माल्यैरलङ्कृत्य विशेषतः ॥३२॥
[3]रथे वा [4]शिबिकायां वा [5]देवमारोप्य भक्तितः ।
[6]ग्रामप्रदक्षिणं कृत्वा सर्वालङ्कारसंयुतम् ॥३३॥

[जलाधिवासादि]

जलतीरं समाश्रित्य प्रपां [7]कृत्वातिसुन्दराम् ।
तन्मध्ये स्थण्डिलं कल्प्य साष्टपत्रं सकर्णिकम् ॥३४॥
दर्भैः पुष्पैः परिस्तीर्य कलशान् नवसंख्यकान् ।
संस्थाप्य हृदयेनैव पुण्याहं वाचयेत्ततः ॥३५॥
[8]प्राक् शिरश्चोर्ध्ववक्त्रं स्यान्मूलेनैव जले क्षिपेत् ।
त्रिरात्रमेकरात्रं वा याममेकमथापि वा ॥३६॥
वास्तुहोमं ततः कृत्वा पर्यग्निकरणं कुरु ।
पुण्याहं वाचयेत्तत्र मण्टपस्यार्चनं कुरु ॥३७॥
जलादुत्तीर्य बिम्बं तु शुद्धिं कृत्वा विचक्षणः ।
महामण्टपमासाद्य रक्षाबन्धनमाचरेत् ॥३८॥

[शयनाधिवासादि]

पुण्याहं तु ततः कृत्वा [9]प्रोक्षयेद्वेदिकोपरि ।

---

[1] दर्शयेच्च सुमङ्गलीम् ] अ, ऋ; कन्यकां तु प्रदर्शयेत् – उ, च; मङ्गल्य प्रदर्शयेत् – झ.
[2] येषामीशेति ] अ, ऋ; एषामीशेति – उ, च, झ.
[3] रथे ] अ, ऋ, उ, ई, झ; अथ – च.
[4] शिबिकायां ] अ, ऋ, ई, च, झ; शिविकोर्ध्वे – उ.
[5] देवमारोप्य ] अ, ऋ; देवानारोप्य – ई, उ, झ; देवावारोप्य – च.
[6] ग्राम० ] अ, ऋ, ई, उ, झ; धाम० – च.
[7] कृत्वातिसुन्दराम् ] अ; कृत्वातिसुन्दरम् – ई, ऋ, उ, च, झ.
[8] प्राक् शिरश्चोर्ध्ववक्त्रं स्या० ] उ; ०श्चोच्छ्रयं कुर्या० – अ, ऋ, झ; ०श्चोश्रयं कुर्या० – ई; प्राश्चरेस्चोर्ध्ववक्त्रं स्या० – च.
[9] प्रोक्षयेद्वेदि० ] अ, ऋ, ई; प्रयते वेदि० – उ, झ; प्रयत्ने वेदि० – च.

स्थण्डिलं शालिभिः कृत्वा तण्डुलैश्च सुशोभितम् ॥ ३९ ॥
शयनं [1]कल्पयेत्तत्र [2]अण्डजाद्यैरनुक्रमात् ।
[3]अर्चयित्वा तु गन्धाद्यैः [4]तत्तन्मूलेन देशिकः ॥ ४० ॥
शयितं [5]शयने तत्र प्रतिमां वस्त्रवेष्टिताम् ।
[6]प्राक्शिरस्कं ततो देवं [7]पूजयेत् स्वस्वमूलतः ॥ ४१ ॥
तस्य दक्षिणपार्श्वे तु शिवकुम्भं च वर्धनीम् ।
सवस्त्रान् पल्लवोपेतान् सकूर्चान् फलसंयुतान् ॥ ४२ ॥
[8]हेमरत्नसमायुक्तान् शुद्धाम्बुपरिपूरितान् ।
कुम्भे शम्भुं समावाह्य तन्मूलेनैव देशिकः ॥ ४३ ॥
अभितः कलशानष्टौ विद्येशान् [9]संप्रपूजयेत् ।
[10]गन्धपुष्पादिनाभ्यर्च्य धूपदीपादिकं ददेत् ॥ ४४ ॥
ऋगाद्यध्ययनं कुर्याच्चतुर्दिक्षु विशेषतः ।

[होमकर्म]

ततो होमं प्रकुर्वीत एकाग्नौ तु विशेषतः ॥ ४५ ॥
अग्न्याधानादिकं सर्वमाज्यभागान्तमाचरेत् । ४
वह्निमध्ये समभ्यर्च्य [11]बहुरूपं समूलतः ॥ ४६ ॥
गन्धपुष्पादिनाभ्यर्च्य [12]तत्तन्मूर्तिदशाहुतिः ।
समिदाज्येन चरुणा लाजांश्च [13]सर्षपं तिलम् ॥ ४७ ॥

---

[1] कल्पये० ] ई, ऋ, उ, च, झ; कल्यये – अ.
[2] अण्ड० ] अ, ई, उ, च, झ; ह्यण्द० – ऋ.
[3] अर्चयित्वा ] अ, ई, ऋ, च, झ; कल्पयित्वा – उ.
[4] तत्तन्मूलेन ] झ; तत्र मूलेन - अ, ई, ऋ; तन्मूलेनैव – उ; तत्तन्मूले तु – च.
[5] शयने ] उ; शयनं – अ, ई, ऋ, च, झ.
[6] प्राक्शिरस्कं ततो ] ई; ०रस्कुम्भतो – अ, ऋ; ०रस्कं भवे० – उ; ०रस्कं भये – च: ०रस्कन्धतो – झ .
[7] पूजयेत् स्वस्वमूलतः ] ई, उ; पूजयेत्तत्र मूलतः – अ, ऋ; पूजयेन् मूलमन्त्रतः – च.
[8] 'झ' मातृकायां श्लो० '४३ पू०' न विद्यते।
[9] संप्रपूजयेत् ] अ, ऋ, ई, झ; संप्रकल्पयेत् – उ, च.
[10] 'उ, च, झ' मातृकासु श्लो० ४४ उ०-४६ भागो न विद्यते।
[11] वहुरूपं ] झ; वहुबेरं – उ, च.
[12] तत्तन्मूर्तिदशाहुतिः ] अ, ऋ, ई; तत्तन्मूर्तिदशाहुतिम् – उ, च; तत्तन्मूर्तिदशाहुति – झ.
[13] सर्षपं तिलम् ] अ, ऋ, ई, झ; सर्षपस्तिलान् – उ, च.

[१]यवं चैव तु सप्तैते आज्यं मूलेन होमयेत् ।
[२]समिदादीनि [३]षड्द्रव्यैर्हृदादींश्चैव हूयते ॥४८॥
प्रत्येकं षोडशं हुत्वा व्याहृतिं [४]जुहुयात्क्रमात् ।
तत्तत्स्वमूलमन्त्रेण [५]आज्येनाष्टशताहुतिः ॥४९॥
[६]एकत्रिंशत् [७]कलाभिस्तु तत्तत्स्थाने स्पृशेद्धुनेत् ।
सर्वद्रव्यैर्विशेषेण [८]हव्यवाहेन [९]हूयते ॥५०॥
गेयनृत्तसमायुक्तं रात्रिशेषं व्यपोह्य च ।

[अधिवासनानन्तरदिवसकृत्यम्]

ततः प्रभाते विमले आचार्यो मूर्तिपैस्सह ॥५१॥
कृत्वा स्नानत्रयं तत्र सकलीकरणं कुरु ।
शयने शाययेद्बिम्बं गन्धपुष्पादिनार्चयेत् ॥५२॥

[-हर्म्यप्रदक्षिणादि]

नानावाद्यसमायुक्तं [१०]नानादीपसमन्वितम् ।
[११]नानाछत्रसमायुक्तं नानालङ्कारसंयुतम् ॥५३॥
नानाभक्तजनैस्सार्धं स्वस्तिसूक्तसमन्वितम् ।
हर्म्यप्रदक्षिणं कृत्वा स्नानवेद्युपरि न्यसेत् ॥५४॥
पुण्याहं वाचयेत्तत्र एकत्रिंशत्कला न्यसेत् ।

[-कलशोद्धारणम्]

[१२]ब्रह्मकुम्भं समुद्धृत्य पूर्ववत्समलङ्कृतम् ॥५५॥

---

[१] यवं चैव ] अ, ऋ, ई, झ; यवांश्चैव – उ, च.
[२] समिदा० ] अ, ऋ, उ, च; समिधा० – ई, झ.
[३] षड्द्रव्यै० ] ई, उ, च, झ; तद्द्रव्यै० – अ, ऋ.
[४] जुहुयात्क्रमात् ] अ, ऋ, ई, झ; जुहुयात्ततः –उ, च.
[५] आज्येनाष्टशता० ] च; आज्येनाष्टादशा० – अ, ऋ, ई; आज्येनाष्टौ दशा० – झ.
[६] एकत्रिंशत्०] ई, उ, च; अष्टत्रिंशत्० – अ, ऋ; झ.
[७] ०कलाभिस्तु ] उ, च; ०कलेनैव – अ, ई, ऋ.
[८] हव्यवाहेन ] अ, ई, उ, ऋ, च; हव्येति – झ.
[९] हूयते ] ई, उ, ऋ, च, झ; हूतये – अ.
[१०] नानादीप० ] ई, उ; नानागाना० – झ. 'ई, उ, झ' मातृकासु श्लो० ५३ द्वितीयतृतीयपादौ न स्तः।
[११] नानाच्छत्र० ] ई; नानाचित्र० – उ.
[१२] ब्रह्मकुम्भं ] अ, ई, उ, झ; वृषकुम्भं – च.

[1]हर्म्यप्रदक्षिणं कृत्वा देवाग्रे स्थापयेद्बुधः ।
मुहूर्तं निरीक्ष्य दैवज्ञो गन्धपुष्पाक्षतैर्यजेत् ॥५६॥
ताम्बूलं दापयित्वा तु [2]दक्षिणां दापयेत्ततः ।

[-जीवन्यासादि]

जीवन्यासं ततः कृत्वा सुमुहूर्ते [3]विचक्षणः ॥५७॥
[4]तत्तत्स्वबीजमूलेन [5]कुम्भतोयाभिषेचयेत् ।

[-नैवेद्यादिदानम्]

मन्त्रान्नं दापयेत्पश्चात् परिवारघटादिकम् ॥५८॥
स्वस्वस्थानेऽभिषेकं तु [6]गन्धपुष्पं च दापयेत् ।
वस्त्रैराभरणैर्माल्यैः [7]प्रभूतहविषं ददेत् ॥५९॥
धूपं दीपं ददेच्छम्भोः ताम्बूलं च निवेदयेत् ।

[-दक्षिणादानम्]

आचार्यं [8]पूजयेत् पश्चात् वस्त्रहेमाङ्गुलीयकैः ॥६०॥
[9]गोभूहिरण्यधान्याद्यैर्मनः संतोषयेत्क्रमात् ।
उत्सवं कारयेत्तत्र यथावित्तानुसारतः ॥६१॥
भक्तानां परिचाराणां दक्षिणां दापयेत्सुधीः ।
दीनान्धकृपणादीनां [10]यथाशक्ति तु [11]दक्षिणा ॥६२॥

[स्थापनफलम्]

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।

---

[1] हर्म्यप्रदक्षिणं ] सं० पाठः; आलय० अ, ई, उ, च (छन्दोभङ्गः); निलया० (छन्दोभङ्गः) – झ.
[2] 'च' मातृकायां श्लो० ४९ श्लोकस्य द्वितीयतृतीयपादौ न स्तः।
[3] विचक्षणः ] अ, ई, उ, ऋ, झ; विशेषतः – च.
[4] तत्तत्स्वबीजमूलेन ] अ, ई, ऋ; तत्तत्स्वमूलबीजेन – उ ; तत्तन्मूलेन बीजेन – च; तत्तत्सबीजमूलेन – झ .
[5] कुम्भतोयाभि० ] अ, ई, ऋ, झ; गन्धोदैरभि० - उ; गन्धतोयाभि० – च.
[6] गन्धपुष्पं च दापयेत् ] उ, च, झ; गन्धपुष्पादि पातयेत् – अ, ऋ; गन्धपुष्पादि वादयेत् – ई.
[7] प्रभूतहविषं ] अ, ई, ऋ, च, झ; प्रभूतं च हविः –उ.
[8] पूजयेत् पश्चात् ] अ, ऋ, ई, झ; पूजयेत्तत्र – उ, च.
[9] गोभूहिरण्यधान्या० ] अ, ऋ, ई; गोभूहिरण्यवस्त्रा० – उ, च.
[10] यथाशक्ति ] सं० पा०; यथाशक्त्या- अ,ई,उ,ऋ,च,झ.
[11] दक्षिणा ] उ, च, झ; दक्षिणाम् – अ, ऋ, ई.

[1]यान् यान् कामयते कामान् तांस्तान् [2]कामेन साधयेत् ॥ ६३ ॥
इहैव धनवान् श्रीमान् [3]अन्ते सायुज्यमाप्नुयात् । ६३ $^{1}/_{२}$ ॥

॥ [4]इति सूक्ष्मशास्त्रे सकलस्थापनविधिः त्रिसप्ततितमः पटलः ॥

---

[1] यान्यान् ] ई, ऋ, उ, च, झ; (या)धान्यान् – अ.
[2] कामेन ] अ, ऋ; वर्णेन – ई, उ, च, झ.
[3] अन्ते ] अ, झ; सान्ते – ई, ऋ; सोऽन्ते – उ, च.
[4] इति सूक्ष्मशास्त्रे सकलस्थापनविधिः त्रिसप्ततितमः पटलः ] सं० पाठः; अ, ऋः इति सूक्ष्मशास्त्रे सकलस्थापनविधिः पञ्चसप्ततितमः पटलः ॥; ई, उः इति सूक्ष्मशास्त्रे सकलस्थापन-विधिपटलः ॥; च : इति सूक्ष्मागमे सकलस्थापनविधि-पटलः ॥; झ : इति सूक्ष्मशास्त्रे सकलस्थापनविधिं नाम चतुसप्त(?)पटलः ॥

## [चतुःसप्ततितमः पटलः]
## पाकालयविधिः[1]

[2]पाकालयविधिं वक्ष्ये [3]श्रृणु त्वं [4]तत्प्रभञ्जन ।

[पाकालयस्थापनकालः]

सुधाकर्मावसाने तु स्थापयेद्देशिकोत्तमः ॥ १ ॥
उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
सुमुहूर्ते सुलग्ने तु स्थापनं सम्यगाचरेत् ॥ २ ॥
[5]निश्चितदिवसात्पूर्वे कारयेदङ्कुरार्पणम् ।

[अधिवासः]

शिल्पिनं तु विसृज्याथ पुण्याहं वाचयेत्ततः ॥ ३ ॥
[6]वास्तुहोमं ततः कृत्वा पर्यग्निकरणं कुरु ।
ब्राह्मणान्भोजयेत्तत्र पुण्याहं वाचयेत्ततः ॥ ४ ॥
तद्दिनात् पूर्वरात्रौ तु प्रारभेदधिवासनम् ।
प्रथमस्तम्भमूले तु बन्धयेत्कौतुकं हृदा ॥ ५ ॥
[7]मण्डपस्य ततो मध्ये वेदिकां संप्रकल्पयेत् ।
विमलैर्व्रीहिभिश्चाष्टद्रोणैः स्थण्डिलमालिखेत् ॥ ६ ॥
तस्य मध्ये लिखेदब्जं दर्भैश्चैव परिस्तरेत् ।
पश्चात्कुम्भं न्यसेन्मध्ये सूत्रोदकादिसंयुतम् ॥ ७ ॥
अभितः कलशानष्टौ [8]वामादींश्च समर्चयेत् ।
[9]मध्यकुम्भेऽन्नपूर्णेशीमर्चयेत्तु स्वनामतः ॥ ८ ॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ४०७-४०९), ई (टि.३६, पृ० ३२५-३२८), झ (टि. १०१६, पृ० ९७-९९) इत्येतेषु कोशेषु दृश्यते।
[2] पाकालयविधिं ] अ ; पचनालयविधिं – ई, झ.
[3] श्रृणु त्वं ] अ, ई ; श्रृणुध्वं – झ.
[4] तत्प्रभञ्जन ] अ, ई ; तत्प्रभञ्जना – झ.
[5] निश्चित० ] सं० पाठः; निश्चित्य – अ, ई, झ.
[6] '४' श्लोको 'ई, झ' मातृकयोः न विद्यते।
[7] मण्डपस्य ततो ] ई, झ; मण्टपस्योत्तरे - अ.
[8] वामादींश्च ] अ ; वामादीनि – ई, झ.
[9] मध्य० ] सं० पाठः; मध्ये – अ, ई, झ.

नैवेद्यं दापयेत्तेषां धूपदीपादिकं ददेत् ।
ऋगाद्यध्ययनं कुर्याच्चतुर्दिक्षु विशेषतः ॥९॥
[1]ब्रह्मसूक्तं जपेत्तत्र . . . . . . . . . . . . . . ।
अग्न्याधानादिकं सर्वम् अग्निकार्योक्तमाचरेत् ॥१०॥
समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान् ।
होमद्रव्याणि सप्तैते [2]सद्यकादि [3]शिरोन्तकम् ॥११॥
शतं वापि तदर्धं वा प्रत्येकं जुहुयात् क्रमात् ।
एवं [4]जागरणं रात्रौ

[अनन्तरदिवसकृत्यानि]

प्रभाते [5]स्नपनं कुरु ॥१२॥
जयादिरभ्याधानं च क्रमाद् [6]राष्ट्रभृतं हुनेत् ।
[7]पूर्णाहुतिं [8]ततो हुत्वा ब्रह्मबीजेन बुद्धिमान् ॥१३॥
पश्चादग्निं विसृज्याथ कुम्भमध्ये तु योजयेत् ।
ब्रह्मकुम्भं समुद्धृत्य धामप्रदक्षिणं कुरु ॥१४॥
प्रधानस्तम्भमूले तु स्थापयेत् स्थण्डिलोपरि ।
पुण्याहं वाचयेत्तत्र दैवज्ञं संप्रपूजयेत् ॥१५॥
कुम्भान्मन्त्रं समादाय तद्गात्रे विन्यसेत्ततः ।
शेषगात्रेषु सर्वेषु रुद्रमन्त्रं न्यसेत्क्रमात् ॥१६॥
वामादिकलशानष्टौ पूर्वादीन्यभिषेचयेत् ।
पूजयेत्सर्वगात्राणि पायसान्नं ददेत्पृथक् ॥१७॥
शिवं संपूज्य विधिवत् यथाविभवविस्तरम् ।

---

[1] ब्रह्मसूक्तं जपेत्तत्र ] झ; ब्रह्मसूक्तं जपे - अ ; ब्रह्मसूक्तं जपेद् – ई.
[2] सद्यकादि ] झ; सम्यगादि – अ, ई.
[3] शिरोन्तकम् ] अ, ई ; शिरोक्तकम् – झ.
[4] जागरणं ] अ, ई ; जागरकं – झ.
[5] स्नपनं ] अ, ई ; स्नानपकं – झ.
[6] राष्ट्रभृतं ] ई, झ; राष्ट्रभृतो – अ.
[7] 'झ' मातृकायां श्लो० १३ उ० न विद्यते।
[8] ततो ] अ; तथा – ई.

महेश्वरं समभ्यर्च्य [1]गब्लिकोर्ध्वे तु विन्यसेत्॥ १८॥
भक्ष्यभोज्यान्नपानादि [2]देवाग्रे स्थाप्य देशिकः।
सर्वालंकारसंयुक्तं दीपज्वालासमन्वितम्॥ १९॥
शंखघोषसमायुक्तं सर्वमुत्थापयेद्बुधः।
हर्म्यप्रदक्षिणं कुर्यात् पचनालयमाविशेत्॥ २०॥
एकत्र स्थण्डिलं कल्प्य पञ्चचूर्णैरलङ्कृतम्।
वस्त्रेणास्तीर्य तन्मध्ये स्थापयेत्तु महेश्वरम्॥ २१॥
संस्थाप्य [3]भोजनद्रव्यं प्रोक्षयेदस्त्रवारिणा।
[4]वीरार्द्रकं च लवणं तिन्त्रिणीफलसंयुतम्॥ २२॥
[5]देवीगायत्रि मन्त्रेण [6]सर्वद्रव्यं निरीक्षयेत्।
[7]तदग्रे त्वन्नपूर्णेशीं स्वनाम्ना तु समर्चयेत्॥ २३॥
सर्वं तु [8]भोजनद्रव्यं देव्यै दद्याच्छिवाज्ञया।
गृहीत्वा त्वन्नपूर्णेशीं [9]धृत्वा तु [10]परिचारकैः॥ २४॥
[11]हविष्यं विधिमार्गेण पायसान्नपुरःसरम्।
पाचयेत्सर्वद्रव्याणि शिवाय विनिवेदयेत्॥ २५॥

[दक्षिणा]

महेश्वरं समानीय पूर्वस्थानं समाविशेत्।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः॥ २६॥

---

[1] गब्लिकोर्ध्वे ] सं० पाठः; गणकोर्ध्वे – ई, झ.
[2] देवाग्रे ] ई ; वेदाग्रे – झ.
[3] भोजनद्रव्यं ] सं० पाठः; भोजनद्रव्यैः – अ, ई, झ.
[4] वीरार्द्रकं ] ई; वीराद्रकं - अ ; वीरद्रवं - झ.
[5] देवीगायत्रि मन्त्रेण ] अ, झ ; ०मन्त्राणि – ई.
[6] सर्वद्रव्यं निरीक्षयेत् ] अ, झ ; सर्वद्रव्याणि निक्षिपेत् – ई.
[7] तदग्रे त्वन्नपूर्णेशीं ] सं० पाठः; तदग्रेष्वन्नपूर्णेशी – अ, ई, झ.
[8] भोजनद्रव्यं देव्यै ] सं० पाठः; भोजनद्रव्यैर्द्रव्यं – अ, ई ; भोजनद्रव्यं दैव्यं – झ.
[9] धृत्वा तु ] झ; संपूज्यन्तु – अ ; पूर्वा तु – ई.
[10] परिचारकैः ] सं० पाठः; परिचारककान् – अ, ई, झ.
[11] हविष्यं ] अ; हविष्य० – ई, झ.

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ २७ १/२ ॥

॥ [१]इति सूक्ष्मशास्त्रे पाकालयविधिः चतुस्सप्ततितमः पटलः ॥

[१] इति सूक्ष्मशास्त्रे पाकालयविधिः चतुस्सप्ततितमः पटलः ] सं० पाठः; अः इति सूक्ष्मशास्त्रे पचनालयविधिष्षट्सप्ततितमः पटलः ॥; ईः इति सूक्ष्मशास्त्रे पचनालयविधिपटलः ॥; झः इति सूक्ष्मशास्त्रे पचनालयस्थापनं नाम पंचसप्ततिपटलः ॥

## [पञ्चसप्ततितमः पटलः]

## [बाललिङ्गस्थापनविधिः[१]]

[२]बालस्थापनकं वक्ष्ये [३]श्रृणु त्वं तत्प्रभञ्जन।

### [तरुणालयद्वैविध्यम्]

प्रथमं द्वितीयमेवेति [४]बालहर्म्यं द्विधा स्मृतम्॥ १॥
[५]मूलस्थानस्य [६]पूर्वं यत् प्रथमं तरुणालयम्।
[७]प्रायश्चित्तार्थकं [८]यत्तु स्थापनं तद्द्वितीयकम्॥ २॥
वाललिङ्गप्रतिष्ठान्ते मूलस्थानं प्रकल्पयेत्।
[९]विना बालगृहं यत्र कुलक्षयकरं भवेत्॥ ३॥
तस्मात्सर्वप्रयत्नेन बालगेहं प्रकल्पयेत्।

### [बालगेहस्थानम्]

प्रासादपूर्वदिग्भागे दक्षिणे चोत्तरेऽथवा॥ ४॥
ईशाने पावके वाथ बालगेहं प्रकल्पयेत्।

### [बालगेहलक्षणम्]

त्रिवेदहस्तमारभ्य हस्तैकेन [१०]विवर्धनात्॥ ५॥
[११]नवधर्मकरान्तं यद्बालगेहं विशालकम्।

---

[१] अयं पटलः अ (टि.१९१, पृ० ४०९-४१४), ई (टि.०३६, पृ० ३२८-३३४), ऋ (टि.०९७, पृ० ४७०-४७५), च (टि.९५५, पृ० ५४-५७), झ (टि.१०१६, पृ० १००-१०५) इत्येतेषु कोशेषु दृश्यते।

[२] बालस्थापनकं ] सं० पा०; बालस्थानविधिं - अ, ई, ऋ ; बालस्थापन० – च; बालस्धान - झ .

[३] श्रृणु त्वं ] अ, ई, ऋ, च; श्रृणुध्वं – झ.

[४] बालहर्म्यं द्विधा स्मृतम् ] ई; बालहर्म्यं द्विधा मतम् – अ, ऋ; बालहर्म्यविधि स्मितः – च; बालहर्म्य द्विधा स्मृतः – झ.

[५] मूल० ] ई, च, झ; बाल० – अ, ऋ.

[६] पूर्वं यत् ] अ, ई, झ; यत्पूर्वं यत् – ऋ ; पूर्वं तु – च.

[७] प्रायश्चित्तार्थकं ] अ, झ; प्रायश्चित्तादिकं – च; 'ई' मातृकायां इदमर्धं न दृश्यते।; प्र . . . .र्थकं 'ऋ'; 'अ, ऋ' मातृकयोः इदमर्धं श्लो० ३ अनन्तरं दृश्यते।

[८] यत्तु स्थापनं तद्द्वितीयकम् ] अ, ऋ; यत्तद्द्वितीयं तरुणालयम् – च; येतद्वितियं तरुणालयम् – झ.

[९] 'झ' मातृकायां श्लो० ३ऊ०-४ पू० न दृश्यते।

[१०] विवर्धनात् ] अ, ई, ऋ, झ; विवर्धयेत् – च.

[११] 'च' मातृकायां श्लो० ६ पू० स्थाने 'धनववा धर्मकारान्तं बालं तं ह विशालकम्' इत्यर्धं दृश्यते।

[1]देवबालगृहं चेत्तु [2]युगाश्रं परिकल्पयेत्॥ ६ ॥
[3]देवीनामायताश्रं वा कल्पयेत्तु यथाक्रमम्।

[बाललिङ्गलक्षणम्]

[4]रुद्राङ्गुलं समारभ्य अङ्गुलाङ्गुलवर्धनात्॥ ७॥
[5]सप्तविंशाङ्गुलं यावद्बालबिम्बोदयं भवेत्।
आयामसदृशं नाहं [6]छत्रशीर्षकसंयुतम्॥ ८॥
[7]बाललिङ्गं समापाद्य तत्तत्तालप्रमाणतः।
अश्वत्थोदुम्बरप्लक्षशमीखदिरपादपैः॥ ९॥
शैलजैर्लोहजैर्वापि बाललिङ्गं प्रकल्पयेत्।
[8]बाललिङ्गं प्रकर्तव्यं सूत्रहीनं [9]प्रकल्पयेत्॥ १०॥

[पीठलक्षणम्]

स्वयोनिं [10]कल्पयेत्पीठम् अथवा चेष्टकामयम्।
पञ्चभागे द्विभागं वा तच्चतुर्थांशमेव [11]वा॥ ११ ॥
सप्तभागे त्रिभागं वा तत्त्रिभागैकमेव वा।
पीठवेशं प्रकर्तव्यं शेषं लिङ्गोदयं भवेत्॥ १२॥
[12]लिङ्गनाहसमं तारं तारार्धं [13]पीठिकोदयम्।
[14]तारमष्टांशमाधिक्यं [15]पीठमूलविशालकम्॥ १३॥

---

[1] देववालगृहं ] अ, ई, ऋ, झ; देवालयगृहं – च.
[2] युगाश्रं] च; युग्मांशं – अ, ई, ऋ, झ.
[3] देवीनामायताश्रं ] च; वेदिमानायताश्रं० – अ, ई, ऋ; देविना० – झ.
[4] रुद्राङ्गुलं ] अ, ऋ; वेदाङ्गुलं – ई; पादाङ्गुलं – च; वेदाङ्गुल – झ.
[5] सप्तविंशा०- अ, ई, च ; .... विंशा०- ऋ ; छत्रशिर्षसं०- झ.
[6] छत्रशीर्षक० ] ऋ, झ; चित्रशीर्षक० – अ; छत्रशीर्षं च – ई; श्वकशिष्य० – च.
[7] 'अ, ई, ऋ, झ' मातृकासु श्लो० ९पू०-१०पू० भागो न दृश्यते, परं 'च' मातृकायामेव दृश्यते।
[8] 'च' मातृकायां श्लो० ९ पू० १० उ० च द्वे अर्धे विपर्यस्तक्रमेण दृश्येते।
[9] प्रकल्पयेत् ] अ, ई, ऋ, झ; विशेषतः – च.
[10] कल्पयेत्पीठम् ] अ, ऋ; कारयेत्पीठम् – ई, च, झ.
[11] वा ] अ, ई, ऋ, च; हि – झ.
[12] लिङ्गनाहसमं तारं ] च, झ; लिङ्गानां सहमन्त्राणां – अ, ई; लिङ्गानाहसमन्त्राणां – ऋ.
[13] पीठिकोदयम् ] अ, च; पीठकोदयम् – ई, झ; पीककोदयम् – ऋ .
[14] तारमष्टांश० ] अ, ऋ; तारादष्टांश० – ई, च; तारादशांशमाथिक्यम् – झ.
[15] पीठमूलविशालकम् ] अ, ई, ऋ; पीठमूले विशालकम् – च; पीठमूलसशालकम् – झ.

[1]पीठतारं त्रिभागैकं [2]गोमुखं दीर्घविस्तरम्।
[3]तत्त्रिभागैकभागेन [4]गोमुखाग्रं प्रकल्पयेत्॥ १४॥

[बाललिङ्गस्थापनम्]

[अङ्कुरार्पणं मण्डपकल्पनं च]

[5]त्रियहे वाथ [6]पञ्चाहे सप्ताहे [7]नवाहेऽथवा।
सद्योऽङ्कुरार्पणं वापि कारयेद्देशिकोत्तमः॥ १५॥
[8]बालधामाग्रके [9]कुर्यान्मण्टपं चतुरश्रकम्।
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम्॥ १६॥
चतुस्तोरणसंयुक्तं [10]दर्भमालासमावृतम्।
मण्टपं पञ्चधा भज्य [11]मध्यभागेन वेदिकाम्॥ १७॥
[12]रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम्।
[13]उपवेदिं ततः कृत्वा [14]चतुरङ्गुलतत्समम्॥ १८॥
[15]नवपञ्चैककुण्डे वा [16]स्थण्डिले वापि होमयेत्।

[मण्डपप्रतिष्ठा शयनकल्पनं च]

गोमयालेपनं [17]कृत्वा भूसुरान् भोजयेत्ततः॥ १९॥

---

[1] पीठतारं ] अ, ऋ; पीठतार० – ई; पीठाकारं – च; पीठतारा० – झ.
[2] गोमुखं ] अ, ऋ, झ; गोमुख० – ई; गोमुखाद् – च.
[3] तत्त्रिभागैकभागेन ] ई, ऋ, झ; तन्त्री० – अ; ०भागोनं – च.
[4] गोमुखाग्रं ] अ, ई, ऋ, झ; गोमुखाश्रं – च.
[5] त्रियहे ] ऋ; त्रिधाहे – अ; त्र्यहे – ई, च; त्रियाहे – झ.
[6] पञ्चाहे सप्ताहे ] झ; सप्ताहे पञ्चाहे – अ, ई, ऋ, च.
[7] नवाहेऽथवा ] सं० पा०; नवमेऽथवा - अ, ई, ऋ, च; नवहेऽपि वा – झ.
[8] बालधामाग्रके ] ई, च, झ; बालयामगृहे – अ; बालधामगृहे – ऋ.
[9] कुर्यान् ] अ, ई, ऋ, झ; वापि – च.
[10] दर्भमालासमावृतम् ] अ, ऋ; दर्भमालाभिरावृतम् – ई, च, झ.
[11] मध्यभागेन वेदिकाम् ] अ, ई, ऋ; मध्यभागे ह वेदिका – च; ०भागेन वेदिका – झ.
[12] रत्निमात्रसमुत्सेधं ] अ, ऋ, झ; अरत्निमात्रमुत्सेधं – ई, च.
[13] उपवेदिं ] अ, ऋ, झ; उपवेदीं – ई, च.
[14] चतुरङ्गुलतत्समम् ] अ, ई, ऋ, झ; ०तस्समम् – च.
[15] नवपञ्चैककुण्डे ] च; नवपञ्चैककुण्डं – अ, ई, ऋ, झ.
[16] स्थण्डिले ] अ, ई, ऋ, च; स्तण्डिलो – झ.
[17] कृत्वा ] च, झ; तत्र – अ, ई, ऋ.

वास्तुहोमं ततः कृत्वा पर्यग्निकरणं [१]चरेत्।
[२]पुण्याहप्रोक्षणं कुर्यान्मण्टपं [३]संप्रपूजयेत्॥ २०॥
[४]वेद्यूर्ध्वे स्थण्डिलं कृत्वा [५]चाष्टद्रोणैश्च शालिभिः।
[६]तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि॥ २१॥
लाजैः पुष्पैः परिस्तीर्य शयनं [७]संप्रकल्पयेत्।

[बालबिम्बस्य जलेऽधिवासनम्]

बालबिम्बं समादाय [८]जले [९]चैवाधिवासयेत्॥ २२॥
पञ्चरात्रं त्रिरात्रं वा [१०]एकरात्रमथापि वा।
[११]यामं वा चार्धयामं वा जले स्नानमथापि वा॥ २३॥
कौतुकं बन्धयेद्विद्वान् शयने [१२]चाधिवासयेत्।

[कुंम्भस्थापनम्]

नवकुम्भान् समादाय तन्तुना वेष्टयेद्बुधः॥ २४॥
क्षालयेदस्त्रमन्त्रेण जलेनैव [१३]तु पूरयेत्।
सहिरण्यं सवस्त्रं च सकूर्चं पल्लवान्वितम्॥ २५॥
[१४]कुम्भान् विन्यस्य वेद्यूर्ध्वे पूजयेद्देशिकोत्तमः।
मध्यकुम्भे शिवं यष्ट्वा वर्धन्यां च मनोन्मनीम्॥ २६॥
अभितः कलशानष्टौ [१५]विद्येशावरणान् यजेत्।

---

[१] चरेत् ] झ; नयेत् – अ, ई, ऋ; कुरु – च.
[२] पुण्याह० ] अ, ऋ, च, झ; पुण्याहं – ई.
[३] संप्रपूजयेत् ] अ, ई, ऋ, च; संप्रकल्पयेत् – झ.
[४] वेद्यूर्ध्वे ] अ, ई, ऋ, च; वेदीध्वे – झ.
[५] चाष्टद्रोणैश्च शालिभिः ] अ, ई, ऋ; चाष्टद्रोणेन शालिना – च; अष्टद्रोणैश्च शालिना – झ.
[६] तदर्धैस्तण्डुलैर्भूष्य ] अ, ई, ऋ, झ; ०स्तण्डुलैश्चापि – च.
[७] संप्रकल्पयेत् ] अ, ई, ऋ, झ; परिकल्पयेत् – च.
[८] जले ] अ, ई, ऋ, च; जलैः – झ .
[९] चैवाधिवासयेत् ] ई, ऋ, च, झ; चैवाधिसंवसेत् – अ.
[१०] एक० ] अ, ई, च, झ; सप्त० – ऋ.
[११] यामं ] ई, च, झ; याम्यं – अ, ऋ.
[१२] चाधिवासयेत् ] ई, ऋ, च, झ; चैवाधिवासयेत् – अ.
[१३] तु पूरयेत् ] अ, ई, ऋ; प्रपूरयेत् – च; तु पूजयेत् – झ.
[१४] कुम्भान् ] अ, ई, ऋ, झ; कुम्भं – च.
[१५] विद्येशावरणान् यजेत् ] अ, ई, ऋ; विद्येशावरणं न्यसेत् – च; विद्येशावरिणान् यजेत् – झ.

ऋग्यजुस्सामवेदैश्च जपं संकल्पयेद् [1]गुरुः ॥ २७ ॥

[अग्निकार्यम्]

[2]शिवाग्नियजनं कुर्यात् [3]समिदाज्यान्नलाजकैः ।
माषशालितिलैर्विद्वान् हुत्वा [4]सद्याच्छिरोऽन्तकम् ॥ २८ ॥
[5]खादिरं बिल्वमश्वत्थं पलाशं [6]वह्निशाखिकम् ।
[7]पूर्वादिषु चतुर्दिक्षु समिद्धोमं प्रकल्पयेत् ॥ २९ ॥
आग्नेय्यां [8]वटवृक्षं स्यान् [9]नैर्ऋते [10]प्लक्षशाखया ।
औदुम्बरं वायुदेशे [11]त्वर्कमीशानगोचरे ॥ ३० ॥
[12]औदुम्बरसमिद्भिर्वा [13]सर्वहोमं समाचरेत् ।
[14]द्रव्यं प्रति विशेषेण [15]स्पर्शाहुतिमथाचरेत् ॥ ३१ ॥
सर्वद्रव्यैः [16]सकृद्धुत्वा [17]हव्यवाहेन मन्त्रतः ।

[परेद्युःक्रिया]

रात्रौ जागरणं कुर्यात् प्रभाते स्नानमाचरेत् ॥ ३२ ॥
तोरणान् कलशान् कुम्भान् [18]यजेत्पूर्वोक्तवर्त्मना ।

---

[1] गुरुः ] अ, ई, ऋ, झ; सुधीः – च.
[2] शिवाग्नियजनं ] अ, ई, ऋ, झ; शिवाधियजनं – च.
[3] समिदाज्यान्न० ] ई, ऋ, च, झ; समिदाज्यान्त० – अ.
[4] सद्याच्छिरो० ] ई, ऋ, च, झ; सद्यःशिरो० – अ.
[5] खादिरं ] अ, ई, च, झ; खदिरं – ऋ.
[6] वह्निशाखिकम् ] अ, ई, ऋ; वह्निशाखिनम् – च; वह्निशालिकम् – झ.
[7] पूर्वादिषु ] अ, ई, च; पूर्वादीनि – ऋ; पूर्वादिनि – झ.
[8] वटवृक्षं स्यान् ] अ, ई, ऋ, झ; पदपृक्षं च – च.
[9] नैर्ऋते ] अ, ऋ, च, झ; नैर्ऋत्यां – ई.
[10] प्लक्षशाखया ] अ, ई, झ; प्लक्षशाखिनः – ऋ; प्लक्षशालिभिः – च.
[11] त्वर्क० ] अ, ई, ऋ, झ; अर्क० – च.
[12] औदुम्बर० ] ई, ऋ, च, झ; ओदुम्बर० – अ.
[13] सर्व० ] ई, च, झ; सर्प० – अ; सर्वहि# – ऋ.
[14] द्रव्यं प्रति ] ई; पूतिद्रव्यं – अ; प्रतिद्रव्यं – ऋ, च, झ.
[15] स्पर्शाहुतिमथाचरेत् ] अ, ई, ऋ , च; ०हुति समाचरेत् – झ.
[16] सकृद्धुत्वा ] अ, ई, ऋ, झ; ततो हुत्वा – च.
[17] हव्यवाहेन ] अ, ऋ; हव्यवाहेति – ई, च, झ.
[18] यजेत्पूर्वोक्तवर्त्मना ] अ, ऋ; यजेत्तु पूर्ववर्त्मना – ई; पूजयेत्पूर्ववर्त्मना – च; अर्चयेत्पूर्ववन्मना – झ.

अग्निमभ्यर्च्य गन्धाद्यैः हुत्वा [१]चित्तादिमन्त्रतः ॥ ३३ ॥
[२]यदस्येति च मन्त्रेण पूर्णाहुतिमथाचरेत्।

[प्रदक्षिणम्]

शङ्खध्वनिसमायुक्तं ब्रह्मघोषसमन्वितम् ॥ ३४ ॥
[३]छत्रचामरसंयुक्तं वाद्यध्वनिसमन्वितम्।
बालबिम्बसमोपेतं प्रदक्षिणमथाचरेत् ॥ ३५ ॥

[बालगर्भगृहे बालमूर्तिस्थापनम्]

बालगर्भगृहं गत्वा पुण्याहं वाचयेत् [४]ततः।
[५]मुहूर्ते समनुप्राप्ते स्थापयेद् [६]बालमूर्तिनम् ॥ ३६ ॥
अष्टबन्धं त्रिबन्धं वा योजयेत्पीठरन्ध्रके।

[कुम्भाल्लिङ्गमध्ये देवस्थापनम्]

शिवकुम्भं समादाय कृत्वा धामप्रदक्षिणम् ॥ ३७ ॥
विन्यस्य बालबिम्बाग्रे [७]स्थण्डिलोर्ध्वे विचक्षणः।
मन्त्रन्यासं ततः कृत्वा [८]चलमार्गेण मन्त्रवित् ॥ ३८ ॥
[९]कुम्भाद्देवं समादाय लिङ्गमध्ये [१०]सुयोजयेत्।

[शिवपूजा]

कुम्भोदकेन संस्नाप्य पायसान्नं निवेदयेत् ॥ ३९ ॥
स्थापितैः सर्वकलशैरभिषिच्येन्दुशेखरम्।
[११]नैवेद्यं दापयेद्विद्वान् पानीयाचमनं ददेत् ॥ ४० ॥
पीठान्तं वा वृषान्तं वा बलिदानं समाचरेत्।

---

[१] चित्तादि० ] अ, ऋ, झ; चित्रादि० – ई, च.
[२] यदस्येति च ] अ, ऋ, च; यदस्य कर्म० – ई; यद्देवस्य च – झ.
[३]'च' मातृकायां 'श्लो०'३५ पू०' न दृश्यते।
[४] ततः ] अ, ई, ऋ; बुधः – च, झ.
[५] मुहूर्ते समनुप्राप्ते ] अ, ऋ, झ; सुमुहूर्ते समनुप्राप्ते – ई; सुमुहूर्ते च संप्राप्ते – च.
[६] बालमूर्तिनम् ] ई, ऋ, च, झ; बालमूर्तिकम् – अ.
[७] स्थण्डिलोर्ध्वे ] ई, च; स्थण्डिलाग्रे – अ, ऋ, झ.
[८] चल० ] ई, ऋ, च, झ; द्वाल० – अ.
[९] कुम्भाद्देवं ] ई, ऋ, च, झ; कुम्भदेवं – अ.
[१०] सुयोजयेत् ] सं० पा०; प्रकल्पयेत्-अ, ई, ऋ, च, झ.
[११] नैवेद्यं दापयेद्विद्वान् ] अ, ई, ऋ, झ; नैवेद्यं च ततो दत्त्वा – च.

धूपदीपं ततो दत्वा ताम्बूलं दापयेद् [1]बुधः ॥ ४१ ॥

[बाललिङ्गप्रोक्षणम्]

नृत्तगीतादिभिस्तोष्य प्रणम्य [2]परमेश्वरम्।
धरातलसमाप्ते [3]वा [4]चोत्तरावधिकेऽपि वा ॥ ४२ ॥
[5]असमाप्तालये [6]वापि प्रोक्षणं सम्यगाचरेत्।
बाललिङ्गविधिस्त्वेवं [7]बालदेवीविधिं शृणु ॥ ४३ ॥

[बालदेवीविधिः]

[8]देवोक्तमखिलं [9]कर्म देव्याश्चापि समाचरेत्।
मन्त्रभेदो भवेदत्र [10]क्रियाभेदो न विद्यते ॥ ४४ ॥
[11]कामकोष्ठाग्रके [12]वापि दक्षिणे चोत्तरे ऽपि वा।
ईशे वा पश्चिमे वापि [13]गौरीबालगृहं भवेत् ॥ ४५ ॥
देवबालगृहे वापि स्थापयेद्बालरूपिणीम्।
संपूज्य शिवपूजान्ते बलिहोमादिकं विना ॥ ४६ ॥
पृथग्बालगृहं चेत्तु देवपूजोक्तमार्गतः।
समभ्यर्च्य [14]महादेवीमन्त्रेणैव तु देशिकः ॥ ४७ ॥
[15]कोष्ठाधारावसाने वा उत्तरारोपणान्तके।

---

[1] बुधः ] अ, ई, ऋ, झ; ततः – च.
[2] परमेश्वरम् ] ई, च, झ; समहेश्वरम् – अ; महेश्वरम् – ऋ.
[3] वा ] अ, ई, च, झ; तु – ऋ.
[4] चोत्तराविधिकोऽपि वा ] ई, ऋ, च; चोत्तरे वाध्वकेऽपि वा – अ; चोत्तरा वा कोऽपि वा – झ.
[5] असमाप्तालये ] अ, ऋ; आसमाप्तालये – च, झ; अण्डमाप्तालये – ई.
[6] वापि ] अ, ई, ऋ, झ; वाथ – च.
[7] बालदेवीविधिं ] ई, ऋ; बालदेविविधिं – अ; बालदेवी यथा – च; बालदेविविधि – झ.
[8] 'अ, ऋ' मातृकयोः श्लो० ४४ पू० न दृश्यते।
[9] कर्म ] ई, झ; धीमान् – च.
[10] क्रिया० ] अ, ऋ, च, झ; वाक्य० – ई.
[11] कामकोष्ठाग्रके ] ई, च, झ; कामकोष्ठाश्रके – अ, ऋ.
[12] वापि ] अ, ई, ऋ, झ; वाथ – च.
[13] गौरीबालगृहं ] ई, ऋ, च; गौरिबालगृणा – अ; गौरिबालगृहं – झ.
[14] महादेवीमन्त्रेणैव ] ई; महादेवीं० – अ. ऋ , च ; महादेवि० – झ.
[15] कोष्ठाधारावसाने ] सं० पाठः; कोष्ठधामवसाने - च; क्रोधारोवावसाने – अ, ई; क्रोथारा च वसाने – झ; क्रोधारोवा . . . .- ऋ.

[1]मूर्धेष्टकावसाने वा प्रोक्षणं सम्यगाचरेत्॥४८॥

[देवतरुणालये देवीप्रतिष्ठा]

[2]किञ्चिदस्मिन् विशेषोऽस्ति शृणु त्वं तत्प्रभञ्जन।
[3]देवीबालप्रतिष्ठा चेद्देवस्य तरुणालये॥४९॥
[4]देवालयं [5]समासाद्य गौरीं संस्थापयेद्बुधः।
[6]शिवसंप्रोक्षणं कृत्वा [7]ततः कल्याणमाचरेत्॥५०॥

[देवीस्वतन्त्रालयकृत्यानि]

गौरीसंस्थापनात्पूर्वं शिवसंप्रोक्षणं भवेत्।
[8]तदा [9]बालालयाद् गौरीं समाकृष्य शिवालये॥५१॥
देवाग्रे मण्टपे त्वीशे नैर्ऋते वायुगोचरे।
दक्षिणे चोत्तरे स्थाप्य [10]पूर्वमार्गेण देशिकः॥५२॥
प्रदक्षिणं जले [11]वासं [12]नयनोन्मीलनं क्रमात्।
[13]अङ्कुरं कौतुकं चैव स्पर्शनं कौतुकं विना॥
देव्यग्रे स्थण्डिलं कृत्वा शिवाग्निं विधिना नयेत्।
गौरीमावाह्य तन्मध्ये मूलेनैव [14]शतं हुनेत्॥५३॥
अघोरेण शतं हुत्वा समिदाज्येन देशिकः।
होमान्ते स्थापयेद्गौरीं [15]पूजयेत् पूर्ववर्त्मना॥५४॥

---

[1] मूर्धेष्टका० ] ई, ऋ; ऊर्ध्वेष्टका० – अ; मूध्नीष्टका० – च; मूध्नेष्टक० – झ.
[2] किञ्चिदस्मिन् ] अ, च, झ; किञ्चिदस्य – ई; किञ्चिदत्र – ऋ.
[3] देवी० ] अ, ई, ऋ; देव० – च; देवि० – झ.
[4] देवालयं ] अ, ई, झ; देव्यालयं – च; 'ऋ' मातृकायां हृ सम्।
[5] समासाद्य ] अ, ई; समापाद्य - ऋ, च, झ.
[6] शिव० ] ई, ऋ, च; शिवं – अ, झ.
[7] ततः ] अ, ई, ऋ, झ; पश्चात् – च.
[8] तदा ] अ, ऋ, च, झ; ततो – ई.
[9] बालालयाद् ] सं० पा०; बालालये-अ,ई,ऋ,च,झ.
[10] पूर्वमार्गेण ] अ, ई, च; पूर्वमार्गे च – ऋ; सर्वमार्गेण – झ.
[11] वासं ] अ, ई, ऋ; वामे – च, वापि – झ;
[12] नयनोन्मीलनं क्रमात् ] ऋ, च; नयनोन्मीलनक्रमम् – अ; नयनोन्मीलनं क्रमम् – ई; नयिनोन्मिलनं कुरु – झ;
[13] अङ्कुरं कौतुकं चैव ] ई, च; अङ्कुरार्पणकं चैव – अ; अङ्कुरं कौतुकैश्चैव – झ. 'ऋ' मातृकायां हृ सम्।
[14] शतं हुनेत् ] अ, ई, ऋ, झ; शताहुतिम् – च.
[15] पूजयेत् ] च, झ; घटे तु – ई; 'अ, ऋ' मातृकयोर्हृ सम्।

[1]देव्यालये समाप्ते तु प्रोक्षणं सम्यगाचरेत्।
पूजयित्वा विधानेन पश्चात् कल्याणमाचरेत्॥५५॥

॥इति सूक्ष्मशास्त्रे बाललिङ्गस्थापनविधिः पञ्चसप्ततितमः पटलः[2]॥

---

[1] देव्यालये ] अ, ऋ, झ; देवालय० – ई; देव्यालयं – च.

[2] इति सूक्ष्मशास्त्रे बाललिङ्गस्थापनविधिः पञ्चसप्ततितमः पटलः ] सं० पाठः; अ, ऋ: इति सूक्ष्मशास्त्रे बाललिङ्गस्थापनविधिः सप्तसप्ततितमः पटलः॥;ई: इति सूक्ष्मशास्त्रे बाललिङ्गस्थापनविधिपटलः॥; च: इति सूक्ष्मशास्त्रे क्रियापादे बालस्थापनविधिपटलः॥;झ: इति सूक्ष्मशास्त्रे बाललिङ्गस्थापनविधिं नाम षड्सप्ततिपटलः॥

## [षट्सप्ततितमः पटलः[१]]

## [पञ्चगोचरमूर्तिविधिः]

[२]पञ्चगोचरमूर्तेस्तु चार्चनं वक्ष्यतेऽधुना।

### [पञ्चगोचरमूर्त्यर्चनफलम्]

आयुःप्रदं च पुष्टिं च श्रीकरं च यशस्करम्॥ १॥
[३]सदेशं मोक्षकामार्थं [४]धनार्थं विष्णुपूजनम्।
[५]दुर्गां शत्रुजयार्थं च विघ्नेशं पुत्रकामदम्॥ २॥
कान्तिदं स्कन्दपूजा च [६]पञ्चमूर्तिं सदार्चयेत्।
[७]एतेषां पञ्चबेराणां प्रधानं च महेश्वरम्॥ ३॥

### [पञ्चगोचरमूर्त्यर्चनद्वैविध्यम्]

[८]स्वतन्त्रं परतन्त्रं च [९]द्विविधं चेति कीर्तितम्।
ग्रामे वा नगरे वापि पत्तने राजधानिके॥ ४॥
खर्वटे कुब्जके चैव पर्वते च मनोरमे।
[१०]आपणे वाथ [११]नद्यां वा [१२]वनमध्ये चतुष्पथे॥ ५॥
[१३]स्थापयेत् [१४]पञ्चमूर्तिं [१]वै सर्वप्राणिहितावहम्।

---

[१] अयं पटलः अ (टि.१९१, पृ० ४१५), ई (टि.३६, पृ० ३३४), च (टि.९५५, पृ० १५१-१५४), झ (टि. १०१६, पृ० १०५-१०९) इत्येतेषु कोशेषु दृश्यते। 'अ, ई' मातृकयोः १ पू०-२ पू० भाग एव वर्तते, पटलशेषो न विद्यते। अयं पटलः अंशुमदागमेऽपि दृश्यते। अंशु० १ (टि.१५८, पृ० १-३, पृ० १२-१५,); अंशु० २ (टि.९५७, पृ० १५४-१५८); अंशु० ३ (टि.२७३, पृ० ४३७-४४५)।
[२] पञ्चगोचरमूर्तेस्तु चार्चनं ] ई, च; ०मूर्ते सकृद्वार्तनं – अ ; ०मूर्तेस्तु स्थापनं – झ.
[३] सदेशं ] अ, ई, झ; सदेशे – च.
[४] धनार्थं ] सं० पाठः दानार्थं – अ, ई, च, झ.
[५] दुर्गां शत्रुजयार्थं ] च; दुर्गशत्रुजयार्थं – झ.
[६] पञ्चमूर्तिं सदार्चयेत् ] च; ०मूर्ति सहर्चयेत् – झ.
[७] एतेषां ] च; तेषां – झ.
[८] स्वतन्त्रं ] च; स्वतन्त्र० – झ.
[९] द्विविधं ] झ; विविधं – च.
[१०] आपणे ] झ; कुपने – च.
[११] नद्यां ] सं० पाठः; नन्द्यां – च, झ.
[१२] वनमध्ये ] च; वनमध्य० – झ.
[१३] स्थापयेत् ] च; स्धापयेत् – झ.
[१४] पञ्चमूर्तिं ] झ; पञ्चमूर्त्यां – च.

[2]पौराण्यायतने चैव [3]पञ्चमूर्तिप्रतिष्ठितम्॥ ६ ॥
एवं प्रतिष्ठितं कुर्यात् [4]सर्वकामफलप्रदम्।
[5]स्वतन्त्रमिति विख्यातं [6]परतन्त्रं गृहार्चनम् ॥ ७ ॥
[7]परतन्त्रे विशेषेण विष्णुमूर्तिं तथार्चयेत्।

[पञ्चगोचरमूर्त्यर्चनम्]

[-महेशस्य विष्णोश्च पूजा]

[8]पूर्वास्यस्तु महेशश्च [9]तस्याग्रे स्नानबेरकम्॥ ८ ॥
[10]पश्चिमास्यो [11]महाविष्णुः सव्ये [12]मार्कण्डेयः स्थितः।
[13]विष्णुवामे तु भूशक्तिः [14]अञ्जलिकरसंयुता॥ ९ ॥
तस्याग्रे स्नानबेरं[15]च शास्त्रोक्तविधिना [16]बुधः।
परिवाराष्टकं चैव द्वारदेवान् [17]प्रपूजयेत्॥ १० ॥
[18]उभयोरर्चनस्थाने [19]आदिशैवः सुपूजयेत्।

---

[1] वै ] सं० पाठः; च – च, झ.
[2] पौराण्यायतने ] सं० पाठः वारण्यायतनं – च; प राण्यायतननं – झ.
[3] पञ्चमूर्ति० ] सं० पाठः; सर्वदेव० – च, झ.
[4] सर्वकामफलप्रदम् ] च; ०काम्य० – झ.
[5] स्वतन्त्र० ] च; . . . . तन्त्र० – झ.
[6] परतन्त्रं ] च; परतत्रं – झ.
[7] परतन्त्रे – झ; परतन्त्रैर् – च.
[8] पूर्वास्यस्तु महेशश्च ] सं० पाठः ; तस्यार्धस्तु महेशं च – च; सर्वास्यस्तु महेशं च – झ; पूर्वास्थमामदेशं च –
[9] तस्याग्रे ] सं० पाठः तस्यास्ते – झ; तस्यार्धे – च.
[10] पश्चिमास्यो ] सं० पाठः पश्चिमे सो – च, झ.
[11] महाविष्णुः ] च; ०विष्णु – झ.
[12] मार्कण्डेयः स्थितः] सं० पाठः; माण्डेयसंस्थिताः – च; माण्डेयसंस्घितः – झ;
[13] विष्णुवामे तु भू०] सं० पाठः विद्यानन्मभूत० – झ; विद्यानमक्षु० – च.
[14] अञ्जलिकरसंयुता ] झ; ०संयुतः – च.
[15] च शास्त्रोक्तविधिना ] सं० पाठः तु यावच्छास्त्रार्चनं – झ; यावच्छास्तार्चनं – च.
[16] बुधः ] च; बुध – झ.
[17] प्र० ] सं० पाठः स – च, झ.
[18] उभयोरर्चनस्थाने ] सं० पाठः; शुभयार्चनया स्थाने– च; ०स्धाने - झ.
[19] आदिशैवः ] च; आदिशैव – झ.

[-दुर्गादेवीपूजा]

[1]तथैव [2]चोत्तराग्रं स्याद् [3]दुर्गादेव्यर्चनं तथा॥ ११॥
[4]शिवकुमारसहिता [5]देवी सव्यापसव्यके।
[6]तद्बेरं चित्रबेरं चेत् तस्याग्रे स्नानबेरकम्॥ १२॥
[7]महिषासुरमूर्धस्था [8]सिंहारूढाथवा भवेत्।
तत्तत्तन्त्रोक्तमार्गेण तत्तदर्चनमाचरेत्॥ १३॥

[-स्कन्दपूजा]

[9]दुर्गास्थानस्य सव्ये तु स्थापनं स्कन्दमूर्तिनः।
स्कन्दं कल्याणमूर्तिं च स्थापयेद् [10]विधिना सह॥ १४॥
[11]अञ्जलिकरदेव्या च [12]कुक्कुटासनसंस्थितम्।
[13]देव्याश्च वामपार्श्वे तु [14]ब्रह्मस्थानं सुसंस्थितम्॥ १५॥
स्कन्दस्य दक्षिणे पार्श्वे नारदं [15]सहितं तु वै।
[16]सर्वदेवावृतं चैव [17]सिद्धविद्यार्थकिन्नरैः॥ १६॥
यावत्पूजोपचारेण [18]तावत् पूजां समाचरेत्।

---

[1] तथैव ] सं० पाठः अथवा – च, झ.
[2] चोत्तराग्रं ] च; चोत्तरोग्रं – झ.
[3] दुर्गादेव्यर्चनं ] सं० पाठः; दुर्गान्देव्यार्चनं – च; दुर्गादेव्यार्चना – झ.
[4] शिवकुमारसहिता ] सं० पाठः; सनत्कुमारसहितौ – च, झ.
[5] देवी ] झ; देवि० – च.
[6] तद्बेरं ] च; तद्बेरा – झ.
[7] महिषासुरमूर्धस्था ] सं० पाठः; ०मूर्भ्रस्था – च; ०मूर्ध्वास्धा – झ.
[8] सिंहारूढाथवा ] सं० पाठः; सिंहासनं तथा – च; सिंहारूढान्तथा – झ.
[9] 'झ' मातृकायां श्लो०'१४ पू०-१५ पू०' भागो न विद्यते।
[10] विधिना = ब्रह्मणा
[11] अञ्जलिकरदेव्या ] सं० पाठः; अञ्जलिकरदेवी – च,झ.
[12] कुक्कुटासनसंस्थितम् ] सं० पाठः कुक्कुटान्तं समाचरेत् – च,झ; सिंहासनम् – च.
[13] देव्याश्च ] सं० पाठः; तं देव्या – च,झ.
[14] ब्रह्मस्थानं सुसंस्थितम् ] च; ब्रह्मस्धानं सुसंस्धितम् – झ.
[15] सहितं तु ] सं० पाठः; सहिताय – च; सहताय – झ.
[16] सर्वदेवावृतं ] च; सर्वदेववृतं – झ.
[17] सिद्धविद्यार्थकिन्नरैः ] च; ०कं नरैः – झ.
[18] तावत् ] च; यावत् – झ.

[-गणाधीशपूजा]

[1]दुर्गालयस्य वामे तु [2]गणाधीशं प्रतिष्ठितम्॥ १७॥
[3]सर्वदेवावृतं चैव [4]मुनिगन्धर्वसेवितम्।
[5]पुरोक्तपूजाविधिना विघ्नेशं पूजयेद्बुधः॥ १८॥

[सदेशस्य विष्णोश्चार्चनम्]

प्रधानं कारयेद्धीमान् सदेशं तु विशेषतः।
देवाग्रे मण्डपं कल्प्य द्वारबेरादिदेवताः॥ १९॥
[6]तद्बिम्बं द्विविधं प्रोक्तं केवलं सहजं स्मृतम्।
[7]केवले च त्रिबेरं स्यात् सहजं पञ्चबेरकम्॥ २०॥
पञ्चावरणसंयुक्तमर्चयेत्तु सदाशिवम्।
विष्णुं संपूजयेद्विद्वान् गर्भावरणसंयुतम्॥ २१॥
[8]अच्युतोऽनन्तमूर्तिस्तु [9]चक्रपाणिर्जनार्दनः।
[10]पुरुषश्च पुरुष्टुच्च गोविन्दो वित्तनायकः॥ २२॥
यावत्तन्त्रेषु [11]पूजायाम् [12]आदिशैवः सुपूजयेत्।

[दुर्गादेव्याद्यर्चनम्]

[13]दुर्गादेवीं समभ्यर्च्य आवृतैकसमन्विताम्॥ २३॥
[14][अणिमा महिमा चैव गरीमा लघिमा तथा।
ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च॥ २४॥

---

[1] दुर्गालयस्य ] च; दुर्गालयं तु – झ.
[2] गणाधीशं ] च; गणाथिशं – झ.
[3] सर्वदेवावृतं ] च; सर्वदेव व्रतं – झ.
[4] मुनिगन्धर्वसेवितम् ] झ; सिद्धविद्यार्थकिन्नारैः – च.
[5] पुरोक्तपूजाविधिना] सं०पाठः पूजां चैव पुरा कृत्वा – च, झ;
[6] तद्बिम्बं द्विविधं ] च; यद्बिम्बद्विधं – झ.
[7] केवले च त्रिबेरं स्यात् सहजं पञ्चबेरकम् ] च; केवलं चेतकुबेरस्य सहजं बहुबेरकम् – झ.
[8] अच्युतोऽनन्त० ] च; अच्युतानन्द० – झ.
[9] चक्रपाणिर्जनार्दनः ] च; ०जनार्दनम् – झ.
[10] पुरुषश्च पुरुष्टुच्च ] सं० पाठः; पुरुषः पुरिष्टुतं – च; पुरुषः पुरुष्टुं – झ.
[11] पूजायाम् ] च; पूजायेम् – झ.
[12] आदिशैवः ] झ; आदिशैवैः – च.
[13] दुर्गादेवीं ] च; दुर्गदेवी – झ.
[14] सूक्ष्मागमस्य मातृकासु श्लो० २४-२६ भागो न विद्यते। अतोऽयं भागः अंशुमदागमस्य कोशेभ्यो गृहीतः।

विघ्नेशं पूजयेद् विद्वान् एकावरणसंयुतम्।
सुमुखं चैकदन्तं च कपिलो गजकर्णकः॥ २५॥
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः।
स्कन्दं सुपूजयेद्विवान् परिवाराष्टकं यजेत्]॥ २६॥
[1]षण्मुखः शक्तिपाणिश्च [2]कार्त्तिकेयो गुहस्तथा।
[3]स्कन्दो मयूरवाहश्च [4]सेनानीस्तु विशाखकः॥ २७॥
महामर्यादितत्स्थाने [5]पार्श्वे लक्ष्मीश्च मातृकाः।
[6]मण्डपे वामपार्श्वे तु भूतेशीं सम्यगर्चयेत्॥ २८॥
[7]तद्देवीं परितः कुर्यात् [8]सर्वदेवानुकूलकाः।
पौराण्यायतनं चैव सर्वबेरप्रतिष्ठितम्॥ २९॥
तत्पार्श्वे पश्चिमे देशे कामकोष्ठं स्वतन्त्रकम्।

[बलिदानादि]

प्रथमावरणे बाह्ये [9]द्वारभूतद्विपार्श्वके॥ ३०॥
[10]अण्डाभरणनाम्नाथ द्वारभूतबलिं ददेत्।
[11]चतुष्प्रस्थं तण्डुलं तु [12]पिष्टमोदकभोज्यकम्॥ ३१॥
भूतस्य सव्यपार्श्वे तु [13]ज्वरदेवेश्वरस्ततः।
[14]तद्बाह्ये मालिकावामे ज्येष्ठां चैवार्चयेद्बुधः॥ ३२॥

---

[1] षण्मुखः ] च; षणुखं – झ.
[2] कार्त्तिकेयो ] सं० पाठः; कार्तिकेयो – च; कार्तिकेय – झ.
[3] स्कन्दो ] च; +न्दो – झ.
[4] सेनानीस्तु ] सं० पाठः; सेनानिस्तु – च; सेनानि तु – झ.
[5] पार्श्वे लक्ष्मीश्च मातृकाः ] च; पार्श्वेलक्षिश्च मात्रका – झ.
[6] मण्डपे वामपार्श्वे तु भूतेशीं सम्यगर्चयेत् ] च; तमण्डपे वामपार्श्वे दुगदेशि समर्चयेत् – झ.
[7] तद्देवीं ] च; तद्देवि० – झ.
[8] सर्वदेवानुकूलकाः ] सं० पाठः; सदेवानुमूलतः-च;सेदवानुकूलकाः-झ
[9] द्वारभूतद्वि० ] झ; द्वारभूतापि० – च.
[10] अण्डाभरणनाम्नाथ ] सं० पाठः; अण्डावरणनाम्नाथ – च; अण्डावरणनाम्नाय – झ.
[11] चतुर्प्रस्थं तण्डुलम् ] च; चतुर्भिस्थण्डुलं – झ.
[12] पिष्टमदेक० ] सं० पाठः; पिष्टं मोदकं - च; पिष्टमदेकं – झ.
[13] ज्वरदेवेश्वरस्ततः ] झ; ज्वरदेवेश्वरस्तथा – च; ज्वरदेवं तु पूजयेत् – अंशु० १, २.
[14] तद्बाह्ये ] झ; तत्पार्श्वे – च.

[शिवार्चनविधिः]

एवमभ्यर्चयेद्धीमान् प्रधानं तु सदाशिवम्।
शिवार्चनविधानेन तत्पूजाबलिदानकम्॥ ३३॥
नित्योत्सवादिकं सर्वम् उत्सवं [1]चान्यकर्म च।
शिवप्रधानकं कुर्याद्

[उत्सवः]

उत्सवे च विशेषतः॥ ३४॥
महेशं विष्णुमूर्तिं च स्कन्दमूर्तिं विनायकम्।
दुर्गादेवीं च सर्वेषां यानं कुर्याद्दिनं प्रति॥ ३५॥
अन्याश्च देवता यानं शिवोत्सवविधानवत्।

[शिवधामवृत्तिमूर्तिविशेषः]

अत्र किञ्चिद्विशेषोऽस्ति [2]धामवृत्तिप्रतिष्ठितम्॥ ३६॥
स्कन्दं च पूर्वदिग्भागे विघ्नेशं दक्षिणे [3]दिशि।
माधवं पश्चिमे देशे [4]दुर्गादेवीं तथोत्तरे॥ ३७॥
[5]मयूरं मूषिकं तार्क्ष्यं मृगम् [6]अग्न्यादिकोणके।
देवाग्रे वृषभं स्थाप्य ध्वजदण्डं [7]विधीयते॥ ३८॥
प्रधानमेकं [8]दण्डं तु दण्डाग्रे पञ्चमध्वजम्।
मध्ये उक्षध्वजं चैव दिक्षु चान्यध्वजं तथा॥ ३९॥

[संघट्टधामविशेषः]

[9]स्थानसंघटधामेषु किञ्चिद्भेदं शिवार्चनम्।
यत्र देशे विशालं स्यात्तद्देशे मुखमण्डपम्॥ ४०॥

---

[1] चान्यकर्म च ] झ; सान्यकर्म च – च.
[2] धामवृत्ति° ] च; धाममूर्ति° – झ.
[3] दिशि ] झ; तथा – च.
[4] दुर्गादेवीं ] च; दुर्गादेवि – झ.
[5] मयूरं मूषिकं तार्क्ष्यं ] सं° पाठः; मयूरमूषिकास्तार्क्ष्य° – च; मयूरमोषिकास्त्याक्ष्य° – झ.
[6] अग्न्यादि° ] झ; मन्वादि° – च.
[7] विधीयते ] च; विधियते – झ.
[8] °दण्डं ] झ; °दण्डे – च.
[9] स्थानसंघटधामेषु ] च; स्थानं संकट° – झ.

मालिकायास्तु परितः कल्पयेत्तस्य मध्यमे।

[पुनर्बलिदानम्]

वृषादिबलिपीठं च कल्पयेत्परितः क्रमात्॥ ४१॥
उक्षं च [1]भानुं मातृश्च हस्तिवक्त्रं तथैव च।
[2]स्कन्दज्येष्ठादुर्गाणां च क्षेत्रपालबलिं ददेत्॥ ४२॥
[3]सव्यं चाप्यपसव्यं च [4]परिवारबलिं ददेत्।
प्रथमावरणं कृत्वा द्वितीयवरणे ददेत्॥ ४३॥
इन्द्रादिलोकपालांश्च प्रासादावरणं न्यसेत्। [5]
[6]दण्डाग्रे तु महापीठं कल्पयेद्देशिकोत्तमः॥ ४४॥
निर्गमद्वार[7]देशे तु नन्दि[8]कालबलिं ददेत्।
[9]बाह्यद्वारे विशेषं तु द्वारभूतबलिं ददेत्॥ ४५॥
वृषभादिबलिं दद्यात् [10]पीठबाह्यप्रदक्षिणम्।
[11]महापीठे बलिं दद्याद्बल्यन्ते तु प्रदक्षिणम्॥ ४६॥
बलिपीठस्य बाह्ये तु [12]द्वितीयभ्रमणं कुरु।
गीतनृत्तादिकं सर्वं तृतीयभ्रमणे [13]बुधः॥ ४७॥
अन्यत्सर्वोपचाराणि शिवपूजाविधानवत्।

---

[1] भानुं मातृश्च ] सं० पाठः; भानुमात्रं च – च, झ.
[2] स्कन्दज्येष्ठादुर्गाणां च ] सं० पाठः; स्कन्दज्येष्ठा च मरीणां – च, झ.
[3] सव्यं चाप्यपसव्यं ] च; अपस्य व्यापसव्यं – झ.
[4] परिवारबलिं ] झ; सर्वत्रपिबलिं – च.
[5] 'च' मातृकायां श्लो० ३९ उ० श्लो० ४४ पू०-४४ उ० मध्ये पुनर्दृश्यते।
[6] दण्डाग्रे ] च; मध्यमे – झ.
[7] ०देशे तु ] च; ०देवानां – झ.
[8] ०काल० ] च; ०कालो – झ.
[9] 'च' मातृकायां श्लो० ४६ पू० न विद्यते।
[10] पीठबाह्य० ] झ.; पीठयन्ते च – च.
[11] 'च' मातृकायां श्लो० ४७ उ० न विद्यते।
[12] द्वितीय० ] च; त्रितय० – झ.
[13] बुधः ] झ; ततः – च.

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्॥ ४८॥

॥ [1]इति सूक्ष्मशास्त्रे पञ्चगोचरविधिः षट्सप्ततितमः पटलः॥

---

[1]इति सूक्ष्मशास्त्रे पञ्चगोचरविधिः षट्सप्ततितमः पटलः] सं० पाठः; च: इति सूक्ष्मागमे क्रियापादे पञ्चगोचारमूर्तिस्थापनविधिपटलः॥; झ: इति सूक्ष्मशास्त्रे पञ्चगोचारविधिं नाम षट्सप्ततिपटलः॥

## [सप्तसप्ततितमः पटलः]

### मठप्रतिष्ठाविधिः[1]

...[2]

[मण्डपे कार्यम्]

...

[3]लाजैः पुष्पैश्च दर्भैश्च विकिरेत्तु विशेषतः ।
तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् ॥ १ ॥
ससूत्रान् सापिधानांश्च वस्त्रयुग्मेन वेष्टितान् ।
फलपल्लवसंयुक्तान् स्वर्णरत्नादिगर्भितान् ॥ २ ॥
नवकुम्भान् संस्थाप्य मध्यकुम्भे शिवं यजेत् ।
पूजां पूर्वोक्तवद्धीमान् गन्धादिभिर्यथाक्रमम् ॥ ३ ॥
विद्येशान् परितो यष्ट्वा पूर्वादीशान्तकं क्रमात् ।
गन्धपुष्पैश्च धूपैश्च नैवेद्याद्यैः प्रपूजयेत् ॥ ४ ॥
तोरणं द्वारकुम्भांश्च यागपूजां समाप्य च ।
आचार्यसाधकादीनां दापयेद्वस्त्रभूषणम् ॥ ५ ॥

[मठे प्रवेशः फलद्रव्यादीनां स्थापनं च]

मठं प्रवेशयेद्धीमान् मठस्योत्तरदेशके ।
मातुद्द ङ्गद्वयं नालिकेरस्य फलसंयुतम् ॥ ६ ॥
बदरामलवार्ताकान् कपित्थं चूतजं फलम् ।
नारङ्गद्वयसंयुक्तं पनसं कदलीफलम् ॥ ७ ॥
बदरी लिकुचं धात्रीफलं चम्पकपुष्पकम् ।
रजनी क्रमुकं चैव तोयेन क्षाल्य स्थापयेत् ॥ ८ ॥
सर्वैश्वर्यसमृद्ध्यर्थं मठसन्ततिवृद्धये ।

[मठेऽधिवासक्रिया]

चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं तथा ॥ ९ ॥
अघोरास्त्रं क्षुरिकास्त्रं जप्त्वा वै दक्षिणोत्तरे ।

---

[1] अयं पटलः अ (टि.१९१, पृ० ४१६-४१९) इत्येतस्मिन् कोश एव दृश्यते।
[2] आरम्भो न दृश्यते।
[3] लाजैः ] सं० पाठः; लाज – अ.

नृत्तगेयसमायुक्तम् आचार्यो होममाचरेत् ॥ १० ॥
संस्कृत्य विधिना कुण्डं शिवाग्निं विधिनाऽऽनयेत् ।
अग्निमध्ये समावाह्य शिवमावरणैर्युतम् ॥ ११ ॥
दत्वा नैवेद्यधूपादीन् मूलेनाज्यं तु होमयेत् ।
समिल्लाजांश्च सक्तूंश्च सर्षपं च यवं तिलम् ॥ १२ ॥
वेणुं मुद्गं च निष्पावं [१]माषं चैकादश क्रमात् ।
ईशानाद्यस्त्रपर्यन्तम् मन्त्रमेकादशं हुनेत् ॥ १३ ॥
शतमर्धं तदर्धं वा [२]प्रतिद्रव्यं तु होमयेत् ।
द्रव्यान्ते व्याहृतिं हुत्वा महापूर्णाहुतिं हुनेत् ॥ १४ ॥
एवं जागरणं रात्रौ

[अधिवासानन्तरदिवसकार्यम्]

प्रभाते स्नानमाचरेत् ।
नित्यकर्म पुरा कृत्वा मठालयं प्रवेशयेत् ॥ १५ ॥

[मठालङ्कारादि]

मठस्य प्रस्तरे देशे त्रिसूत्रैर्दर्भमालया ।
वस्त्रयुग्मेन परितो वेष्टयेद्दिग्ध्वजेन च ॥ १६ ॥
वितानैश्च समाच्छाद्य [३]मठस्योर्ध्वमलङ्कुरु ।
पञ्चमृद्भिश्च काषायैर्गव्यैश्चैवाभिषेचयेत् ॥ १७ ॥
मठान्तर्जगतीकण्ठपट्टिकाङ्घ्रिकपोतकम् ।
एतेषु पञ्चस्थानेषु सुगन्धेन विलिप्य च ॥ १८ ॥
निवृत्त्यादिकलामन्त्रानर्चयित्वा क्रमेण तु ।
धूपदीपादिकं दत्वा द्वारे [४]द्वाराधिपान् यजेत् ॥ १९ ॥

[पूजा उत्सवः अभिषेकश्च]

ततो यागं समापाद्य पूर्ववत्पूजयेत्क्रमात् ।
प्रायश्चित्तं ततो हुत्वा अग्निस्थान् योजयेद्धटे ॥ २० ॥

---

[१] माषं चैकादश ] सं० पाठः; माषस्येकादश – अ.
[२] प्रति० ] सं० पाठः; पूति० – अ.
[३] मठस्योर्ध्वमलङ्कुरु ] सं०पाठः; मठस्योर्ध्वमलङ्करेत् – अ.
[४] द्वाराधिपान् ] सं०पाठः; द्वारादिपान् – अ.

वह्निं विसृज्य परिधिविष्टरस्थान् विसर्जयेत् ।
शालां प्रवेशयेत्कर्ता सुमुहूर्ते सुलग्नके ॥२१॥
दानं कुर्याद्विशेषेण यथावित्तानुसारतः ।
प्रधानकुम्भं शिरसा [[1]वाहयित्वा] सुबन्धुभिः ॥२२॥
मठं प्रदक्षिणं कृत्वा वाद्यमङ्गलघोषकैः ।
निधाय कुम्भं [2]स्वस्थाने कर्ता नत्वा घटस्थितम् ॥२३॥
वेद्या उपरि मध्ये तु गुरुः संयोज्य सेचयेत् ।
तत्तत्कुम्भजलेनैव तत्तत्स्थानेऽभिषेचयेत् ॥२४॥
नैवेद्यं धूपदीपादीनुपचारान् समाचरेत् ।
सर्वद्रव्यसमृद्ध्यर्थं सर्वज्ञानफलार्थकम् ॥२५॥

[मठे प्रवेशः गुरुपूजा दक्षिणादानं च]

मठं प्रवेशयेत्कर्ता फलद्रव्याणि संस्पृशेत् ।
उत्तराभिमुखः स्थित्वा चिन्तयेत्परमेश्वरम् ॥२६॥
गुरुसमीपमासाद्य पूजयेद्भक्तिमार्गतः ।
गुरुं प्रणम्य तत्कर्ता तस्मै दद्यात्सुदक्षिणाम् ॥२७॥
साधकाचार्यभक्तानां दक्षिणां दापयेत्ततः ।

[मठस्य नामकरणम्]

मठस्य नाम कृत्वा तु [3]कर्तृनामाङ्कितं मठम् ॥२८॥
एवं यः कुरुते मर्त्यः सोऽन्ते सायुज्यमाप्नुयात् ॥२८ $^{1}/_{2}$ ॥

॥ [4]इति सूक्ष्मशास्त्रे मठप्रतिष्ठाविधिः सप्तसप्ततितमः पटलः ॥

---

[1] मातृकायां 'वाहयित्वा' न दृश्यते ।
[2] स्वस्थाने ] सं० पाठः; संस्थाने – अ.
[3] कर्तृ० ] सं० पाठः; कर्ता – अ.
[4] इति सूक्ष्मशास्त्रे मठप्रतिष्ठाविधिः सप्तसप्ततितमः पटलः] सं० पाठः; अः इति सूक्ष्मशास्त्रे मठप्रतिष्ठाविधिः नवसप्ततितमः पटलः ॥

## [अष्टसप्ततितमः पटलः[1]]

### [तटाकप्रतिष्ठाविधिः]

तटाकस्थापनं वक्ष्ये श्रृणु त्वं तत्प्रभञ्जन ।

[तटाकलक्षणं तत्स्थानं च]

तटाकं वाथ वापी वा पुष्करिण्यथवापि वा ॥१॥
आलयाभिमुखे मुख्यम् ऐशान्यामुत्तरेऽपि वा ।
दक्षिणे वा प्रकुर्वीत आग्नेय्यां पश्चिमेऽपि वा ॥२॥
यथा मनोरमे देशे तटाकं कारयेत्सुधीः ।
अशक्तश्चेद्वापिमात्रं [2]मम प्रीतिकरं भवेत् ॥३॥
पुष्पोद्यानादिरम्ये वा तटाकं वा प्रभञ्जन ।
[3]सुशैलादीष्टकाभिर्वा तत्स्थानं कारयेद् दृढम् ॥४॥
सोपानसहितं कृत्वा यथाविभवविस्तरम् ।

[तटाकप्रतिष्ठाफलम्]

यः कुर्यात्तीर्थमुद्दिश्य स हि सर्वमवाप्नुयात् ॥५॥
धनधान्यसमृद्धिः स्याद् आरोग्यं पुत्रसम्पदम् ।
भुक्तिं मुक्तिं च सौख्यं च लभते नात्र संशयः ॥६॥

[यागशालानिर्माणम्]

कृत्वा तटाकसंशुद्धिं वारिणा च सुपूरितम् ।
तत्तीरे यागशालां च दक्षिणे पूर्वभागके ॥७॥
उत्तरे ईशदिग्भागे कुण्डवेदीसमन्वितम् ।
अलङ्कृत्याङ्कुरं कृत्वा पञ्चाहं त्रियहं तु वा ॥८॥
[4]सद्योऽधिवासनं कुर्याद् अङ्कुरं च प्रपूजयेत् ।
वास्तुशान्तिं ततः कृत्वा पर्यग्निं कारयेत्सुधीः ॥९॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ४१९-४२२) इत्येतस्मिन् कोशे दृश्यते।

[2] मम ] सं० पाठः; मर्म – अ.

[3] सुशैलादीष्टकाभिर्वा ] सं० पाठः; सुशैलाद्याभिषेकायां वा – अ.

[4] सद्योऽधिवासनं ] अ.

[मण्डललेखनं कुम्भस्थापनं च]

पञ्चगव्येन संप्रोक्ष्य शुद्धिं कृत्वा विचक्षणः ।
वेदिमध्ये विशेषेण साष्टद्रोणैश्च शालिभिः ॥ १० ॥
तन्मध्ये पद्ममालिख्य नवकुम्भांश्च विन्यसेत् ।
ससूत्रान् सापिधानांश्च नालिकेराम्रपत्रकान् ॥ ११ ॥
सरत्नान् स्वर्णप्रतिमान् क्षौमवस्त्रसमन्वितान् ।
एवमेवमलङ्कृत्य गन्धपुष्पैः सुपूजयेत् ॥ १२ ॥

[देवतानामावाहनं स्थापनं च]

आसनं मूर्तिन्यासं च ध्यानं चैव विशेषतः ।
[1]वरुणमन्त्रेणावाह्य मध्यकुम्भे सुयोजयेत् ॥ १३ ॥[2]
गङ्गां च यमुनां चैव नर्मदां च सरस्वतीम् ।
सिन्धुं गोदावरीं चैव[3] कावेरीं ताम्रपर्णिकाम् ॥ १४ ॥
[4]इत्यष्टशक्तीरभ्यर्च्य विशेषद्रव्यमुच्यते ।
शङ्खं च वासुकिं पद्मं कुलीरं चैव कूर्मकम् ॥ १५ ॥
नक्रं चोत्पलकं प्रोक्तं हैमेनैव सलक्षणम् ।
पूर्वादीशानपर्यन्तं निक्षिपेत्कुम्भमध्यमे ॥ १६ ॥
सुवस्त्रैर्वेष्टयेत् कुम्भान् [5]तत्तन्नाम्ना च पूजयेत् ।
एवमावाह्य संपूज्य धूपदीपैर्विशेषतः ॥ १७ ॥
नैवेद्यं दापयेत् पश्चात् ताम्बूलं च निवेदयेत् ।
द्वारादिगुरुपूजान्तं यागशालां प्रपूजयेत् ॥ १८ ॥

[अग्निकार्यम्]

एवं संस्थाप्य विधिना शिवाग्निं परिकल्पयेत् ।
पश्चिमे कुण्डमेकं तु पद्ममश्रमथापि वा ॥ १९ ॥
आधानादिविवाहान्तम् अग्निकार्योक्तमाचरेत् ।[6]

---

[1] वरुणमन्त्रेणावाह्य ] सं० पाठः; आवाह्य वरुणमन्त्रेण – अ.
[2] 'अ' मातृकायां १३उ० - १४पू० श्लोकमध्ये १६उ० अर्धं दृश्यते ।
[3] 'अ' मातृकायां श्लो० १४ द्वितीयतृतीयपादौ पुनर्लिखितौ ।
[4] इत्यष्टशक्तीरभ्यर्च्य ] सं० पाठः; इत्यष्टशक्तीः समाभ्यर्च्य – अ.
[5] तत्तन्नाम्ना च ] सं० पाठः; तत्तन्नामभिः – अ.
[6] 'अ' मातृकायां श्लो० १७उ०-२०पू० भागो द्विवारं दृश्यते ।

तद्देवं पूजयेदग्नौ पश्चाद्धोमं समाचरेत् ॥२०॥
पलाशं [1]वटशुक्लार्कावश्वत्थोदुम्बरौ तथा ।
प्लक्षः खदिरबिल्वौ च शमी च समिधः क्रमात् ॥२१॥
[हुनेद्] वरुणमन्त्रेण पलाशं [2]प्रथमं ततः ।
[3]गङ्गादिताम्रपर्ण्यन्तं [4]स्वस्वनाम्ना च होमयेत् ॥२२॥
आज्यं चरुं मधु क्षीरं हुत्वा वरुणमन्त्रतः ।
शालिगोधूममाषं च तिलं सिद्धार्थमाढकम् ॥२३॥
निष्पावं [5]यवमुद्गं च मध्यादीशान्तकं क्रमात् ।
नवधान्यानि सर्वाणि तत्तन्मन्त्रेण होमयेत् ॥२४॥
द्विशतं च शतं वापि पञ्चाशत् पञ्चविंशतिः ।
द्रव्यं प्रति क्रमेणैव होमयेत्तु प्रभञ्जन ॥२५॥
पूर्णाहुतिं ततो हुत्वा बलिं क्षिप्त्वा समाप्य च ।
एवं रात्रौ प्रकर्तव्यं

[अपरेद्युःकार्यम्]

प्रभाते स्नानमाचरेत् ॥२६॥
यागशालां प्रविश्याथ पूर्ववत् पूज्य होमयेत् ।
जयादिरभ्याधानं च प्रायश्चित्तं हुनेत् क्रमात् ॥२७॥
पूर्णां [6]हुत्वा च वह्निस्थं घटे संयोजयेद्गुरुः ।
दशदानानि सर्वाणि दापयेत्तु विचक्षणः ॥२८॥
आचार्यपूजनं कृत्वा यथोक्तां दक्षिणां ददेत् ।

[प्रदक्षिणं तटाकाभिमुखकार्यं च]

कुम्भानुद्धृत्य शिरसा सुमुहूर्ते सुलग्नके ॥२९॥
धामप्रदक्षिणं कृत्वा तटाकं च प्रदक्षिणम् ।
तटाकाभिमुखः स्थित्वा कुम्भान् तत्रैव विन्यसेत् ॥३०॥

---

[1] वटशुक्लार्कावश्वत्थोदुम्बरौ तथा ] सं० पाठः; वटशुक्लार्क अश्वत्थोदुम्बरस्तथा – अ.
[2] प्रथमं ] सं० पाठः; प्रथममं – अ.
[3] गङ्गादिताम्रपर्ण्यन्तं ] सं० पाठः; गङ्गादिताम्रवर्णान्तं – अ.
[4] स्वस्वनाम्ना च] सं० पाठः;स्वस्वनामभिः – अ.
[5] यवमुद्गं ] सं० पाठः; चैव मुद्गं – अ.
[6] हुत्वा च वह्निस्थं ] स० पाठः; हुत्वाग्निसंस्थानं – अ

पुण्याहैः पञ्चगव्यैश्च तटाकं प्रोक्षयेद्गुरुः ।
अर्चयित्वा विशेषेण धूपदीपादिसंयुतम् ॥ ३१ ॥
साधितैः कलशैः सम्यग् वारिमध्ये सुयोजयेत् ।
मध्यादीशक्रमेणैव कुम्भद्रव्याभिषेचयेत् ॥ ३२ ॥
नैवेद्यं धूपदीपौ च उपचारान् समाचरेत् ।
तटाकपरितश्चाष्टलोकेशबलिमाचरेत् ॥ ३३ ॥
तत्तीर्थे स्नापयेत् कर्ता बान्धवादिसमन्वितः ।
तत्तीर्थं संगृहेत् कर्ता जनान् शिष्टांश्च दापयेत् ॥ ३४ ॥
भूरिदानं ददेत् पश्चाद् यथावित्तानुसारतः ।
तत्तीरे भोजयेद्विद्वान् सर्वकार्याभिवृद्धये ॥ ३५ ॥
एवं यः कुरुते मर्त्यः सर्वान् कामानवाप्नुयात् ॥ ३५ १/२ ॥

॥ इति सूक्ष्मशास्त्रे तटाकप्रतिष्ठाविधिरष्टसप्ततितमः पटलः[१] ॥

---

[१] इति सूक्ष्मशास्त्रे तटाकप्रतिष्ठाविधिरष्टसप्ततितमः पटलः ] सं० पाठः; अः इति सूक्ष्मशास्त्रे तटाकप्रतिष्ठाविधिरशीतितमः पटलः ।

## [एकोनाशीतितमः पटलः[1]]

### [वृक्षपूजाविधिः]

वृक्षपूजाविधिं वक्ष्ये शृणु त्वं तत्प्रभञ्जन ।
[2]आयुःश्रीकीर्तिवृद्धिं च पुत्रधान्यविवर्धनम् ॥ १ ॥

[वृक्षपूजाद्वैविध्यम्]

सामान्यं च [3]विशेषं च वृक्षपूजा द्विधोच्यते ।
[4]अश्वत्थादिकवृक्षांश्च यजेत् सामान्यमीरितम् ॥ २ ॥
यद्वृक्षे देवधामेषु शम्भुसान्निध्यं संस्थितम्[5] ।
तद्विशेषमिति ख्यातं तस्यार्चनमुदाहृतम् ॥ ३ ॥

[स्थानशुद्धिः]

प्रातःसन्ध्यावसाने तु [6]दिव्यवृक्षाग्रदेशतः ।
बहुरूपेण संशोध्य लेपनं पुरुषेण तु ॥ ४ ॥
पुण्याहं वाचयेत्तत्र द्रव्यान् संप्रोक्ष्य [7]चास्त्रतः ।
[8]पाद्यादीनि तु संसाध्य विघ्नेशं पूजयेद्गुरुः ॥ ५ ॥
द्वारपूजां ततः कृत्वा [9]वृक्षं प्रक्षाल्य हेतिना ।

[वृक्षपूजा]

आसनं मूर्तिमूलं च पूर्ववत् कल्पयेद्बुधः ॥ ६ ॥
वृक्षं शिवमयं ध्यात्वा स्नानं पूर्ववदाचरेत् ।
वस्त्रं माल्यं च गन्धं च शिवमन्त्रेण दापयेत् ॥ ७ ॥
नैवेद्यं दापयित्वा तु धूपं दीपं च भस्मकम् ।

---

[1] अयं पटलः अ (टि.१९१, पृ० ४२३), च (टि.९५५, पृ० १८२) इत्येतयोः कोशयोर्दृश्यते।
[2] आयुःश्रीकीर्तिवृद्धिं च पुत्रधान्यविवर्धनम् ] च; आयुः.कीर्तिवृद्धिश्च पुत्रवान् धनवद्धनम् – अ.
[3] विशेषं च ] अ; विशेषेण – च.
[4] अश्वत्थादिकवृक्षांश्च ] सं० पाठः ; अश्वत्थादीनि वृक्षांश्च – अ, च.
[5] शम्भुसान्निध्यं संस्थितम् ] सं० पाठः ; स्थितं सान्निध्य शम्भुना – अ, च.
[6] दिव्यवृक्षाग्रदेशतः ] अ; ०देशितः – च.
[7] चास्त्रतः ] अ; चास्मृतः – च.
[8] पाद्यादीनि तु संसाध्य ] सं० पाठः; पाद्यादीन् शोध्य संपूज्य - अ; पाद्यादीनां तु संसाध्य – च.
[9] वृक्षं प्रक्षाल्य हेतिना ] सं० पाठः ; प्रक्षाल्य भेतिना – अ; उमादीं क्षाल्य हेतिना - च.

ताम्बूलं दापयेद्धीमान् [1]स्तोत्राद्यैश्चैव तोषयेत् ॥८॥
एककालं द्विकालं वा त्रिकालं वा समाचरेत् ।
[2]एवं दिने दिने कुर्याच्छिवलोके महीयते ॥९॥

॥ इति सूक्ष्मशास्त्रे वृक्षपूजाविधिरेकोनाशीतितमः पटलः[3] ॥

[1] स्तोत्रा० ] अ; वेद्या० – च.
[2] एवं ] च ; पूजां – अ.
[3] इति सूक्ष्मशास्त्रे वृक्षपूजाविधिरेकोनाशीतितमः पटलः ] सं० पाठः; अः इति सूक्ष्मशास्त्रे वृक्षपूजाविधिरेकाशीतितमः पटलः । चः इति सूक्ष्मशास्त्रे क्रियापादे वृक्षपूजाविधिः ।

## [अशीतितमः पटलः[१]]

## [कूपस्थापनविधिः]

[२]कूपसंस्थापनं वक्ष्ये श्रृणु त्वं तत्प्रभञ्जन ।

[कूपस्थापनकालः]

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ॥ १ ॥
सुवारे सुमुहूर्ते च स्थापनं सम्यगाचरेत् ।

[अधिवासनम्]

तद्दिनात्पूर्वदिवसे अधिवासनमारभेत् ॥ २ ॥
मण्डपं समलङ्कृत्य पुण्याहं वाचयेद्गुरुः ।
शालिभिः स्थण्डिलं कृत्वा लाजैः पुष्पैः परिस्तरेत् ॥ ३ ॥

[नवकुम्भस्थापनं]

नवकुम्भान् समादाय क्षालयेदस्त्रमन्त्रतः ।
ससूत्रान् सापिधानांश्च सवस्त्रान् वारिपूरितान् ॥ ४ ॥
फलपल्लवसंयुक्तान् हेमकूर्चसमन्वितान् ।
[३]मध्यकुम्भे मनोन्मन्यां पञ्चरत्नं विनिक्षिपेत् ॥ ५ ॥
[४]कूर्मं चैवेन्द्रकुम्भे तु गङ्गां चैव समर्चयेत् ।
मण्डूकमग्निकुम्भे तु यमुनां च समर्चयेत् ॥ ६ ॥
[५]सर्पः स्याद्दक्षिणे [६]कुम्भे नर्मदां च समर्चयेत् ।
मत्स्यं नैर्ऋतकुम्भे तु अर्चयेच्च सरस्वतीम् ॥ ७ ॥
कर्कटं वारुणे कुम्भे सिन्धुतीर्थं समर्चयेत् ।
नक्रं वायव्यकुम्भे तु [७]गोदावरीं समर्चयेत् ॥ ८ ॥

---

[१] अयं पटलः अ (टि.१९१, पृ० ४२३-४२६), ऋ (टि.०९७, पृ० ३२९-३३०), च (टि.९५५, पृ० ३७-३८), फ (टि.५५२, पृ० १४१-१४३) इत्येतेषु कोशेषु दृश्यते ।

[२] 'ऋ' मातृकायां श्लो० '१पू०-६पू०' भागो न दृश्यते ।

[३] मध्यकुम्भे ] फ; मध्यं कुम्भ० – अ; मध्यकूर्चे – च .

[४] कूर्मं चैवेन्द्रकुम्भे तु ] सं० पाठः; कूर्मवत्विन्द्रकुम्भे तु - अ; कूर्मं हृश्चिद्देशे तु – च; कूर्मं चन्त्विन्द्रदेशे तु – फ .

[५] सर्पः स्याद् ] ऋ; सर्त – अ; सर्प स्याद्– च; सर्प्यं सयाद् – फ .

[६] कुम्भे ] सं० पाठः ; स्थाप्या – अ, ऋ, च; स्थाप्य कुम्भे – फ .

[७] गोदावरीं समर्चयेत् ] अ, ऋ; गोदावर्यास्तु पूजयेत् – च; गोदावरि समर्चयेत् – फ .

[1]सौम्ये तु पद्मपुष्पं तु कावेरीं च समर्चयेत् ।
उत्पलं त्वीशकुम्भे तु ताम्रपर्णीं समर्चयेत् ॥ ९ ॥
तत्तत्स्वनाममन्त्रेण चार्चयेद्देशिकोत्तमः ।
पञ्चमृत्पञ्चगव्यं च कूपमध्ये विनिक्षिपेत् ॥ १० ॥

[अग्निकार्यम्]

अग्निकार्योक्तमार्गेण अग्निकार्यं समाचरेत् ।
[2]समिदाज्यान्नलाजैश्च हुनेदष्टोत्तरं शतम् ॥ ११ ॥
सद्यादिवक्त्रपर्यन्तं क्रमेणैव तु हूयते ।
[3]सर्वद्रव्याणि संहुत्वा द्रव्यान्ते व्याहृतिं हुनेत् ॥ १२ ॥
[4]वारुणोक्तमनुं जप्त्वा [5]मूलमन्त्रशतं जपेत् ।
[6]आपो वा इति मन्त्रेण [7]अष्टोत्तरशतं जपेत् ॥ १३ ॥
[8]पूर्णाहुतिं ततो हुत्वा नैवेद्यादीन् प्रपूजयेत् ।
एवं रात्रौ प्रकर्तव्यं

[अपरेद्युःकार्यम्]

प्रभाते स्नानमाचरेत् ॥ १४ ॥
सकलीकरणं कृत्वा कुम्भं वह्निं समर्चयेत् ।
जयादिरभ्याधानं च [9]राष्ट्रभृच्च क्रमाद्धुनेत् ॥ १५ ॥
पश्चादग्निं विसृज्याथ कुम्भमध्ये तु योजयेत् ।
नैवेद्यं दापयेद्भक्त्या धूपदीपादिकं ददेत् ॥ १६ ॥

[प्रदक्षिणं कुम्भस्थतीर्थानां कूपे योजनं च]

पश्चात्कुम्भान् समुद्धृत्य सर्वालङ्कारसंयुतम् ।

---

[1] सौम्ये तु ] च, फ; सौम्येन – अ, ऋ .
[2] समिदाज्यान्न० ] ऋ, च; समिदाज्यान्त० – अ; समिदाज्यन्न० – फ .
[3] 'च, फ' मातृकयोः श्लो० '१२उ०' न दृश्यते ।
[4] वारुणोक्त० ] च, फ; वारुणोग्र०– अ, ऋ .
[5] मूल० ] अ, ऋ, च; शूल० – फ .
[6] आपो वा इति ] च, आपोवायेति – अ, ऋ, फ .
[7] अष्टोत्तरशतं जपेत् ] अ, ऋ, फ; स्पृष्ट्वा कुम्भान् जपेत्ततः – च .
[8] 'च, फ' मातृकयोः श्लो०'१४पू०' न दृश्यते ।
[9] राष्ट्रभृच्च क्रमाद्धुनेत् ] अ, ऋ; क्रमाद् राष्ट्रभृतिं हुनेत् – च; क्रमादष्टां मृतं हुनेत् – फ .

हर्म्यप्रदक्षिणं [१]कृत्वा कूपस्थानं समाविशेत् ॥ १७॥
पुण्याहं वाचयेद्धीमान् शुद्धैरुत्थेति मन्त्रतः ।
कूपमध्ये तु संप्रोक्ष्य अस्त्रेणैव समर्चयेत् ॥ १८॥
[२]कुम्भान्मूर्तिं समादाय कूपमध्ये तु योजयेत् ।
कुम्भोदकेन संस्नाप्य [३]आपो वा इति मन्त्रतः ॥ १९॥
गङ्गादिसर्वकलशैः स्नापयेत्तत्स्वनामतः ।
अर्चयेद्गन्धपुष्पाद्यैः धूपदीपादिकं ददेत् ॥ २०॥
[४]कूर्मादीन्यष्टद्रव्याणि कूपमध्ये [५]विनिक्षिपेत् ।
[६]सघृतं गुलसंमिश्रं कूपबाह्ये विशेषतः ॥ २१॥
[७]वज्रादिपद्मपर्यन्तं बलिं दद्यात् स्वनामतः ।
कूपतोयं तु संग्राह्य सर्वभक्तेषु दापयेत् ॥ २२॥
आचार्यं पूजयेत्पश्चाद् वस्त्रहेमाङ्गुलीयकैः ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ २३॥

॥ इति सूक्ष्मशास्त्रे कूपस्थापनविधिरशीतितमः पटलः[८] ॥

---

[१] कृत्वा ] अ, ऋ; कुर्यात् – च, फ .
[२] 'च, फ' मातृकयोः श्लो० १९पू० न दृश्यते ।
[३] आपो वा इति ] सं० पाठः ; अपोवेति – अ; आपोवा एति – ऋ; आपोवायेति - च, फ .
[४] कूर्मादीन्यष्ट० ] सं० पाठः; कूर्माणि चाष्ट० – अ, ऋ; कूर्मादि अष्ट० – च; कूर्मादिरष्ट० – फ .
[५] विनिक्षिपेत् ] अ, ऋ, फ; तु विन्यसेत् – च .
[६] 'च, फ' मातृकयोः श्लो० २१उ० न दृश्यते ।
[७] वज्रादि० ] च; चन्दादि० – अ, ऋ; 'फ' मातृकायां श्लो० २२पू०-२३पू० न दृश्यते ।
[८] इति सूक्ष्मशास्त्रे कूपस्थापनविधिरशीतितमः पटलः ] सं० पाठः; अ, ऋः इति सूक्ष्मशास्त्रे कूपस्थापनविधिः द्व्यशीतितमः पटलः । चः इति सूक्ष्मतन्त्रे क्रियापादे कूपस्थापनविधिपटलः । 'फ' मातृकायां पुष्पिका नास्ति ।

## [एकाशीतितमः पटलः]
## नागलक्षणविधिः[1]

नागस्य लक्षणं वक्ष्ये शृणु [2]त्वं तत्प्रभञ्जन ।

[नागबेरद्रव्याणि तन्मानं च]

[3]स्वर्णरजतताम्रेण शिलयेष्टकयाथवा ॥ १ ॥
[4]दारुकैर्दशमृद्भिर्वा भुजङ्गं संप्रकल्पयेत् ।
एकहस्तं समारभ्य वस्वङ्गुलविवर्धनात् ॥ २ ।
चतुर्विंशतिहस्तान्तं [5]नागायामं प्रकल्पयेत् ।
[6]आयादिशोभनोपेतं शुभमानं [7]परिग्रहेत् ॥ ३ ॥
तन्मानं शतधा भज्यैकांशं चाङ्गुलं भवेत् ।

[बेरस्वरूपम्]

वेदांशं मुखमानं स्याद् रुद्रांशं [8]मुखविस्तृतम् ॥ ४ ॥
भान्वंशं फणदीर्घं स्यात् पञ्चांशं [9]फणविस्तृतम् ।
नासापुटान्तरं पादं नासितारं शिवांशकम् ॥ ५ ॥
[10]तत्समं नासिदीर्घं स्याद् व्योमांशं दृष्टिमण्डलम् ।
तन्मध्ये यवमानेन कृष्णमण्डलमाचरेत् ॥ ६ ॥
तद्विस्तारार्धमानेन ज्योतिर्मण्डलकं भवेत् ।
पक्षदीर्घं द्विभागं स्यात् तद्विस्तारं शिवांशकम् ॥ ७ ॥

---

[1] अयं पटलः अ (ट.१९१, पृ० ४२६-४२७), ई (ट.३६, पृ० १४९), ऋ (ट.९७, पृ० ३३०-३३२), च (ट.९५५, पृ० ३६६३७), ज (ट.१००३, पृ० ३११-३१२) इत्येतेषु कोशेषु दृश्यते।
[2] त्वं तत्प्र० ] अ, ई; तत्वत्प्र० – ज .
[3] स्वर्ण० ] ई; स्वर्णं – अ; ऋ, ज. 'च' मातृकायां श्लो०'१ उ०' एवं दृश्यते : 'सौवर्णं रजतं ताम्रं शिलरिष्टकयाथवा' ।
[4] दारुकै० ] च; दारुजै० – अ, ई, ऋ, ज;
[5] नागायामं ] ऋ, च, ज; नागाधामं - अ; नागायतं – ई .
[6] आयादि० ] अ, ई, ऋ, ज; आयतं – च .
[7] परिग्रहेत् ] अ, ई, ऋ, ज; परिकीर्तितम् – च .
[8] मुखविस्तृतम् ] ई, च, ज; मुखविस्मृतम् –अ; मुख विस्तरम् - ऋ.
[9] फणविस्तृतम् ] ई, ऋ, च, ज; फणविस्मृतम् –अ .
[10] तत्समं ] अ, ई, ऋ; तत्समानं – च; तत्समा० – ज .

[1]पक्ष्म पञ्चाङ्गुलं चैव कर्णः पक्षाङ्गुलो भवेत् ।
वेदांशं [2]कर्णविस्तारं युज्य सिंहस्य [3]कर्णवत् ॥८॥
चतुर्दन्तसमायुक्तं दन्तदीर्घं तदङ्गुलम् ।
दन्तादि त्वङ्गुलार्धं स्याद्ध [4]हरिदन्तवदाचरेत् ॥९॥
करण्डमकुटैर्वापि चित्रवस्त्राकृतिस्तु वा ।
मध्ये फणार्धमानेन तस्य पार्श्वे फणं भवेत् ॥१०॥
फणसप्तेषु वा प्रोक्तं त्रिफणं वा समाचरेत् ।
[5]नाहं वै षोडशाङ्गुल्यं वालान्तं चाङ्गुलं भवेत् ॥११॥
[6]पद्मपीठोपरिष्टात्तु [7]त्रिपञ्चमण्डलान्वितम् ।
नासिमध्यमसूत्रं तु [8]वालाग्रं ऋजुसूत्रकम् ॥१२॥
[9]अंशं वापि द्वित्र्यंशं वा हीनाधिक्यं न दोषभाक् ।
[10]शोभाबलसमोपेतं युक्त्या [11]सर्वं समाचरेत् ॥१३॥
नागलक्षणमेवोक्तं [12]तत्प्रतिष्ठाविधिं शृणु ।१३ १/२ ॥

॥ [13]इति सूक्ष्मशास्त्रे नागलक्षणविधिरेकाशीतितमः पटलः ॥

---

[1] पक्ष्म पञ्चाङ्गुलं चैव ] सं० पाठः; पक्ष्मां पञ्चाङ्गुलान्तु - अ; पक्षोच्चं चांगुलार्धं –ई; पक्ष्मां पञ्चाङ्गुलार्धं तु - ऋ;. पक्षोच्चत्वंगुलार्धं तु – च; पक्षोच्चं द्वंगुलार्धं –ज.

[2] कर्ण० ] ऋ, च, ज; कण्ठ० – अ .

[3] कर्णवत् ] अ, च; कर्णवित् – ऋ, ज .

[4] हरिदन्तवदाचरेत् ] च, ज; हरिदाचरेत् - अ.

[5] नाहं ] अ, ऋ, ज; नागं - च .

[6] पद्मपीठोपरिष्टात्तु ] ऋ, च, ज ; पद्मपीठोपरिष्ठान्तु - अ .

[7] त्रिपञ्चमण्डला० ] अ; त्रि ...कुण्डला० - ऋ;. त्रिफणमण्डला० - च; त्रिफलं मण्डना० – ज .

[8] वालाग्रं ] अ, ऋ, ज; वालान्ता – च .

[9] अंशं वापि द्वित्र्यंशं ] ऋ, ज;.अंशं वापि चित्रांशं - अ; अंशाद्वित्र्यंशकं वापि – च .

[10] शोभावल० ] ज; शोभाङ्गुल० - अ; त्रि ...शोभाफल० - ऋ;. शोभाबलि – च .

[11] सर्वं समाचरेत् ] अ, ऋ ; सर्वंगमाचरेत् च, ज .

[12] 'च, ज' मातृकयोः - श्लो०'१३ १/२ द्वितीयपादः एवं दृश्यते : शृणु मण्डपमानकम् ।

[13] इति सूक्ष्मशास्त्रे नागलक्षणविधिरेकाशीतितमः पटलः ] सं० पाठः; अः इति सूक्ष्मशास्त्रे नागलक्षणविधिस्त्र्यशीतितमः पटलः ॥; ऋः इति सूक्ष्मशास्त्रे ....विधिस्त्र्यशीतितमः पटलः ॥ ; चः इति सूक्ष्मशास्त्रे क्रियापादे नागलक्षणविधिपटलः ॥ ; जः इति सूक्ष्मशास्त्रे नागलक्षणविधिं नाम एकेन षष्ठिपटलः ॥;'ई ' मातृकायां पुष्पिका नास्ति ।

## [द्व्यशीतितमः पटलः]

### नागप्रतिष्ठाविधिः[1]

नागस्य स्थापनं वक्ष्ये शृणु त्वं तत्प्रभञ्जन ।

[प्रतिष्ठाफलम्]

धन्यं यशस्करं चायुर्वर्धनं पुत्रवर्धनम् ॥ १ ॥
जन्मवन्ध्या काकवन्ध्या [2]मृतवन्ध्या त्रयः क्रमात् ।
तथा [3]पुरुषवन्ध्यानां स्त्रीणां चैव सुपुत्रदम् ॥ २ ॥

[बिम्बकल्पनम्]

शिलासंग्रहमार्गेण सुशिलां ग्राहयेद्बुधः ।
द्विसर्पं [4]भिन्नभिन्नं वा पञ्चास्यमुरगं तु वा ॥ ३ ॥
लिङ्गयुक्तमयुक्तं वा फणैकं वा प्रकल्पयेत् ।
आयादिशुभसंयुक्तं शिल्पमानेन कारयेत् ॥ ४ ॥

[बिम्बस्थापनम्]

देवालये मठे वापि पर्वते तीर्थतीरके ।
नन्दने [5]ऽश्वत्थमूले तु [6]चैत्यवृक्षसमीपके ॥ ५ ॥
एतेषु कारयेद्धीमान् इष्टसिद्धिकरं भवेत् ।
अष्टदिक्षु प्रकर्तव्यम् आलये तु विशेषतः ॥ ६ ॥
[7]ऐन्द्रे राज्यप्रदं प्रोक्तं [याम्ये] वृद्धिं तथायुषः ।
आरोग्यं वारुणे चैव सोमे वित्तप्रदं भवेत् ॥ ७ ॥
वह्निदेशे सुखं दद्याद् [8]विजयं निर्ऋतौ तथा ।
वायव्ये भयनाशार्थम् ऐशान्यां पुत्रवर्धनम् ॥ ८ ॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ४२७-४३१), ऋ (टि.९७, पृ० ३३२), इत्येतयोः कोशयोर्दृश्यते।
[2] मृतवन्ध्या त्रयः ] ऋ; मृतवन्ध्येति त्रिः - अ.
[3] पुरुषवन्ध्यानां ] सं० पाठः; पुरुषवन्ध्या च – अ, ऋ .
[4] भिन्नभिन्नं ] सं० पाठः; छिन्नभिन्नं – अ, ऋ .
[5] ऽश्वत्थमूले ] सं० पाठः; शुक्लमूले -अ; ऽश्वत्यमूले – ऋ .
[6] चैत्य० ] अ; शैत्य० – ऋ .
[7] 'अ' मातृकायां श्लो० ७ पू० न विद्यते।
[8] विजयं निर्ऋतौ ] ऋ ; विजयन्तिष्टतौ – अ .

एवं शिवस्य परितः प्राकारे स्थापयेत् क्रमात्

[प्रतिष्ठाकालः]

[1]पुष्यमासादिषण्मासं देवानां तु दिवा स्मृतः ॥ ९ ॥
अयने पक्षनक्षत्रे तिथिवारांशराशयः ।
मुहूर्तं तत्र संवीक्ष्य स्थापनं तु समारभेत् ॥ १० ॥
पञ्चाहं वा त्रियहं वा एकाहं वा यथोचितम् ।
तद्दिने स्थापनं कुर्यात्तिथिऋक्षसुलग्नके ॥ ११ ॥

[मण्डपनिर्माणादि]

शिवालयेऽन्यदेशे वा मण्टपं चतुरश्रकम्।
धर्मरन्ध्राष्टहस्तं वा कलास्तम्भसमन्वितम् ॥ १२ ॥
मण्डपं तु त्रिधा भज्य मध्यभागे तु वेदिका।
रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम् ॥ १३ ॥
चतुर्द्वारसमायुक्तम् अलङ्कुर्याद्विशेषतः ।
योनिकुण्डाब्जकुण्डं वा पश्चिमे तु प्रकल्पयेत् ॥ १४ ॥
[2]उद्वास्य शिल्पिनं पश्चाद् भूसुरान् भोजयेत्क्रमात् ।
गोमयेनोपलिप्याथ वास्तुहोमं च कारयेत् ॥ १५ ॥
[3]बीजनिर्वापणं पश्चात् सायाह्नसमये बुधः ।

[प्रतिष्ठा]

प्रातः स्नानादिकं कृत्वा नित्यकर्म समाप्य च ॥ १६ ॥
उपवासं च संकल्प्य कर्ता तत्र जितेन्द्रियः ।
आचार्यं वरयेत्पूर्वं पश्चात्कर्म समाचरेत् ॥ १७ ॥
पूजासङ्कल्पकं कुर्यात्प्राणायामपुरस्सरम् ।
नयनोन्मीलनं कृत्वा बिम्बं तत्रैव विन्यसेत् ॥ १८ ॥
सुवर्णनखसंयुक्ताङ्गुलीभिश्च क्रमेण तु ।
सुवर्णदूर्वयास्त्रेण मध्वाज्याभ्यां तु तर्पयेत् ॥ १९ ॥

---

[1] पुष्य० ] ऋ ; पुष्प० – अ .
[2] उद्वास्य ] ऋ ; उद्वस्य – अ .
[3] बीजनिर्वापणं] अ; बीजानि वापणं – ऋ .

उच्चार्य नेत्रमन्त्रं तु [1]नेत्रयुग्मदिने शुभे ।
बिम्बशुद्धिं ततः कुर्याद्ग्रामावर्तं तदन्तके ॥२०॥
जलाधिवासनं पश्चाद् रक्षाबन्धं ततः परम् ।
निद्राकुम्भसमायुक्तं शयनं परिकल्पयेत् ॥२१॥
वेदिमध्ये विशेषेण साष्टद्रोणैश्च शालिभिः ।
तन्मध्ये नलिनं लिख्य तिलतण्डुलसंयुतम् ॥ २२॥
दशकुम्भसमायुक्तं त्रिसूत्रैः परिवेष्टितम् ।
अन्तःकूर्चसमायुक्तं नालिकेरोपरि न्यसेत् ॥२३॥
प्रतिमारत्नसंयुक्तं कूर्चवस्त्रादिवेष्टितम् ।
आवाहनादिमार्गेण स्थापयेत्तु विचक्षणः ॥२४॥
मध्यमे नागराजं च [2]नागबीजेन पूजयेत् ।
नागकन्यां समावाह्य तद्वामे वर्धनीं न्यसेत् ॥२५॥
पूर्वादीशानपर्यन्तम् अनन्ताद्यर्चयेत्सुधीः ।
गन्धाक्षतैश्च पुष्पैश्च नैवेद्यैश्च प्रपूजयेत् ॥२६॥
ततः [3]कुण्डान्तिकं गत्वा होमं कुर्याद्विचक्षणः।
अग्निकार्योक्तमार्गेण अग्निमध्ये सुपूजयेत् ॥२७॥
[4]समिदाज्यान्नशालींस्तु यवगोधूमवैणवम्।
अपामार्गं च नीवारं प्रियङ्गुतिलसर्षपम् ॥२८॥
लाजं पलाशसंयुक्तं होमयेत्तु यथाक्रमम् ।
[5]नागब्रह्माङ्गमूलैस्तु प्रत्येकं होममाचरेत् ॥२९॥
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा ।
अष्टोत्तरशतं वापि पञ्चाशत्पञ्चविंशतिः ॥३०॥
प्रायश्चित्ताहुतिं हुत्वा पूर्णाहुतिमथाचरेत् ।
उत्थाप्य शयनाद्बिम्बं स्पर्शाहुतिमथाचरेत् ॥३१॥

---

[1] नेत्रयुग्म०] ऋ ; नेत्रयुग्मं – अ .
[2] नागबीजेन ] ऋ ; नागबिम्बेन – अ .
[3] कुण्डान्तिकं ] सं० पाठः; कुण्डाग्निकं – अ, ऋ .
[4] समिदाज्यान्न०] ऋ; समिदाज्यान्त० – अ .
[5] नाग० ] ऋ ; नागं – अ .

स्वस्थाने स्थापयेद्बिम्बं न्यासं कृत्वा यथाक्रमम् ।
[1]अग्नेर्मूर्तिं समुत्थाप्य कुम्भस्योपरि विन्यसेत् ॥ ३२॥
आचार्यं पूजयेत् पश्चाद् दक्षिणां च प्रदापयेत् ।
यात्रादानं पुरा कृत्वा दशदानं ददेत् क्रमात् ॥ ३३॥
[2]वेद्याः कुम्भं समुत्थाप्य बिम्बाग्रे विन्यसेत् क्रमात् ।
कुम्भाद्बीजं समुत्थाप्य सर्पस्योपरि विन्यसेत् ॥ ३४॥
तद्वामे वर्धनीं न्यस्य [3]ऐक्यं च पीठके न्यसेत् ।
अनन्ताद्यष्टनागांश्च पूर्वादिकलशान् न्यसेत् ॥ ३५॥
महाभिषेकसंयुक्तं वस्त्रैर्गन्धैरलङ्कृतम् ।
पुष्पमाल्यैरलङ्कृत्य सर्वाभरणभूषितम् ॥ ३६॥
महानैवेद्यसंयुक्तं ताम्बूलं धूपदीपकम् ।
उपचाराणि सर्वाणि दापयेत्तु विचक्षणः ॥ ३७॥
ब्राह्मणान् भोजयेत् पश्चाद् [4]दक्षिणां चैव दापयेत् ।

[ प्रतिष्ठाफलम् ]

अनेन विधिना यस्तु करोति स्थापनं यदि ॥ ३८॥
नागेन्द्रस्य प्रसादेन सर्वान् कामानवाप्नुयात् ।
आयुरारोग्यपुत्रार्थम् ऐश्वर्यादिसमृद्धिदम् ॥ ३९॥
इह लोके सुखं प्राप्य पुण्यं लोकं लभेत्सुधीः ॥ ३९$^1/_2$॥

॥ [5]इति सूक्ष्मशास्त्रे नागप्रतिष्ठाविधिर्व्यशीतितमः पटलः ॥

---

[1] अग्नेर्मूर्तिं ] सं० पाठः; अग्नौ मूर्तिं – अ, ऋ .
[2] वेद्याः ] अ; वेद्यां – ऋ .
[3] ऐक्यं च पीठके ] सं० पाठः; ऐकं चोत्पीठके – अ, ऋ .
[4] दक्षिणां चैव ] सं० पाठः; दक्षिणाभिश्च – अ, ऋ .
[5] इति सूक्ष्मशास्त्रे नागप्रतिष्ठाविधिर्व्यशीतितमः पटलः] सं० पाठः; इति सूक्ष्मशास्त्रे नागप्रतिष्ठाविधिश्चतुरशीतितमः पटलः- अ, ऋ.

## [त्र्यशीतितमः पटलः]

### प्रभामण्डलविधिः[1]

वक्ष्यामि सकलादीनां [2]प्रभामण्डललक्षणम् ।
स्वर्णरजतलोहेन कारयेत्तु प्रभञ्जन ॥ १ ॥

[प्रभामण्डलत्रैविध्यम्]

[3]बिम्बस्य शोभनार्थाय मण्डलं त्रिविधं कुरु ।
[4]वह्निमण्डलमादौ तु द्वितीयं भानुमण्डलम् ॥ २ ॥
तृतीयं [5]चन्द्रवृत्तं च त्रिविधं मण्डलं भवेत् ।
एकं [6]वापि द्वयं वापि त्रयं वापि प्रकल्पयेत् ॥ ३ ॥

[वह्निमण्डलम्]

[7]बिम्बोदयार्धं संग्राह्य भ्रामयेच्चन्द्रबिम्बवत् ।
जानुभ्यामवसानं च [8]जङ्घामध्यावसानकम् ॥ ४ ॥
[9]सिंहांश्च मकरांश्चैव अधो भागे प्रकल्पयेत् ।
[10]मण्डलस्य तु विस्तारम् [11]अग्निबाणाब्धिनन्दतः ॥ ५ ॥
[12]मध्यविस्तारमेवोक्तं [13]पञ्चभागेंशहीनकम् ।
[14]मूलाग्रस्य विशालं तु क्रमेण परिकल्पयेत् ॥ ६ ॥

---

[1] अयं पटलः अ (टि.१९१, पृ० ४३१ - ४३३), ऋ (टि.९७, पृ० ३३५), च (टि.९५५, पृ० २१-२२), झ (टि.१०१४, पृ० ८८-९०), प (टि.४२२, पृ० २९५-२९७) इत्येतेषु कोशेषु दृश्यते।

[2] प्रभामण्डललक्षणम् ] आ, ऋ, छ, झ ; प्रभामण्डलसंयुतम् – प .

[3] बिम्बस्य ] अ, ऋ, च, प; बिम्बोस्य – झ .

[4] 'च' मातृकायां श्लो० '२ उ० - ३ पू०' भागो न विद्यते।

[5] चन्द्रवृत्तं ] ऋ, झ, प; चेन्द्रवृत्तं – अ .

[6] वापि द्वयं ] अ, ऋ, झ; वा त्रिविधं – प .

[7] बिम्बोदयार्धं ] ऋ, झ; बिम्बोदरार्धं – अ ; बिम्बोदयार्थं – प .

[8] जङ्घामध्यावसानकम् ] अ, ऋ, झ; जंघामर्धावसानकम् – प .

[9] 'च' मातृकायां श्लो० ' ५ पू० – ६ पू० ' भागो न विद्यते।

[10] मण्डलस्य ] प; मण्डपस्य – अ, ऋ, झ .

[11] अग्निबाणाब्धिनन्दतः ] प; अग्निबाणादनन्तरम् - अ; अग्निबाणादनन्दतः – ऋ ; अग्निबाणमुनिर्णव – झ .

[12] मध्यविस्तारमेवोक्तं ] अ, ऋ, झ; धर्मविस्तारमेवं तु – प .

[13] पञ्चभागेंशहीनकम् ] प; पञ्चभागे विहीनकम् – अ, ऋ, झ .

[14] मूलाग्रस्य ] च, झ, प; मूलग्रन्थि० - अ; मूलग्रध्य० – ऋ ; कुलाग्रस्य – झ .

[१]मकरास्ये तु [२]संयोज्यं [३]मकारं वृत्तमेव वा ।
त्रयोदशाङ्गुलं ख्यातं [४]मकरस्यैव [५]दीर्घतः ॥७॥
विस्तारं [६]रुद्रधा भज्य [७]मुक्तादामं द्वियंशकम् ।
[८]वेत्रमर्धांशकं प्रोक्तम् इन्दूत्सेधं द्वियंशकम् ॥८॥
अर्धांशं वेत्रतुङ्गं तु [९]महावेत्रं त्रियंशकम् ।
तद्वेत्रतुङ्गमर्धांशम् इन्दूत्सेधं द्वयंशकम् ॥९॥
वेत्रमर्धांशमित्युक्तं तस्योर्ध्वेऽग्निं प्रकल्पयेत् ।
[१०]पञ्चाङ्गुलसमुत्सेधं विस्तारं च [११]त्रियङ्गुलम् ॥१०॥
सप्तजिह्वासमायुक्तम् अथवा पञ्चजिह्वकम् ।
[१२]पार्श्वेष्वग्निं त्रिजिह्वं तु [१३]क्रमात् क्षीणं प्रकल्पयेत् ॥११॥
सर्वाङ्गानां प्रकर्तव्यं शोभाबलसमन्वितम् ।
वह्निमण्डलमेवोक्तं भानुमण्डलकं शृणु ॥१२॥

[भानुमण्डलम्]

वह्निमण्डलबाह्ये तु कल्पयेद्भानुमण्डलम् ।
विस्तारायाममानं तु पूर्वोक्तविधिना कुरु ॥१३॥
विस्तारं सप्तधा भज्य वेत्रमंशेन कल्पयेत् ।
पुष्पोच्चं पञ्चभागं च [१४]वेत्रं भागेन कल्पयेत् ॥१४॥

---

[१] मकरास्ये ] अ ; मकारस्य – ऋ, झ; मकरस्य – च, प .
[२] संयोज्यं ] ऋ, च, प; संयोज्य – अ, झ .
[३] मकारं ] ऋ; मकरं - च, झ, प; आकारं – अ, झ.
[४] मकरस्यैव ] च; मकरास्ये तु – अ, मकारास्ये तु – ऋ; मकारस्यैव – झ ; मकरास्येव – प .
[५] दीर्घतः ] प ; दीक्षितः - अ, ऋ, च, झ .
[६] रुद्रधा ] प; तु त्रिधा - अ; रुद्रया – ऋ, च; रुद्रथा – झ .
[७] मुक्तादामं द्वियंशकम्] सं०पाठः; ० द्वयांशकम् - अ, झ; मुक्तादामं द्व...- ऋ; मुक्ताममद्विविंशकम् -च; ० द्वियांशकम् प .
[८] वेत्रमर्धांशकं ] प; वेत्रमध्यांशकं – च; वेदार्थांसकं – झ. 'अ, ऋ' मातृकयोः श्लो० ८ उ० न विद्यते।
[९] महावेत्रं त्रियंशकम् ] ऋ, च, झ, प; महावेत्रयंशकम् – अ .
[१०] पञ्चाङ्गुलसमुत्सेधं ] च, झ, प ; ०समुद्भूतं – अ, ऋ .
[११] त्रियङ्गुलम् ] सं० पाठः; त्रयांगुलम् - अ; त्रियांगुलम् – ऋ, च, झ, प .
[१२] पार्श्वेष्वग्निं ] ऋ, च, प; पार्वेष्वग्निं - अ; मार्गेष्वहि – झ .
[१३] क्रमात् ] अ, च, झ, प; क्षणात् – ऋ .
[१४] वेत्रं भागेन कल्पयेत् ] अ, ऋ, झ, प; भागेन कल्पयेत् क्रमात् – च .

पुष्पमष्टदलोपेतं [१]पञ्चभागं सकर्णिकम् ।
रत्नानि विन्यसेन्मध्ये वृत्ताकारं प्रकल्पयेत् ॥ १५ ॥
नक्षत्रसंख्यया पुष्पं तत्संख्यं [२]पद्मकुड्मलम् ।
पद्मस्य मुकुलाकारं तस्योर्ध्वे तु प्रकल्पयेत् ॥ १६ ॥
भानुमण्डलमेवोक्तं [३]चन्द्रमण्डलकं शृणु ।

[चन्द्रमण्डलम्]

भानुमण्डलबाह्ये तु कल्पयेच्चन्द्रमण्डलम् ॥ १७ ॥
[४]तस्य विस्तारतुङ्गं च पूर्वोक्तविधिना कुरु ।
वेत्रद्वयसमायुक्तं [५]मध्ये पुष्पं प्रकल्पयेत् ॥ १८ ॥
दलैः षोडशभिर्युक्तं [६]कल्पयेत् पूर्ववत्सुधीः ।
[७]कुमुदकुड्मलाकारं तस्योर्ध्वे तु प्रकल्पयेत् ॥ १९ ॥
[८]नक्षत्रसंख्यया पुष्पं [९]कुर्यात्कुमुदकुड्मलम् ।
पुष्पस्याभ्यन्तरे चैव रज्जुबन्धं प्रकल्पयेत् ॥ २० ॥
चन्द्रमण्डलमेवोक्तं कल्पयेदतिसुन्दरम् ।

[वह्निमण्डलस्य विशेषः]

[१०]अत्र किञ्चिद्विशेषोऽस्ति वह्निमण्डलकस्य च ॥ २१ ॥
महावेत्रस्य मध्ये तु [११]कल्पयेद्रक्तपुष्पकम् ।

---

[१] पञ्चभागं सकर्णिकम् ] अ, ऋ, झ, प; ०भागसमन्वितम् – च .
[२] पद्मकुड्मलम् ] अ, प; पद्मकुण्डलम् – ऋ ; पद्मकुश्मलम् – च ; पत्रकुड्मलम् – झ .
[३] 'अ, ऋ' मतृकयोः श्लो० '१७ पू० (दितीयः पादः) -१८ उ० (प्रथमः पादः)' भागो न विद्यते।
[४] तस्य विस्तारतुङ्गं ] प; तस्य विस्तारतुंगो – च; झ .
[५] मध्ये पुष्पं ] झ ; मध्येष्वब्जं – अ, ऋ, च, प .
[६] कल्पयेत् ] अ, ऋ, च, झ; त्र्यश्रं कल्पौएत् – प .
[७] कुमुदकुड्मलाकारं ] ऋ, झ, प ; कुमुदकुकुड्मलंकारं – अ; कुमुदकुमुकुलाकारं – च .
[८] नक्षत्रसंख्यया पुष्पं ] अ, ऋ, च, झ; ऋक्षसंख्या प्रकर्तव्यं – प .
[९] कुर्यात्कुमुदकुड्मलम् ] अ, ऋ, झ ; कुर्यात् चैव च कुश्मलम् – च ; पुष्पं कुमुदकुड्मलम् – प .
[१०] 'प' मातृकायां श्लो० २१ उ०-२२उ० भागः पुष्पिका च न विद्यन्ते।
[११] कल्पयेद्रत्न० ] च; कल्पयेद्रक्त० - अ, ऋ, झ.

प्रभामण्डलमेवोक्तं [१]पुष्परागविधिं शृणु ॥२२॥

॥ [२]इति सूक्ष्मशास्त्रे प्रभामण्डलविधिस्त्र्यशीतितमः पटलः ॥

[१] पुष्पराग०] अ; पुष्परंग० – ऋ ; शीतकुम्भ० – च; पुष्पमण्डलकं – झ.

[२] इति सूक्ष्मशास्त्रे प्रभामण्डलविधिस्त्र्यशीतितमःपटलः ] सं० पाठः; अ: इति सूक्ष्मशास्त्रे प्रभामण्डलविधिश्चतुरशीतितमः पटलः ॥; ऋ : इति सूक्ष्मशास्त्रे प्रभामण्डलविधिश्चतु ... पटलः ॥; च: इति सप्तमतन्त्रे प्रभामण्डलविधिपटलः ॥; झः इति सूक्ष्मशास्त्रे प्रभामण्डलविधिनाम त्रिसपमपटलः ॥

## [चतुरशीतितमः पटलः[१]]

## [बाणलिङ्गविधिः]

अथातः संप्रवक्ष्यामि बाणलिङ्गस्य लक्षणम्।

### [बाणलिङ्गस्य भेदा उपभेदाश्च]

द्विविधं लक्षणं चैव स्थावरं जङ्गमं तथा॥ १॥
[२]नागरादिविमानेषु [३]स्थावरं च प्रकल्पयेत्।
ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च॥ २॥
जङ्गमं पूजयेन्नित्यम् आत्मार्थं तु विशेषतः।
नागरे [४]नागरं चैव द्राविडे द्राविडं तथा॥ ३॥
वेसरे वेसरं चैव [५]मिश्रे चैव तु मिश्रकम्।
तेषां मिश्रं पृथक् [६]कल्प्य यथोक्तं देशिकोत्तमः॥ ४॥
विप्रस्य श्वेतवर्णं स्यात् क्षत्रियस्य तु रक्तकम्।
वैश्यस्य पीतवर्णं स्यात् शूद्रस्यैव तु [७]नीलकम्॥ ५॥

### [स्थावरबाणलिङ्गस्य सामान्यलक्षणम्]

शिरोवर्तनहीनं तु ब्रह्मसूत्रविहीनकम्।
[८]निम्नोन्नतसमायुक्तं मूलं [९]शिरोविहीनकम्॥ ६॥
[१०]व्यग्रवक्रसमायुक्तं [११]त्र्यश्रवृत्तमथापि वा।

---

[१] अयं पटलः अ (टि.१९१, पृ० ४३३-४३६), ऋ (टि.३६, पृ०३३८-३४१), झ (टि.१०१६, पृ० १११-११४) इत्येतेषु कोशेषु दृश्यते।

[२] नागरादि० ] झ; नागरेति – अ, ऋ .

[३] स्थावरं ] अ, ऋ; स्थापनं – झ .

[४] नागरं ] झ; नगरे – अ, ऋ .

[५] मिश्रे ] सं० पाठः; मिश्रं – अ, ऋ, झ .

[६] कल्प्य ] अ, झ; कल्प – ऋ .

[७] नीलकम् ] अ; कृष्णकम् – झ; 'ऋ' मातृकायां अक्षरलोपः।

[८] निम्नोन्नत० ] ऋ, झ; निमेनान्त – अ .

[९] शिरोविहीनकम् ] झ; शीर्षकम् – अ ; शी ... तम् – ऋ .

[१०] व्यग्रवक्रसमायुक्तं ] अ; व्यश्रवक्रसमायुक्तं –ऋ; सूत्रवृतसमायुक्तं – झ .

[११] त्र्यश्रवृत्तममथापि वा ] झ; त्र्यश्रं वर्तम० – अ, ऋ .

पूजांशद्द्विगुणं पीठं [१]कण्ठादूर्ध्वे [२]बिलं भवेत्॥ ७॥
लिङ्गविष्कम्भमानेन पीठं कुर्याद्विचक्षणः।
वृत्तं वा चतुरश्रं वा ह्यष्टाश्रं वा षडश्रकम्॥ ८॥
[३]स्थावरे तु प्रकर्तव्यं जङ्गमं तु विशेषतः।

[जङ्गमबाणलिङ्गस्य सामान्यलक्षणम्]

ब्राह्मणस्यैव वस्वश्रं क्षत्रियस्य षडश्रकम्॥ ९॥
चतुरश्रं तु वैश्यस्य शूद्रस्य तु सुवृत्तकम्।
[४]सर्वजातिषु कर्तव्यं वृत्तं पीठं प्रकल्पयेत्॥ १०॥
लिङ्गस्य यादृशं रूपं [५]तादृशं पिण्डिके बिलम्।
सूत्रहीनस्य [६]लिङ्गस्य [७]मुखभेदं न कारयेत्॥ ११॥
यस्य लिङ्गस्य नाहं तु तत्समं पीठविस्तरम्।
गोमुखाकारमार्गेण [८]मुखभावं [९]विचिन्तयेत् ॥ १२॥
[१०]यस्मिन्देशे तु निम्नं तु तस्मिन् [११]भागे मुखं भवेत्।
यस्मिन् भागे तु दीपं स्यात् तस्मिन् [१२]भागे मुखं भवेत्॥ १३॥
शिवशास्त्रोक्तमार्गेण पीठबन्धं प्रकल्पयेत्।
[१३]स्वायम्भुवादिलिङ्गानां पीठबन्धं प्रकल्पयेत्॥ १४॥

[बाणलिङ्गस्य लक्षणान्तरम्]

अथवान्यप्रकारेण बाणलिङ्गं तु वक्ष्यते।

---

[१] कण्ठादूर्ध्वे] सं० पाठः; कर्णादूर्ध्व० – अ, ऋ; कर्णमूर्ध्न० – झ .
[२] बिलं भवेत्] झ; वलिर्भवेत् – अ, ऋ .
[३] 'अ' मातृकायां श्लो० '९पू०-उ०' भागो न दृश्यते।
[४] सर्वजातिषु कर्तव्यं ] झ; सर्वजातिप्रकर्तव्यं - ऋ; सर्वजातिः प्रकर्तव्या – अ .
[५] तादृशं पिण्डिके बिलम् ] झ; पीठस्यैव तथा भवेत् – अ, ऋ .
[६] लिङ्गस्य] झ; लिङ्गं तु – अ, ऋ .
[७] मुखभेदं न] ऋ; मुखभेदस्तु – अ; मुखवेरं न – झ .
[८] मुखभावं ] अ ; मुखभागं - ऋ, झ .
[९] विचिन्तयेत् ] सं० पाठः; विचारयेत् – अ, ऋ, झ .
[१०] 'झ' मातृकायां श्लो० १४पू० न दृश्यते।
[११] भागे ] सं० पाठः ; भावे – अ, ऋ .
[१२] भागे ] ऋ ; भावे – अ .
[१३] 'अ' मातृकायां श्लो० १४ उ० न दृश्यते।

पर्वते वा वने वाऽपि नद्यां वापि जलेऽपि वा॥ १५॥
इष्टलिङ्गं गृहीत्वा तु पश्चात् पीठं [१]प्रकल्पयेत्।
लिङ्गस्य नाहसदृशं पीठविस्तारमुच्यते॥ १६॥
लिङ्गोत्सेधसमं पीठं [२]कर्णमानेन वा पुनः।
लिङ्गानुरूपशैलेन [३]स्त्रीशैलेन तु कारयेत्॥ १७॥
[४]श्वेतभावादयो वर्णास्ते [५]ब्राह्मणादिकीर्तिताः।
इष्टलिङ्गस्य पूजायाम् इष्टकाम्यमवाप्नुयात्॥ १८॥
इष्टलिङ्गसमं [६]बाणं भेदस्तत्र न विद्यते।
ततो लिङ्गस्य पूजायां [७]दोषं चैव न कारयेत्॥ १९॥
[८]तस्माल्लोहेषु संपूज्य बाणलिङ्गे विशेषतः।
[९]पश्चाद् यथेष्टलिङ्गं तु पूजयेच्च विशेषतः॥ २०॥

[पर्वतलिङ्गस्य पीठलक्षणम्]

पर्वते पर्वतलिङ्गं लक्षणेन समन्वितम्।
संग्राह्य [१०]विधिवद् धीमान् एकवर्णेन बुद्धिमान्॥ २१॥
तस्य रूपप्रमाणेन पीठं कुर्यात् [११]त्रिखण्डकम् ।
[१२]अथवा चैकवर्णं वा अर्धचित्रं प्रयोजयेत्॥ २२॥
पञ्चाङ्गसहितं वापि पद्माकृतिमथापि वा।
एवमेव विधानेन कारयेच्छिल्पिना सह॥ २३॥

---

[१] प्रकल्पयेत्] अ, ऋ; तु बन्धयेत् – झ .

[२] कर्णमानेन ] झ; कण्ठमानेन - अ, ऋ .

[३] स्त्रीशैलेन तु ] सं० पाठः ; स्त्रीशैले तु – अ, ऋ, झ .

[४] श्वेतभावादयो वर्णाः] सं० पाठः; श्वेतभावशये – अ; श्वेतभावाच्च ये वर्णा - ऋ; श्वेतभावश्च यो वर्णः – झ .

[५] ब्राह्मणादिकीर्तिताः] सं० पाठः; ब्राह्मणा हि कीर्तिताः – अ; ब्राह्मणाति कातिका - ऋ; ब्राह्मणादिका... – झ .

[६] बणं भेदः तत्र ] सं० पाठः; बाणं भेदमन्त्रं – अ, ऋ; बाणभेदं तत्र – झ .

[७] दोषं चैव न] झ; तेषां चैव तु – अ; ... चैव तु – ऋ .

[८] तस्माल्लोहेषु ] सं० पाठः; तस्माल्लोकेषु – अ, ऋ, झ .

[९] पश्चाद् यथेष्ठलिङ्गं] झ; पार्श्वाद् यत् कोष्ठलिङ्गं – अ; पार्श्वाद्य कोष्ठ... – ऋ .

[१०] विधिवद्] झ; पीठवद् – अ; . . . . – ऋ .

[११] त्रिखण्डकम् ] सं० पाठः; त्रिकर्णिकम्] अ, ऋ; . . . . खण्डकम् - झ .

[१२] अथवा चैकवर्णं वा ] सं० पाठः; अथवैकवर्णं वा - ऋ; अथवैककर्णम् वा – अ; 'झ' मातृकायामक्षरलोपः।

[परार्थात्मार्थलिङ्गयोर्विशेष :]

[१]परार्थे लक्षणैर्युक्तम् आत्मार्थे तु न लक्षयेत्।
[२]भक्तिरेव विशिष्टं स्यात् भुक्तिमुक्तिफलप्रदम्॥ २४॥
तस्मात् सर्वप्रयत्नेन गुरोराज्ञां समाचरेत्।
आत्मार्थे वा परार्थे वा शिवपूजां [३]समाचरेत् ॥ २५॥
अनुलोमैः प्रतिलोमैरात्मार्थं पूजयेत् सदा।
परार्थं ग्रामादिके [४]स्यादात्मार्थं [५]स्वगृहे भवेत् ॥ २६ ॥

[पुनः पर्वतलिङ्गस्य पीठविधिः]

गिरिसम्बन्धिलिङ्गस्य नाहं षोडशभागिकम्।
[६]पञ्चांशं पीठिकोत्सेधं कनिष्ठं सम्यगुच्यते॥ २७॥
सप्तांशं मध्यमं प्रोक्तम् [७]उत्तमम् [८]चाष्टभाजिते।
प्रत्येकं [९]पीठिकोत्सेधं नवधा पीठमुच्छ्रयम्॥ २८॥
[१०]उच्छ्रतेः द्विगुणं तारं त्रिगुणं वा [११]चतुर्गुणम्।
शिलामये शिलापीठमथवा [१२]दारवेण वा॥ २९॥
इष्टकाभिस्तु वा कुर्यात् पीठबन्धार्थमेव च।
पीठप्रमाणमानेन प्रासादं कारयेद्बुधः॥ ३०॥
पश्चात् प्रतिष्ठितं कुर्यादुक्तमार्गेण कारयेत्।
लिङ्गहीनेऽवरं पीठं [१३]स्थापनं तु समाचरेत्॥ ३१॥

---

[१] परार्थे] ऋ, झ; परार्थ० – अ .
[२] भक्तिरेव विशिष्टं] अ, ऋ; भक्तिरेवं विशेषं – झ .
[३] समाचरेत् ] सं० पाठः; समारभेत् – अ, ऋ, झ .
[४] स्यादात्मार्थं ] सं० पाठः ; स्थाप्याऽऽत्मार्थं – अ, ऋ, झ .
[५] स्वगृहे भवेत् ] झ; संग्रहोद्भवे - अ ; संग्रहो भवेत् - ऋ.
[६] पञ्चांशं] ऋ, झ; पञ्चहं – अ .
[७] उत्तमम् ] सं० पाठः; अधमम् – अ, ऋ, झ .
[८] चाष्टभाजिते-] सं० पाठः; अष्टांश० – झ; अष्टाङ्ग० - अ, ऋ .
[९] पीठिकोत्सेधं ] ऋ, झ; पीङ्गोत्सेधं – अ .
[१०] उच्छ्रतेः ] सं० पाठः; उच्छ्रितिः - ऋ; उच्चति – अ; उच्छ्रता – झ .
[११] चतुर्गुणम् ] अ, ऋ; चतुर्थकम् – झ .
[१२] दारवेण वा ] ऋ, झ; दारवेणवम् – अ; 'अ' मातृकायां श्लो० २९ पू०-३० उ० भागो श्लो० २८ पू० अन्ते पुनर्दृश्यते।
[१३] 'झ' मातृकायां 'स्थापनं तु समाचरेत्। लिङ्गोत्कृष्टे वरं पीठं' भागो न दृस्यते।

[१]लिङ्गोत्कृष्टे वरं पीठं स्थापनं सम्यगाचरेत्।
तस्मिन् स्थाने कृते लिङ्गं तस्मिन् स्थाने प्रतिष्ठयेत्॥ ३२॥
एकहस्तात्परं नास्ति द्वादशाङ्गुलहीनतः।
[२]एतयोरधिकं हीनं [३]कर्तव्यं न कदाचन॥ ३३॥
यजमानानुकूलेन [४] कारयेच्छास्त्रमार्गतः।
एकमार्गं समाश्रित्य [५]पूर्वस्मिन् पूर्वमार्गतः॥ ३४॥
कारयेत् तत्प्रयत्नेन शुभकाले तु कारयेत्।

॥ [६]इति सूक्ष्मशास्त्रे प्रतिष्ठातन्त्रे बाणलिङ्गलक्षणं नाम चतुरशीतितमः पटलः॥

---

[१] लिङ्गोत्कृष्टे वरं ] सं० पाठः; लिङ्गोत्कृष्टवरं - ऋ; लिङ्गात्कष्टवरं – अ; लिङ्गहिनं वरं - झ .
[२] एतयोरधिकं ] सं० पाठः ; एकयोरधिकं– अ, ऋ, झ .
[३] कर्तव्यं न कदाचन ] झ; प्रकर्तव्यं कदाचरेत् ] अ, ऋ .
[४] कारयेच्छास्त्रमार्गतः ] झ; रोचये चास्त्रमार्गतः – अ; रोचयेच्छास्त्रमार्गतः- ऋ .
[५] पूर्वस्मिन् पूर्वमार्गतः] अ, ऋ; अन्यस्मिन् सर्वमार्गतः – झ .
[६] इति सूक्ष्मशास्त्रे प्रतिष्ठातन्त्रे बाणलिङ्गलक्षणं नाम चतुरशीतितमः पटलः ] सं० पाठः; झः इति सूक्ष्मशास्त्रे प्रतिष्ठातन्त्रे बाणलिङ्गलक्षणं नाम अष्टसप्तति पटलः॥ अ, ऋः मातृकयोः पुष्पिका न दृश्यते ।



## [पञ्चाशीतितमः पटलः[1] ]

## [बलिपीठप्रतिष्ठाविधिः ]

[2]बलिपीठविधिं वक्ष्ये शृणु त्वं तत्प्रभञ्जन।

### [बलिपीठस्य द्वैविध्यम्]

भद्रं क्षुद्रं द्विधा प्रोक्तं क्षुद्रमेवाल्पपीठकम्॥ १॥
भद्रं प्रोक्तं महापीठं [3]लिङ्गं त्रिधैकरूपकम्।
एतयोः क्षुद्रपीठानां लक्षणं वक्ष्यतेऽधुना॥ २॥

### [क्षुद्रबलिपीठमानम् ]

शिवलिङ्गस्य [4]पीठं यत् तुङ्गतारं नवांशकम्।
सप्तांशमुत्तमं प्रोक्तं पञ्चांशं मध्यमं स्मृतम्॥ ३॥
[5]त्रियंशं कन्यसं ख्यातं क्षुद्रपीठस्य विस्तरम्।
[6]तद्विस्तारचतुर्भागे [7]क्षुद्रपीठस्य तुङ्गकम्॥ ४॥
मानाङ्गुलवशाद् [8]वाथ रव्यष्टरसमात्रकम्[9]।

### [क्षुद्रबलिपीठस्यालङ्कारः]

[10]अत्रोत्सेधांशमाने तु [11]पञ्चभागे कृते सति॥ ५॥
उपानमेकभागेन पद्मतुङ्गं गुणांशतः।
एकेन कर्णिकां कुर्यादथवाऽन्यविधानतः॥ ६॥
अंशेन फुल्लपद्माभं कारयेन्मानकोविदः।

---

[1] अयं पटलः अ ( टि.१९१, पृ० ४३९ – ४४२ ), ई (टि.३६, पृ०१४९-१५४), ऋ (टि.९७, पृ०३४३-३४८), ज (टि.१००३, पृ० ३१२-३१८) इत्येतेषु कोशेषु दृश्यते।

[2] 'ई' मातृकायां श्लो० १-१३ तृतीयपादान्तो भागः न विद्यते। 'ऋ' मातृकायामक्षरलोपः।

[3] लिङ्गं त्रिधैक० ] अ; . . . . गं त्रियेक० – ऋ; लिङ्गं त्रैयेकब् – ज .

[4] पीठं यत् ] अ; पीठायास् – ऋ; पीठायस् – ज .

[5] त्रियंशं ] सं० पाठः ; त्रिभागं – अ, ऋ, ज .

[6] तद्विस्तारचतुर्भागे ] ऋ, ज; तद्विस्तारचतुर्भागा – अ .

[7] क्षुद्रपीठस्यं तुङ्गकम्] सं० पाठः; क्षुद्रपीठस्य तुङ्ग - अ, ऋ; एकैकं पीठतुङ्ग – ज .

[8] वाथ ] ऋ, ज; वा – अ .

[9] रव्यष्टरसमात्रकम् ] ऋ; ०मातृकम् – अ; ०मन्त्रकम् – ज .

[10] अत्रोत्सेधांशमाने तु ] आ, ऋ; ०मानेन – ज .

[11] 'ऋ' मातृकायां श्लो० ५ चतुर्थपादो न दृश्यते.

[मातृबलिपीठस्य विशेषः]

[१]मातृपीठप्रकारं तु अयुक्तं वा सयुक्तकम्॥ ७॥
[२]अयुक्तं पूर्ववत्प्रोक्तं सयुक्तं [३]चैकपीठजम्।
चतुष्षडङ्गुलं वापि सप्त पीठविशालकम्॥ ८॥
उत्तुङ्गलक्षणाद्यादि पूर्ववत्परिकीर्तितम्।
[४]तत्तदन्तरमानं तु [५]एकाङ्गुलवशात्स्मृतम्॥ ९॥

[भद्रपीठविधिः]

भद्रपीठविधिः प्रोक्तः [६]परिवारविधौ पुरा।

[बलिपीठप्रतिष्ठासामान्यविधिः]

एतत्सर्वं समापाद्य प्रतिष्ठाविधिमाचरेत्॥ १०॥
[७]द्वारे पीठप्रतिष्ठा च प्रथमे वा द्वितीयके।
भद्रपीठप्रतिष्ठा च [८]समतन्त्रेण कारयेत्॥ ११॥
पृथक् तन्त्रेण वा कुर्याच्चतुरङ्गविधानतः।
[९]एकाचार्येण कर्तव्यम् एकस्मिन्नेककालके॥ १२॥
अङ्कुरं वास्तुयागादि [१०]समतन्त्रकमाचरेत्।

[प्रतिष्ठामण्डपे पञ्चवेदिकल्पनम्]

प्रासादपूर्वदिग्भागे मण्डपं विधिनाचरेत्॥ १३॥
तन्मध्ये वेदिकां कुर्याद्धस्तमात्रप्रमाणतः।
रुद्रवेदीति [११]संप्रोक्ता [१२]तत्तारत्र्यैकतुङ्गकम्॥ १४॥

---

[१] मातृ० ] अ; मात्र० – ऋ, ज .
[२] अयुक्तं ] ऋ, ज; 'अ' मातृकायां द्द ष्टम् ।
[३] चैकपीठजम् ] अ, ऋ; पीठपङ्कजम् –ज .
[४] तत्तदन्तरमानं ] ऋ, ज; नक्तदन्तरमानां – अ .
[५] एकाङ्गुलवशा० ] ज; एकाङ्गुलविशा० – अ . 'ऋ' मातृकायां श्लो० '९' चतुर्थपादो न दृश्यते।
[६] परिवारविधौ ] अ, ऋ; ०विधीं – ज .
[७] द्वारे ] ऋ, ज; द्वार० – अ .
[८] समतन्त्रेण ] अ, ऋ; समतन्त्रे च – ज .
[९] एकाचार्येण ] ज; एकं चाग्रेण – अ; एकाचाग्रेण – ऋ .
[१०] समतन्त्रकमाचरेत् ] ज; समतन्त्रैक० - अ, ऋ.
[११] संप्रोक्ता ] ऋ; संप्रोक्तं – अ; सा प्रोक्ता – ई, ज .
[१२] तत्तारत्र्यैक०] ज, ई; तर्त्तरत्र्यक – अ; तत्तारत्र्यक० – ऋ .

तत्पूर्वादिचतुर्दिक्षु [१]विधिवेदीं प्रकल्पयेत्।
[२]अनेनैव समं कुर्यात् [३]तद्विधानप्रकारतः ॥ १५॥
एवमेव प्रकारेण मण्डपं सम्यगाचरेत्।

[अङ्कुरार्पणम्]

नवाहे वाथ पञ्चाहे त्र्यहे वाऽङ्कुरमाचरेत् ॥ १६॥

[जीर्णबलिपीठविशेषविधिः]

जीर्णपीठपरित्यागं कृत्वाथ [४]स्थापयेन्नवम्।
तज्जीर्णं तु त्रिधा प्रोक्तं स्फुटितं छिन्नभिन्नकम्॥ १७॥
भद्रपीठं विशेषेण महाङ्गोपाङ्गसंयुतम्।
उपानं जगती चाथ कुमुदं [५]कण्ठपट्टिका॥ १८॥
पद्मं च कर्णिका चाथ महाङ्गमिति कीर्तितम्।
[६]दलोपदलनास्याद्यम् उपाङ्गमिति कीर्तितम्॥ १९॥
[७]वर्जयेत्तं महाङ्गेषु [८]स्फुटितं च प्रभञ्जन।
क्षुद्रपीठादिसर्वेषु [९]विभिन्नं तच्च वर्जयेत्॥ २०॥

[जीर्णबलिपीठोद्धारक्रमः]

[१०]तस्योद्धारक्रमं वक्ष्ये पीठदक्षिणमण्डले।
[११]संकल्प्यासनमावाह्य [१२]पूजामत्र समाचरेत्॥ २१॥
तत्पूर्वे स्थण्डिलं कृत्वा [१३]शालिभिर्विमलैः शुभैः।

---

[१] विधिवेदीं ] ई; विधिं वेदिं – अ, ज; वीथिवेदिं – ऋ.
[२] अनेनैव समं ] सं० पाठः ; अनेनैवोत्सवं – अ ; अनेरेवासकं – ई ; अनेरेवासनं – ऋ ; अनेन व समं – ज.
[३] तद्विधानप्रकारतः ] सं पाठः ; ०प्रकारकाः - अ, ऋ, ज; ०प्रकारकम् – ई.
[४] स्थापयेन्नवम् ] ज ; स्नापयेदथ – अ ; स्नापयेन्नवम् – ई.
[५] कण्ठ० ] ज ; कर्ण० – अ,ई, ऋ.
[६] दलोपदलनास्याद्यम् ] अ, ऋ, ज ; ०नास्यादि – ई.
[७] वर्जयेत्तं ] अ, ई, ऋ ; वर्जयेत्तु – ज.
[८] स्फुटितं च ] अ, ऋ ; स्फुटितं नैर्ऋत्यं च - ई ; न त्याज्यं चेत् – ज.
[९] विभिन्नं तच्च ] अ ; विभिन्ने तांश्च – ई, ज ; विभिन्नतां च – ऋ.
[१०] तस्योद्धोरक्रमं ] अ, ऋ, ज ; तस्योद्धोदारकं – ई.
[११] संकल्प्या० ] ई, ज ; संकल्पा० – अ.
[१२] पूजामत्र ] सं० पाठः; पूजामन्त्रं – अ, ई, ऋ, ज.
[१३] शालिभिर्विमलैः ] अ, ई, ऋ ; शालिभिर्मण्डलैः – ज.

तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम्॥ २२॥
[1]द्रोणाम्बुपूरितघटान् [2]तन्मध्ये विन्यसेद्बुधः।
आवाह्य [3]पीठाद्देवांश्च कुम्भमध्ये तु विन्यसेत्॥ २३॥
नैवेद्यादीन् समाप्याथ चाग्निकार्योक्तमार्गतः।
आधानादिविवाहान्तं कृत्वा मधुघृतैरपि॥ २४॥
दूर्वाभिः [4]तण्डुलैस्तत्र देवतामन्त्रमुच्चरन्।
शतमर्धं तदर्धं वा होमयेत्तु पृथक् पृथक्॥ २५॥
क्षुरिकाबीजमुख्येन पूर्णाहुतिमथाचरेत्।
जयादिरभ्याधानं च [5]राष्ट्रभृच्च क्रमाद्धुनेत्॥ २६॥
अग्निस्थं मण्डलस्थं च कुम्भमध्ये समावहेत्।

[जीर्णबलिपीठानां परित्यागः]

भूतले निखनेत्तांश्च समुद्रेष्वथवा नयेत् ॥ २७॥
[6]जीर्णपीठादिसंभूतमस्ति चेदिदमाचरेत्।

[बलिपीठशुद्ध्यादि]

पीठशुद्धिं ततः कृत्वा पञ्चमृद्द्रव्यबिल्बकैः॥ २८॥
भद्रपीठे विशेषोऽस्ति [7]तदग्रस्थितदर्पणे।
धाराभिषेचनं कुर्याच्छुद्धैरुत्थेति मन्त्रतः॥ २९॥
वास्तुहोमबलिं चाथ [8]मण्डपार्चां पुराचरेत्।
रक्षाबन्धं ततः कुर्याद्भद्रपीठोर्ध्वकर्णिके[9]॥ ३०॥
अन्येषामेव पीठानां कृतं वा तद्विनाचरेत्।

---

[1] द्रोणाम्बुपूरितघटान् ] ई, ऋ, ज; ०घटं – अ .
[2] तन्मध्ये ] ई, ऋ, ज; मध्ये – अ .
[3] पीठाद्देवांश्च ] अ, ऋ, ज; पीठं देवांश्च – ई .
[4] तण्डुलैस्तत्र ] अ, ऋ, ज; ०लैस्तत्तद् – ई .
[5] 'ई, ज' मातृकयोः श्लो० '२६ उ०'' क्रमाद्राष्ट्रभृतं हुनेत्' इति दृश्यते ।
[6] जीर्णपीठादि सम्भूतमस्ति चेदिदमा० ] ई, ऋ; ०सम्भूतेऽस्ति चेद्दमा० - अ; ०सम्भूतमस्मि चेति तमा० – ज .
[7] तदग्रस्थितदर्पणे ] सं० पाठः; तदग्रस्थितदर्पनैः - अ, ई, ऋ; तदग्रे स्थितदर्पनैः – ज .
[8] मण्डपार्चां पुरा० ] ज; मण्डपाच्चाम्बुना० ] अ, ऋ; मण्डपार्चाम्बुरा० – ई .
[9] कुर्याद्भद्रपीठोर्ध्वकणिके ] ई, ज; ०कणिकैः – अ, ऋ .

[मण्डपे पञ्चवेदिषु कुम्भविन्यासः]

[१]वेदिषु स्थण्डिलं कुर्यादष्टद्रोणेन शालिना॥ ३१॥
[२]तदर्धैः तण्डुलैर्युक्तं तदर्धतिलसंयुतम्।
लाजैः पुष्पैः [३]तिलैर्दर्भैर्विकिरैः समलंकृतम्॥ ३२॥
तत्पूर्वे वेदिकुम्भेषु दक्षिणोत्तरमध्यतः[४]।
[५]नन्दिनं च महाकालं वृषभं पूजयेत् क्रमात्॥ ३३॥
ततो दक्षिणसंभूतवेदिकुम्भेषु सर्वतः।
[६]दुर्गां मातृश्च विघ्नेशं [७]वीरस्कन्दौ च [८]माधवम्॥ ३४॥
चण्डेशमग्न्यादीशान्तमग्रे [९]भूतेशमर्च्य च।
प्रतीचीवेदिकुम्भेषु [१०]अरिष्टं भुजगेश्वरम्॥ ३५॥
[११]धर्मदेवमवामे [१२]च वामे मध्येष्वनुक्रमात्।
उदीचीवेदिकुम्भेषु इन्द्रं वैश्वानरं यमम्॥ ३६॥
[१३]निर्ऋतिं [१४]पाशिवाय्विन्दु[१५]वटुकाख्यं महेश्वरम्।
[१६]विष्णुं पितामहं चापि पूर्वादारभ्य पूजयेत्॥ ३७॥
[१७]तन्मध्ये वेदिकुम्भेषु आमोदं तु प्रमोदकम्।

---

[१] वेदिषु स्थण्डिलं ] अ,; वेद्यासु स्थण्डिलं. – ई; वेद्यासु स्थ . . . . – ऋ; वेद्यास्घ स्तण्डिलं – ज .
[२] तदर्धैः ] अ, ऋ, ज; तन्मध्ये. – ई .
[३] तिलैर्दर्भैर्विकिरैः ] ऋ; तिलैदर्भैर्विकरैः – अ; तिलैर्दर्भैर्विकीर्णैः – ई, ज .
[४] दक्षिणोत्तरमध्यतः ] ऋ, ज; ०मध्यमम् – अ .
[५] 'अ, ऋ' मातृकयोः 'श्लो० ३३उ०-३४' भागो न दृश्यते।
[६] दुर्गां मातृश्च ] ई ; दुर्गामन्त्रश्च – ज .
[७] वीरस्कन्दौ ] सं० पाठः; वरस्कन्दौ - ई ; वरस्कन्दं– ज .
[८] माधवं ] ई ; वधावम् – ज .
[९] भूतेशमर्च्य ] अ, ई, ऋ; . भूतेशमध्य – ज .
[१०] अरिष्टं ] अ; .रिष्टं – ई, ऋ; धरिषं – ज .
[११] धर्मदेवमवामे] ई; धर्मदेवं च मामे - अ; धर्मदेवव मामे – ऋ; धर्मदेववमामेव – ज .
[१२] च वामे ] अ, ई, ऋ; च त्वाम् – ज .
[१३] निर्ऋतिं ] ऋ, ज; निऋऋतिं – अ .
[१४] पाशवाय्विन्दु० ] ऋ, ज; वा शिवाय विन्दु – अ .
[१५] वटुकाख्यं] ई, ऋ, ज; ०पट्टुका० – अ .
[१६] विष्णुं पितामहं चापि ] ई, ऋ, ज; विष्णु पितामहश्चापि – अ .
[१७] 'अ' मातृकायां श्लो० ३७ पर्यन्तमेव दृश्यते ।

सुमुखं दुर्मुखं चाथ अविघ्नं विघ्नराजकम्[१] ॥ ३८ ॥
[२]पूर्वदक्षिण[३]पाशीन्दुरुद्रदिक्कर्णिकोर्ध्वतः ।
[४]आसनमूर्तिमूलाद्यैः [५]संयुतं सम्यगर्चयेत् ॥ ३९ ॥

[बलिपीठानामधिवासः]

[६]तद्वेद्युत्तरे देशे [७]क्षुद्रपीठाधिवासनम् ।
भद्रपीठे विशेषोऽस्ति तत्स्थाने चाधिवासयेत् ॥ ४० ॥
वेदपारायणं कुर्यात् कुम्भस्थापनपूर्वकम् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ ४१ ॥
समिदाज्यचरून् लाजसर्षपांश्च [८]यवं तिलम् ।
[९]तत्तन्मूलषडङ्गैश्च पवमानैस्त्रियम्बकैः ॥ ४२ ॥
[१०]स्पृष्ट्वा स्पृष्ट्वा तु जुहुयात् तत्तन्मूलमनुस्मरन् ।
एवं जागरणं रात्रौ

[अनन्तरदिवसकृत्यम्]

प्रभाते स्नानमाचरेत् ॥ ४३ ॥
तोरणादिघटान् सर्वान् अर्चयेद्गन्धपुष्पकैः ।

[बलिपीठानां प्रतिष्ठास्थानम्]

क्षुद्रपीठप्रतिष्ठायाः स्थानं वक्ष्यामि [११]तच्छृणु ॥ ४४ ॥
प्रासादमध्यमाश्रित्य चान्तर्मण्डलमध्यतः ।
दुर्गादिचण्डपीठान्तम् [१२]अग्न्यादीशान्तमर्चयेत् ॥ ४५ ॥

---

[१] विघ्नराजकम् ] ऋ; ०नायकम् – ई, ज .
[२] 'ऋ' मातृकायां श्लो० ३९-४०पू० भागो न दृश्यते।
[३] पाशीन्द्र० ] ई; पाशिन्दु० – ज .
[४] आसनं ] ई; आसनैः – ज .
[५] संयुतं ] ई; सम्युक्तां – ज .
[६] तद्वेद्युत्तरे ] ज; तत्तद्वेद्युत्तरे – ई .
[७] क्षुद्रपीठाधिवासनम् ] ई; क्षुद्रपीठादिवासनम् – ऋ, ज .
[८] यवं तिलम् ] ई, ऋ; यवा तिलान् – ज .
[९] तत्तन्मूल० ] ई, ज; तत्तन्मूलं - ऋ .
[१०] स्पृष्ट्वा स्पृष्ट्वा तु जुहुयात् ] ई, ऋ; स्पृष्ट्वा तु जुहुयात्तत्र – ज .
[११] तच्छृणु ] ई, ज; मच्छृणु – ऋ .
[१२] अग्न्यादीशान्तमर्चयेत् ] ई, ज; अत्यरीशान्तमर्पयेत् – ऋ .

अग्रे वृषस्थलं यत्र तत्र [१]तत्पीठदेशकम्।
[२]तत्पृष्ठे भूतनाथस्य पीठं [३]दण्डप्रमाणतः ॥ ४६ ॥
द्वारं प्रति विशेषेण द्वारेशपीठदेशकम्।
अन्तर्मण्डलमात्रं स्याद् [४]धर्मेशस्य वृषाग्रतः ॥ ४७ ॥
[५]इन्द्रपीठमुखायामे [६]भद्रपीठाग्रमानतः।
तत्स्थानसीमासंबन्धमन्तर्मण्डलमानतः ॥ ४८ ॥
अग्न्यादि स्थापयेत् सप्तदिक्षु सोमेशमध्यतः।
नैर्ऋते दण्डमानेन विष्णुपीठं प्रतिष्ठयेत् ॥ ४९ ॥
ऐशान्यां [७]हस्तमानेन ब्रह्मपीठं प्रतिष्ठयेत्।
द्वितीयावरणे [८]पीठांस्त्वेवमेव प्रकल्पयेत् ॥ ५० ॥
भद्रपीठप्रतिष्ठा तु प्रोक्ता प्राकारलक्षणे[९]।

[दक्षिणा]

आचार्यं पूजयेत् पश्चाद्वस्त्रहेमाङ्गुलीयकैः ॥ ५१ ॥
अध्येतॄन् परिचारांश्च यथावित्तानुसारतः।

[बलिपीठानामभिषेकः]

पर्यष्टिनोत्तरीयाद्यैरुष्णीषैर्मण्डितेन च ॥ ५२ ॥
पूर्वे तु स्थापितघटान् सर्वातोद्यसमन्वितः।
शिरसा [१०]वाहयित्वा तु कृत्वा धामप्रदक्षिणम् ॥ ५३ ॥
तत्तन्मूलं समुच्चार्य तत्तत्पीठेऽभिषेचयेत् ।

---

[१] तत्पीठदेशकम्] ई, ऋ; तत्पीठमाचरेत्, – ज .
[२] तत्पृष्ठे ] ई, ऋ; तत्पीठे – ज .
[३] दण्ड० ] ई; दण्डं - ऋ; दत्त्वा – ज .
[४] धर्मेशस्य वृषमग्रतः] ऋ; धमेशस्य वृषातृता – ई ; धमेशस्य वृषामृतः. – ज .
[५] इन्द्रपीठ० ] ई, ऋ ;. इन्द्रपीठं – ज .
[६] भद्रपीठाग्रमानतः] ई, ऋ; भद्रपीठोभ्रमानतः – ज .
[७] हस्तमानेन] ऋ, ज; सप्तमानेन – ई .
[८] पीठांस्त्वेवमेव ] ई, ज; पीठास्त्वेवमेव - ऋ .
[९] प्राकारलक्षणे ] ई, ऋ; ०लक्षणम् – ज .
[१०] वाहयित्वा तु ] सं० पाठः ; कृत्वा – ई, ऋ, ज .

भद्रपीठे विशेषोऽस्ति [1]मन्त्रन्यासं समाचरेत् ॥५४॥

॥ [2]इति सूक्ष्मशास्त्रे प्रतिष्ठातन्त्रे बलिपीठप्रतिष्ठाविधिः पञ्चाशीतितमः पटलः ॥

[1] मन्त्रन्यासं समाचरेत् ] ई, ज ; भद्रपीठविधिं शृणु – ऋ .

[2] इति सूक्ष्मशास्त्रे प्रतिष्ठातन्त्रे बलिपीठप्रतिष्ठाविधिः पञ्चाशीतितमः पटलः ] सं० पाठः ; 'ऋ' इति सूक्ष्मशास्त्रे बलिपीठप्रतिष्ठाविधिः षडशीतितमः पटलः ॥ 'अ, ई, ज' मातृकासु पुष्पिका न दृश्यते ॥

## IN THE SAME SERIES
## *DANS LA MÊME COLLECTION*

*The Archaeology of Bhakti II. Royal Bhakti, Local Bhakti.* Edited by Emmanuel Francis & Charlotte Schmid, IFP/EFEO, 2016, ix, 609p. (CI n°132)

*Tantric Studies. Fruits of a Franco-German Project on Early Tantra.* Edited by Dominic Goodall & Harunaga Isaacson, IFP/EFEO/Asien-Afrika-Institut, Universität Hamburg, xxix, 305 p. (CI n°131/ Early Tantra Series n° 4)

*The Brahmayāmalatantra or Picumata. Volume II. The Religious Observances and Sexual Rituals of the Tantric Practitioner: Chapters 3, 21, and 45.* A Critical Edition and Annotated Translation by Csaba Kiss, IFP/EFEO/Asien-Afrika-Institut, Universität Hamburg, 373 p. (CI n° 130/ Early Tantra Series n° 3)

*Early Tantric Vaiṣṇavism: Three Newly Discovered Works of the Pañcarātra. The Svāyambhuva pañcarātra, Devāmṛtapañcarātra and Aṣṭādaśa vidhāna.* Critically edited from their 11th- and 12th-century Nepalese palm-leaf manuscripts with an Introduction and Notes by Diwakar Acharya, IFP/EFEO/Asien-Afrika-Institut, Universität Hamburg, lxxxvi, 229 p. (CI n° 129/ Early Tantra Series n° 2)

*The Niśvāsatattvasaṃhitā. The Earliest Surviving Śaiva Tantra. Volume 1. A Critical Edition & Annotated Translation of the Mūlasūtra, Uttarasūtra & Nayasūtra.* Edited by Dominic Goodall in collaboration with Alexis Sanderson & Harunaga Isaacson with contributions of Nirajan Kafle, Diwakar Acharya & others, IFP/EFEO/Asien-Afrika-Institut, Universität Hamburg, 662 p. (CI n°128/ Early Tantra Series n° 1)

*Śaiva Rites of Expiation. A First Edition and Translation of Trilocanaśiva's Twelfth-Century Prāyaścittasamuccaya (With a Transcription of Hṛdayaśiva's Prāyaścittasamuccaya).* Critically edited & translated by R. Sathyanarayanan with an introduction by Dominic Goodall, IFP/EFEO, 2015, 651 p. (CI n°127)

*Contribution to the History of the Wheeled Vehicle in India.* Jean Deloche, IFP/EFEO, 2014, xiii, 145 p. (CI n°126)

To order, contact: / *Pour commander, s'adresser à :*

Institut Français de Pondichéry
(attn. Library and Publication Division)
P. B. 33, 11, St. Louis Street,
Pondicherry-605001, INDIA
Ph: +91-413-2231660. Fax: +91-413-2231605
E-mail: library@ifpindia.org
Web: www.ifpindia.org

École française d'Extrême-Orient
P.O. Box 151, 16 & 19, Dumas Street,
Pondicherry – 605001, INDIA
Ph: +91-413-2334539
E-mail: shanti@efeo-pondicherry.org
Web: www.efeo.fr

# सूक्ष्मागमः

## SŪKṢMĀGAMA

Volume III

*Chapters 54 to 85*

This third volume of the *Sūkṣmāgama* critical edition contains descriptions of a variety of rites and ceremonies concerning Śiva and the Goddess and for the welfare of the society. Many of them are in the form of installations of a Śivaliṅga, of the image of the Goddess and of the provisional temple. Others include festivals such as the collecting of pearls from the sea, the chariot festival, the offering of a golden crown to the Liṅga, the installation of the temple kitchen, tank, well and of the monastery. The performance of atonement rites in order to make up for omissions in various rites, the installation of the Nāga and that of the altars inside the temple for bali-offering are also treated in detail.

This volume has been prepared and published with the financial assistance from Sri Sambamurthy Sivacharyar Foundation, Chennai and Sadyojat Samskrita Prakashan, Cuddalore.

*Ce troisième volume de l'édition critique du* Sūkṣmāgama *contient la description de divers rites et cérémonies concernant le dieu Śiva, la déesse ainsi que des rites effectués pour le bien de la société. Les principaux concernent l'installation du Liṅga, de l'image de la Déesse et du temple provisoire. En outre, plusieurs rites sont décrits qui concernent l'installation de la cuisine du temple, du réservoir, du puits et du monastère. Le texte traite aussi de l'installation de l'image du Nāga et de l'autel pour les offrandes de bali. Sont aussi décrits en détail les fêtes du ramassage des perles, la fête du char, l'offrande de la couronne d'or au Liṅga, ainsi que les rites de réparation.*

*Ce volume a été préparé et publié avec l'aide financière de la Sri Sambamurthy Sivacharyar Foundation, Chennai et du Sadyojat Samskrita Prakashan, Cuddalore.*




ISBN (IFP): 978-81-8470-218-7




ISBN (EFEO): 978-2-85539-224-0